रुक्मिणीशविजयमहाकाव्यस्य काव्य-शास्त्र-पुराणसान्दर्भिकं समीक्षणम्

V. B. TADAKOD
M. A.

**THESIS SUBMITTED TO THE KARNATAK UNIVERSITY
FOR THE DEGREE OF
DOCTOR OF PHILOSOPHY
IN SANSKRIT**

**DEPARTMENT OF STUDIES IN SANSKRIT
KARNATAK UNIVERSITY, DHARWAD - 580 003**

FEBRUARY 1986

Dr. D. N. Shanbhag,
M.A., Ph.D.
Professor of Sanskrit

Dept. of Studies in Sanskrit
Karnatak University,
Dharwad.
20th Feb. 1986

CERTIFICATE

I certify that this thesis "रुक्मिणीविजय-महाकाव्यस्य काव्य-शास्त्र-पुराणसान्दर्भिकं समीक्षणम्" presented by Shri. V.B. Tadakod represents his original work and has not been submitted for any other Diploma or Degree in any University. The work has been carried out by him at the Department of Studies in Sanskrit, Karnatak University, Dharwad, under my guidance and supervision.

(D. N. SHANBHAG.)
Research Guide

Rarest Archiver

विषयानुक्रमणिका

content

भूमिका		(iii)
सङ्केताक्षरसूची		(vii)
प्रथमोऽध्यायः	कविपरिचयः रुक्मिणीशविजयमहाकाव्यस्य कर्तुः श्रीवादिराजतीर्थस्य देश-काल-कृतयः	1
द्वितीयोऽध्यायः	गद्यरुक्मिणीशविजयः (मुद्रितोऽयं भागः पुस्तकबन्धनसौकर्याय ग्रन्थान्ते निबद्धोऽस्ति)	24
तृतीयोऽध्यायः	रुक्मिणीशविजयस्य सामान्यपरिचयः	25
चतुर्थोऽध्यायः	अलङ्कारसौन्दर्यम्	37
	शब्दालङ्काराः	38
	अर्थालङ्काराः	57
पञ्चमोऽध्यायः	नगरादिवस्तुवर्णनम्	86
षष्ठोऽध्यायः	पात्र-चरित्रचित्रणम्	151
सप्तमोऽध्यायः	रसाभिव्यक्तिः	174
अष्टमोऽध्यायः	कवेः शैली	219

Rarest Archiver

नवमोऽध्यायः	कवेर्वैदुष्यम्	232
	वेदवेदाङ्गानि	
दशमोऽध्यायः	दर्शनानि	280
एकादशोऽध्यायः	मध्वसिद्धान्तप्रतिपादनम्	293
द्वादशोऽध्यायः	धर्मशास्त्रादिविषयाः	314
त्रयोदशोऽध्यायः	पुराणसान्दर्भिकं समीक्षणम्	339
	रुक्मिणीशविजये प्रसक्तानि	
	पौराणिकपात्राणि	345
चतुर्दशोऽध्यायः	उपसंहारः	366
परिशिष्टम्	रुक्मिणीशविजयस्थ पद्यद्वयस्य	368
	स्वयं वादिराजतीर्थकृतं व्याख्यानम्	

Rarest Archiver

भूमिका Acknowledgement

रुक्मिणीशविजयमहाकाव्यं सदा मम किमप्याकर्षणम्।
रु॰वि॰काव्यस्य शब्दालङ्काराणां वैचित्र्येण, अर्थालङ्काराणां वैभिन्येन,
नगरादिवर्णनानां वैलक्षण्येन, पात्रचित्रणानां वैशिष्ट्येन, वेदवेदाङ्गानां
वैदुष्येन, सरससुन्दरशैल्याः वैभवेन, वेदान्तशास्त्रस्य वैशुद्ध्येन
शास्त्रान्तराणां वैदग्ध्येन, सुभाषितानां वैपुल्येन, छन्दोबन्धनानां
वैशाल्येन, रसभावानां वैशद्येन, पुराणवाङ्मयस्य वैशारद्येन
मध्वसिद्धान्तप्रतिपादनस्य वैचक्षण्येन च नितरां चमत्कारितोऽहं
पौनःपुन्येन पठितवान् तन्महाकाव्यम्।

विश्वविद्यालये च एम॰ ए॰ परीक्षार्थं अध्ययने, संस्कृत-
साहित्यस्य इतिहासनिरूपकाणां ग्रन्थानां अवलोकनेन च साश्चर्यं
मच्चित्तं सञ्जातं यतो हि रु॰वि॰काव्यस्य उल्लेखः संस्कृत-
साहित्येतिहासनिर्मातृभिः अकृतप्रायः आसीत्, कृतोऽपि कुत्रचित्
उपलभ्यमानासङ्गततया।

बहवः संस्कृतकवयः श्रीकृष्णेनाकृष्टान्तराः यैः खलु
स्वीयकृतिभिः संस्कृतसाहित्यं समृद्धं कृतम्। रु॰वि॰काव्यस्य
रचयिता श्रीवादिराजतीर्थः न केवलं वादकोविदः, प्रौढशास्त्रीय-
प्रबन्धप्रणेता, वैष्णवसिद्धान्तप्रतिष्ठापनाचार्यः अपितु महाकविः
अपि आसीत्। श्रीकृष्णविषयकेऽस्मिन् महाकाव्ये तत्काव्य-
निर्माणकौशलं सहजसुन्दरं सन्दृश्यते। सन्न्यासिभिर्विरचितेषु

Rarest Archiver

विरलेषु काव्येषु इदमन्यतममिति च काव्यस्यास्य वैशिष्ट्यम्।

भगवद्भक्तिभूषितकाव्यपरम्परायां च रु॰वि॰काव्यस्य प्राधान्यं प्राशस्त्यं च विद्यते। भगवद्भक्त्यादिप्रतिपादकेऽप्यस्मिन् काव्ये काव्यमार्गस्य न कोऽपि बाधः वर्तते। पञ्चदशे षोडशे च शतके भारतीयेषु विविधभाषासाहित्येषु भक्तिमार्गप्रचारः समृद्धतया प्रभूतमभूत्। तदानीन्तनकाव्यवैशिष्ट्यद्योतकमिदं रु॰वि॰काव्यं नूनं सफलमस्ति स्वप्रयोजनसाधने।

संस्कृतसाहित्याध्ययने रघुवंशकुमारसम्भवकिरातार्जुनीय-शिशुपालवधनैषधीयचरितानां 'पञ्चमहाकाव्यानां' व्यासङ्गपरम्परायाः प्राबल्यात् रुक्मिणीशविजयसदृशानां सरसमहाकाव्यानां महान् प्रचयः नाभूदिति प्रतिभाति।

अस्य च रु॰वि॰काव्यस्य व्यवस्थितं अध्ययनं नाधुनापि कृतमुपलभ्यते। प्रबन्धोऽयं रु॰वि॰काव्यस्य समीक्षणे सविनयः प्रयत्नोऽस्ति। काव्यस्यास्य शास्त्रीयविषयोपबृंहितत्वतया अत्र विवेचनं कृतमस्ति। श्रीमद्भागवतस्य आकरग्रन्थत्वात् काव्यस्यास्य पुराणसान्दर्भिकं समीक्षणमपि विहितमस्मिन् प्रबन्धे। माध्वपीठाधिष्ठितेन श्रीवादिराजतीर्थेन विरचितेऽस्मिन् महाकाव्ये मध्वसिद्धान्तप्रमेयसङ्गोपनं नाश्चर्यकरम्। भक्तकविविरचितेऽस्मिन् काव्ये भगवद्भक्तिरभिव्यक्ताऽस्ति। अयमपि विषयः प्रबन्धेऽस्मिन् यथाज्ञप्ति प्रकाशितोऽस्ति।

Rarest Archiver

महदिदं मम भागधेयं यत् कर्णाटकविश्वविद्यालये संस्कृतप्राध्यापकस्थानमलङ्कुर्वाणाः डा. डि. एन्. शानभागमहाभागाः (एम्.ए., पीएच्.डी.) मत्संशोधनमार्गदर्शकतया लब्धाः इति। येषां खलु निरन्तरप्रोत्साहनेन सूक्ष्मेक्षणमार्गदर्शनेन च मयेदं संशोधनं पूरितं, तेभ्यः, छात्रेषु दयया आनन्दप्रापणेन 'दयानन्द' इति सार्थकीकृतस्वनामधेयेभ्यः डा. शानभागमहाभागेभ्यः सश्रद्धं कृतज्ञतासमर्पणकर्तव्यनिर्वहणे सानन्दोऽस्म्यहम्।

कर्णाटकविश्वविद्यालये संस्कृतविभागस्य भूतपूर्वाध्यक्षेभ्यः डा. के. कृष्णमूर्तिमहोदयेभ्यः तथा अधुना संस्कृतविभागप्रमुखेभ्यः डा. बी. आर्. मोडकमहाभागेभ्यश्च मत्संशोधने समुचितसूच-नानुकूल्यादि सङ्कलितवद्भ्यः नितरां कार्तज्ञ्यमावेदये।

यस्माद्वत्सलतामयात् खलु तपःपूतादहं बालकः
साहित्यं ननु रुक्मिणीशविजयाद्यं वै पुराऽधीतवान्।
आचार्यं ह्यवधानिवंशजबुधं तं राघवेन्द्राभिधं
मन्मातामहपूज्यपादममलं स्मृत्वा नमामि ध्रुवम्॥

सान्निध्ये ननु यस्य तुष्टमनसा वेदान्तशास्त्रं पठन्
धन्योऽहं, सदयं मदीयविषये श्लाघ्यं गुरुं, भूषितम्।
विद्यारत्नमुखै रुपाधिभिरलं, बादामिकट्टीकुल-
भ्राजद्भूषणमाधवार्यकृतिनं वन्दे सदा संविदे॥

Rarest Archiver

विश्वविद्यालयधनसहायायोगस्य कृतज्ञता-पूर्वकस्मरणं मम कर्तव्यं, येन मम धनसाहाय्यं प्रदत्तं (वर्षचतुष्टयपर्यन्तं 'U.G.C. Junior Fellowship' इत्येतद्रूपेण) यच्च संशोधनकर्मण्यस्मिन् बहूपयोगि सञ्जातम्।

Dept. of Sanskrit
Karnatak University
Dharwad.
22-2-1986

V.B. Tadakod.
(V. B. TADAKOD)

सङ्केताक्षरसूची Abbreviations

अमरः	अमरकोशः
ऋ., ऋ.सं	ऋग्वेदसंहिता
कठ.	कठोपनिषत्
कविकण्ठ.	कविकण्ठाभरणम्
का. प्र.	काव्यप्रकाशः
काव्या.	काव्यादर्शः
का. सू.	काव्यालङ्कारसूत्राणि
कुव.	कुवलयानन्दः (निर्णयसागरमुद्रणालयप्रकाशितः)
छा.	छान्दोग्योपनिषत्
तै.	तैत्तिरीयोपनिषत्
तै. आ.	तैत्तिरीयारण्यकम्
द. रू.	दशरूपकम्
प्र. प.	प्रमाणपद्धतिः (धारवाडतः प्रकाशितः शा.श १८५२)
ब्र. सू.	ब्रह्मसूत्राणि बृ. बृहदारण्यकोपनिषत्
भाग.	श्रीमद्भागवतम्
मनु.	मनुस्मृतिः
मभा. ता. नि.	महाभारततात्पर्यनिर्णयः
या.व, याज्ञ.	याज्ञवल्क्यस्मृतिः
र. गं.	रसगङ्गाधरः (चौखम्बा विद्याभवनं, वाराणसी)

Rarest Archiver

रु. वि. काव्यं.	रुक्मिणीशविजयमहाकाव्यम्
वा. गु. च.	श्रीवादिराजगुरुवरचरितामृतम्
वि. त. नि.	विष्णुतत्त्वविनिर्णयः
विष्णु	विष्णुपुराणम्
ह. भ. र. सि	हरिभक्तिरसामृतसिन्धुः
हरि.	हरिवंशः
सर. कण्ठ.	सरस्वतीकण्ठाभरणम्
सा. द.	साहित्यदर्पणः (द्विवेदीदुर्गाप्रसादसम्पादित: १९३१)
श्वेत.	श्वेताश्वतरोपनिषत्
H. D. S. V.	History of Dvaita School of Vedanta.

chapter-1

प्रथमोऽध्यायः कविपरिचयः

रुक्मिणीशविजयमहाकाव्यस्य रचयिता श्रीवादिराजतीर्थः श्रीमध्वाचार्यप्रतिष्ठापितेषु रजतपीठपुरीया(उडुपी) ष्टमठेषु अन्यतमस्य सोदामठस्य अधिपतिः समभवत्। द्वैतवेदान्त-साम्राज्ये चिरस्मरणीयं तन्नाम वर्तते। कर्णाटकराज्ये दक्षिण-कन्नडमण्डलस्य कुन्दापुरप्रान्तस्य कुम्भासिसमीपे 'हूविनकेरे' नाम्नि ग्रामे श्रीवादिराजः कविरयं लब्धजन्माऽभवत् यस्मिन् खलु परशुरामसृष्टे तौलवे(1) मण्डले श्रीवादिराजस्य पूर्वाश्रमीयपितरौ अवसताम्। कवेः पिता रामाचार्यः षट्कर्मनिरतो द्विजः, माता च सरस्वत्याख्या साध्वी। एतौ च देवभट्टः, गौरी इत्यपि निगदितौ।(2)

---

(1) कुठारपाणिना सृष्टे तौलवे मण्डले पुरा।
कुम्भासिक्षेत्रनिकटे पुष्पकासारसंज्ञके॥
रामाचार्यः सामवेदी षट्कर्मनिरतो द्विजः।
सरस्वत्याख्यया पत्न्या स्वधर्मनिरतोऽवसत्॥
— श्रीवादिराजगुरुवरचरितामृतम् १/४,५

श्रीवादिराजोऽपि स्वविरचिततीर्थप्रबन्धे परशुरामक्षेत्रं स्वजन्मभूमिं एवं शंसति—
कर्णे पदन्यस्तरुची रिरंसुः वाराशिवस्त्रं जघनाद्धि यस्याः।
अमूमुचद्बाणकरेण भूमेः श्रीभार्गवः सा जयति क्षितिर्नः॥ ती.प्र. १/६

(२) यां गौरीमिति च प्राहुः देवभट्टं च तं विदुः। वा.गु.च. १/७
देवभट्टाभिधस्यास्य पत्नी गौरीति विश्रुता। -वादिराजगुणरत्नमाला ४/८

Rarest Archiver

पुत्रसन्तानापेक्षया स रामाचार्यः स्वग्रामसमीपकुम्भासिक्षेत्रमठगं श्रीवागीशाख्यं मुनीश्वरं शरणं गतः।[१] श्रीवागीशतीर्थः सोदामठे पारम्पर्येण एकोनविंशतितमः श्रीवादिराजस्य सन्यासदीक्षादातृगुरुः।[२] वागीशतीर्थानुग्रहाज्जातं शिशुं गृहाद्बहिः जातत्वात् गुरोः आज्ञा-[३]नुसारं तस्मै वागीशतीर्थाय समर्पयत रामाचार्यः। वादिराजतीर्थस्य पूर्वाश्रमे नाम भूवराहः इति आसीत्।[४] भूवराहः देवः वागीशतीर्थस्य उपास्योदेवः। वादिराजस्य च जन्मकालः श्रीवादिराजगुरुवर-चरितामृते निःसन्दिग्धं एवं उक्तः —

---

(१) सन्तानवान् कन्यकया लिप्सुः सुगुणमात्मजम्॥
कुम्भासिक्षेत्रमठगान् श्रीवागीशमुनीश्वरान्।
भक्तानुग्रहदक्षान् तान् श्रुत्वा शरणमेयिवान्॥ वा.गु.च. १।७,८

(२) मुनीशवागीशसुतः सुरम्यां हरेः कथां शंसति वादिराजः।
— रुक्मिणीशविजयकाव्ये १।८

(३) यदि प्रसूयेत भवन्निकेतने तदा स बालो युवयोः परं भवेत्।
बहिः प्रसूयेत तदा स मह्यं देवः सुदैवं हि परीक्षणीयम्॥ वा.गु.च. १।१३,१४

एकदा द्वादश्यां प्रातः पारणासन्ने रामाचार्ये गृहस्य पुरतः केदारेषु सस्यानि भोक्तुमागतां गां निरोद्धुं बहिरागता गौरी तत्रैव पुत्रं सुषुवे —

पत्याज्ञया गां निरोद्धुं केदारं प्राप सत्वरम्।
तदा तत्रैव सुषुवे भास्करप्रभमात्मजम्॥ वा.गु.च. १।१९

(४) वराहकृपया जातं वराहाख्यं व्यधात्ततः॥ तत्रैव १।२२

Rarest Archive

शालीवाहस्य सुशके पक्षाकाशयुगेन्दुके (१४०२)।
शार्वरीवत्सरे माघे शुक्लद्वादशिकातिथौ ॥
ऋजुदेवः स ज्ञातव्यः[1] धरण्यामवतीर्णवान् ॥ १|३०,३१

शालिवाहनशकतः १४०२ वत्सरः क्रिस्ताब्दतः १४८० भवति। महाकवेरस्य जीवितकालः १२० संवत्सरात्मको ऽभूत्। शालिवाहन-शकतः १५२२ तमवत्सरपर्यन्तं असौ भुवि विरेजे।[2]

रामाचार्यस्य पुत्रोऽयं वराहाचार्यः वागीशतीर्थस्य मठे एव ववृधे। वागीशतीर्थस्य शिष्यः विद्यानिधितीर्थः आसीत् यस्य च सान्निधौ शास्त्राध्ययनं समभवत् अस्माकं महाकवेः बाल्ये।[3] वागीशतीर्थादपि अनेन वेदान्ततत्त्वमधीतमेव।[4]

---

(१) श्रीवादिराजः ऋजुगणेषु अन्यतमः भाविकाले वायुपदवीं प्राप्नोति इति साम्प्रदायिकेषु केषाञ्चनाभिप्रायः। एतद्विषये विप्रतिपत्तिरप्यस्ति। वा.गु.च. ८/१.

(२) स्वस्तिश्रीजयशालिवाहनशके सार्धात्सहस्रात्परं
द्वाविंशे शरदां गते प्रभवति श्रीशार्वरीवत्सरे।
मासे फाल्गुनके सितेतरतृतीयायां तिथौ विद्दिने
स्वातीहर्षणसंयुते हरिपदं श्रीवादिराजोऽगमत् ॥ वा.गु.च. ६|७२

(३) तत्प्रार्थिताश्च वागीशाः तस्मै सन्न्याससद्व्रतम् ॥
दत्वा विद्यानिधिं नाम्ना ख्यापयामासुरादृताः।
वराहाख्यं बालमेनं तच्छिष्यं व्यदधुः किल ॥ वा.गु.च. २/२४

(४) वागीशयोगीन्द्रमुखादपि स्म वेदान्ततत्त्वं जगृहेऽथ मोदात् ॥ तत्रैव २/१२

Rarest Archiver

हयग्रीवस्य मध्वस्य 'विद्यानिधि' गुरोः, गुरोः ।
कृपया वादिराजोऽहं रचये युक्तिमल्लिकाम् ॥ (युक्तिमल्लिका १।७)

इतिपद्येनापि कवेः विद्यागुरुः विद्यानिधितीर्थः इति ज्ञायते । व्यासत्रय-तया वेदान्ते प्रसिद्धानां न्यायामृत-तात्पर्यचन्द्रिका-तर्कताण्डवानां निर्माता श्रीव्यासतीर्थः अपि वादिराजस्य विद्यागुरुरभवदिति ऐतिह्येन ज्ञायते । किन्तु व्याजान्तरेण कविरयं व्यासतीर्थशिष्यत्वमुपगत इति वा.गु.च. ग्रन्थे प्रोक्तम्।(1) अष्टमे वयसि सन्यासदीक्षां वागीशतीर्थात् सम्प्राप्यासौ 'वादिराजतीर्थः'(2) बभूव । एवं वादिराजतीर्थः श्रीमध्वाचार्यसहोदरविष्णुतीर्थाधिष्ठितस्य सोदा-मठस्य विंशतितमः पीठाधिपतिरभवत् ।

---

(1) He is believed to have been a disciple of Vyasatirtha and studied under him. This fact is confirmed by the Udipi tradition also though a different is given for this fact.*

— Dr. B.N.K. Sharma. H.D.S.V. Motilal Banarsidass. 1981. page 413

(2) अष्टमेऽब्दे वराह्नोऽसौ वागीशमुनिशेखरैः ।
सन्यासदीक्षापात्रं स कारितः तुष्टिमाययौ ॥ वा.गु.च. २।९
भविताऽखिलवादीन्द्रदर्पहन्ता यतीश्वरः ।
इत्यतो वादिराजाख्यां लम्भितः सद्गुरूत्तमैः ॥ तत्रैव २।१०

* व्यासङ्गव्याजमासाद्य व्यासार्यं समुपागतः । — वा.गु.च. ४।२९

श्रीवादिराजतीर्थः सुप्रसिद्धनामधेयः द्वैतवेदान्तक्षेत्रे। अयं खलु कविः, समाजनियन्ता महावादकोविदः, समृद्धानां ग्रन्थानां रचयिता सर्वाधिकतया महातेजस्वी मुनिश्च आसीत्।(1)

श्रीवादिराजस्य ग्रन्थप्रणाल्याः वैशिष्ट्यं नाम युक्त्युपबृंहितत्वं कमनीयकाव्यकौशलपरिपूर्णत्वम्। शास्त्रीयानपि ग्रन्थान् साहित्यशैलीसुरभितान् व्यातनोत् श्रीवादिराजः। तस्य वेदान्तधुरन्धरत्वे युक्तिमल्लिकादिग्रन्था एव प्रमाणम्।(एतत्कृतग्रन्थविषये अनुपदमेव लिख्यते)

महातपोभूषितोऽयं वादिराजतीर्थः समग्रभारते तीर्थाटनं कृतवान्। वेङ्कटाचलक्षेत्रे च पर्वतं तं जानुभ्यामारुह्य श्रीश्रीनिवासाय सालिग्रामशिलामालिकां समर्पयामास। सा मालिका अद्यापि वेङ्कटाचलाधिपतेः श्रीश्रीनिवासस्य कण्ठे राजते।(2) इयं नूनं वादिराजस्य भगवद्भक्तत्वे साक्षिभूता वर्तते कथा माला च।

---

(1) He(Sri Vadirajateertha) was a poet, a philosopher, a social organiser a great debater, a prolific writer and to crown all this a saint of great mystic eminence.— Prof. K.T. Pandurangi 'Introduction' to Yuktimallika. page xxvi Davanageri 1977

(2) ततो वेङ्कटशैलस्य निकटं प्राप्तवान् कृती।
शिलासोपानरूपेण देवमावीक्ष्य दिव्यदृक्॥
जानुभ्यामेव शैलेन्द्रं आरुरोह महाबलः।
श्रीनिवासं निरीक्ष्याथ सालिग्रामसुमालिकाम्।
अर्पयामास सा माला तत्कण्ठेऽद्यापि राजते॥ वा.गु.च. 2/23-24

श्रीवादिराजकृतः कुम्भकोणे विद्वद्भिः वादः, तेषां चैतच्छागतापतिः वादिराजगुरुवरचरितामृते वर्णिते स्तः ।[1] अन्यत्र च केनचिद् अद्वैतपण्डितेन वादार्थं समयादिषु निर्णीतेषु, तेन च तदा अनागते श्रीकृष्णपूजापर्यायनिर्बन्धेन श्रीवादिराजः उडुपीक्षेत्रं आगतः, किन्तु पाण्डुरङ्गीवंशोद्भूतं आनन्दभट्टारकं नाम महाविद्वांसं तेन वादार्थं योजयामास, स तु तं अद्वैतपण्डितं वादे जित्वा जयपत्रादिकं गुरवे श्रीवादिराजाय समर्पयामास । अनया च कथया श्रीवादिराजस्य विद्वत्प्रियता व्यक्ता भवति ।[2]

विजयनगरे च वीरप्रतापवेङ्कटपतिमहाराजस्य आस्थाने श्रीवादिराजः बहुभिः विद्वद्भिः सार्धं शास्त्रवादं चकार । उत्तरदानेन च तान् पण्डितान् सन्तोषयामास। स च महाराजः अस्य वैदुष्यं वीक्ष्य 'प्रसङ्गाभरणं' नाम बिरुदं गुरवेऽस्मै ददौ ।[3] सोदाराज्याधिपतिः अरसप्पनायकोऽपि श्रीवादिराजाय महागौरवं आतनोत्, श्रीगुरोरस्य अनुग्रहपात्रं च अभूत् ।[4] तद्दत्तं मुकुटछत्रादिकं सोदामठे अद्यापि रक्षितं वर्तते ।[5]

---

(१) श्रीवादिराजगुरुवरचरितामृतम् २।२२
(२) तत्रैव ५।१९
(३) तत्रैव ३।३
(४) तत्रैव ६।१०
(५) तत्रैव ३।४४

Rarest Archive

धर्मस्थलस्य तदानीन्तनः अधिकारी देवराज हेग्गडे इति संज्ञितः श्रीवादिराजं आमन्त्रयामास । जैनमतावलम्ब्यधिष्ठितं तं ग्रामं गत्वा वादिराजः तत्र मञ्जुनाथस्य – शिवस्य लिङ्गं प्रतिष्ठापितवान् । 'कुडुम' इति ख्यातं तं ग्रामं ततः प्रभृति अयं वादिराजः 'धर्मस्थलं' इति नूतन-नामान्वितं चकार ।[1] उडुपीसमीपे यल्लूरक्षेत्रे च श्रीवादिराजेन शिवपूजादिव्यवस्था सुष्ठु कारिता ।[2] एतदाद्याः कथाः श्रीवादि-राजस्य समाजे प्रभावद्योतकाः सन्ति ।

उडुपीक्षेत्रे च श्रीमन्मध्वाचार्याः, अष्टमठीययतयः मासद्वयपर्यायेण श्रीकृष्णपूजां कुर्युः इति व्यवस्थापितवन्तः । श्रीवादिराजस्तु तत्पर्यायावधिं मासद्वयेन वर्षद्वयतया परिवर्धितवान् । तदादेशानुसारमेव अद्यापि रजतपीठपुरे संवत्सरद्वयान्तरे पर्यायोत्सवः सञ्जायते ।[3]

श्रीवादिराजस्य उपास्यो देवः श्रीहयग्रीवदेवः । सोदा-मठे श्रीहयग्रीवप्रतिमा-आगतिकथाऽपि लोकविचित्राऽस्ति । स्वर्णकारः एकः हेरम्बस्य मूर्तिं कर्तुं उद्यतो ह्यासीत । दिष्ट्या सा मूर्तिः हयवदनस्य अभूत । अन्यथाकर्तुं यतमानोऽपि

(१) वा. गु. च. ३/५१-५५

(२) श्रीवादिराजर कृतिगळु. मैसूरुविश्वविद्यानिलयः, १९८०. पृष्ठ ८(viii)

(३) वा. गु. च. ४/४१-५०

Rarest Archiver

साफल्यं न जगाम। स्वप्नसूचनेन च सः स्वर्णकारः तां हयग्रीवमूर्तिं श्रीवादिराजाय समर्पयामास। श्रीवादिराजः तं हयवदनं सादरं परिगृहीतवान्, पूजयामास च यथाविधि। न केवलमेतत्, तं स्वर्णकारं सानुगमेव स्वशिष्यं ततःप्रभृति आतनोत्। तदा प्रभृति स्वर्णकारवर्गः (दैवज्ञब्राह्मणसमूहः) श्रीसोदावादिराजमठस्य शिष्यत्वं गतः।[1] अनेन खलु वृत्तान्तेन श्रीवादिराजस्य हृदयवैशाल्यं ज्ञायते।
तदानीन्तनजनतायां मिथ्यावादघातेन तस्मात् कोटीश्वर-ब्राह्मणान् अपि अयं पीठाधिष्ठितगुरुः श्रीवादिराजः उद्दधार।[2] श्रीवादिराजप्रदर्शितलोकाश्चर्यकरात्यद्भुतमहिमाविशेषास्तु तत्पर-ग्रन्थैरेव विज्ञेया नात्र प्रपञ्च्यन्तेऽविषयत्वादस्य प्रबन्धस्य। एतादृशपुण्योदारचरितस्य श्रीवादिराजस्य, भगवद्भक्तिः, मध्वसिद्धान्तदीक्षा च इत्येतद् द्वयं स्वरूपभूतं लक्षणं वर्तते। स्वकीयं समस्तमपि वैदुष्यं सङ्गीतादिकलासु वैचक्षण्यं च किं बहुना समग्रमेव जीवितं भगवद्भक्तिप्रचाराय विनियुक्तवान् श्रीवादिराजतीर्थश्रीमच्चरणः।

---

(१) श्रीवादिराजगुरुवरचरितामृतम् - ५/६९-७४

(२) तत्रैव ५/७०
अनेनापि कोटीश्वरब्राह्मणानां वैष्णवदीक्षाप्रदानेन उद्धारवृत्तान्तेन श्रीवादिराजस्य समाजे सौहार्दस्थापनचातुरी प्रकटीभवति।

Rarest Archiver

श्रीवादिराजतीर्थमहाकविविरचिता: ग्रन्था: ।

श्रीवादिराजकविराजप्रणीता: नैकविधा: ग्रन्था उपलभ्यन्ते। टीकाग्रन्था:, टिप्पणीग्रन्था:, स्वतन्त्रशास्त्रीयप्रबन्धा:, काव्यग्रन्था: देवतास्तोत्रात्मका: कृतय: कन्नडभाषामयानेकग्रन्था: - एवंभूता: तदीयकृतय: तस्य सर्वतोमुखग्रन्थकर्तृत्वं संस्थापयन्ति ।

महाभारतलक्षालङ्कार: – श्रीवादिराजस्य माता गौरीदेवी, स्वस्या: पुत्रलाभे भगवन्तं लक्षभूषणै: पूजयिष्यामीति सङ्कल्पितवती आसीत्[1]। तदिच्छां तत्सुत: श्रीवादिराज: लक्षश्लोकात्मकमहाभारतव्याख्यानकरणेन पूरितवानिति ऐतिह्यम्[2]। अयं ग्रन्थ: महाभारतस्य संक्षिप्तमपि विशिष्टं व्याख्यानम् । आध्यात्मिकवैशिष्ट्यवतां पदानां श्लोकानां च विलक्षणं विवरणं अस्मिन् व्याख्याने उपलभ्यते। सनत्सुजातीयस्य विष्णुसहस्रनाम्नां व्याख्या अत्र विस्तरेणास्ति । अयं ग्रन्थ: उडुपि सोदावादिराजमठात् क्रि.श. १९५९ वत्सरे उद्योगपर्वपर्यन्तं प्रकाशितोऽस्ति ।

---

(१) गौरी तु सुतलाभ: स्याद्यदि लक्षसुभूषणै: ।
श्रीपतिं पूजयिष्येऽहमिति सङ्कल्पवत्यभूत् ॥ वा.गु.च. १।९

(२) प्रयागे ब्रह्मण: सन्ध्यामठे जपपरस्य हि ।
मुनिवेषधरो व्यास: साक्षाद् दृष्टिपथे स्थित: ॥
मात्रोपयाचितं वत्स लक्षभूषानिवेदनम् ।
सुपुत्रेण त्वया कार्यं महाभारतटीकया ॥
लक्षग्रन्थिपद्यर्थानां विवृत्या लक्षभूतया .... अनुवर्तते

महाभारततात्पर्यनिर्णयभावप्रकाशिका(१) - अयं ग्रन्थ श्रीमध्वाचार्यविरचितस्य महाभारततात्पर्यनिर्णयाख्यग्रन्थस्य व्याख्यानरूपः। उडुपीवादिराजीय-ग्रन्थप्रकाशनसमित्या प्रकाशितोऽस्ति · क्रि·श· १९५२.

तलवकार-तैत्तिरीय-काठक-आथर्वण-माण्डूक्योपनिषदां भाष्यटीकाः। श्रीमध्वाचार्यविरचितोपनिषद्भाष्याणां टीकाः इमाः सर्वाः। उडुपी-वादिराजीयग्रन्थप्रकाशनसमित्या प्रकाशिता एव।

तन्त्रसारटीका - श्रीमध्वाचार्यकृततन्त्रसारग्रन्थस्य व्याख्यारूपा इयं अधुना नोपलभ्या।(२)

न्यायसुधागुर्वर्थदीपिका - श्रीजयतीर्थविरचितस्य न्यायसुधाग्रन्थस्य विशिष्टं व्याख्यानम्। श्री· वा· ग्र· प्र· समित्या प्रकाशितास्ति।

पूर्वपृष्ठतोऽनुवृत्तम्

मदर्चनेन मात्रोक्तं साधितं स्यादितीरितः।
व्यासाज्ञां शिरसा धृत्वा बदरीं गतवान् मुदा॥
प्रणम्य मध्वहंसेन्द्रान् व्यासमध्वप्रचोदितः।
लक्षालङ्कारटीकां स विलिख्यार्पयते स्म हि॥ तत्रैव ३/१८-२२

(१) भावप्रकाशिकाप्रारम्भे 'वादिराज'नाम्नः निर्वचनं स्वेनैव कृतम् -

वादी मध्वो यस्य राजा सोऽहं तस्य कृपाबलात्।
वादिराजो न स्वशक्त्या वीणेव रणयामि तत्॥ १।४

(२) व्यासनकेरे प्रभञ्जनः, वादिराजस्तोत्रमञ्जरीग्रन्थस्य उपोद्घाते ऐतरेयप्रकाशनम् व्यासनकेरे, हुणापूर· (१९८०)

Rarest Archive

तत्त्वप्रकाशिका गुर्वर्थदीपिका - श्रीमध्वाचार्यविरचित ब्रह्मसूत्रभाष्यस्य जयतीर्थविरचितायाः तत्त्वप्रकाशिकाख्यायाः टीकायाः व्याख्यानभूता एषा । अधिकरणार्थसङ्ग्रहरचणा इयं गुर्वर्थदीपिका सूत्रभाष्य-टीकासु तत्सम्बद्धश्रुतिषु च विमर्शनं करोति।[1]

ईशावास्य षट्प्रश्नभाष्यटीका टिप्पण्यौ - श्रीजयतीर्थानां टीकोपरि व्याख्यानद्वयमेतत् उडुपीतः श्री·वा·ग्र·प्र· समीत्या प्रकाशितम् ।

गीताभाष्यटिप्पणी वादिराजकर्तृकत्वेन प्रसिद्धा नोपलभ्यते।[2]

युक्तिमल्लिका - युक्तिमल्लिकाख्यः प्रौढशास्त्रीयप्रबन्धः श्रीवादिराजकृतिषु श्रेष्ठतमा । ५२७९ अनुष्टुभ् श्लोकात्मकोऽयं वादग्रन्थः द्वैतवेदान्तप्रमेयाणि चार्वाकाद्यशेषपरमतनिराकरणपूर्वकं संस्थापयति । ग्रन्थेऽस्मिन् पञ्चाध्यायाः सन्ति सौरभपदेनाभिहिताः । गुणसौरभ-शुद्धिसौरभ-भेदसौरभ-विश्वसौरभ-फलसौरभात्मकेऽस्मिन् ग्रन्थरत्ने ब्रह्मसूत्राणां चतुरध्यायात्मकानां सिद्धान्तः नितरां हृदयङ्गमेन प्रकारेण प्रतिपादितः। युक्तिमल्लिकायाः व्याख्या श्रीवादिराजस्य पूर्वाश्रमीयानुजेन[3] सुरोत्तमतीर्थेन कृता वर्तते । तत्र युक्तिमल्लिकायाः विषयसङ्ग्रहः

---

(1) सूत्रे भाष्ये च टीकायां सूत्रोक्तश्रौतवाचि च ।
यथाशक्ति विमर्शेन .... (प्रारम्भपद्यम् २)
अयमपि ग्रन्थः उडुपी श्री·वा·ग्र·प्र समित्या प्रकाशितः

(2) Nothing is known of the gloss on G.B. attributed to him (Vadiraja)
— Dr. B.N.K. Sharma. H.D.S.V. page 419

(3) वृत्तरत्नसङ्ग्रहः ३।२८

Rarest Archiver

एवं कृतोऽस्ति "अधुना, शिष्यमनःसमाधानाय परमतनिराकरणात्मक-समयपादोक्तमपि समयनिराकरणं प्राक्प्रस्तात्य पुनः समन्वयाध्याय प्रतिपाद्यं सर्वगुणपूर्णत्वं गुणसौरभसर्वस्वेन मनःप्रियं कुर्वन्, तदनन्तरमविरोधाध्यायप्रतिपाद्यं निर्दोषत्वं शुद्धिसौरभसर्वस्वेन रञ्जयन्, पुनरेतदध्यायेऽपि सूत्रे सूत्रे प्रतिपादितं जीवेश्वरभेदं भेदसौरभसर्वस्वेन प्रतिपादयन्, तदनु जन्माद्यस्य यतः इति सूत्रप्रतिपादितजगज्जन्मादि-कारणत्वलक्षणपरिरक्षणाय विश्वसौरभसर्वस्वेन जगत्सत्यतां संस्थापयन्, पुनः साधनफलाध्यायप्रतिपाद्यं साधनं फलं च फलसौरभ-सर्वस्वेन सङ्गृह्णन् प्रमाणाधीना प्रमेयसिद्धिरिति न्यायेन पञ्चसौरभोक्त-प्रमेयस्यापि प्रमाणसापेक्षत्वात् प्रमाणेषु च प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतमिति वचनादलौकिकेऽर्थे प्रबलप्रमाणभूतवेदस्य न विलक्षणत्वादस्य तथात्वं च शब्दादिति सूत्रे नित्यतया प्रतिपादितं स्वतःप्रामाण्यं समर्थयितुं वेदापौरुषेयतां तावदादौ साधयितुमुपक्रमते"। शास्त्रीयेऽस्मिन् ग्रन्थे श्लेषानुप्रासकाकूक्त्यादयः बहवो दृश्यन्ते। शास्त्रीय-विषयाणां सुलभया प्रणाल्या प्रतिपादनं युक्तिमल्लिकायामेव दृश्यते। अतः शास्त्रीयवाङ्मये विलक्षणोऽयं ग्रन्थः(7)। अत्र हि शास्त्रवाक्यार्थस्य तर्कनिष्ठुरता

---

(7) It was Vadiraja who first brought the wisdom of his predecessors within the reach of all. In this respect, his work marks a new and necessary phase in the history of Dvaita Literature and breathes the spirit of a new age which other popular exponents of

Rarest Archiver

काव्यमधुरता च दृश्येते । युक्तीनां तीक्ष्णता वर्ततेऽत्र दृष्टान्तोपमादीनां रमणीयता च । कविवर्यविरचितेयं युक्तिमल्लिका वादिराजशैल्याः परां काष्ठां प्रदर्शयति । वादिराजतीर्थः मध्वसिद्धान्तस्य परमोत्कर्षं साधयितुं अस्यां युक्तिमल्लिकायां युक्तिजालमेव व्यातनोति । शाङ्करभाष्यं[1], आनन्दबोधः श्रीहर्षः[2] इत्यादयः उदाहृताः निराकृताश्चात्र । श्रुतीनां च विशिष्टं व्याख्यानं तत्र तत्र दृश्यते[3] । पञ्चमे फलसौरभे तु मध्वमताभिमतस्य मोक्षस्य निरूपणं वर्तते । तप्तमुद्राङ्कनादीनां आचाराणामपि प्रामाणिकत्वं प्रतिपादितम् । तेनायमध्यायः महत्त्वपूर्णः भवति । संक्षेपेण वक्ष्यते चेत्, युक्तिमल्लिकायां माध्वब्रह्मसूत्रभाष्यस्य युक्तिपूर्णं विवरणमेव वर्तते । विषयप्रतिपादने च श्रुतिस्मृतीनां अविरुद्धाः युक्तयः उपन्यस्ता इति युक्तिरसिकानां मनांसि सानन्दानि तनोतु इति वादिराज एव ग्रन्थारम्भे युक्तिमल्लिकां सम्बोध्य निगदितवानास्ति ।[4]

पूर्वपृष्ठतोऽनुवृत्तम्

Madhva-Siddhanta, both in Sanskrit and Kannada.

— Dr. B.N.K. Sharma. H.D.S.V. page. 421

(१) युक्तिमल्लिका ३।१२१

(२) तत्रैव २।१२६

(३) तत्रैव. १/५६७, ७९४, ३/२२८, ६२८, १०४०

(४) न स्नेहात् न च विस्नेहात् युक्त्याकृष्टेन चेतसा ।
यतः कृताऽसि तत्तर्करसिकानां मुदे भव ॥ १/२४

न्यायरत्नावली - पञ्चसरोपेतोऽयं न्यायरत्नावलीग्रन्थः पद्यात्मकः वर्तते । ९०१ अनुष्टुप् श्लोकेषु अयं ग्रन्थः अद्वैतप्रक्रिया विमर्शपूर्वकं द्वैततत्त्वानि साधयति । ग्रन्थान्ते स्वयं वादिराजः एवमाह -

वादिराजेन रचितां न्यायरत्नावलीमिमाम् ।
सङ्गृह्णतः सभामध्ये वाग्दारिद्र्यं न विद्यते ॥(५।९९)

उडुपी प्रभाकरमुद्रणालये मुद्रितोऽस्त्ययं ग्रन्थः सव्याख्यानः (१९२५)

चक्रमीमांसा - तप्तमुद्राधारणस्थापनपरोऽयं ग्रन्थः । बेलगांवनगरतः प्रकाशिते स्तोत्रमहोदधौ चक्रस्तुतिनाम्ना (पत्रं २१२-२१) प्रकाशितोऽस्ति।(1) तीर्थप्रबन्ध व्याख्यायां एतद्ग्रन्थकर्तृत्वमेव मुद्धृतम् -

यश्चक्रे चक्रमीमांसां यश्चक्रे युक्तिमल्लिकाम् ।
मुकुन्दलीलां यश्चक्रे तस्मै काव्यकृते नमः ॥

उपन्यासरत्नमाला - अस्मिन् ग्रन्थे आहत्य दश उपन्यासा वर्तन्ते । रुक्मिणीशविजयस्य द्वयोः श्लोकयोः(2) प्रमाणपद्धति सम्बद्धाः सप्त उपन्यासाः मायावादखण्डनस्य एकः इति विषयाः सन्ति । एवं वादिराजीयग्रन्थमालिका (उडुपी) प्रकाशिते पुस्तके वादिराजतीर्थैः स्वयमुक्तमिति विद्यते । (पुस्तकस्य प्रथमपत्रे)

---

(1) डा॥ बी· एन्·के शर्मा· H·D·S·V· page 422

(2) मुद्रितपुस्तके 'श्रीरुक्मिणीशविजयस्थकृष्णस्तुतिरूप गोपीवाक्यात्मकश्लोकद्वयस्य द्वावुपन्यासौ' इत्युक्तत्वेऽपि तत्र वादिराजतीर्थव्याख्यातयोः श्लोकयोः एकः गोपीवाक्यात्मकोऽस्ति (कमलासनाद्य भवतोऽभवतो ८/२९) अपरश्च मुनिवाक्यात्मकोऽस्ति (करणपालनशील नते स्थितिं १७/१२)

Rarest Archiver

श्रुतितत्त्वप्रकाशिका - अत्र ५०७ अनुष्टुप् पद्यानि सन्ति यत्र नेह नानास्ति किञ्चन, अहं ब्रह्मास्मि, एकमेवाद्वितीयं ब्रह्म, तत्त्वमसि केवलो निर्गुणश्च इति ऐक्यप्रतिपादकतयाभिमतानि वेदवाक्यानि द्वैतानुकूल्यतया सयुक्तिकं प्रतिपादिताः। श्रीमध्वाचार्यजयतीर्थादि प्राचीनाचार्याणामभिप्रायानुसारं ग्रन्थे विषयाः प्रतिपादिता अपि नूतनतया स्वयं ग्रन्थकारस्य केचिद् व्याख्याविषयाः वर्तन्ते। अयं ग्रन्थः सोदामठेन प्रकाशितोऽस्ति (१९५४) (1)

हरिभक्तिलता - अयमपि सोदावादिराजमठेन प्रकाशितोऽस्ति।

ज्ञानसाधनविचारः वेदापौरुषेयत्वं च अस्य ग्रन्थस्य विषयः।

सदाचारस्मृतिः, सङ्कल्पपद्धतिः, एकादशीनिर्णयः भूगोलनिर्णयः इमे चत्वारः ग्रन्थाः वादिराजीयग्रन्थप्रकाशनसमित्या (उडुपी) प्रकाशिताः सन्ति।

पाषण्डमतखण्डनग्रन्थे जैनमतीयसम्प्रदायाः निरस्ताः। (2)

(पूर्वपृष्ठतोऽनुवृत्तम्)
तथा तस्यामेव वादिराजीयग्रन्थमालिकायां प्रकाशिते पुस्तके मायावादखण्डनोपयोगी एकः इत्यपि वर्तते। वस्तुतः तत्र मुद्रितः उपन्यासः उपाधिखण्डनोपयोगी आस्ति।

(1) कन्नडभाषान्तरेण सहितमपि बेङ्गलूरतः प्रकाशितोऽस्ति।

(2) श्रीरामतत्त्वप्रकाशनमुद्रणालयः बेलगांव. इत्येतैः प्रकाशितः।

विवरणग्रणम् - पञ्चपादिका, विवरणं, तत्त्वदीपनं - इत्येतेषां अद्वैतग्रन्थानां विमर्शनपरोऽयं ग्रन्थः । अयमपि कान्वादिभिः -चमत्कारितः वादिराजस्य वैशिष्ट्यं प्रदर्शयति । उडुपि. वा. ग्र. प्र. समित्या प्रकाशितोऽस्ति ।

माध्ववाग्वज्रावलिनामा ग्रन्थः वादिराजीयत्वेन प्रसिद्धः नाधुना उपलभ्यते । (1)

मुहूर्तराजाख्यः ग्रन्थः वादिराजविरचितः अप्रकाशितः । व्यासनकेरे, श्रीजयतीर्थ संस्कृतहस्तलिखित ग्रन्थालये वर्तते । (2)

अधिकरणनामावलिः ब्रह्मसूत्राणां अधिकरणानुसारमर्थसङ्ग्राहकः वा. ग्र. प्र. समित्या प्रकाशितः ।

कल्पलताख्यः ग्रन्थः वादिराजसूरिनामकजैनपण्डितरचितस्य प्रमाणनिर्णयाख्यस्य ग्रन्थस्य खण्डनरूपः । (3) युक्तिमल्लिका व्याख्यायां सुरोत्तमतीर्थेन नाम्ना उल्लिखितः (१।८६) । शब्दप्रामाण्यविषये जैनानामाक्षेपाः निराकृताः । जैनमतानुसारेण जीवपरिमाण-विषया अपि तीक्ष्णतया प्रत्युक्ताः ।

सनत्सुजातीयम् - महाभारतान्तर्गतसनत्सुजातीयस्य विस्तृतं व्याख्यानमिदं बेङ्गळूर श्रीमन्माध्वसङ्घ ग्रन्थमालायां प्रकाशितः ।

---

(1) श्रीवादिराजस्तोत्रमञ्जरी, वि. प्रभञ्जनः, ऐतरेयप्रकाशनं व्यासनकेरे. पत्रं २

(2) तत्रैव पत्रं (i)

(3) उडुपी. वा. ग्र. प्र. समित्या प्रकाशितः

पुरुषसूक्तव्याख्यानम् - ऋ.सं. १०।९१ तमसूक्तस्य माध्वाध्वानुसारि व्याख्यानमिदं पूर्णप्रज्ञग्रन्थमालायां (बेङ्गलूर) प्रकाशितमस्ति ।

वादिराजतीर्थविरचितानि देवतास्तोत्राणि - भक्तकवि श्रीवादिराजविरचित-देवतास्तोत्राणि अद्यापि तत्सम्प्रदायानुयायिभिः माध्वैः पठ्यन्ते पाठ्यन्ते गीयन्ते च।[1] इमानि च स्तोत्राणि, पावञ्जे गुरुराव अँण्ड सन्स् उडुपि इत्येतैः स्तोत्रमञ्जर्यां प्रकाशितानि। श्रीवादिराजीयग्रन्थप्रकाशनसमित्या च स्तोत्ररत्नमालायां प्रकटितानि। बेलगाँवतः प्रकाशिते स्तोत्रमहोदधौ च नैकानि स्तोत्राणि समुपलभ्यन्ते ।

---

(१) तेषां च स्तोत्राणां नामनिर्देशः उडुपीवादिराजीयग्रन्थमालिकायां 'प्रथमपुष्पे' अन्ते निर्दिष्टतया क्रियते केषाञ्चन एव — रूप्यपीठकृष्णस्तुतिः, अश्वधाटी, विष्णुस्तुतिः, हयग्रीवस्तुतिः, श्रीशगुणदर्पणम्, वेङ्कटेशमङ्गलाष्टकम्, प्रार्थनादशकम्, दशश्लोकी, अभयस्तोत्रं, रमेशस्तुतिः, सङ्कल्पपद्धतिः, कृष्णस्तुतिः, रामकृष्णस्तोत्रम्, अष्टमहिषीयुक्तकृष्णस्तोत्रम्, आपाद-स्तोत्रम्, त्रिविक्रमस्तोत्रम्, दशावतारस्तोत्रम्, वराहहयग्रीवस्तोत्रम्, हयग्रीव स्तोत्रं, हयग्रीवपञ्चकम्, रामकवचम्, प्रौढस्तोत्रम्, चिन्ताखण्डनस्तोत्रम्, विभीषणहनुमत्संवादवायुस्तुतिः, लकारविभक्त्येकतास्तुतिः, सुदर्शन स्तुतिः, श्रीधरस्तुतिः, रामदशकम् मध्वमुनिप्रतापाष्टकम्, नवग्रहस्तोत्रम्, हितोपदेशः हरिभक्त्यष्टकम् आर्यावृत्तकृष्णस्तोत्रम्, वादिभजयाष्टकम्, दुर्गास्तोत्रम्, हर्यष्टकम्, व्यासस्तोत्रम्, विघ्नपरिहारस्तोत्रम्, भयपरिहारस्तोत्रम्, ऋणविमोचनस्तोत्रम्, नारायणस्तुतिः, रक्षाप्रार्थना इत्यादीनि

Rarest Archive

दशावतारस्तुतिः अश्वधाट्यां विरचिता अनुप्रासस्य परमोत्कर्ष-विजृम्भिता पाठकानां अमन्दमामोदं जनयति।

कर्णाटभाषायामपि वादिराजस्वामिपादविरचिताः ग्रन्थाः जनसामान्यस्य तत्त्वज्ञानभक्तिप्रकाशनपराः नैके विद्यन्ते। वैकुण्ठवर्णनं, गुण्डक्रिये सुळादि, सहस्राधिककीर्तनेगळु लक्ष्मीशोभानपद, स्वप्नगद्य, भ्रमरगीते इत्यादयः प्रसिद्धाः सन्ति। 'वादिराजरकृतिगळु' इति च पुस्तकं मैसूरुविश्व-विद्यानिलयात् (१९८०) प्रकाशितमस्ति। तुळुभाषायामपि वादिराजकृतयोवर्तन्ते।

वादिराजविरचिताः काव्यग्रन्थाः - रुक्मिणीशविजयः (अस्य प्रबन्धस्य विषयीभूतः) तीर्थप्रबन्धः, सरसभारती विलासः, कविकदम्बकण्ठभूषा च।

तीर्थप्रबन्धः खण्डकाव्यम्। श्रीवादिराजः अखण्डं भरतखण्डं सञ्चरन् स्वयात्राक्रमपरिचितसुक्षेत्रमाहात्म्ययुक्तं अमुं तीर्थप्रबन्धं विरचयामास।[७] संस्कृतसाहित्ये अयं तीर्थप्रबन्धः विशिष्टं स्थानं लभते। प्रवासकथनवाङ्मये अस्यैव प्राधान्यं प्राथम्यं च।

नानावृत्तोपशोभितमिदं खण्डकाव्यं पश्चिमप्रबन्धः, उत्तरप्रबन्धः पूर्वप्रबन्धः दक्षिणप्रबन्धः इति चतुर्भागात्मकं वर्तते।

पश्चिमप्रबन्धे परशुरामक्षेत्रं, रजतपीठपुरं, पाजकक्षेत्रं इत्यादीनां उत्तरप्रबन्धे कृष्णानदी, पण्ढरपुरं, गोदावरीनदी, प्रयागक्षेत्रं, यमुना गङ्गा, काशी, वृन्दावनं, बदरीक्षेत्रं इत्यादीनां, पूर्वप्रबन्धे

---

(७) स्वदृष्टक्षेत्रतीर्थादिमाहात्म्यस्यावबोधकम्।

तीर्थप्रबन्धं कृतवान् पठतामघनाशनम्॥ वा. गु. च. २।१६

पुरीजगन्नाथः, श्रीशैलः, हम्पी एतत्प्रमुखानां चतुर्थे दाक्षिणप्रबन्धे च श्रीरङ्गक्षेत्रं, कावेरी, रामेश्वरः, अगस्त्याश्रमः, अनन्तशयनक्षेत्रं इत्येतत्प्रभृतीनां विषयाणां सुन्दरं वर्णनं ऐतिहासिकविषयोपबृंहिततया तथा पौराणिकप्रसिद्धिमत्तया श्रीवादिराजविहितं संशोभते ।

सरसभारतीविलासः - द्वादशसर्गात्मकेऽस्मिन् काव्ये हरेः सर्वोत्तमत्वं, वायोः जीवोत्तमत्वं देवतातारतम्यं च मनोज्ञया रीत्या चारुवृत्तैश्च प्रतिपादितानि। बह्वः पुराणकथाः प्रमाणानि च उदाहृतानि तत्प्रतिपादनाय ।

रुक्मिणीशविजयमहाकाव्यम्

श्रीवादिराजतीर्थस्य कवित्वोत्कर्षः रुक्मिणीशविजये महाकाव्ये प्रदर्शितोऽस्ति । एतत्काव्यनिर्माणविषये ऐतिह्यं एवं श्रूयते - "श्रीवादिराजः दिग्विजययात्रायां यदृच्छया पुण्य(पूना)पत्तनमगात् । तत्रस्थविद्वांसः काव्येषु माघकाव्यमेव उत्कृष्टमिति निर्णीतवन्तः आसन्। एतच्छ्रुत्वा एकोनविंशतिदिनेषु महाकविरयं वादिराजः एकोनविंशतिसर्गात्मकं इदं काव्यरत्नं तेभ्यो विद्वद्भ्यः प्रादर्शयत् । दृष्ट्वैतत्काव्यं ते विद्वांसः इदमेव काव्यं साहित्यकृतिषु सर्वाधिकं जगदुः"

वृत्तरत्नसङ्ग्रहे अयं विषयः एवं सूचितः — (७/३६)

रुक्मिणीशविजयस्य रुक्मिणीवल्लभप्रियतमस्य चातुरीम् ।
माघकाव्यमुखकाव्यमण्डलं नाप पापहरणस्य शृण्वताम् ॥

अनेन इदं खलु स्पष्टं यत् रुक्मिणीशविजयः पापहारित्वेन माघादिकाव्यानि अतिशेते इति ।

Rarest Archiver

रु·वि·महाकाव्यं नूनं वादिराजाख्यवृक्षस्य परिपक्वं फलम् ।(१)
वादिराजगुरुवरचरितामृते रु·वि·काव्यनिर्माणकथा एवमास्ति —

ततः पुण्यपुरीं प्राप्तो भेरीताडनपूर्वकम् ।
काव्यश्रेष्ठं माघकाव्यं गजमूर्धनि पूज्यते ॥
इत्याघोषितमाकर्ण्य सभापतिमवोचत ।
अस्मत्पुरे महाकाव्यं एकं श्रेष्ठं प्रकाशते ॥
दीयेत समयः कश्चित् दर्शयिष्ये परीक्ष्यताम् ।
अङ्गीकुर्वति विद्वौघे गुरुरेकोनविंशता ॥
दिवसैरेकदिवसे ह्येकसर्गक्रमेण सः ।
रुक्मिणीशमहाकाव्यं निर्ममे सुरसाकरम् ॥
अवेक्षणाय विदुषां संसदे प्रैषयत्सुधीः ।
परिषत्सा परीक्ष्याथ विस्मितानन्दपूरिता ॥
रुक्मिणीशमहाकाव्यं उत्तमं माघतोऽपि च ।
इत्याघोष्य च सम्मान्य प्रार्चयत्कविसत्तमम् ॥ (२।४-९)

वादिराजगुणरत्नमालायां तु(२) इयं कथा सोदाराजस्य सान्निध्ये तदास्थाने प्रावर्तत इत्युक्तम् । शिष्याणां प्रार्थनानुसारेण श्रीवादिराजतीर्थैः काव्यमिदं दिनाष्टके एव रचितवानित्यपि उक्तम् (५।३४-४९)

(१) तुतोष लोकः कविवर्यवादिराजाख्यवृक्षादुपलभ्य रम्यम् ।
सुवर्णमाधुर्यरसादिभिश्च पूर्णं महाकाव्यफलं सुवृत्तम् ॥ वृत्तरत्नसङ्ग्रहः १/३५

(२) षट्पुराचार्यकृता. उडुपीश्रीसोदावादिराजमठतः प्रकाशिता. १९५६

Rarest Archiver

शिशुपालवधमहाकाव्यस्य वस्तु महाभारतसभापर्वसमुद्धृतं वर्तते। रु॰वि॰महाकाव्यस्य कथावस्तु भागवतदशमस्कन्धादुद्धृतमस्ति। अष्टमशताब्द्यां विरचितस्य वीररसप्रधानस्य माघकाव्यस्य राजनैतिकविषय-प्रतिपादने अन्तःपुरीयशृङ्गारवर्णने च तात्पर्यमस्तीति तत्काव्यावलोकनेन ज्ञायते। माघकाव्ये प्रथमद्वितीयसर्गयोः राजनैतिकविचाराः एव विस्तरशः प्रतिपादिताः। अष्टमसर्गस्य जलक्रीडावर्णनं अतिरञ्जितं सत् विलासिनां भोगजीवितस्य चित्रणे सफलमस्ति। पानगोष्ठी-वर्णनं रात्रिक्रीडावर्णनं च तत्कोटिप्रविष्टे एव वर्तेते। महाकाव्य लक्षणनिर्वाहार्थं माघकाव्ये सुष्ठु प्रयतितं वर्तते।

रुक्मिणीशविजयमहाकाव्यस्य तु तात्पर्यमेव भिन्नं भासते। केवलं लौकिकसुखलोलुपजनमनोविनोदकरणेन काव्यस्यास्य सार्थक्यं साफल्यं न सञ्जायते। वैदिकसिद्धान्तप्रतिष्ठापनपटुतरोऽयं श्रीवादिराजः काव्यैकास्वादनतत्परकोमलाधिषणानामपि मानुषाणां भगवद्भक्तिमार्गे अनुराग-अभिनिवेशाङ्कुरान् जनयति। महाकाव्यनिर्माणेनानेन तर्ककर्कशशास्त्रमार्गानुवर्तनासमर्था अपि उपकृताः सन्ति। अत एव रु॰वि॰काव्यस्य शैली प्रसादगुणो-पेता सुलभग्राह्या च वर्तते। अनायासमेव श्रीवादिराजतीर्थः सरलसुन्दरपदपुञ्जानि आकलयति काव्येऽस्मिन्। अतिरञ्जित-विलासवर्णनाभावेऽपि रु॰वि॰काव्ये शृङ्गारादिरसप्रवाहाः नैव कुण्ठिताः। एवं माघकाव्य-रु॰वि॰काव्ययोः वैलक्षण्यं वर्तते।

Rarest Archive

डा. बि. एन. के. शर्मा महाभागास्तु रु. वि. काव्यं माघकाव्यप्रतिस्पर्धितया कृतं इति कथां सन्देहास्पदां प्रतिपादयन् काव्ययोरेतयोः भावनासमुच्चयेऽसम्बद्धत्वात् तयोः परस्परं तुलना एव न घटते इति अभिप्रैति । (1)

---

(1) The story current about the Rukmiṇiśa Vijaya that it was composed by Vadiraja at Pune within a short space of nineteen days, to rival the Māgha Kāvya which was being acclaimed by the assembly of Pandits of Pune as the best amoung Samskrit Kavyas and was taken in procession on the back of an elephant by the orders of the King, seems to be apocryphal, as Pune was neither a capital nor had a King till the time of the Peshwas in 1714 (one hundred and fourleen years after the year of Bṛndavanapravesha of Vadiraja)!)

Apart from this, the theme and outlook of the two Mahakavyas of Magha and Vadiraja differ widely.....

Magha's work is Veerarasapradhana while Vadiraja's May be fittingly described as Bhaktirasa Pradhana and Dvaita Philosophy oriented..... The two Kavyas have no ideological affinity and cannot therefore be compared.

— Dharma Prakash - January 1982 pages. 17-18

Rarest Archiver

रुक्मिणीशविजयमहाकाव्यस्य विषये आधुनिकाः विद्वांसः 'भारतीयसंस्कृतसाहित्य' निर्मातारश्च प्रायः मूकीभावमाश्रिताः । यत्र कुत्रचित् उपलभ्यमानोऽपि तदुल्लेखः न सुष्ठु वर्तते ।[१] संस्कृतसाहित्याध्ययने पञ्चमहाकाव्यानामेव अध्ययनपरम्परा वर्तते इति रुक्मिणीश-विजयसदृशानि काव्यानि न नितरां प्रसिद्धिं गतानि इति प्रतिभाति ।

इदं रुक्मिणीशविजयकाव्यं बेलगांवनगरतः रामतत्त्वप्रकाशनमुद्रणालये मुद्रितमासीत् । कर्णाटभाषानुवादसहितं च विद्वान् के नरसिंहाचार्यैः इत्येतैः बेङ्गलूर नगरतः १९७५ तमे (क्रि.श.) वत्सरे प्रकाशितमास्ति ।

---

(೧) "ವಾದಿರಾಜರ ಎರಡು ಕೃತಿಗಳನ್ನು ಇಲ್ಲಿ ಉದಾಹರಿಸಬಹುದು. ಸೋದೆಮಠದ ಪೀಠಾಧಿಪತಿಗಳಾದ ಈ ದ್ವೈತಾಚಾರ್ಯರು ೧೬ನೇ ಶತಮಾನದ ಕೊನೆಯ ಭಾಗದಲ್ಲಿ ರುಕ್ಮಿಣೀಶವಿಜಯ ಮತ್ತು ತೀರ್ಥಪ್ರಬಂಧ ಎಂಬ ಎರಡು ಗ್ರಂಥಗಳನ್ನು ರಚಿಸಿದರು. ರುಕ್ಮಿಣೀಶವಿಜಯವು ಭಾಗವತದಲ್ಲಿನ ಶ್ರೀಕೃಷ್ಣಚರಿತ್ರೆಯನ್ನು ೨೧ ಸರ್ಗಗಳಲ್ಲಿ ವರ್ಣಿಸುತ್ತದೆ.

— ಕರ್ನಾಟಕದ ಪರಂಪರೆ ಭಾಗ ೨. ಪುಟ. ೧೫೧.

Rarest Archiver

chapter - 2

द्वितीयोऽध्यायः गद्यरुक्मिणीशविजयः

मुद्रितोऽयं द्वितीयाध्यायात्मकः भागः

पुस्तकग्रथनसौकर्याय ग्रन्थान्ते निबद्धोऽस्ति ।

Rarest Archive

Chapter-3

तृतीयोऽध्यायः रुक्मिणीशविजयकाव्यपरिचयः

महाकविश्रीवादिराजस्य देश-काल-कृति विचारानन्तरं एतत्प्रबन्ध विषयीभूतस्य रुक्मिणीशविजयमहाकाव्यस्य सामान्यतो ज्ञानं प्रसक्तं भवितुमर्हति।

वेदान्तिधुरन्धरस्य सन्यासिकुलमूर्धन्यस्य श्रीवादिराजस्य महाकाव्यनिर्माणमेव महत्त्वापादकं न भवेत् किन्तु कोमलमतीनां अपि आनुकूल्याय भगवद्भक्तिहेतुभूतं श्रीकृष्ण-चरित्रं कान्तासम्मितेन मार्गेण विस्तारितमत्र रुक्मिणीशविजयकाव्ये कविनाऽमुना।

पाण्डित्यैकप्रदर्शनपराणां विद्वत्कवीनां भारविमाघादीनां अनन्तरं संस्कृतसाहित्यसाम्राज्ये कृतावतारोऽयं कविः तन्मार्गं अननुसृत्य सुलभग्राह्यसुभगशैल्या महाकाव्यमेतन्निर्मितवान्।

कवेः कर्म काव्यम्। वर्णनानिपुणः कविः। वर्णना च प्रतिभानुप्राणिता भवेत्। नवनवोन्मेषशालिनी प्रज्ञा एव प्रतिभा।(1) यथोक्तं मम्मटेनापि 'काव्यं लोकोत्तरवर्णनानिपुणकविकर्म' इति।(2) काव्यनिर्माणे च प्रतिभया सह पाण्डित्यमपि अपेक्षितम्। अतः मम्मटः 'शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्। काव्यज्ञशिक्षया

---

(1) प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता।
तदनुप्राणनाजीवद्वर्णनानिपुणः कविः।
तस्य कर्म स्मृतं काव्यम् ..... भट्टतौतस्य काव्यकौतुके

(2) काव्यप्रकाशः 1/2 वृत्तिः

अभ्यासः इति हेतुस्तदुद्भवे' इति समुदितानां शक्ति-निपुणता-अभ्यासानां काव्यहेतुत्वं निजगाद। अस्मिंश्च कविवरे श्रीवादिराजे प्रतिभा-पाण्डित्ययोः समुचितं मेलनं तत्काव्यावलोकनेन स्पष्टीभवति। काव्यलक्षणं च प्राचीनैरर्वाचीनैश्चालङ्कारिकैर्बहुधा प्रोक्तमस्ति। 'शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली' इति काव्यादर्शे (१।१०) दण्डी काव्यशरीरं लक्षितवान्। अत्र च इष्टार्थस्यैव काव्यात्मत्वं सूचितम्। इष्टाश्च सरसमनोहरतया वर्णयितुमभिलषिताः ये अर्थाः — कविप्रतिभोल्लासविषयीभूताः सुन्दराः पदार्थाः।

भामहस्तु शब्दार्थौ सहितौ काव्यं (१।१६) इति भामहालङ्कारे सहितयोः शब्दार्थयोरेव काव्यत्वं उक्तवानस्ति। रुद्रटोऽपि स्वीये काव्यालङ्कारे 'ननु शब्दार्थौ काव्य'मिति तयोरेव काव्यतां आह। "काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते" इति काव्यालङ्कारसूत्रवृत्तौ (१।१) वामनोऽपि उभयनिष्ठमेव काव्यमाह। मम्मट[1]-हेमचन्द्र[2]-वाग्भट[3]-विद्यानाथ[4]-विद्याधरादयो[5] सालङ्कारिका अपि शब्दार्थोभयनिष्ठमेव काव्यशब्दप्रवृत्तिनिमित्तं प्रोक्तवन्तः।

---

(१) तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि। का॰ प्र॰ १।४

(२) अदोषौ सालङ्कारौ काव्यम्। काव्यानुशासनम्

(३) शब्दार्थौ निर्दोषौ सगुणौ प्रायः सालङ्कारौ च काव्यम्। वाग्भटालङ्कारः

(४) गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ। प्रतापरुद्रीयम्· काव्यप्रकरण

(५) शब्दार्थौ वपुरस्य तत्र विबुधैः आत्माभ्यधायि ध्वनिः। एकावली १।१२

Rarest Archiver

एतेषां सर्वेषामालङ्कारिकाणामभिप्रायेण काव्ये रमणीया अर्थाः शब्दाश्च अपेक्ष्यन्ते। काव्यफलोद्भावने शब्दार्थयोः द्वयोरपि आवश्यकतया तद्युगलमेव काव्यं भवितुमर्हति।

'रमणीयार्थप्रतिपादकः शब्दः काव्यं' इति जगन्नाथः वेदादिवत् शब्दस्यैव काव्यत्वं वदन् पूर्वोक्तानि लक्षणानि नूनं निराकर्तुं प्रयतितवान्। काव्यमुच्चैः पठ्यते काव्यादर्थोऽवगम्यते काव्यं श्रुतं अर्थो न ज्ञातः इत्यादिलोकव्यवहारेषु शब्दस्यैव प्राधान्यात् अर्थोपस्कृतः शब्द एव काव्यपदाभिधेयो भवतीति तन्मतम्। 'वाक्यं रसात्मकं काव्यं' इति विश्वनाथोऽपि साहित्यदर्पणे वाक्यस्य काव्यशरीरत्वं रसस्य आत्मत्वं निरूपितवान्।

पूर्वोक्तरीत्या काव्यप्रकाशकारः तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापीति शब्दार्थयुगलस्य काव्यत्वमुक्तवान्। तदनुसारिणस्तु काव्यं पठितं श्रुतं काव्यं बुद्धं काव्यमिति लोके उभयविधव्यवहारदर्शनात् काव्यपदप्रवृत्तिनिमित्तं शब्दार्थोभयपर्याप्तवृत्ति समर्थयन्ते। प्रयोगानुरोधेन च क्वचित् अर्थविशिष्टः शब्दः काव्यं भवति, क्वचिच्च शब्दविशिष्टः अर्थः काव्यं भवतीति तैः व्यवस्थितम्। शब्दालङ्कारप्रधानप्रबन्धेषु शब्दस्य काव्यत्वं भवति रसार्थादिप्रधानेषु प्रबन्धेषु शब्दविशिष्टः अर्थः काव्यं भवति। काव्यमुच्चैः पठ्यते इत्यत्र लक्षणया शब्दमात्रे काव्यपदं प्रवृत्तम्। काव्यं बुद्धं इत्यादिप्रयोगेषु च लक्षणया अर्थमात्रे काव्यपदं प्रवर्तते।

Rarest Archiver

कवेरस्य वादिराजस्य मतेऽपि काव्यं शब्दार्थयुगलं इति प्रतिभाति। द्वारकावर्णने एवमुक्तम् –

काव्योचितश्लोकमपेक्षमाणा विचारयन्तीह पदे पदेऽर्थान्।
विद्वज्जनानन्दकरान् मनोज्ञा बुधा वदान्याश्च पुरे मुरारेः॥ (१७।)

अत्र काव्योचितश्लोकेषु पदे पदेऽर्थस्ना रस्यविचारकविद्वद्वर्णनेन काव्ये शब्दस्य तथा अर्थस्य महत्वं वर्तते इति सूचितं भवति।

महाकाव्यस्वरूपं च तैरेव दण्डिभामहविश्वनाथादिभिः विस्तरेण निरूपितमास्ति।

भामहः – महाकाव्यं खलु सर्गबद्धम्। महाविस्तृतेऽस्मिन्महाकाव्ये महतां चरित्रं वर्णनीयम्। शब्दानां अर्थानां चाग्राम्यत्वं नूनं अपेक्षितम्। अलङ्कार-रस-लोकस्वभावादिभूषितमिदं महाकाव्यं सद्वस्त्वाश्रयं भवतु। मन्त्र-दूत-प्रयाण-युद्धादीनां वर्णनं अत्र भवेत्। अपि च महाकाव्ये नायकाभ्युदयः प्रदर्शनीयः। अन्यच्च, महाकाव्यं व्याख्यैकगम्यं नैव भवेत्। एवं समृद्धिमत् महाकाव्यपदवीमारोहति। (१)

---

(१) सर्गबन्धो महाकाव्यं महताच्च महच्च यत्।
अग्राम्यशब्दमर्थ्यं च सालङ्कारं सदाश्रयम्॥
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैश्च यत्।
पञ्चभिः सन्धिभिर्युक्तं नातिव्याख्येयमृद्धिमत्॥
चतुर्वर्गाभिधानेऽपि भूयसाऽर्थोपदेशकृत्।
युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक्॥ भामहालङ्कारः १/१८-२०

Rarest Archive

दण्डी अपि महाकाव्यलक्षणं विस्तरेण निगदितवान्। तदनुसारेणापि, महाकाव्यं सर्गबद्धं भवति। महाकाव्यस्य प्रारम्भः- आशिषा वा नमस्क्रियया वा वस्तुनिर्देशेन वा भवति। महाकाव्यस्य वस्तु च इतिहासोद्भूतं अथवा सज्जनाश्रितं अन्यद् भवेत्। भामहवत् अयमपि चतुर्वर्गप्रयोजकत्वं महाकाव्यस्य प्रोक्तवान्। नायकः चतुरः उदात्तश्च भवेदिति तन्मतम्। नगरार्णवशैलर्तुचन्द्रार्कोदयादीनां वर्णनानि काव्ये सविस्तरं भवेयुः। सर्गाश्चानतिविस्तीर्णाः अपेक्षिताः श्रव्यवृत्तैः सुसन्धिभिश्च उपेतं महाकाव्यं कल्पान्तरस्थायि भवति।(1)

(1) सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम्।
आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्॥
इतिहासकथोद्भूतं इतरद्वा सदाश्रयम्।
चतुर्वर्गफलायत्तं चतुरोदारनायकम्॥
नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः।
उद्यानसलिलक्रीडामधुपानरतोत्सवैः॥
विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः।
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि॥
अलङ्कृतमसंक्षिप्तं रसभावनिरन्तरम्।
सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः॥
सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जनम्।
काव्यं कल्पान्तरस्थायि जायते सदलङ्कृति॥ काव्यादर्शः 1/14-19

Rarest Archiver

साहित्यदर्पणे च विश्वनाथः महाकाव्यस्य पुनरपि परिष्कृतं लक्षणं दत्तवान्। तदनुसारेण सर्गबन्धात्मके महाकाव्ये सुरः, सद्वंशः क्षत्रियो वा धीरोदात्तगुणान्वितः नायको भवति। शृङ्गारवीरशान्तानां एकः मुख्यरसः, अन्ये तदङ्गतया निवेशनीया भवन्ति। सर्गाः एकवृत्तमयाः (सर्गान्ते वृत्तभेदश्च) विधन्ते। अनतिदीर्घा अष्टाधिकाः सर्गाः अपेक्षिताः। भाविसर्गस्य कथासूचनं सर्गान्ते भवति। महाकाव्यस्य च नाम कविनाम्ना वा नायकनाम्ना वा वर्ण्यवृत्तनाम्ना वा भवति। सन्ध्यासूर्यादिवर्णनानि च साङ्गोपाङ्गं यथासम्भवं करणीयानि वर्तन्ते। (1)

(1) सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः॥
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।
एकवंशभवा भूपाः कुलजा बहवोऽपि वा॥
शृङ्गारवीरशान्तानां एकोऽङ्गी रस इष्यते।
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः॥
इतिहासोद्भवं वृत्तं अन्यद्वा सज्जनाश्रयम्।
चत्वारस्तस्य वर्गास्स्युः तेष्वेकं च फलं भवेत्॥
आदौ नमस्क्रियाऽऽशीर्वा वस्तुनिर्देश एव वा।
क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम्॥
एकवृत्तमयैः पद्यैः अवसानेऽन्यवृत्तकैः।
नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह॥
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते।

Rarest Archive

इमानि च महाकाव्यलक्षणानि संस्कृतसाहित्ये महाकाव्यानां नैकेषां रचनानन्तरमेव विस्तारितानि । लक्ष्यग्रन्थानां निर्माणानन्तरमेव लक्षणग्रन्था निर्मिता वर्तन्ते । एतेषां सर्वेषामपि लक्षणानां अक्षरशः परिपालनं नोपपद्यते नोपलभ्यते च । अत एव दण्डिना 'न्यूनमप्यत्र यैः कैश्चित् अङ्गैः काव्यं न दुष्यति' इति लक्षणपरिपालने सङ्कोचोऽपि अभिहितः ।

एतेषां च लक्षणानां रुक्मिणीशविजये काव्ये प्रायः समन्वयः दृश्यते । कविरयं वादिराजतीर्थः आलङ्कारिकोक्तानि लक्षणानि अक्षरशः न परिपालयति । किन्तु इमानि लक्षणानि काव्येऽस्मिन् स्वभावेनैव लक्ष्यन्ते ।

महाकाव्यं सर्गबद्धं भवेत्; अष्टाधिकाः सर्गाश्च भवेयुः इत्यस्य लक्षणस्य निर्वाहः रुक्मिणीशविजयकाव्ये सुष्ठु दृश्यते एव ।

पूर्वपृष्ठतोऽनुवृत्तम्

सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ॥
सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः ।
प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः ॥
सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः ।
रणप्रयाणोपयममन्त्रपुत्रोदयादयः ॥
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह ।
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ॥
नामास्य सर्गोपादेयकथया सर्गनाम तु ॥ साहित्यदर्पणः ६/३१५-३२४

Rarest Archiver

एकोनविंशतिसर्गात्मके अस्मिन् काव्ये अनतिदीर्घाः सर्गाः विद्यन्ते। एकोनविंशे सर्गे ४१ श्लोकाः, दशमे सर्गे च ८४ श्लोकाश्च सन्ति।

महाकाव्यनियमेषु सुरोऽथवा धीरोदात्तगुणान्वितः सत्कुलोत्पन्नः क्षत्रियः नायकः कथितः। महाकविश्रीवादिराजः सर्वसुरोत्तमं श्रीकृष्णं स्वकाव्यस्य नायकं विधाय उक्तकाव्यनियमस्य उत्तमं उदाहरणं प्रदत्तवान्। प्रबन्धेऽस्मिन् पात्रचित्रणविवेचनावसरे षष्ठेऽध्याये विषयोऽयं प्रपञ्चितोऽस्ति।

महाकाव्येषु शृङ्गारवीरशान्तान्यतमः मुख्यो रसः अन्ये च तदङ्गभूततया निवेशनीयाः। रुक्मिणीशविजयमहाकाव्ये शृङ्गार एव मुख्यो रसः। अन्ये तदङ्गतया निवेशिताः। अङ्गरसेषु च वीररसस्य प्राधान्यं वर्तते ऽस्मिन् काव्ये।

महाकाव्यस्य ऐतिहासिकं वा सज्जनाश्रितं वा कथानकं काव्यशास्त्रसम्मतमस्ति। महाकविर्वादिराजः श्रीमद्भागवतादुद्धृतं श्रीकृष्णचरितं काव्योचिततया वर्णयन् काव्यमिदं अत्युपादेयं चकार।

चतुर्वर्गफलायत्तमिति महाकाव्यलक्षणेष्वन्यतमम्। पूर्वनिर्दिष्टरीत्या विश्वनाथस्तु धर्मार्थकाममोक्षेष्वन्यतमस्यैकस्य फलत्वं वक्ति। भामहमतेन विशेषतः अर्थोपदेशः फलत्वं भजते। प्रकृतमहाकाव्यं चतुर्वर्गफलप्रदमेव। यतिवरोऽयं कविः धर्मोपदेशं मोक्षमार्गोपदेशं च अधिकारिणां कृते सुष्ठु कृतवानेवास्ति महाकाव्येऽस्मिन्।

प्रबन्धेऽस्मिन् तत्र तत्र यथा इदं काव्यं धर्मादिमार्गप्रदर्शकमिति निरूपणं कृतमस्ति।

Rarest Archive

काव्यारम्भे आशीर्वादात्मकेन नमस्कारात्मकेन वस्तुनिर्देशात्मकेन वा मङ्गलेन भवितव्यं खलु। महाकाव्येऽस्मिन् आदितः षष्ठश्लोकपर्यन्तं आशीर्वादात्मकं नमस्कारात्मकं च मङ्गलमाचरितं वर्तते। प्रथमे पद्ये 'स्त्रीयानाममृतं प्रयच्छति स मां पायाद्गुणोद्यन्मणिः' इति काव्यनायकस्य प्रार्थनाऽस्ति। द्वितीयतृतीयपद्ययोः 'तं वाजिवक्त्रं भजे' 'श्राये हयमुखं' इति स्वोपास्यहयग्रीवदेवस्य भजनरूपं मङ्गलाचरणं कृतम्। चतुर्थे च शार्दूलविक्रीडिते 'अम्बां तां प्रणतोऽस्मि कृष्णरमणीं लम्बालकां रुक्मिणीं' इति काव्यनायिकायाः रुक्मिण्याः प्रणामः कृतः। पञ्चमे श्लोके च 'अस्माकहृत्सरसिजेऽस्तु स मध्वहंसः' इति स्वगुरोः श्रीमध्वाचार्यस्य प्रार्थना वर्तते। षष्ठे च पद्ये 'वाणीमुखं श्रेयसे' इति सरस्वत्याः वदनं श्रेयसे भूयादिति आशंसनं विहितमस्ति।

प्रतिसर्गं महाकाव्यस्य एकस्मिन् वृत्ते रचनीयम्। सर्गान्ते च वृत्तपरिवर्तनं करणीयम्। अयं च नियमः रुक्मिणीशविजयमहाकाव्ये सर्वथा न परिपालितोऽस्ति। कथावर्णनसौकर्याय सर्वेऽपि सर्गाः अत्र नानावृत्तमया एव विद्यन्ते। तत्रापि शार्दूलविक्रीडितवृत्तानां बाहुल्यं दृश्यते।

वर्णनानिपुणकवेः कर्म काव्यम्। महाकाव्येषु नगरार्णवादीनां वर्णनं वैशिष्ट्यमातनोति। रु. वि. काव्ये सहजसुन्दराणि वर्णनानि समुपलभ्यन्ते। यथाकथञ्चित् एतन्नियमनिर्वाहाय वर्णनानि नात्र प्रवेशितानि किन्तु कथासङ्गततया नायकोत्कर्षोपयोगितया च इमानि अत्र दृग्गोचरीभवन्ति। तानि च एवं वर्तन्ते —

Rarest Archiver

नगरवर्णनम्- द्वारकावर्णनम् - रु॰वि॰ १७/२६-७० श्लोकाः

समुद्रवर्णनम्- द्वारकासमुद्रवर्णनम्- रु॰वि॰ १६/५१-६० श्लोकाः

शैलवर्णनम् - गोवर्धनगिरिवर्णनम्- रु॰वि ६/१-१६ श्लोकाः

ऋतुवर्णनम् - वसन्तवर्णनम् - रु॰वि॰ ४/३६-४८ श्लोकाः

ग्रीष्मवर्णनम् - रु॰वि॰ ५/४-७, १५-१९

वर्षावर्णनम् - रु॰वि॰ ५/२०-२५

शरद्वर्णनम् - रु॰वि॰ ५/३६-३९

हेमन्तवर्णनम् - रु॰वि॰ ५/४०-४२

चन्द्रोदयवर्णनम् - ६/३४-४२ चन्द्रास्तवर्णनम् ८/३८

सूर्योदयवर्णनम् - २/९-१५, २२-२५ ४/५५, ११/२९, १४/२२

सूर्यास्तवर्णनम् - ४/५१, ६/२४-३१ ११/१५,१६, १४/१९

उद्यानक्रीडा सलिलक्रीडावर्णने - नवमे सर्गे सम्पूर्णम् ।

मधुपानवर्णनम् - ९/५० विप्रलम्भवर्णनम्- सप्तमसर्गसम्पूर्णम्,

अष्टमे सर्गे १-३७ श्लोकाः. सम्भोगशृङ्गारः ८/३८-६२ नवमे सर्गे च ।

विवाहवर्णनम् -१५/३०-६२. १६/१-३२(स्वयंवरवर्णनम्) ३३-६० (विवाहोत्सव-वर्णनम्) कुमारोदयवर्णनम् १/३१-४९, १९/२५-३२

मन्त्रवर्णनम् - १२/४०-६९ दूतवर्णनम्- ११/१७-२७

प्रयाणवर्णनम् - मूलमाधववनाय प्रयाणम् - १५/१५ - २५

युद्धवर्णनम् - मल्लयुद्धवर्णनम् - ११/४०-४९. कंसेन युद्धम्- ५०-६४. १३/३९-६४, १४/१-३०, १५/१-१२ उपनयनवर्णनम् -१२/१८-३०

श्रीकृष्णरुक्मिण्योः आपादमस्तकवर्णनम् -१८/१-६० १९/१-११

कवेः कथाया वा नायकस्य वा काव्यस्य नाम करणीयम्। अस्य च महाकाव्यस्य, नायकस्य श्रीकृष्णस्य नाम्ना काव्ये च कथितवृत्तान्तस्य च नाम्ना "रुक्मिणीशविजयः" इति काव्यनाम नितरां सङ्गच्छते । एवं लक्षणगणसमन्वितत्वात् रुक्मिणीशविजयः महाकाव्यं भवति। किञ्च प्रतिसर्गं अन्ते विद्यमानेनानेन शार्दूलविक्रीडितेन स्वयं कविरेव एतन्महाकाव्यं एवं परिचाययति –

रोम्णां हर्षणकारिणि श्रवणतः पापौघविध्वंसिनि
प्रेम्णा चिन्तयतां विचित्रविमलश्लाघ्यार्थसन्दायिनि ।
सञ्जाते भुवि रुक्मिणीशविजये सद्वादिराजोदिते
सञ्जातः सुरमण्डलीषु महितः सर्गोऽयमाद्यो मुदाम् ॥

(सर्गो द्वितीयो मुदाम् इत्यादि)

अत्र रोम्णां हर्षणकारिणि इति सद्यःपरनिर्वृतिः कथिता भवति।(1) श्रवणतः पापौघविध्वंसिनि इति च शिवेतरक्षतिः सूचिताऽस्ति। प्रेम्णा चिन्तयतां विचित्रविमलश्लाघ्यार्थसन्दायिनि इत्यनेन च महाकाव्यस्यास्य रसालङ्कारनिर्भरत्वं अभिहितं, अपि च चतुर्वर्ग-फलायत्तत्वमपि मुख्यतया प्रयोजनं उक्तं भवति। सुरमण्डलीषु महितः सर्गः इत्यनेन खलु महाकाव्यनायकस्य परमोत्कर्षः अभिव्यक्तो भवति । रुक्मिणीशविजये, सद्वादिराजोदिते इति कविकाव्यनामोल्लेखोऽपि कृतो वर्तते। एवमेव

(1) काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यःपरनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥ काव्यप्रकाशः १/२

Rarest Archiver

एकोनविंशे सर्गे काव्योपसंहारावसरे द्वारकावर्णनव्याजेन
महाकाव्यस्यास्य वैभवं कथितं वर्तते —

कृष्णस्योदयवर्णनैः सुचरितस्तोमस्तवैः सूक्तिभिः
सुश्लोकैः सुभगा रसैश्च विविधैः सानन्दसर्गैर्वृता ।
दुष्टागम्यनिजार्थतोषितखगा साऽस्याः कृतेर्वैखरी
बिभ्राणेव विभाति विठ्ठलपुरी विश्वकसुवर्णोज्ज्वला ॥(१९।३०)

अत्र कृष्णस्योदयवर्णनैरित्यनेन नायकोदयः निरूपितः । सुचरितस्तोमस्तवैरिति काव्यस्य सदाश्रयत्वं व्यवहार-प्रयोजकत्वं च अभिहिते । सानन्दसर्गैर्वृता इतीदं विशेषणं महाकाव्यस्यास्य सर्गबद्धत्वं स्पष्टीकरोति । निजार्थ-तोषितखगा इति आकाशगानां देवानामपि तोषप्रदार्थ-विशिष्टत्वं सूचितं भवति । अस्य च श्लोकस्य प्रामाणिकत्वे सहृदयाः वाचका एव प्रमाणम् ।

Rarest Archiver

Chapter-4

चतुर्थोऽध्यायः अलङ्कारसौन्दर्यम्

अलङ्कारान् विना काव्यमेव न भवतीति जयदेवस्य मतम्।[1] एतेषां च अलङ्काराणां रसोपकारकतया काव्येषु वैशिष्ट्यं वर्तते।[2] विश्वनाथानुसारेण अलङ्काराः अङ्गदादिवत् शब्दार्थयोः शोभातिशायिनः रसादीन् उपकुर्वन्तः धर्माः।[3] रसाद्युपकारकत्व-अभावे अनुप्रासोपमादिषु अलङ्कारशब्दप्रयोगः गौण एव भवति।

मम्मटः किल काव्यलक्षणकथने "सगुणावनलङ्कृती पुनः क्वापि"[4] इति शब्दार्थयोः विशेषणं दत्तवान्। किन्तु तत्र तद्वृत्तौ तेनैव विवृतं यत् "क्वापीत्यनेन एतदाह- यत् सर्वत्र सालङ्कारौ, क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिरिति" इति। अनया च वृत्त्या इदं स्पष्टीकृतं यत् सर्वत्रापि सालङ्कारत्वं भवेदेव, किन्तु अलङ्काराणां क्वचित् स्फुटत्वं क्वचिदस्फुटत्वमित्येव विवेकः। रु.वि. काव्ये शब्दालङ्काराणां अर्थालङ्काराणां च <u>रसपोषकाः प्रयोगाः समुपलभ्यन्ते। अलङ्काराः प्रयोक्तव्या इति</u>

(1) अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।
असौ न मन्यते कस्मात् अनुष्णमनलं कृती॥ -चन्द्रालोक 1.8

(2) उपकुर्वन्ति यं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलङ्काराः तेऽनुप्रासोपमादयः॥ काव्यप्रकाशः 8-2

(3) शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्॥ साहित्यदर्पणः 10.1.

Rarest Archive

कृत्वा तेषां प्रयोगः अत्र कविना नाकारि किन्तु अर्थपोषकतया तेऽत्र उपात्ता वर्तन्ते । अस्य च कवेः शैली रसप्रधाना।[1] तथापि अलङ्काराणां वैभवं रु.वि.काव्ये सुष्ठु दृश्यते । अर्थपोषकतया रसोपकारकतया चात्र प्रयुक्ताः अलङ्काराः सहृदयानां चेतांसि नूनं चमत्कारयन्ति ।

शब्दालङ्काराः

कविरयं वादिराजतीर्थः शब्दालङ्कारप्रियोऽपि वर्तते।[2] अत्रासमेव प्रासबद्धशब्दपुञ्जाः सञ्जायन्ते कवेः। अनुप्रासः, यमकं, वक्रोक्तिः, श्लेषः - इत्यादयः बहवः शब्दालङ्काराः अस्मिन् रु.वि.काव्ये दृश्यन्ते । यमक-चित्रबन्धादिभिः शब्दसौन्दर्यं यद् वर्धितं तेनैतत् स्पष्टं यत् शब्दालङ्कारचमत्कारवती तदानीन्तनकाव्यप्रणाली आसीदिति । तत्र तत्र अन्त्यानुप्रासादिभिः शोभितमिदं काव्यं गेयत्वमपि भजते ।

---

(१) मृदुसरसकवेः पुरः किमीड्या
कठिणपदप्रियकाव्यकारशीला ॥ रु.वि. ११/४४

(२) नानावृत्तं स्वयात्राक्रमपरिचितसुक्षेत्रमाहात्म्ययुक्तं
शब्दालङ्कारबद्धं शमलकुलहरश्लाघनीयार्थहृद्यम् ।
श्रीनाथप्रीतिहेतोः हयवदनकृपाम्भोधिसम्भूतरत्नं
चक्रे तीर्थप्रबन्धं बहुगुणभरितं वादिराजो यतीन्द्रः ॥
— वादिराजतीर्थः ; तीर्थप्रबन्धः ४।४६

Rarest Archiver

अनुप्रासः — रसाद्यनुगतत्वेन प्रकर्षेण न्यासः अनुप्रासः।(१) अयं चानुप्रासः, छेकानुप्रासः, वृत्त्यनुप्रासः, श्रुत्यनुप्रासः, अन्त्यानुप्रासः लाटानुप्रासश्च इति पञ्चधा विभक्तोऽस्ति।(२) मम्मटेन तु छेक-वृत्ति-लाटानुप्रासा एव लक्षिताः सन्ति।(३)

(अ) छेकानुप्रासः — स्वरूपतः क्रमतश्च व्यञ्जनसङ्घस्य सकृत्साम्यं छेकानुप्रासः।(४) रु.वि.काव्ये तत्र तत्र छेकानुप्रासः श्रुतिमनोहरः राजते।(५) कानिचिदुदाहरणानि —

श्राव्यकाव्यमार्गसमाप्तये। (१.३)

कञ्जाक्षी कुचभारभीरु विलसन्मध्यां क्वणत्कङ्कणाम्। (१.४)

विरिञ्चवैरिञ्चमुखामरेशाः। (१.१४)

धत्ते विधत्ते बलभद्रमातुः नित्यं स्वमातृत्वसुखं सुखात्मा।(१.२७)

कथं न पुत्रः शतपत्रनेत्रः। (१.४७)

अत्र सर्वत्र 'श्राव्यकाव्य' इत्यादिषु वकारयकारादिव्यञ्जनसमूहस्य स्वरूपतः क्रमतश्च साम्यात् छेकानुप्रासः।

---

(१) अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्।- विश्वनाथ. सा.द. १०/३

(२) अनुप्रासः पञ्चधा ततः। — तत्रैव १०.७

(३) वर्णसाम्यमनुप्रासः छेकवृत्तिगतो द्विधा - मम्मटः का.प्र. ९/७९
शाब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः -तत्रैव. ९/८१

(४) छेको व्यञ्जनसङ्घस्य सकृत्साम्यमनेकधा। सा.द. १०/३

(५) रु.वि. १/४८, १/५१, ५३, २/११, १७, २१. ३/३६, ६० ४/४१, ६१ ६/६५, ७/५०, ९/१७, ११/६ १२/१३, १६/८ इत्यादिषु।

Rarest Archiver

(आ) वृत्त्यनुप्रासः - अनेकव्यञ्जनानां स्वरूपत एव साम्यं, एकस्य वा व्यञ्जनस्य सकृद् वा असकृद् वा साम्यं वृत्त्यनुप्रासः। (1)

रु० वि० काव्ये सर्वेष्वपि सर्गेषु निसर्गोज्ज्वलः वृत्त्यनुप्रासः लोचनगोचरतामाचरति। अक्लिष्टोऽयं वृत्त्यनुप्रासः सर्वत्र रसपोषको भवति। अस्मिन् काव्ये हठादाकृष्टपदैर्वृत्त्यनुप्रासो न निर्मीयते किन्तु सहजसुन्दरः संशोभते।

कानिचिदुदाहरणानि —

हाराधारमनोहरोरसि लसन्नारीकराम्भोरुहं
ताराधीशमुखं विहारसरसोदारस्फुरद्वीक्षणम्।
स्मेरं चारुपरार्घ्यभूषणधरं कारुण्यवारांनिधिं
कारागारमिदं विहाय भजतं धाराधरश्यामलम्॥ (१/२१)

हयास्यनासापुटजातवातविघातधूताघपलालजातः।
मुनीशवागीशसुतः सुरम्यां हरेः कथां शंसति वादिराजः॥ (१/८)

लोलत्कङ्कणपाणिपद्मधृतया नीलोच्चलत्कुन्तला
बालाः स्रस्तदुकूलहारवलयाः मौलिस्खलन्मल्लिकाः।
लोलाङ्ग्यः क्वणदङ्घ्रिभूषणगणा इवाचलत्कुण्डला
व्यालोलं सह दोलया मृगदृशः कृत्वोपनिन्युः प्रियम्॥ (३/१४)

काचिच्चुचुम्बे कमलेक्षणस्य कारुण्यसिन्धोः करमब्जनेत्रा। (2)

(1) अनेकस्यैकधा साम्यं असकृद्वाऽप्यनेकधा।
एकस्य सकृदप्येषः वृत्त्यनुप्रास उच्यते॥ सा० द० १०/४

(2) इयं च कवर्गानुप्रासवती कार्णाटी वृत्तिरिति कथ्यते॥ सरस्वतीकण्ठाभरणम् २/७९

Rarest Archive

वैगुण्यं विविधोदयैर्विमृशतां वित्तैर्जगद्बाधयतां
वैरूप्यं निजतेजसा निरुपमैरङ्गैर्निराकारताम् ।
नीचैस्त्वं च निरस्य निर्मलधियां नित्यार्चया विट्ठलो
दिग्भिन्नाम्बरधीक्रियार्थमभवद् दिग्वस्त्रतां दीपयन् ॥ (३।२८)

अष्टप्रासशार्दूलविक्रीडितान्यपि रु॰वि॰का॰ये तत्र तत्र दृश्यन्ते ।(1)

उदाहरणम् —

अंसालम्बितपाणिपद्मललना संसक्तकपोलस्थली -
संसक्तोज्ज्वलगण्डमण्डलरुचं हंसासनाद्यैः स्तुतम् ।
वंशस्थापितमङ्गलाङ्गुलिदलं स्रंसद्विभूषावलिं
तं सेवे हरिनीलनीलममलं संसारसारं हरिम् ॥ (९।२०)(2)

अत्र च यत्यनन्तरद्वितीयो वर्णः सानुस्वारसकार इति अष्टप्रासश्लोकः ।
पादगतद्वितीयाक्षरानुप्रासोऽपि रु॰वि॰काव्ये बहुत्र दृश्यते
अयं च द्वितीयाक्षरप्रासः कर्णाटभाषापद्येषु दाससाहित्ये
नियमेनोपलभ्यते ।(3) दण्डिना तु अयं पादगतवृत्त्यनुप्रासत्वेन कथितः ।(4)

---

(1) रु॰वि॰ ९।२१, ५६ १४।६१, १४।३५, १६।१० इत्यादिषु

(2) अत्र च स्थाने स्थाने (गण्डमण्डल, मङ्गलाङ्गुलि) अनुप्रासविन्यासतः
स्तबकवान् अनुप्रासः । — क॰कं॰ २-९०

(3) कञ्चुगारर अङ्गडियन्दीदे कञ्चुहित्ताळेय प्रतिमेय नेरीहे ।
मिञ्चलेनुत बहुज्योतिगळने हाञ्चि वञ्चनेयिन्द धनपूजेमाडुवडु ॥-पुरन्दरदासस्य

(4) काव्यादर्शः १।५६

Rarest Archiver

कानिचिदुदाहरणानि —

निन्दां मुकुन्दस्य सकृन्निशम्य मन्दः पतेत् किं पुनरच्युतं तम् ।
निन्दन्निति ह्यालपतः शुकस्य किं द्विषतो मुक्तिरिति स्म हृद्यम् ॥ (२/५१)

अङ्कोज्झितेन्दुप्रतिमाननं तमङ्के समारोप्य मुहुर्मृजन्ती ।
पङ्के मनोज्ञाङ्गगतं क्षुधार्तशङ्का स्तनक्षीरमपाययत्सा ॥ (४/२)

रङ्गत्तरङ्गचयसङ्गतवायुना त्वं
माङ्गल्यदा किल समीपकुलालयानाम् ।
भृङ्गीरिवान्तिकवने तव सञ्चरन्तीः
सङ्गीतकृष्णचरिताः किमुपेक्षसे नः ॥ (७/३६)

रु॰वि॰काव्यकर्ता श्रीवादिराजतीर्थः कर्णाटभाषाकविरपि ।
अतः द्वितीयाक्षरप्रासः काव्येऽस्मिन् बहुत्र[1] उपलभ्यते ।

(३) श्रुत्यनुप्रासः — श्रुत्यनुप्रासः अनुप्रासेषु नायक इति भोजमतम्[2]।
विश्वनाथमते, अयं हि सहृदयानां अतीव श्रुतिसुखावहत्वात् श्रुत्यनुप्रासः । यत्र वर्णानां स्वरूपतः साम्याभावेऽपि कण्ठतात्वादि-उच्चारणस्थानतः साम्यं भवति तत्र श्रुत्यनुप्रासः । मम्मटेन तु

(१) रु॰वि॰ १/१४, २/६०, ३/८,१४, ६/३,२९,३५,४३,४४. ७/९,५६,६०, ८/४०
९/१-१३,३१-३४,४२,५३, १०/५२,६५, ११/३८,६४, १३/५८, १४/५४
१५/५७, १६/८,१०,१९,२८. १८/१७,५४,५५ इत्यादिषु

(२) प्रायेण श्रुत्यनुप्रासः तेष्वनुप्रासनायकः ।
सनाथैव हि वैदर्भी भाति तेन विचित्रिता ॥ .कण्ठ. २/७२

अयं श्रुत्यनुप्रासः(1) न निरूपितः। रुक्मिणी-काव्ये अयमनुप्रासः सुष्ठु शोभते ——

अपण्डितेनापि मयार्जितेयं मुकुन्दलीला कविकण्ठमाला।
अकौशलेन ग्रथितेति जातिप्रसूनमालां किमु सन्त्यजन्ति॥(1।9)

अस्मिन् पद्ये प्रथमपादे ते,न इति दन्त्यौ, पि म इति ओष्ठ्यौ, या जि य इति तालव्याः वर्तन्ते। न द ली ला इति दन्त्याः द्वितीये पादे। तृतीये पादे-च, अकौ इति कण्ठ्यौ ले न थि ते ति ति इति दन्त्यषौष्कन्यमेव। चतुर्थपादे सू न स न् त इति दन्त्याः, य ज इति तालव्यौ। एवं अयं श्रुत्यनुप्रासः।

यदा स पद्मासनसंस्थितोऽलं जजाप विद्यामितरैरवेद्याम्।
तदा प्रभृत्येव जगत्सु नूनं बभूव पद्मासनशब्दितोऽसौ॥(1/10)

अत्र प्रथमे पादे दा स इति दन्त्यौ पमकारौ ओष्ठ्यौ सन सं स थि तो ल इति दन्त्य सप्तकम्। तृतीये पादे-च, तदा इति दन्त्यौ प्र भृ इति ओष्ठ्यौ त सू न् नं इति दन्त्यचतुष्टयम्। चतुर्थे बभूव इत्यत्र बवयोरभेदन्यायेन बभूव प म इति ओष्ठ्यपञ्चकं, स न दि तो सौ दन्त्यपञ्चकं इति श्रुत्यनुप्रासः।(2)

---

(1) उच्चार्यत्वात् यदैकत्र स्थाने तालुरदादिके।
साद्दृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते॥ सा॰द॰ 10।5

(2) अन्ये श्रुत्यनुप्रासश्लोकाः – 1।22, 34

Rarest Archiver

(ई) अन्त्यानुप्रासः - यत्र पादान्ते आद्येन स्वरेण सह यथावस्थं व्यञ्जनं आवर्त्यते तत्रान्त्यानुप्रासः[१] अन्त्यप्रासेषु वा यमकेषु वा बवयोः शसयोः डलयोः सविसर्गाविसर्गयोर्वा अभेदो[२] स्वीकृतो दृश्यते रु.वि.काव्येऽपि। उदाहरणानि[३] —

परिस्फुरन्नूपुरकङ्कणोज्ज्वला लसन्नितम्बार्पितरत्नमेखला।
दृगन्तसंस्तम्भितमानिमण्डला तदोर्वशीवास्ति विलोलकुण्डला॥(२/२४)

मण्डलीकृतमनोरमरामाकुण्डलद्युतिसुदीपितसीमा।
गण्डचुम्बनकुतूहलकामाखण्डिताननसरोरुहधामा॥ (९/१)

स जयति यदुनाथः श्राविताने कगीतः
करधृतवरवेणुः कामिनीकामधेनुः।
सुललितवनमालः सुन्दरापाङ्गलीलः
सजलजलदमूर्तिः साधुभिर्गीतकीर्तिः॥ (६/५०)

तृतीये श्लोकेऽत्र पादमध्यान्त्यप्रासो वर्तते।

---

(१) व्यञ्जनं चेद्यथावस्थं सहाद्येन स्वरेण तु।
आवर्त्यतेऽन्त्ययोज्यत्वात् अन्त्यानुप्रास एव तत्॥ सा.द. १०/५

(२) यमकादौ भवेदैक्यं डलयोः रलयोः बवोः।
शषयोर्नणयोश्चान्ते सविसर्गाविसर्गयोः।
सबिन्दुकाबिन्दुकयोः स्यादभेदप्रकल्पनम्॥ तत्रैव १०/८

(३) उदाहरणान्तराणि - २/६०, ३/१०, २०, ५/४२, ४३, ६/५०, ७/११, ५१, ५२, ९/१-१४, १०/३८, ४२, ११/८, १३/५८, १५/११, १८ इत्यादयः।

Rarest Archiver

(५) लाटानुप्रासः - "शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्यमात्रतः" (१) इति लक्षणात् तात्पर्यभेदे सति शब्दार्थपौनरुक्त्यं लाटानुप्रासः।

धर्मो न योऽयं श्रुतिसङ्गतास्य. धर्मो नयोऽयं श्रुतिसङ्गतास्य।
माऽन्यं भजध्वं रमणं विहाय मान्यं भजामो रमणं विहाय॥ (६/६२)

अत्र रमणं विहाय इत्यादिषु तात्पर्यभेदे सति शब्दार्थयोः पौनरुक्त्यं अस्तीति लाटानुप्रासः।

(२) यमकम्

यम्यते गुण्यते आवर्त्यते पदमक्षरं वेति यमः। यम एव यमकम्। एवं च यत्र पदानां अक्षराणां वा आवृत्तिर्भवति तत्र यमकं सम्भवति। (२) भामहः श्रवणे समानानां अर्थे भिन्नानां वर्णानां पुनर्वादं यमकं निगदितवान्। (३) भामहेन यमकस्य परिष्कृतं लक्षणं दत्तम्। एतदपि तेनैवोक्तं यत् यमकेषु प्रसिद्धाः शब्दाः भवेयुः, पदसन्धयः सुश्लिष्टा भवेयुः ओजःप्रसादादयश्च भवेयुः इति। (४) वर्णसङ्घातस्य - स्वरव्यञ्जन समूहस्य - आवृत्तिः यमकमिति दण्डिनो मतम्। (५) रुद्रटोऽपि स्वीये

---

(१) विश्वनाथः सा॰ द॰ १०/६

(२) शब्दाभ्यासस्तु यमकम्। भरतः, नाट्यशास्त्रम् १६/५८

(३) तुल्यश्रुतीनां भिन्नानां अभिधेयैः परस्परम्।
वर्णानां यः पुनर्वादो, यमकं तन्निगद्यते॥ भामहः काव्यालङ्कारः २/१७

(४) तत्रैव २/१८ (५) काव्यादर्शः १/६१

Rarest Archiver

काव्यालङ्कारे विस्तरशः यमकं निरूपयित्वा एतादृयमके कविभिः कृतप्रयत्नैर्भवितव्यमित्युक्तवान् ।[1] रु.वि.काव्ये नानाविधानां व्यपेतानां अव्यपेतानां पादगतानां पादैकदेशगतानां च यमकानां प्रयोगाः समुपलभ्यन्ते । वामनोक्तरीत्या शृङ्खलादिभिः भङ्गैः यमकस्य उत्कर्षः समवलोक्यते ।

(अ) प्रथमपादः तृतीयपादे यम्यते चेत्तदा सन्दंशयमकम् ।[2]

कामिनी इति जितापद् यां निनाय सुखयन् सुखी ।
कामि-नीति-जिता पद्यां कालिदासाय सोज्झिता ॥ (७/५२)

(आ) प्रथमपादः चतुर्थपादे यम्यते चेत्तदा आवृत्तिः ।

करोऽतिकार्यो दधिमन्थसङ्गमपि स्म कर्तुं यततेन तेन ।
त्वदङ्घ्रिजुष्टेरपरं मुरारे करोति काऽऽर्या ऽदधिमन्थसङ्ग ॥ (८/११)
मुदावहा भासुरगीतशोभा बिभर्ति वृन्दावनरासलीला ।
हरेश्च मूर्तिः शतशोऽङ्गनाल्यामुदावहाभा सुरगीतशोभा ॥ (८/६३)

(इ) द्वितीयः पादः चतुर्थे पादे यम्यते चेत्तदा सन्दष्टकं यमकम् ।[3]

कान्तोपमानेन दिवाऽपि कुट्यामन्तर्हितं कालभत्तेजसा यम् ।
स्वान्ते बिभर्मीश विनेह तं त्वामन्तः हितं का लभतेऽज सायम् ॥ (७/५६)

---

(१) इति यमकमशेषं सम्यगालोचयद्भिः सुकविभिरभियुक्तैर्वस्तु चौचित्यविद्भिः ।
सुविहितपदभङ्गं सुप्रसिद्धाभिधानं तदनु विरचनीयं सर्गबन्धेषु भूम्ना ॥ रुद्रट. ३/५९

(२) सन्दंशान्तराणि – ७/५९, ८/५,८, २६, २७, १४/४९

(३) अन्यत्रापि – रु.वि. ८/१२ १७/५८

Rarest Archiver

(ई) प्रथमपादः त्रिष्वपि पादेषु यम्यते चेत्तदा पङ्क्तिः —

रमानयाहङ्कृतिदूरवृत्तिरमानयाहङ्कृतिदूरवृत्तिः।
रमानयाहङ्कृतिदूरवृत्तिरमानयाहङ्कृतिदूरवृत्तिः॥ (७/६१)

मनसामहितस्वरमित्रहृदा मनसा महितस्वरमित्रहृदा।
मनसा महितस्वरमित्रहृदा मनसा महितस्वरमित्रहृदा॥ (८/४)

(उ) प्रथमपादः चतुर्थे, द्वितीयपादः तृतीये यम्यते चेत्तदा परिवृत्तिः —

वृणीत दासी यदि नो वनेनः कवीश गौः इश हृताऽऽत्मवृत्ता।
कवीश गौरीश हृत आत्मवृत्तो ऋणी तदाऽसीर्यदि नोऽवनेनः॥ (८/६)

(ऊ) प्रथमो द्वितीये, तृतीयश्चतुर्थे आवृत्तश्चेत् युग्मकं भवति। (1)

विलासमस्यां वरसिद्धसत्कृता विला समस्याम्बरसिद्धसत्कृता।
ततान वीणाध्वनिगानविद्यया ऽऽतता नवीनाध्वनि गानविद् यया॥ (८/५७)

(ए) पादचतुष्टयगतं अव्यपेतं पादादियमकम् — (2)

देवेश देवेऽशनिवर्षहेतौ पातासि पातासितघातकल्पे।
दावेऽष्टद आवेष्टयतीह योऽभ्रमाँ नः समानः स निजे त्यजाघ॥ (८/२)

(ऐ) पादचतुष्टयगतं अव्यपेतं पादादियमकम् (3) —

मधुपालिरीश सरसा सरसामुपकण्ठमेत्य मुदिता मुदिता।
अनुयाति पश्य सभया सभयामनुनीय चालिमधुना मधुना॥ (७/५८)

---

(1) रु॰वि॰ १७/६५, ६६

(2) रु॰वि॰ १०/२६, ३२, १७/५७, ६२

(3) रु॰वि॰ ७/६३, ८/१४, २०-२४, २८-३१, ३३-३७, ४५

Rarest Archiver

(ओ) पादचतुष्टयगतं व्यपेतं पादान्तयमकम् [1] —

विरहवह्निबला मलयानिला जगदिवाखिलधाम लयानिलाः।
चलति वीक्ष्य भियामलयानिला बत तुदन्तितरामलयानिलाः॥ (८/१)

(औ) व्यपेतं पादादियमकम् — [2]

न वहति हृदि तोषं वैरवध्वाः कपोले
नव-हृतिमवलोक्य श्वासविश्रान्तवाक्या।
समुदित-रवि दृष्टि-व्रीड विभ्रान्तनेत्रा
समुत इतरवराङ्गी भावमाविष्करोति॥ (१७/६४)

(अं) व्यपेतं पादान्त यमकम् [3] —

अलक्षयन्ती स्मरतातमेनं हृदाऽऽत्तखेदा स्मरता तमेनम्।
जगाद सौम्यं नय नातिदूरं विधे न कुर्या नयनातिदूरम्॥ (७/७५)

(अः) व्यपेतं पादान्तयमकम् —

ये पुरारिरिपुणाऽन्ये पुरा सङ्गताम्रनयनाः स्म सङ्गताः।
कान्तया सह वरालकान्तया तेऽपि रेचकभृतोऽग्र तेपिरे॥ (१७/५३)

(क) पादचतुष्टयगतं व्यपेतं आद्यन्तयमकम् —

समायतेयं न शरैः समायते समायते स्वेषु किलासमायते।
समाय तेनाङ्ग नमः समायते स मा यतेर्वर्त्म भजासमाय ते॥ (८/१०)

---

(१) अन्यच्च ८/२

(२) उदाहरणान्तराणि १४/४०, ४१, १७/६७, ८/१५, ३२

(३) ८/१२, १६, १५, १९. ९/३, १०, १३. १७/५४, ५६, ५९

Rarest Archiver

(ख) शृङ्खलायमकम् -

इत्थं गिरा कापि तमर्चयन्ती यं तीव्रयोगैर्मुनयोऽगुरन्ते ।
रन्तेति मत्वा गलिताम्हारा हा राम कृष्णेत्यपतच्छुचाऽर्ता ॥(७।६४)

धन्याऽबला सा विभवे भवेद्या वेधाय भूम्ने सुकृताय साम्ना ।
साम्नायशास्त्रोदितधर्मपात्रे पात्रेषु दत्वामपदाय दत्ता ॥ (१४।३९)

(ग) -चतुर्थपादगतं अव्यपेतं पादमध्ययमकम् - रु०वि काव्ये प्रायः सर्वेषु द्रुतविलम्बितवृत्तेषु[1] इदं यमकं विद्यते । इदमत्रोदाहरणम् -

सजलशीकरदक्षिणवायुना कुसुमसञ्चयकम्पनचुञ्चुना ।
व्यजनपाणितलेव तमन्वगात् वनरमा नरमानसमण्डनम् ॥ (४।३८)

(घ) असमपादगतं अव्यपेतं पादादियमकम् -

स ततः सततध्यानशुद्धवृद्धजनाश्रिताम् ।
मधुरां मधुरां कर्तुं गमनायोपचक्रमे ॥ (१०।३३)

(ङ) असमपादगतं व्यपेतं पादादियमकम् -

अङ्गनालमलकावलिभृङ्गं मन्दहासमधु मन्मथबाणम् ।
अङ्गनाऽलममलं मुखपद्मं बिभ्रती वशयितुं जगदस्याम् ॥(१७।५५)

(च) समपादगतं व्यपेतं यमकम् -

विजने वने स्वजनमुत्सृजतस्तवनागमं यदि मनो मनुते ।
विनिहंसि हंसनुतपुण्ययशास्तवनागमं परम तर्हि तव ॥ (८।२५)

---

(१) -चतुर्थसर्गे श्लोकाः ३८-४४, ४७-५७, ५९ पञ्चमसर्गे -२७
सप्तदशेसर्गे -१-२४

(छ) प्रतिलोमानुलोमपादयमकम् –

सायं हीन नहीयं मा मारतात तता रमा ।

क्षीणा देववदेणाक्षी चाररराज जरारुचा ॥ (१।४७)

(ज) अक्षरयमकम् –

ननाम नारायणमादिपूरुषं ननर्त नव्योत्सवजातसम्भ्रमः ।

ननाद नानादुरितौघमर्दयन् ननन्द नन्दस्य तपःफलोदयम् ॥ (१०/२४)

(३) वक्रोक्तिः

वाचामलङ्कारार्थं वक्रोक्तिः इष्टा इति भामहस्य मतम् ।[1] अपि च वक्रोक्तौ कविना यत्नः कार्यः इति अपि तेनैव अभिहितमस्ति ।[2] न केवलमेतत्, वक्रोक्त्यभावात् हेतुः, सूक्ष्मः, लेशः इत्येतेषु अलङ्कारत्वमेव नैव घटनाकोटिमाटीकते भामहमतानुसारेण ।[3]

दण्डिनस्तु मते समस्तं वाङ्मयं द्विधाभिन्नं स्वभावोक्तिः वक्रोक्तिश्चेति ।[4]

---

(१) वक्राभिधेयशब्दोक्तिः इष्टा वाचामलङ्कृतिः – भामहालङ्कारः १।३६

(२) सैषा सर्वत्र वक्रोक्तिः अनयार्थो विभाव्यते ।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ॥ तत्रैव २।८५

(३) हेतुश्च सूक्ष्मो लेशोऽथ नालङ्कारतया मतः ।
समुदायाभिधानस्य वक्रोक्त्यनभिधानतः ॥
गतोऽस्तमर्को भातीन्दुः यान्ति वासाय पक्षिणः ।
इत्येवमादि किं काव्यं वार्तामेनां प्रचक्षते ॥ तत्रैव २।८६-८७

(४) भिन्नं द्विधा स्वभावोक्तिः वक्रोक्तिश्चेति वाङ्मयम् । काव्यादर्शः २।३६३

Rarest Archiver

स्वभावोक्तिरपि तन्मते अलङ्कारत्वं भजते।[1] स्वभावोक्तावविद्यमानः अतिशयः यत्र वर्तते तत्र वक्रोक्तिर्भवति।

इत्थं च दण्डिभामहयोर्मते वक्रोक्तिशब्दस्य व्यापकः अर्थः आसीत्। क्रमेण चार्थसङ्कोचः सञ्जातः। रुद्रटः काव्यालङ्कारे वक्रोक्तिं शब्दालङ्कारत्वेन निरूपितवान्।[2] यत्र अन्यार्थं वाक्यं अन्यथा योज्यते सा वक्रोक्तिः।[3] सा च द्विविधा। श्लेष-वक्रोक्तिः, काकुवक्रोक्तिश्चेति। श्लेषोऽपि द्विविधः। सभङ्ग-श्लेषः अभङ्गश्लेषश्चेति। वक्रोक्तेः इमे त्रयोऽपि प्रकाराः रु॰ वि॰ काव्ये उपलभ्यन्ते —

(अ) धर्मो न वोऽयं श्रुतिसङ्गताक्ष्यः

धर्मो नवोऽयं श्रुतिसङ्गताक्ष्यः।
माऽन्यं भजध्वं रमणं विहाय
मान्यं भजामो रमणं विहाय॥ (६।६२)

वेणुगानं श्रुत्वा आगताः गोपाङ्गनाः प्रति कृष्णः प्राह — हे श्रुतिसङ्गताक्ष्यः गोप्यः अयं परपुरुषपरिग्रहः वः युष्माकं

(1) काव्यादर्शः २।८

(2) रुद्रटकाव्यालङ्कारः २।१२

(3) यदुक्तमन्यथा वाक्यं अन्यथाऽन्येन योज्यते।
श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिः तथा द्विधा॥ का॰ प्र॰ ९।७८

धर्मः न इति । तं प्रति ता ऊचुः - अयं नवः नूतनः धर्म इति।
मान्यं इत्यत्रापि मा अन्यं इति पदच्छेदः ।

(आ) चीरहरणे गोपी-कृष्णसंवादः —

देहीश, अम्बरं अस्मदीयं, अबलाः दत्तं, क्व तद्वर्तते ?

मध्ये वः प्रतिभाति, तर्हि न कथं ~~सन्दृश्यतेऽस्मद्दृशा~~ १.(५/४८)

अत्र अम्बरशब्दस्य वस्त्रार्थमभिप्रेत्य गोपीभिः पृष्टम्।
कृष्णेन तु अम्बरशब्दः आकाशार्थकः अङ्गीकृतः। तासां मध्यस्य
अतिसूक्ष्मत्वात् आकाशसाम्यं कृत्वा मया दत्तं अम्बरं
(आकाशः) भवतीनां मध्ये वर्तते इत्यभिहितम्। एवं चात्र
अभङ्गश्लेषवक्रोक्तिः ।

(इ) कृष्णविरहितानां गोपीनां संवादः —

गोप्यः काञ्चित्प्रति —

रमणि रुचिररूपः किं नु दूरे तवासीत् ?

सा - नहि नहि; मम पुण्यं तन्वि दूरे प्रयातम् ।

ताः - बत यदुकुलनाथः स त्वया मृग्यते किम् ?

सा - न हि सखि; सहनीतं चित्तमन्वेषयामि ।

अत्र काका कृष्णः मम दूरे आसीत्, तमेवान्विष्यामीति
लभ्यते । अतः काकुवक्रोक्तिरियम्।

प्रदीपकारमते च इयं वक्रोक्तिः न केवलं वाकोवाक्य-
मात्रनिर्वाह्या किन्तु स्वतोऽपि अन्योक्तस्य अन्यथायोजनमात्रे

भवति-न्यायसाम्यादेव । तथाविधाः वक्रोक्तयः अपि रु॰वि॰काव्ये दृश्यन्ते । उदाहरणम् —

शस्त्रास्त्रप्रकरेषु शार्ङ्गधरतो भेदं द्विपाश्वद्विपद्-
वर्गेष्वात्तशरासनात् मुरभिदः निर्भिन्नगात्रेषु च ।
मृत्योर्लोकमितेषु तं स्वजनतः कायान्मिथः खण्डिते
हस्तादौ युधि साधयन्स विदधे व्यक्तं भिदां पञ्चकम् ॥(७३/६२)

अत्र युद्धे श्रीकृष्णमुक्तः बाणः वैरिणां शस्त्रास्त्रेषु भेदं असाधयत् इति प्रथमतः विदारणात्मकः भेदः उपात्तः । भिदां पञ्चकमित्यत्र च श्लेषेण अन्योन्याभावरूपः अर्थः गृहीतः । अतोऽत्र वक्रोक्तिः ।

(४) श्लेषः

यत्र श्लिष्टैः पदैः अनेके अर्थाः अभिधीयन्ते तत्र श्लेषः भवति[1] । परिवृत्त्यसहेन शब्देन यदा अनेकार्थाभिधानं तदा शब्दश्लेषः भवति । रु॰वि॰काव्ये सप्तदशे सर्गे प्रारम्भतः चतुर्विंशतितम-श्लोकपर्यन्तं शब्दश्लेषः नितरां चमत्कारावहः दृश्यते । तत्र प्रतिश्लोकं श्रीकृष्णस्य वर्णनं एकार्थेन, मत्स्यकूर्मादिवर्णनं च अन्यार्थेन क्रियते ।

१) इदं तावत् मूलरूपनारायणवर्णनं, श्रीकृष्णवर्णनं च

स्वभजकाब्जकुलोदयहेतवे जलनिधौ वरभोगिनिकेतने ।
भवमहानलमुक्तभयानुगच्छविपदेऽविपदे लसते नमः ॥(१७/१)

---

(१) श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते । सा॰द॰ १०।११

Rarest Archiver

नारायणपक्षे – स्वभजकः अब्जः ब्रह्मा तस्य कुलं ऋजुगणः तदुदयहेतवे । भव-महानलः संसाराग्निः तस्मात् मुक्तभयाः विमुक्ताः ते एव अनुगाः तेषां छविः तस्याः पदे स्थाने जलनिधौ, वरभोगी शेषः स एव निकेतनं तस्मिन् लसते अविपदे विपद्रहिताय नारायणाय नमः ।

श्रीकृष्णपक्षे – स्वभजकः अब्जः-चन्द्रः तस्य कुलं सोमवंशः तदुदयहेतवे । जलनिधौ द्वारावतीसमुद्रे वरभोगिनां परमसुखिनां निकेतने स्थानभूते । भवस्य शिवस्य महानलः द्वारकानाशाय प्रयुक्तः कृत्यारूपः अग्निः, तस्मान्मुक्तभयाः ये अनुगाः यादवाः तेषां छविपदे कान्तिस्थाने द्वारावतीनगरे लसते शोभमानाय विपदे, विः पक्षी गरुडः तस्मिन्पदौ चरणौ यस्य सः तस्मै गरुडवाहनाय श्रीकृष्णाय नमः ।

२. मत्स्यावतारवर्णनम् –

भुवनवास्यनिशं मनुसंस्तुतो विधिविरोधिविनाशकृदन्वहम् ।
अनिमिषप्रभुरागमहर्षदो निजवशो जवशोभितसागरः ॥ (१७।१९)

मत्स्यपक्षे – अनिशं भुवने जले वासः अस्यास्तीति भुवनवासी । अन्वहं ब्रह्मणः दिने दिने वैवस्वतमनुना संस्तुता । विधेः विरोधिनः वेदापहारिदैत्यस्य विनाशकृत् । आगमानां वेदानां हर्षदः । जवशोभितसागरः । अनिमिषाणां मत्स्यानां प्रभुः मत्स्यावतारो हरिः निजवशो वर्तते ।

Rarest Archive

कृष्णपक्षे - अनिशं भुवनेषु लोकेषु वासः अस्यास्तीति भुवनवासी। अन्वहं प्रतिदिनं मनुना कृष्णमन्त्रेण संस्तुतः। विधेः राजसूयादि-कर्मानुष्ठानस्य विरोधिनः जरासन्धादयः तेषां विनाशकृत्। स्वागमेन पाण्डवानां हर्षदः। जवेन द्वारवतीं प्रत्यागमनवेगेन क्षोभितसागरः। अनिमिषाणां देवानां प्रभुः श्रीकृष्णः निजवशोऽस्ति। उपमा-रूपक-अर्थान्तरन्यासादिष्वपि श्लेषः तत्र तत्र दृश्यते। अत्र शब्दश्लेषः सुलभग्राह्यो वर्तते।

(५) चित्रम्

रु.वि.काव्ये कवेः पाण्डित्यप्रदर्शकाः चित्रबन्धाः अपि उपलभ्यन्ते।

एकाक्षरः - नानाननानन्नूनं नैनोऽनन्नेऽन्निनां नुनौः।

नानान्ननुन्नेनाने न नोनो नेन ननो ननु ॥(८/३)

द्व्यक्षरः - सारसासारसंसारे ससारसुरसूरसम्।

सुसारसरसारोरः सरसी सरसारसी ॥(७/५४)

द्व्यक्षरपादः - रासि सारोऽसि सुरसमीहि हे महि मामिह।

दासीं ससादां सदसि वेदवादविदो वद ॥(७/५७)

षडर-चक्रबन्धः -(७९/३६) अस्मिन् पद्ये चक्रबन्धोद्धृते सति वादिराजकृतिः, रुक्मिणीशजय इति लभ्यते। (चित्रोद्धारः प्रदत्तः)

द्वादशदलपद्मबन्धः -(७७/६९) श्लोकेऽस्मिन् चित्रे चित्रिते वादिराज-रचितः रुक्मिणीशविजय इति कविकाव्यनाम उपलभ्यते।

एवं च शब्दालङ्कारेषु कविरयं सिद्धहस्तः, रसानुकूलशब्दप्रयोगे विद्वत्प्रियचित्रबन्धे च चातुरीं प्रदर्शितवान् रु.वि.काव्येऽस्मिन्।

Rarest Archiver



षडरचक्रबन्धः

अत्र तृतीयमण्डले 'रुग्मिणीशजयः' इति काव्यनाम, अष्टमे मण्डले च 'वादिराजकृतिः' इति कविनाम च उपलभ्येते ।



द्वादशदलपद्मबन्धः

अत्र प्रथमदलषट्के षष्ठदलान्तिमतकार सहिततया यत्याद्यक्षरेषु 'वादिराजरचितः' इति लभ्यते । तथा द्वितीयषट्के 'रुग्मिणीशविजयः' इति च लभ्यते ।

Rarest Archiver

अर्थालङ्काराः

काव्येषु अर्थालङ्कारा अपि शोभातिशायिनो भवन्ति। भाषासौन्दर्यवर्धनार्थमपि अलङ्कारा अपेक्षिताः। रसोपकारितया अलङ्काराणां महत्वमस्तीति एतदध्यायप्रारम्भे एव अभिहितं खलु। रुद्रटेन अर्थालङ्काराणां चातुर्विध्यमङ्गीकृतम्।(1) मम्मटस्तु एतादृशं विभागनिर्देशं विनैव अर्थालङ्कारान् विवृणुते।

उपमालङ्कारः —

उपमाद्यलङ्काराणां प्रयोगेण कवेः प्रतिभया सह पाण्डित्यमपि प्रदर्शितं भवति। उपमा च अर्थालङ्कारेषु प्राथम्यं प्राधान्यं च भजते। राजशेखरः उपमां अलङ्कारशिरोरत्नं मनुते।(2) अप्पय्यदीक्षितस्तु उपमाज्ञानात् सर्वमपि अलङ्कारजातं ज्ञातं भवति- ब्रह्मज्ञानात् सर्वज्ञानवत्- इति निरणयत्।(3)

उपमानोपमेययोः समानधर्मेण सम्बन्धः उपमा।(4)

---

(1) अर्थस्यालङ्काराः वास्तव-औपम्य-अतिशय-श्लेषाः।
एषामेव विशेषा अन्ये तु भवन्ति निःशेषाः॥ काव्यालङ्कारः ७/९

(2) अलङ्कारशिरोरत्नं सर्वस्वं काव्यसम्पदाम्।
उपमा कविवंशस्य मातेवेति मतिर्मम॥ काव्यमीमांसा

(3) तदिदं चित्रं विश्वं ब्रह्मज्ञानादिवोपमाज्ञानात्।
ज्ञातं भवतीत्यादौ निरूप्यते निखिलभेदसहिता सा॥ चित्रमीमांसा.पृ.३५.

(4) साधर्म्यमुपमा भेदे (का.प्र. १०/१) इत्यस्य वृत्तिः।

Rarest Archive

जगन्नाथेन उपमा एवं लक्षिता- सादृश्यं सुन्दरं वाक्यार्थोपस्कारं उपमालङ्कृतिः इति ।[1]

रु॰वि॰महाकाव्ये वाक्यार्थोपस्कारकान् सुन्दरान् उपमालङ्कारान् बहुधा प्रयुक्तवान् श्रीवादिराजतीर्थः ।

(अ) यः सन्धिमुख्यामलनीतिकालमज्ञान्यविज्ञाय रणं विधत्ते ।
षाण्णिग्रहाणां समयानभिज्ञवादीव संसत्सु स यात्यकीर्तिम् ॥ (१२।८६)

सन्धिमुख्यान् षड्गुणान्[2] अज्ञात्वा अविचार्य राजा रणं विधत्ते चेत् सः षाण्णिग्रहस्थानानां[3] समयानभिज्ञः वादीव अकीर्तिं याति । अत्र कवेः शास्त्रपाण्डित्यमपि प्रकटितमस्ति ।

(आ) कठोरगिरमुत्सृज्य वृणोत्यपरामिन्दिरा ।
घनं पुरोस्तनितात् विहायेव तटिद्दिशः ॥ (१२।६२)

स्तनितात्पुरा एव यथा तटित् घनं विहाय दूरं याति तथैव राजा यदि कठोरवाग् भवति तत्पूर्वमेव श्रीः तं परित्यज्य दूरतो गच्छति । अयं वाक्यार्थोपस्कारकः उपमालङ्कारः ।

---

(१) रसगङ्गाधरः पृ॰ २११ - चौखम्बा विद्याभवन वाराणसी, १९६३

(२) सन्धिर्ना विग्रहो यानं आसनं द्वैधमाश्रयाः ।षड्गुणाः - अमरः २/८

(३) मध्वसिद्धान्तानुसारेण षडेव निग्रहस्थानानि ।
तत्त्वविरोधासङ्गती, न्यूनाधिके, संवादानुक्ती इति षडेव निग्रहस्थानानि -जयतीर्थः प्रमाणपद्धतिः अनुमानपरिच्छेदः पृष्ठं २५३. धारवाडतः प्रकाशितग्रन्थः । (शा॰ श॰ १८७३)

(इ) विभूषणेषु प्रतिबिम्बिताहिः प्रहृष्टपाणिद्वयरोमपत्रः।
स कृष्णवाहो विनताङ्गजातः पिता गरुत्मानिव वेगतोऽगात्॥(१।६५)
शिशुरूपं कृष्णं मथुरातः कारागृहात् गोकुलं नयतः वसुदेवस्य वर्णनमिदम्। अनया च श्लिष्टोपमया यथा गरुत्मान् श्रीहरिं भक्त्या वहति तथैव, स्वविभूषणेषु प्रतिबिम्बितच्छत्रायिताहिः प्रहृष्टपाणिद्वयाख्यपक्षवान् अत्यन्तं विनयवान् वसुदेवोऽसौ श्रीकृष्णपिता सश्रद्धं कृष्णं गोकुलं नीतवानिति अयं विषयः सुष्ठु प्रतिपादितः।
(ई) त्रिषु स्थानेषु विस्तीर्णा मधुसूदनवाहिनी।
त्रिपदा वेदमातेव रिपुसेनामहन्क्षणात्॥(१४/२३)
वेदमाता गायत्री इव मधुसूदनवाहिनी अपि शत्रुसंहारिका।
(उ) अथोषःसमये शौरी रथमारुह्य निर्ययौ।
सवितेव सह स्वीयैः निशाचरबलान्तकः॥(१४/२०)
सवितेव इत्युपमया कृष्णस्य निशाचरबलान्तकत्वं स्फुटीकृतम्।
(ऊ) द्वारकावर्णने इयं पूर्णोपमा-

समुद्रमुत्सृज्य पुरीं प्रविष्टा
बलेन मुक्तावलिराशुगस्य।
भवाब्धिमुल्लङ्घ्य मरुद्बलाभ-
विकुण्ठमुक्तावलिवद्विरेजे॥(१७/३३)

अत्र विकुण्ठमुक्तावलिः उपमानम्। पुरीं प्रविष्टां मुक्तामणीनां

आवलिः उपमेयम्। मरुद्बलेन प्रवेशः साधारणधर्मः। साहृश्यं च वता अभिहितम्। एवमियं पूर्णोपमा। [1]

<u>उपमेयोपमालङ्कारः</u> — यत्र उपमानोपमेययोः विपर्यासः भवति तत्र विलसति उपमेयोपमालङ्कारः। [2]

सत्कान्त्या हरिनीलकाञ्चनसमौ हस्तीन्द्रहस्तोपमौ
विष्वग्वर्तुलतागुणेन मृदुताधर्मेण कुन्दस्रजः।
कल्पौ यद्यपि रुक्मिणीमुरभिदोरूरू कथञ्चित्तुला
लावण्येन परस्परं परामिति द्वन्द्वात्मतां बिभ्रतौ॥ (१८/१२)

रुक्मिणीकृष्णयोः ऊरुवर्णनमेतत्। कृष्णस्य ऊरू सत्कान्त्या इन्द्रनीलसदृशौ। रुक्मिण्या ऊरू सत्कान्त्या काञ्चनसदृशौ। वर्तुलतागुणेन तौ हस्तीन्द्रहस्तोपमौ। मृदुताधर्मेण तयोः तौ ऊरू मल्लिकामालिकोपमौ वर्तेते। परन्तु लावण्येन धर्मेण तयोः उपमानमेव न लभ्यते। दक्षिणोरुसदृशः वामोरुः। वामोरुसदृशः दक्षिणोरुः। इति परस्परोपमानोपमेयभावं दर्शयितुं ऊरू द्वौ द्वौ बभूवतुः। अत्र श्रीकृष्णस्य रुक्मिण्याश्च ऊर्वोः परस्परमेवोपमानोपमेयभावचित्रणेन उपमेयोपमालङ्कारः।

---

(१) अन्याश्च काश्चिदुपमाः – १/३१. २/२४. ३/२. ४/२८,३१,३७,५३. ५/६,२५,२६,२७. ६/२,४,६, ७,१४,३४,३८,५१,६५. ८/२२,२९. १०/२२, ११/२,३८,४०,४१,५१. १२/२६,४६,४७,६३ १३/४१,४४,४५,४६ ४७,४८. १४/६,९,२३,२४,३५,५६. १५/२६,२७. १६/६०, १७/३०, ३२,५०-५२. १८/४५. १९/१,४ इत्यादयः

(२) विपर्यासः उपमेयोपमा तयोः। मम्मटः, <u>का. प्र.</u> १०/५

Rarest Archive

स्मरणालङ्कारः - यत्र सदृशवस्त्वनुभवेन अनुभूतपूर्वस्य स्मृतिः तत्र स्मरणालङ्कारो भवति ।(1)

गोधूलिधूसरमनोज्ञशरीरकान्तीन्
गोपान्निरीक्ष्य करसङ्गतवेणुशृङ्गान् ।
कृष्णस्य शैशवविलासमनुस्मरन् स
मोदाम्बुपूर्णनयनः पुलकाङ्कितोऽभूत् ॥ (१२/६)

मधुरातः श्रीकृष्णेन गोकुलं प्रेषितः उद्धवः गोकुलं प्रविशन् गोधूलिधूसरान् करसङ्गतवेणुशृङ्गान् कृष्णसदृशान् गोपालान् निरीक्ष्य श्रीकृष्णस्य शैशवं अनुसस्मार; मोदाम्बुपूर्णनयनः पुलकाङ्कितश्चाभूत् । श्रीकृष्णसदृशगोपालदर्शनेन श्रीकृष्णस्मरणवर्णनादयं स्मरणालङ्कारः ।

रूपकालङ्कारः — उपमानोपमेययोः आहार्यभेदः यत्र, तत्र रूपकम्(2) । उपमानतावच्छेदकपुरस्कारेण उपमेये शाब्दाभिधीयमानं उपमानतादात्म्यं रूपकम् ।(3)

रु॰वि॰ काव्ये चमत्कारावहाः बहवः रूपकालङ्काराः संशोभन्ते । नैकैः साङ्ग-निरङ्ग-श्लिष्ट-परम्परितादिरूपैः रूपकालङ्कारैः कविश्रीवादिराजतीर्थः सहृदयानानन्दयति।—

(1) सदृशानुभवाद्वस्तुस्मृतिः स्मरणमुच्यते ॥ सा॰द॰ १०/२७
(2) तद्रूपकमभेदो य उपमानोपमेययोः ॥ का॰प्र १०/९३
(3) रसगङ्गाधरः - द्वितीयाननम् - रूपकप्रकरणम् ।

Rarest Archiver

काव्यमिदं रूपकेणैव प्रारभ्यते —

श्रीवेदान्तमहाचलं हि परितः संयोज्य सूत्राहिवं
सद्व्रातागमपोषितात्महृदयं तत्पूर्वपक्षासुरैः।
सिद्धान्तोक्तिसुरेश्वरैश्च मथितो यः कृष्णदुग्धाम्बुधिः
स्त्रीयानाममृतं प्रयच्छति स मां पायाद् गुणोघन्मणिः॥ (१।१)

अत्र उपमेये कृष्णे उपमानस्य दुग्धाम्बुधेः आरोपात् रूपकालङ्कारः। विलसति। आरोपिताः खलु अत्र शब्दोपात्ता इति समस्तवस्तु विषयं साङ्गं रूपकमेतत्। श्रीकृष्णदुग्धाब्धिमन्थने सति स्त्रीयानां अमृतं लभ्यते इति चमत्कारेण वर्णितमत्र।

सत्सङ्घमानससरोवरमध्यवर्ती
कृष्णाङ्घ्रिचारुकमलार्पितचित्तवृत्तिः।
शास्त्राति मञ्जुपदराजितरम्यसंसत्
आस्माकहृत्सरसिजेऽस्तु स मध्वहंसः॥ (१।५)

श्लिष्टपरम्परितरूपकमेतत्। परमहंसः श्रीमध्वाचार्यः हंसत्वेनाऽत्र वर्णितोऽस्ति। मध्वस्य हंसत्वारोपे अन्यानिरूपकाणि कारणानि। मानसशब्दस्य श्लिष्टत्वात् श्लिष्टपरम्परितरूपकत्वम्।

बकरूपदैत्यसंहारे उक्तमिदम् —

पतत्रिणं तं परिगृह्य दोर्भ्यां विभिद्यतुण्डं विनिपात्य भूमौ।
स यातनामीनभुजं विधातुं न्ययोजन्नारकवापिकासु॥ (४।३५)

अत्र यातनासु मीनतारोपात्, नरके वापिकारोपाच्च रूपकालङ्कारः।

Rarest Archiver

कवेः प्रतिभाप्रभावप्रदर्शकं समस्तवस्तुविषयं साङ्गरूपकमिदमन्यत्—

पूर्वाब्धावथगाह्य फेननिचयश्रीखण्डलेपद्युतिः

स्वाङ्काकङ्कृतिमूलनीलतिलकः तारौघहारान् दिशन् ।

व्योमाख्यां कबरीं प्रगृह्य सुकरैः आश्लिष्य दिक्कामिनीं

ऐन्द्रीमिन्दुरसौ चुचुम्ब सरसो रागेण तां रञ्जयन् ॥(६।३६)

अत्र सरसस्य चन्द्रस्य चुम्बनव्यापारः सपरिकरं वर्णितः । तस्य अवगाहनं, श्रीखण्डलेपनं, तिलकधारणं, तारौघाख्यहारदानं, कबरीग्रहणं दिक्कामिन्यालिङ्गनं स्वकरैः इति सुष्ठुवर्णनं कृतमिति रूपकालङ्कारः । चन्द्रोदयवर्णनमिदं नितरां मनोहारि ।

परम्परितरूपकस्य अपरोऽयं सुन्दरः दृष्टान्तः रु.वि.काव्यकारस्य—

हे हस्ताम्बुज विठ्ठलाङ्घ्रितरणिं मा मुञ्च, दृक्कैरव

श्रीमन्तं मुखचन्द्रं, आस्थिरमनश्चोरालकाख्यं तमः ।

जिह्वादर्दुर तत्कथासुजलधिं, वक्षःकवाटं सदा

हृद्गेह, श्रुतिपञ्जर प्रतिदिनं हृद्यं शुकस्योदितम् ॥(९।२४)

कृतरासोत्सववर्णनस्य उद्रिक्तभक्तेः भक्तकवेः वादिराजस्य आशंसनमिदम् । श्रीविठ्ठलाङ्घ्रितरणिं हस्ताख्यं अम्बुजं नैव मुञ्चतु । तरण्याश्रयेण यथा अम्बुजस्य विकासः तथा भगवत्पादाश्रयेणैव हस्तस्य सार्थक्यं इत्ययमर्थः अलङ्कारेण स्फुटीकृतः । एवमेव कैरवस्य चन्द्राश्रये सति उत्कर्षः, अन्यथा म्लानिः तथा दृशः श्रीकृष्णस्य मुखेक्षणासक्तौ एव साफल्यं इत्यादिरीत्या सर्वेन्द्रियाणां भगवत्प्रवणत्वोपदेशोऽयम् ।

Rarest Archiver

रुक्मिणी स्वयंवरे कृष्णवर्णनमेतत् –

गरुत्मदंसाचलनीलमेघं फणीन्द्रहारोच्चयनीलरत्नम् ।
उमेशहंसप्रियपादपद्मं पतिं सती सा चकमे रमेशम् ॥(१६/२३)

इदं च आश्लिष्टमालारूपं परम्परितरूपकम् । अनेन च मालारूपकेण रमेशस्य गरुत्मत्फणीन्द्रोमेशोत्तमत्वं व्यक्तं भवति ।

एवं रूपकालङ्कारोऽपि रु.वि.काव्ये अर्थपोषकः उपलभ्यते । अस्य च कवेः रूपकप्रियत्वं काव्यान्तेऽपि रूपकप्रयोगेण ज्ञायते –

हंसानां हृदयङ्गमं कविलसद्भृङ्गाहृतं मौक्तिक-
प्रख्याग्र्योक्तिनवं प्रबन्धजलजं पादेऽर्पितं स्याद्धरेः ।
लक्ष्मीरम्यकरे वरामरततेः सन्मानसे शारदा-
नन्दं तत्पवनः स्वहृत्कृतगुणं विस्तारयत्वञ्जसा ॥(१९/४०)

अत्र स्वरचितस्य काव्यस्य जलजत्वमभिहितम् । तच्च जलजं हंसानां हृदयङ्गमम् । तस्मिन् कवयः एव भृङ्गाः । एतादृशं खलु प्रबन्धजलजं श्रीहरेः पादे अर्पितम् । लक्ष्म्याः करे अर्पितम् । अमराणां मानसे समर्पितम् । शारदानन्दप्रदं इदं काव्यजलजं स पवनः अञ्जसा विस्तारयतु इति च सम्प्रार्थितम् ।

अन्यान्यपि रूपकाणि – १/७,८,११,२२,३९,६६. २/२,३,११. ३/२१,२५,३०. ४/३१, ३४,३५,३७. ८/३८. ९/२,९,१२,२२,२३,२४,३२,३४,५८,६०. १०/६,१०,४६, ५०,५६,७५,८०,८१. ११/६,८,६२. १४/१२,१३. १५/६,१२,२२,३७,५९. १६/१०, ३८,४४,४८. १८/२,३,४,५,९ १९/३९ इत्यादीनि ।

उत्प्रेक्षालङ्कारः - रु॰वि॰ काव्ये उत्प्रेक्षालङ्काराणां पौष्कल्यं वर्तते । उत्प्रेक्षामाध्यमेन कविवर्यः श्रीवादिराजतीर्थः शास्त्रीयानि तत्त्वानि स्फुटीकरोति । "उत्प्रेक्षा वादिराजस्य" इति यदि उच्यते नैव तत्र अतिशयोक्तिलेशोऽपि भवेत् । नानाप्रकाराः उत्प्रेक्षाः शतशः समुपलभ्यन्ते रु॰वि॰ काव्ये ।

उपमेयस्य उपमानेन सम्भावनं उत्प्रेक्षा(1) इति तल्लक्षणम् । रु॰वि॰काव्ये इष्टदेवस्य श्रीहयग्रीवस्य भजनं उत्प्रेक्षाभूषितम् -

सच्छास्त्रोदितवर्त्मना पदमिदं ध्यायन् मदङ्काङ्कितो
मन्मन्त्रं जप शास्त्रसम्पदमथो दास्यामि भाग्यैः सह ।
तत्तत्त्वान्यपि बोधयामि तदनु प्राप्यो मदङ्घ्रिर्भवेत्
इत्याद्योबयतीव यः करपयैस्तं वाजिवक्त्रं भजे ॥ (1।2)

अत्र हयग्रीवदेवस्य शङ्खचक्रपुस्तकाक्षमालाधारणस्य प्रयोजनं उत्प्रेक्षितमिति फलोत्प्रेक्षेयम् ।(2) हयग्रीवमूर्तेः, अङ्गुलीनिर्देशेन पादध्यानं, पुस्तकधारणेन सच्छास्त्रमार्गवर्तिता, शङ्खचक्राभ्यां भक्तस्य शङ्खचक्रधारणं, अक्षमालया तन्मन्त्रजपनं, पुस्तकेन पुनः शास्त्रसम्पद्दानं, शङ्खेन पुनः शङ्खाख्यनिधिपरिमितभाग्यप्रदानं, पुनः अङ्गुल्या तत्पदस्य भक्तप्राप्यत्वं - इत्येतानि साधु उत्प्रेक्षितानि । अनया च उत्प्रेक्षया कवेः सच्छास्त्रदीक्षा भावभक्तिश्चाभिव्यक्ते भवतः ।

---

(1) सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् । का॰प्र॰ 10/137

(2) अहेतौ हेतुभावेनाफलस्य फलत्वेन हेतूत्प्रेक्षा फलोत्प्रेक्षा चोच्यते ॥
— कुवलयानन्दः पृ॰ 33

Rarest Archiver

हेतूत्प्रेक्षा –

यदा स पद्मासनसंस्थितोऽलं जजाप विद्यामितरैरवेद्याम्।
तदा प्रभृत्येव जगत्सु नूनं बभूव पद्मासनशब्दितोऽसौ ॥(७।१७)

भूभारहरणाय अवतर्तुं विष्णुं प्रार्थयितुं गतस्य ब्रह्मणश्चित्रणमिदम्। अत्र पद्मासने स्थित्वा जपकरणं तस्य पद्मासनशब्दितत्वेऽहेतुरपि हेतुत्वेनोक्तः इति हेतूत्प्रेक्षालङ्कारः।

स्वरूपोत्प्रेक्षा – उदाहरणम् –

उद्गच्छदुष्मावलिधूमलिङ्गं अद्रिं द्रवद्धातुरसार्द्रशृङ्गम्।
विष्वक्पतद्रत्नचयस्फुलिङ्गं अग्न्यस्त्रमीशाचरितं प्रतर्के ॥(६।७५)

महावृष्टिभयात् गोगोपसंरक्षणाय श्रीकृष्णेन उद्धृतस्य गोवर्धनगिरेः वर्णनमिदम्। अत्र गोवर्धनगिरिः वृष्टिशान्त्यै प्रयुक्तं अग्न्यस्त्रमिति उत्प्रेक्षितम्। अतः इयं स्वरूपोत्प्रेक्षा।

इयं च चमत्कारावहा मालोत्प्रेक्षा –

कृष्णालिङ्गनकातरैः करसमैरोघैर्निवृत्तैरिव
स्वप्रान्तस्थिततत्पदाङ्कमुरसा धर्तुं धियेवार्कजा।
सुप्रेमाम्बुधिमिश्रणादिव जगद्वन्द्यस्य पातादिव
स्निग्धा तं मदनाकृतिं स्वहृदयेनाश्लिष्य साऽवर्धत ॥(४।७८)

कालियमर्दनाय कदम्बवृक्षात् यमुनायां श्रीकृष्णपातानन्तरं यमुनावर्धने हेतूत्प्रेक्षामालेयम्। श्रीकृष्णालिङ्गनाय प्रतिनिवृत्तहस्ताः यमुनायाः तरङ्गाः। स्वप्रान्ते स्थितं तत्पदाङ्कं उरसा धर्तुमिव यमुनाऽवर्धत।

१२।१०४

समुद्रसङ्गमे नदी वर्धते खलु। श्रीकृष्णः प्रेमाम्भोधिः। तत्सङ्गमे नदीवृद्धिः युक्तैव। अथवा नायकस्य नमने नायिकायाः हर्षोद्रेको भवति किल। तथा जगद्वन्द्यः पतितवानिति यमुनायाः हर्षप्रकर्षः। कवेः प्रतिभालताप्रसूनायितमिदं सहृदयैः शिरसा धार्यते।

व्यङ्ग्योत्प्रेक्षा —

करस्थभास्वन्नवनीतमन्या विभीषयन्त्यन्वगमन्मुकुन्दम्।
स्वमौलिमालाच्युतपुष्पपुञ्जैः पदानि तस्येशितुरर्चयन्ती॥ (३/२५)

नवनीतचोरं विभीषयन्ती गोपी स्वमौलिमालाच्युतपुष्पपुञ्जैः तत्पदाङ्कानि अर्चयन्ती इव गता। अत्रोत्प्रेक्षाव्यञ्जकेवपद-अनुपादानात् गम्योत्प्रेक्षेयम्।

एवमेव रु.वि.काव्ये शास्त्रतत्त्वप्रतिपादिकाः अर्थस्फुटीकरणपट्व्यः चमत्कारकारिण्यः उत्प्रेक्षाः विलसन्ति।[1]

---

[1] उत्प्रेक्षान्तराणि — १/१८,१९,२०,२४,२८-३७,३९-४३,४५,५८,६०-६३. २/१,४,९,१०,१४,१६,१७,१९,२०,२१,३५,३७,६६. ३/१,३,४,१५-१८,१९,२८,३२,३८,६०,६१,६३. ४/५,८,१२,१३,१४,२०,२१,२३,३८-४३,४५,५१,५८,६४,६७. ५/१,५,१५,२१,२३,३६,४५,४६, ६/५,१२,२२-२५,२९,३९,४२,५२,५३. ७/५,६. ८/३९,४० ४१,४२,४३,५०,५४,५९. ९/२९,४०,४१,४२,४३, १०/१,६,५,१०,११,१३,२५,७६. ११/३,३७,४५,४७,४८,६२,६३,६४, १२/२४,२५,२९ १३/२६ ३९,४०. १४/२७,२८,६६. १५/२,७,१५,२४,२९,६१. १६/४३,४६,४७,५६,५८. १७/३३,३६,३७,४२. १८/६,२६. १९/१० इत्यादीनि

परिणामालङ्कारः – यत्र उपमानं उपमेयत्वेन परिणतं सत् कार्योपयोगि भवति तत्र परिणामालङ्कारः भवति ।[१]

दम्पत्योः श्रीरुक्मिणीकृष्णयोः पादवर्णनमिदं एतद्दृष्टान्तभूतम् –

रक्तात्मीयतलत्विषा प्रविलसत्स्वीयोर्ध्वभागश्रिया
स्वच्छेन्दुच्छविवृत्तसन्नखरुचा स्वासक्तभूषावलेः ।
यच्छन्त्यद्भुतरत्नबन्धनमहः श्रीरुक्मिणीकृष्णयोः
दम्पत्योः पदपङ्कजानि भजतां सम्पत्कराणि ध्रुवम् ॥(१८।१)

स्वासक्तानां जडानामपि अलङ्काराणां विचित्ररत्नबन्धन-सौभाग्यं सम्प्रदातॄणि रुक्मिणीकृष्णपदानि भजतां ध्रुवं सम्पत्कराणीति वर्णनेऽस्मिन्, पङ्कजानि सम्पत्करणार्थं पादत्वेन परिणतानि इति परिणामालङ्कारः ।

अन्यच्च उदाहरणम् –

श्रये हयमुखं श्राव्यकाव्यमार्गसमाप्तये ।
सरागयोगिपूगोक्तस्तोत्रतोत्रवशं महः ॥ (१/२)

हयवदनरूपिपरमात्माश्रयणकथनमिदम् । यथा अज्ञातमार्गः पुमान् ज्ञातमार्गं हयमारुह्य मार्गं गच्छति तथा काव्यमार्गसमाप्तये हयमुखाश्रयणम् । अत्र काव्यमार्गप्रदर्शनाय महः हयमुखत्वेन परिणतमिति परिणामालङ्कारः ।

(१) यत्र आरोप्यमाणः विषयी किञ्चित्कार्योपयोगित्वेन निबध्यमानः स्वतस्तस्य तदुपयोगित्वासम्भवात् प्रकृतात्मना परिणतिमपेक्षते तत्र परिणामालङ्कारः । — कुवलयानन्दः पृ॰ २०.

Rarest Archiver

अर्थान्तरन्यासालङ्कारः – सामान्येन विशेषस्य समर्थनं अथवा विशेषेण सामान्यस्य समर्थनं यत्र क्रियते तत्रार्थान्तरन्यासो भवति। एतयोः एकं प्रस्तुतं अन्यदप्रस्तुतं भवति।(१)

विचित्ररूपेण संशोभमानाः अर्थान्तरन्यासाः रु.वि.काव्यं नितरां अलङ्कुर्वन्ति। श्रीकृष्णजन्मकाले समस्तं चराचरं जगत् सन्तुष्टमभूदिति अर्थान्तरन्यासेन कविः एवं समर्थयते –

अजन्मनस्तस्य हि जन्मकाले चराचरं तुष्टमभूत्किलेदम्।
तथा हि तुष्टिर्भुवि कस्य न स्याददृष्टपूर्वस्य निरीक्षणेन॥(१।४४)

अत्र, भुवि तुष्टिः कस्य न स्यादिति सामान्येन श्लोकपूर्वार्धगः विशेषः समर्थितः इति अर्थान्तरन्यासो नामालङ्कारः।

भगवतो द्वेषेण मुक्तिर्नास्तीत्येतदेवं संस्थापितम् चमत्कारेण –

विद्वेषमूलस्मरणेन तुष्टिः इत्यप्यवद्यं न जहाति पक्षः।
हिंसार्थमालिङ्ग्यतस्तरक्षोः किं चेष्टया तुष्यति कामधेनुः॥(२।४५)

अयं विशेषेण सामान्यसमर्थनरूपः अर्थान्तरन्यासः। अर्थान्तरन्यासैश्च तत्र तत्र लोकनीतिरपि प्रकटिता रु.वि.काव्ये।(२) अयं च द्वादशोऽध्याये प्रपञ्चितोऽस्ति।

---

(१) सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।
यत्तु सोऽर्थान्तरन्यासः ········ ॥ का.प्र. १०/१०९

(२) अन्ये अर्थान्तरन्यासाः — १।१२, २६, ३८, ४४, ५९, २।२२, २३, २४, २५, २९, ३८, ४५. ३।२०, ३७, ३९. ४।४, ५, ३०, ६१, ७०, ७१. ५।८, १० १६, ५७. ६।२८, ३१, ३५, ४८, ४९, ७।३५, ८।५२ इत्याद्याः बहवः प्रतिसर्गम्।

Rarest Archiver

भ्रान्तिमानलङ्कारः – कविप्रौढोक्तिसिद्धः साम्यादतस्मिंस्तद्बुद्धिः भ्रान्तिमान नाम अलङ्कारः।[1] उदाहरणम् –

यदात्मजस्ते पिबति स्म दुग्धं विभिद्य पात्राणि तदा ममासीत्।
न मन्युरुत्सर्पितदीयदन्तदृगन्तकान्तिं हृदि तर्कयन्त्याः॥(३।४५)

श्रीकृष्णकृतदुग्धचौर्यं यशोदायै निवेदयन्त्याः गोप्याः वचनमिदम्। अत्र शुभ्रतया अप्रकृतदन्तदृगन्तकान्तितुल्यायाः प्रकृतदुग्धधारायाः दर्शनेन गोपाङ्गनायाः अप्रकृतश्रीकृष्णदन्तदृगन्तकान्तित्वेन ज्ञानं इति भ्रान्तिरलङ्कारः। तच्च ज्ञानं कविप्रौढोक्तिसिद्धम्।
द्वारावतीवर्णनावसरेऽयं श्लोकः –

यदीयरत्नावृतहैमवप्रसकाशमभ्येत्य निवर्तते स्म।
समुद्यतासीन् प्रतिबिम्बराशीन् निरीक्ष्य दीना बहुशोऽरिसेना॥(१७।२९)

अत्रापि स्वप्रतिबिम्बदर्शनेन कृष्णसेनाज्ञानात् भ्रान्तिमान् अलङ्कारः।[2]
अपह्नुत्यलङ्कारः – उपमेयस्वरूपनिषेधसहितं उपमेयस्य उपमानतारूपताव्यवस्थापनं अपह्नुतिः।[3] दृष्टान्तः –

शङ्खाम्भोजनिधी समीहितधनप्रत्यर्पणेनाङ्कुशौ
हस्तिन्यान्तरकर्षणेन दितिजप्रध्वंसनेनाशनिम्।

---

(१) साम्यादतस्मिन् तद्बुद्धिः भ्रान्तिमान प्रतिभोत्थितः। सा॰द॰ १०।३६
... भ्रान्तिमान अन्यसंवित् तत्तुल्यदर्शने॥ का॰प्र॰ १०।१३२

(२) अन्यत्र च – ६।१, ७।३२

(३) प्रकृतं यन्निषिध्यान्यत् साध्यते सा त्वपह्नुतिः। का॰प्र॰ १०।९६

निर्जित्य ध्वजमुत्पताकमदधायः कृष्णपादो मुदा
प्रायस्तेऽपि च तस्य लक्षणगणव्याजेन भेजुस्तलम् ॥(१८/६)

श्रीकृष्णपादस्थशङ्खपद्मादिवर्णनमिदम्। अत्र लक्षणगणव्याजेनेति श्रीकृष्णपादलक्षणत्वं निषिध्य उपमानभूतशङ्खपद्मादिरूपत्वव्यवस्थापनात् अपह्नुतिः। रु॰वि॰काव्ये तत्र तत्रायमलङ्कारो मनोहरो दृश्यते।[1]

<u>अतिशयोक्त्यलङ्कारः</u> — विशेषस्य विवक्षया लोकसीमातिवर्तिनी उक्तिः अतिशयोक्तिरिति दण्डिमतम्।[2] इयं च मम्मटेन चतुर्धा विभक्ताऽस्ति।[3] अतिशयोक्त्यलङ्कारस्य सुन्दराणि उदाहरणानि रु॰वि॰काव्ये दृश्यन्ते —

मूलासेचनपूर्वकं परिसरन् त्वामार्द्रवस्त्रः पुमान्
स्वाभीष्टं लभते किल प्रतिवनं विष्वक् चरन्तीति ।
कायक्लेशवशात् समुत्थितघनस्वेदाम्बुनार्द्राम्बराः
पाथोधैः किमुपेक्षसे विदधतीः आर्द्रां भवद्वेदिकाम् ॥ (७/२)

श्रीकृष्णविरहितानां गोपवधूनां विप्रलम्भवर्णनमेतत्। वृन्दावने अश्वत्थवृक्षं कृष्णं पृच्छन्ति, प्रार्थयन्ते च। प्रतिवनं सञ्चरणेन

---

(२) विवक्षा या विशेषस्य लोकसीमातिवर्तिनी।
असावतिशयोक्तिः स्यात् अलङ्कारोत्तमा .. ॥ (काव्यादर्शः २/२१४

(३) निगीर्याध्यवसानं तु प्रकृतस्य परेण यत्।
प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम् ॥
कार्यकारणयोश्चैव पौर्वापर्यविपर्ययः।
विज्ञेयातिशयोक्तिः सा . . . . ॥ का॰प्र॰ १०/१००, १०१.

(१) रु॰वि॰ ६/२२, ३३, ४० इत्यादिषु

Rarest Archive

कायक्लेशवशात् सञ्जातैः स्वेदोदकैः आर्द्राम्बराः गोप्यः अस्रोघैः अश्वत्थवेदिकामेव आर्द्रां चकुरिति वर्णितम्। अत्र मूलासेचनाद्यसम्बन्धे अपि सम्बन्धोक्त्या अतिशयोक्त्यलङ्कारः। अन्यच्च —

स्वर्गोपुरौघैरियमुन्नमयूखैर्दिवं व्यतीयाय न तद्विचित्रम्।
मुकुन्दमन्तर्हृदि धारयन्त्याः विचित्रतीर्थानि च संस्पृशन्त्याः॥(१७/४३)

अत्रापि गोपुरादीनां औन्नत्यविशेषविवक्षया दिवोऽपि उच्चत्ववर्णनेन अतिशयोक्तिः।

तुल्ययोगितालङ्कारः – यत्र प्रकृतस्य अप्रकृतस्य वा धर्मोपादानेन औपम्याक्षेपकत्वं तत्र तुल्ययोगिता नाम अलङ्कारो राजते।[1]

स्नात्वा पूर्वपयोदधावचलसत्पीठाधिरूढः करैः
पद्मानि प्रतिगृह्य सान्द्रतिमिराण्युन्मूल्य रागावृतः।
सिञ्जत्पक्षिगणान्निशम्य परमं कृष्णावतारं रविः
तत्पूजार्थमिवोदितो व्रजगृहद्वारेषु तान् प्राहिणोत्॥(२/९)

अत्र प्रकृतस्य रवेः वर्णनेन अप्रकृतस्य अर्चकस्य सादृश्यस्य आक्षिप्तत्वात् तुल्ययोगिता।

दीपकालङ्कारः – यत्र प्राकरणिकाप्राकरणिकानां क्रियादिधर्मस्य एकवारं उपादानं तत्र दीपकं भवति। एकस्य कारकस्य एकवारं अनेकासु क्रियासु सम्बन्धोऽपि दीपकं भवति।[2]

---

(१) नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता। का॰प्र॰ १०/१०४

(२) सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम्।
सैव क्रियासु बह्वीषु कारकस्येति दीपकम्॥ का॰प्र॰ १०/१०३

Rarest Archiver

इन्दुः स्वरम्यकिरणैर्विपिनं पुपूर
मन्दानिलश्च मुदितोत्पलमान्यगन्धैः ।
सान्द्रप्रसूननिचयैस्तरवः समन्तात्
कन्दर्पतातमवलोक्य पिकाश्च गीतैः ॥ (६/४४)

कृष्णस्य प्रवेशे सति वृन्दावनवर्णनमेतत् । अत्र पुपूर इति क्रियायाः अनेकसम्बद्धत्वात् दीपकम् ।(1)

प्रतिवस्तूपमालङ्कारः — यत्र एकस्य साधारणधर्मस्य उपमानोपमेयवाक्ययोः द्विवारं शब्दभेदेन उपस्थितिः तत्र प्रतिवस्तूपमालङ्कारो भवति ।(2) इदमत्रोदाहरणम् —

प्रायेण धनवानेव जायते क्लेशवानपि ।
फलवानेव हि तरुः कण्टकैरुपरुध्यते ॥ (१२/५३)

अत्र क्लेशवानपि जायते, कण्टकैरुपरुध्यते इति एक एव धर्मः वाक्यद्वये उपात्तः इति प्रतिवस्तूपमालङ्कारः ।

दृष्टान्तालङ्कारः — उपमानोपमेयवाक्ययोः उपमानोपमेयसाधारणधर्माणां प्रतिबिम्बनं दृष्टान्तः ।(3)

उद्यद्द्युति वक्रशक्रधनुषि व्योमाग्रसीमाश्रये
वर्षत्यूर्जितगर्जितेऽतिचकिता मर्त्याः पयोधारिणि ।

---

(1) अन्येऽपि — १/१३, ६/१६, ११/१६, ५५

(2) प्रतिवस्तूपमा तु सा । सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः ।
— का॰प्र॰ १०/१०१-१०२

(3) दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम् — का॰प्र॰ १०/१०२

Rarest Archiver

नेत्रान्तभ्रुकुटीबलं कृशलसन्मध्योर्ध्वभागोदितं
नारीपीनपयोधरं भयहरं भेजुः क्वणद्भूषणम् ॥(७।३२)

वर्षर्तुवर्णनेऽस्मिन् विद्युत्, शक्रधनुः-नेत्रान्तः, व्योमाग्रं-मध्योर्ध्वभागोदितं, ऊर्जितगर्जितं-क्वणद्भूषणं - इत्येतेषां बिम्बप्रतिबिम्बभावगतत्वेन दृष्टान्तालङ्कारः ।

निदर्शनालङ्कारः — उपमापरिकल्पकः, अनुपपद्यमानः वाक्यार्थयोः पदार्थयोर्वा सम्बन्धः निदर्शना ।(1)

रु॰वि॰काव्ये निदर्शनालङ्काराः तत्र तत्रोपलभ्यन्ते ।(2)

अपण्डितेनापि मयार्जितेयं मुकुन्दलीला कविकण्ठमाला ।
अकौशलेन ग्रथितेति जातिप्रसूनमालां किमु सन्त्यजन्ति ॥(१।९)

अत्र अकौशलेन ग्रथिता जातिप्रसूनमाला यथा न त्याज्या तथा अपण्डितेन आर्जिता मुकुन्दलीला कविकण्ठमाला भवति इति उपमायां पर्यवस्यतीति निदर्शनालङ्कारः ।

यत्र क्रियया एव स्वस्य कार्यस्य स्वहेतोश्चान्वयः(3) हेतुहेतुमद्भावरूपः परान् प्रति बोध्यते साऽपरा निदर्शना । एता अपि निदर्शनाः रु॰वि॰ काव्ये दृश्यन्ते । निदर्शनालङ्कारैः लोकनीतिरपि प्रदर्शिता भवति ।

---

(१) निदर्शना । अभवन् वस्तुसम्बन्धः उपमापरिकल्पकः ।- का॰प्र॰ १०।९७

(२) रु॰वि॰ १।१०, ११।४४, १७।३३, ३४

(३) स्वस्वहेत्वन्वयस्योक्तिः क्रिययैव च साऽपरा । का॰प्र॰ १०।९८

लक्ष्मीशवाहरथहस्तिभटौघवेगात्
जातं व्रजात्त्रिदिवमात्तरयं रजस्तत्।
कृष्णानुषङ्गि चिदचेतनसङ्गभाजो
वक्ति त्रिविष्टपगतिं गतमेघ्यसोऽपि ॥(१५।२३)

अत्र कृष्णानुषङ्गिनः चितो वा अचेतनस्य वा सम्बन्धभाजः पुंसः त्रिविष्टपगतिर्भवतीति लक्ष्मीशस्य वाहानां रथानां हस्तिनां भटानां वा वेगात् जातं, त्रिदिवं व्रजत् सत् तत् रजः त्रिदिवव्रजनक्रियया ख्यापयतीति निदर्शनालङ्कारः।

व्यतिरेकालङ्कारः — यत्र उपमानापेक्षया उपमेयस्य आधिक्यं भवति तत्रायमलङ्कारो भवति।

नायं स्मरः श्यामलकोमलाङ्गः नायं शशी वीतकलङ्कशङ्कः।
नायं रविर्लोकदृगार्तिहारी सोऽयं पुराणः पुरुषोऽद्वितीयः ॥(१५।५९)

रुक्मिणीहरणायागतस्य पुराद्बहिरेव स्थितस्य श्रीकृष्णस्य दर्शनेन समुत्थितमिदं जनानां वचनम्। अत्र श्यामलकोमलाङ्गत्वेन, वीतकलङ्कशङ्कत्वेन, लोकदृगार्तिहारित्वेन च उपमानभूतात् अनङ्गात् स्मरात्, कलङ्किनः शशिनः, लोकदृगार्तिकारिणः रवेश्च सकाशात् उपमेयस्य श्रीकृष्णस्य आधिक्यकथनात् व्यतिरेकालङ्कारः।

प्राकाराद्बहिरत्र वारिधिरयं प्राप्याम्बुदैरर्पितं
स्वातौ वारि ततश्चिरेण हृदये मुक्तामयो जायते।

---

(१) उपमानाद्यदन्यस्य व्यतिरेकः स एव सः। का॰प्र॰ १०।१०५

अन्तर्हस्ततटेषु विप्रजलधिः कृष्णाब्दवृष्टं सदा
वित्ताम्बु प्रतिपद्य तत्क्षणमहो मुक्तामयो जायते ॥(१७/४१)

अम्बुदैः स्वातौ दत्तं वारि समुद्रे चिराय मुक्तामणिर्भवति। कृष्णाख्य-मेघेन सदा वृष्टं वित्ताम्बु प्रतिपद्य विप्रजलधिः तत्क्षणमेव मुक्तामयो जायते। एवमत्र अम्बुदेभ्यः कृष्णाधिक्यकथनात् व्यतिरेकालङ्कारः।

सहोक्त्यलङ्कारः – एकं पदं यत्र सहार्थस्य बलात् द्विवाचकं भवति यत्र, तत्र सहोक्त्यलङ्कारः।[1] रु.वि.काव्ये सहोक्त्याः सुन्दरं नैकं उदाहरणं दृश्यते।[2] यथा–

सा धाराम्बुकदम्बकेन सह सुप्रेमाश्रुधारां हरे-
र्भाजनमालिकया समं प्रणयसन्मालां सुनीराजनम्।
नेत्रान्तेन शुचिस्मितामृतरसैर्नैवेद्य मावेद्य त-
त्पार्श्वं मन्दमुपाश्रयत्फलमिव व्यालोलहारोज्ज्वला ॥(७६/४४)

अत्र सुप्रेमाश्रुधारादिषु द्वितीयान्तेषु आवेदनं साक्षात् अन्वितम्। तृतीयान्तेषु पदेषु सहार्थबलात् अन्वेतीति सहोक्त्यलङ्कारः।

समासोक्त्यलङ्कारः – यत्र प्रस्तुतवृत्तान्ते वर्ण्यमाने विशेषण-साम्यात् अप्रस्तुतवृत्तान्तस्यापि परिस्फूर्तिः तत्र समासोक्त्यलङ्कारः,

(१) सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकः। का.प्र. १०/११२

(२) सहोक्तिपद्यानि – रु.वि. ५/४०, १०/५, १५/११

Rarest Archiver

समासेन संक्षेपेण प्रस्तुताप्रस्तुतवृत्तान्तयोर्वर्णनात्।(1)

उदाहरणम्(2) –

त्यक्त्वा क्रमेण सहजातमपि स्वरागं
चक्राब्जमानितकरः प्रततोर्ध्वपादः।
आश्रित्य विष्णुपदमुग्रतपोऽतपश्चः
तस्यैव धाम स जगाम कुतोऽस्य पातः॥(६।२६)

सूर्यास्तवर्णनेऽस्मिन् प्रकृतसूर्यास्तवृत्तान्ते वर्ण्यमाने चक्राब्जमानितकरः इत्यादि विशेषणसाम्यात् तपस्विवृत्तान्तः प्रतीयते इति समासोक्त्यलङ्कारः।

परिकरालङ्कारः – साभिप्रायविशेषणत्वे परिकरोऽलङ्कारो भाति।(3)

विश्वम्भरस्यास्य हि बन्धनाय दामानि सम्पादयितुं क ईशः।
बद्धः कथञ्चिद्यदि तर्हि बद्धा मध्ये विलीना वयमेव नूनम्॥(२।५३)

अत्र कृष्णस्य बन्धनं अशक्यमिति वदन्त्या गोप्या 'विश्वम्भरस्य' इति साभिप्रायं विशेषणं प्रयुक्तमिति परिकरालङ्कारः शोभते।

कात्यायनीव्रतपराणां गोपबालिकानां वर्णनमिदम् –

पुमांसमभ्यर्चयितुं सलज्जाः समान्तरङ्गाः वरवर्णिनीश्च।
सहोदरीं श्रीरमणस्य दुर्गां अपूजयंस्ताः कृतविश्वसर्गाम्॥(७।४३)

(1) कुवलयानन्दः पृ. ६९

(2) उदाहरणान्तराणि – ६।२३, ३४, ४८

(3) उक्तैर्विशेषणैः साभिप्रायैः परिकरो मतः। सा॰द॰ १०/५७

Rarest Archiver

दुर्गापूजाकरणे तस्याः मातृस्थानीयतया तत्र लज्जाऽभावं प्रतिपादयितुं कृतविश्वसर्गामिति दुर्गायाः जगन्मातृत्वमाभिहितमिति परिकरालङ्कारः। रु॰वि॰काव्ये साभिप्राय विशेषणानि बहुत्र दृश्यन्ते।(१)

श्लेषालङ्कारः — एकार्थप्रतिपादकानां शब्दानां यत्र वाक्ये अनेकः अर्थः तत्र अर्थश्लेषालङ्कारः।(२) अर्थश्लेषे परिवृत्तिसहानां पदानां प्रयोगो भवति। शब्दश्लेषे (शब्दालङ्कारे) परिवृत्त्यसहानां पदानां प्रयोगो वर्तते। रु॰वि॰काव्ये अर्थश्लेषोऽपि विशिष्टो दृश्यते —

मधुप चरसि कस्मादस्मदग्रे वृथा त्वं
द्विरदवरदमूर्धारोहयोग्योऽसि नूनम्।
विषम विरहवह्नौ निर्दहत्यस्मदङ्गं
किमिह पतितुमिच्छस्यङ्ग दूरे प्रयाहि॥ (१३/२९)

मथुरातः श्रीकृष्णप्रेषितं उद्धवं दृष्ट्वा गोकुलस्थाः गोप्यः श्लिष्टोक्त्या मधुपं — मधुकुलोत्पन्नं उद्धवं भृङ्गं च — लक्षीकृत्य कथयन्ति स्म। हे मधुप त्वं द्विरदस्य वरदमूर्धारोह योग्योऽसि। भृङ्गस्य मदोदकलुब्धत्वेन, उद्धवस्य, स्वस्वामिनः श्रीकृष्णस्य उत्सवप्राप्त्या द्विरदारोहणं कथितम्। रु॰विकाव्येऽर्थश्लेषोऽपि तत्र तत्र दृश्यते।(३)

(१) रु॰वि॰ ४/४७, ५६, ६/१९, ५१. १०/४२, १६/३६, १९/२२ इत्यादिषु

(२) श्लेषः स वाक्ये एकस्मिन् यत्रानेकार्थता भवेत्। का॰प्र॰ १०/९६

(३) १३/३०-३६, ४७ १४/५६

Rarest Archiver

व्याजस्तुत्यलङ्कारः — व्याजरूपा व्याजेन वा स्तुतिः व्याजस्तुतिः।[1]
अयमप्यलङ्कारः रु॰वि॰काव्ये चमत्कारी शोभते।[2] इदमस्योदाहरणम् —

स्तुवन्तु सर्वे वनवह्निपानकृतानुभावं न वयं मुरारेः।
स्वजन्मभूमिं शिखिनि प्रविष्टे क ईशितुस्तेन कृतोऽनुभावः॥ (७।२)

स्वभक्तानां गोपालादीनां संरक्षणार्थं दावाग्निं पपौ श्रीकृष्णः निशि प्रवृद्धम्। परन्तु कविर्वक्ति — हरेः वनवह्निपानकृतानुभावं सर्वे जनाः स्तुवन्तु न वयं स्तुमः इति। "मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत" इति श्रुतेः[3] तन्मुखाज्जातो वह्निः तन्मुखं प्रविष्टः इति चेत् - स्वजन्मभूमिं गतश्चेत् - कृष्णमाहात्म्यं नास्ति इति आपाततो निन्दा। वस्तुतस्तु श्रुतिप्रतिपाद्यमहामाहात्म्यवान् श्रीकृष्णः इति स्तोत्रे एव पर्यवसानमिति व्याजस्तुतिरलङ्कारः।

काव्यलिङ्गालङ्कारः — यत्र वाक्यार्थेन वा पदार्थेन वा हेतोः प्रतिपादनं क्रियते तत्र काव्यलिङ्गं भवति।[4] काव्यलिङ्गालङ्कारस्य चारूणि उदाहरणानि रु॰विकाव्ये समुपलभ्यन्ते।[5] इदमेकम् —

हयास्यनासापुटजातवातविघातधूताघपलालजातः।
मुनीशवागीशसुतः सुरम्यां हरेः कथां शंसति वादिराजः॥ (१।८)

---

(१) व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यथा। का॰प्र॰ १०।११२ इत्यस्य वृत्तिः

(२) रु॰वि॰ १३।३९, १५।३१, १८।३५. (३) पुरुषसूक्तम् ऋ॰सं॰ १०।९१

(४) हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते। सा॰द॰ १०।६२

(५) रु॰वि॰ २।३६, ६७. ३।२५, ६।२७, ५८, ७।१९ इत्यादीनि

Rarest Archiver

अत्र पूर्वार्धोक्तः दुरितध्वंसः पदार्थीभूतः उत्तरार्धोक्तहरिकथाकथने हेतुः इति पदार्थहेतुककाव्यलिङ्गालङ्कारोऽत्र विलसति ।

अन्यच्चोदाहरणम् —

नगं समुत्पाट्य समं समाधिकृच्छ्रमाख्यवृषेण स गोस्वरूपिणः ।
खलांश्च तेनैव जघान लीलया प्रभोः क्रियैकाऽप्युरुकार्यसाधिका ॥(५।७४)

प्रभोः कृष्णस्य एकापि क्रिया बहुकार्याणां साधिका इत्ययमर्थः प्रथमपादत्रयगतेन वाक्यार्थेन हेतुना दृढीकृत इति वाक्यार्थहेतुककाव्यलिङ्गालङ्कारः ।

अनुकूलालङ्कारः — यत्र प्रतिकूलमपि आनुकूल्यकरं भवति तत्र अनुकूलं नाम अलङ्कारो भवति ।[१] इदमत्र सुन्दरं उदाहरणम् —

कामस्तेऽङ्घ्रियुगार्चने,ऽमलधियां लोभः, सुपुण्यार्जने
मात्सर्यं, चरितानुकीर्तनसुधापानान्मदः, शत्रुषु ।
क्रोधो, भक्तजनेषु राग उदयाच्छ्रीविह्वलान्यत्र नो
यत् शत्रुर्न हि शत्रुरच्युतनिलयस्यान्यस्य शत्रुर्भवेत् ॥(१०।७८)

श्रीकृष्णः एवं अक्रूरेण प्रार्थितः । अत्र प्रतिकूलानामपि काम-क्रोध-मद-मत्सर-मोह-लोभानां श्रीहरिसम्बन्धितया आनुकूल्यकरत्वेन अनुकूलालङ्कारः । अन्यच्च —

पुण्यश्रेण्यतिदूरमप्यनुदिनं मूकं सतां दूषणे-
ष्वन्धं मीनदृगीक्षणेषु बधिरं त्वद्विन्नगोष्ठीषु माम् ।

(१) 'अनुकूलं' प्रातिकूल्यमनुकूलानुबन्धि चेत् ॥ सा.द. १०।६४

Rarest Archiver

पङ्गुं पापकरप्रयाणकरणेऽपाणिं च तत्कर्मसु
क्लीबं ग्राम्यरतौ मुकुन्द कुरु मां मूढं तदीयस्मृतौ ॥ (१०/७७)

इदमपि अक्रूरकृतं प्रार्थनम् । अत्र मूकत्वान्धत्वादीनां प्रतिकूलानामपि आनुकूल्येन अङ्गीकारात् अनुकूलालङ्कारः ।

आक्षेपालङ्कारः – अनिष्टस्यार्थस्य विध्याभासः आक्षेपः ।[1]

श्रीकृष्णस्य अक्रूरेण सह गोकुलात् मथुरां प्रति प्रयाणसमये तं प्रति गोपीनां उक्तिरियम् —

जिगमिषसि मुरारे राजधानीं यदीतः
श्रुतिततिजित याहि श्रीः शुभा तत्र तेऽस्तु ।
सुखद तदुपसर्गं सौम्य सन्धेहि शीघ्रं
घटय घटक नोचेत् नस्तवैवोपसर्गम् ॥ (१०/८१)

'हे कृष्ण त्वं राजधानीं याहि, यदि नागम्यते तर्हि अस्माकं तव समीपे सर्गं घटय' इति तदनागमने स्वासां मरणं गोपीभिः सूचितम् । एवं अनिष्टस्य गमनरूपस्यार्थस्य विध्याभास एव कृतः इति आक्षेपालङ्कारः । अन्यदुदाहरणम् – रु.वि. १८/१५

विशेषोक्त्यलङ्कारः – पुष्कलकारणेषु सत्स्वपि कार्यस्यानुक्तिर्विशेषोक्तिः ।

स्नातः सौन्दर्यनद्यां परिहृतवसनो गोपिकालेपनश्रीः
वक्षोजाब्जासनस्थः कृतवनवसतिः हारमालाकराग्रः ।
बिभ्रत्केशोधकाशान् अधरजनिपयोमात्रवृत्तिर्विनिद्रः
प्रेष्ठः श्रीविट्ठलोऽसौ जयति मुनिगणं जारवार्ता कुतोऽस्य ॥ (९/५८)

(१) अनिष्टस्य तथार्थस्य विध्याभासः परो मतः । सा.द. १०/६५

Rarest Archive

विहितरासविलासस्य श्रीकृष्णस्य वर्णनमेतत्। गोपीसङ्गम-रूपकारणसत्त्वेऽपि जारवार्ता नास्तीति कार्यानुक्तेः विशेषोक्तिः।[1] नवनीतचोरस्य मातुः सन्निधौ गोपीभिः कृतं आपादनमिदम् —

गृहे गृहेऽयं नवनीतदुग्धदधीनि सर्वाण्यपहृत्य भुङ्क्ते।
तथापि तृप्तिं न सुतस्तवैति किमस्य भूतानि वसन्ति कुक्षौ॥(३।४८)

अत्र, गृहे गृहे नवनीत-दुग्ध-दधि भोजनेऽपि कृष्णस्य तृप्तिरेव नास्तीति विशेषोक्तिः। उदाहरणान्तरं रु.वि. ७।४.

स्वभावोक्त्यलङ्कारः — डिम्भादेः क्रियारूपवर्णनं स्वभावोक्तिः।[2] चमत्कारावहाः कवेः सूक्ष्मवर्णनाकौशल्यप्रदर्शिकाः स्वभावोक्त्यलङ्काराः रु.वि.काव्ये समुपलभ्यन्ते।[3] इदमेकमुदाहरणम् —

गण्डं वराङ्गुलिदलैर्लघु चालयन्ती
मन्दस्मिताननमथोपरिरम्भयन्ती।
सान्द्रस्तनस्नुतपयः किल पाययन्ती
नन्दस्य राज्ञ्यभवदित्थमहर्नयन्ती॥(३।१०)

अत्र यशोदाकृतकृष्णलालनं सहजसुन्दरं वर्णितमिति स्वभावोक्त्यलङ्कारः।

उदात्तालङ्कारः — वस्तुनः सम्पत्समृद्धत्ववर्णनं उदात्तम्।[4]

---

(१) विशेषोक्तिरखण्डेषु कारणेषु फलावचः। का.प्र. १०/१०८

(२) स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम्॥ का.प्र. १०/१११

(३) रु.वि. १।४, ३।२९-३१, ४।२, ६।५०, १३।५ इत्याद्याः

(४) उदात्तं वस्तुनः सम्पत्। का.प्र. १०/११५

Rarest Archiver

रु॰वि॰काव्ये उदात्तोदाहरणान्यपि सुन्दराणि दृश्यन्ते।[1]

इमामधिश्रित्य पुरीं परत्र विमुक्तिमेव व्रतिनो व्रजन्ति।
पुरापि नाकाधिकलोकभाजां कथं स तेषां बहुमानपात्रम्॥(१७/३५)

अत्र द्वारवतीवासिनां परत्र स्वर्गाधिकः मोक्ष एव भवतीति लोकातिशयसम्पत्तिवर्णनात् उदात्तालङ्कारः।

प्रतीपालङ्कारः — यत्र प्रसिद्धोपमानोपमेययोः प्रातिलोम्यं भवति तत्र प्रतीपालङ्कारो जायते।[2] यथा-

चन्द्रे जृम्भति तन्मुखत्विषि मुहुर्मन्दानिले तद्वपु-
र्गन्धे वाति वियोगवृद्धिसचिवे तत्कोमलालापवत्।
वेणौ कूजति पञ्चबाणविशिखैः शाणाशितैस्ताडिता
मानिन्योऽपि ययुर्मनोभवपितुः श्रेयोनिधिं सन्निधिम्॥(६/८१)

चारुचन्द्रचन्द्रिकाशोभितशरद्रात्रौ मुकुन्दमुरलीमाधुरीमुग्धानां गोपमानिनीनां श्रीकृष्णसान्निध्यगमनवर्णनमिदम्। उपमानत्वेन प्रसिद्धानां चन्द्रादीनां अत्र उपमेयत्ववर्णनात् प्रतीपालङ्कारोऽयम्।

व्याजोक्त्यलङ्कारः - स्फुटस्य वस्तुस्वरूपस्य छद्मना निगूहनं व्याजोक्तिः।[3]

अन्याचुम्बनजातचिह्नमधुना बिम्बाधरे दृश्यते
तन्मां रञ्जयसीश किं मृदुगिरा धन्याऽबला सैव हि।

---

(१) रु॰वि॰ ९/२२, ३१, ६१. १७/४१

(२) प्रतीपमुपमानस्योपमेयत्वप्रकल्पनम्। कुवलयानन्दः पृ॰ ११

(३) व्याजोक्तिः छद्मनोद्भिन्नवस्तुरूपनिगूहनम्। का॰प्र॰ १०/११८

Rarest Archiver

मन्यूद्रिक्तहृदा मुहुः सखि भवच्छून्यां सभां पश्यतः
तन्मेऽभ्रद्वरवर्णिनीति शमयन्मन्मानसे स्यादसौ॥(९।७४)

गोपीकृष्णसंवादोऽयम् । अत्र अन्यया कृतेन चुम्बनेन सञ्जातस्य चिह्नस्य श्रीकृष्णः मन्युनिमित्तकत्वेन गूहयतीति व्याजोक्त्यलङ्कारः।

विनिमयालङ्कारः - सदृशवस्तुनोः तुल्यायव्ययत्वे विनिमयः ।
रु॰ वि काव्ये विनिमयालङ्कारस्य चारुतरं उदाहरणं वर्तते —
गोवर्धनोद्धारकः कृष्णः "गिरेर्बहिर्गत्वा अद्यापि वार्मुचामाटोपः वर्तते किं पश्य" इति कञ्चिद्गोपं प्राह। स दृष्ट्वा आगत्य श्रीकृष्णं विज्ञापयति —

धारा नैव पयोमुचां यदुपते प्रेमाश्रुधारा परं
स्वानां नापि च गर्जितं स्तुतिकृतां सिद्धेश्वराणां ध्वनिः।
विद्युत्न, अमरनर्तकीकरचयालङ्कारकान्तिः प्रभो
नो वायुः सुरवृष्टपुष्पसहगानन्पालिपक्षैर्मरुत्॥(६।७८)
नीलं नैव नभः सुलज्जितशचीभर्तुर्मुखे नीलिमा
मेघाः क्वापि न सन्ति किन्तु दिविजभ्राजद्विमानाम्बुदाः।
तामिस्रं नहि दिशि, अथेदृशमपि त्वां मानुषं मन्वतां
चित्ते ध्वास्ति, न वेपथुर्निजजने भीतेन्द्रगात्रे परम्॥(६।७९)

श्लोकद्वयेऽस्मिन्, पयोमुचां धाराद्यभावेऽपि प्रेमाश्रुधारादीनां आयवर्णनात् विनिमयालङ्कारः। अस्य च मनोहारित्वे चमत्कारित्वे सहृदया एव प्रमाणम् ।

Rarest Archiver

अर्थापत्त्यलङ्कारः – यत्र दण्डापूपन्यायेन अन्यार्थागमो भवति तत्र अर्थापत्तिः।[1]

> रासोत्सवस्मरणलालसमानसानां
> नासह्यबन्धमिह मोचयतीत्यपूर्वम् ।
> यत्केशपक्ष कुचकञ्चुक रम्यनीवी-
> बन्धं स विश्लथयते व्रजवल्लवीनाम् ॥ (९।१८)

अत्र गोपीनां बन्धत्रयमोचकस्य रासोत्सवस्य, तत्स्मरणलालसमानसानां एकस्य संसारबन्धस्य मोचनं नापूर्वमिति वर्णनात् अर्थापत्त्यलङ्कारः।[2]

एवमर्थालङ्काराणां शब्दालङ्काराणां च प्रयोगेषु कविवर्यः श्रीवादिराजः नितरां सफलोऽस्ति ।

उपरि निर्दिष्टान् अलङ्कारान् अतिरिच्य अन्येऽपि मीलित[3]-आशीः[4]- युक्ति[5]- निरुक्ति[6]- रसवत्[7]- यथासंख्य[8]- अलङ्कार संसृष्टि[9]-अलङ्कारसङ्कर[10] प्रमुखा अपि काव्येऽस्मिन् रुक्मिणीशविजये तत्र तत्र विलसन्ति ।

— x —

---

(1) दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते । सा॰द॰ १०।८३

(2) अर्थापत्त्यन्तराणि – २।५८, ९।३५, ११।१०.

(3) १७/२९ (4) १।६ (5) १।४७ (6) १।१७,१८ इत्यादिषु

(7) २।४४-५८ (8) १।१८ १३।२७ १९।६ (9) ४।२३, ११।४५

(10) १।१३, २।२४, ६।१६, ३४, ४८ इत्यादयः

Rarest Archiver

पञ्चमोऽध्यायः वस्तुवर्णनम्

रु.वि.काव्ये नगरादिवस्तूनां वर्णनं समुचितं विहितं दृश्यते। आलङ्कारिकोक्तानां नगरादिवर्णनानां(1) यथाकथञ्चित् प्रवेशः अत्र न विद्यते किन्तु तानि स्वाभाविकेन प्रकारेण उपलभ्यन्ते। सर्वाणि वर्णनानि नायके श्रीकृष्णे एव समन्वीयन्ते इति नायकोत्कर्षवर्णने तेषामुपयोगः तात्पर्यं च। नगरादीनां वर्णनमस्मिन्काव्ये मनोहारि चमत्कारि च भवति। कवेर्वर्णनाकौशलं अत्र स्फुटीकृतम्। वर्णनाप्रवीणता हरिप्रवणतया सनाथीकृता भक्तकविना श्रीवादिराजेन।

(1) द्वारवतीवर्णनम् – द्वारवत्याः लोकविलक्षणं वैभवं रु.वि.महाकाव्ये वर्णितम्। द्वारवतीति संज्ञा एव तस्या नगर्या किंकारणं जाता? – कविर्वक्ति –

इहाखिलैश्वर्यसुभोगवृद्धेः परत्र निश्श्रेयससौख्यसिद्धेः।
महः परं द्वारमवाप्य पृथ्व्यामसौ पुरी द्वारवती बभूव॥ (७/२६)

इह संसारे अखिलैश्वर्यस्य भोगस्य च अभिवृद्धेः, परत्रापि मोक्षानन्दसिद्धेः द्वारभूतं महः श्रीकृष्णाख्यं अवाप्य इयं नगरी 'द्वारवती' बभूव। श्रीकृष्णस्य सन्निधानादेव अस्याः पुर्याः

---

(1) नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः।
उद्यानसलिलक्रीडामधुपानरतोत्सवैः॥
विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः।
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि॥
अलङ्कृतमसंक्षिप्तं ...... । काव्यादर्श १/१६,१७,१८

लौकिकालौकिक सुखप्रदत्वं नामनिर्वचनेनैवाभिहितम् ।

मध्येसमुद्रं सा द्वारवती विष्णोराकृतिवद्भातीति श्लिष्टोपमया वर्णयन् कविः नगर्याः सम्पद्भरितत्वं स्फुटीकरोति —

सच्चक्रा करपुष्टरम्यकटका भोगीन्द्रभोगास्पदा
नेत्रस्थानगतेन्द्विना कनकसद्वप्रातिपीताम्बरा ।
भाति स्वोदरवासिहंसगमना सेयं सुधर्मावहा
विष्णोराकृतिवत् समुद्रहृदये लक्ष्मीधरालिङ्गिता ॥(७।५२)

सतां-चक्रेण मण्डिता सा द्वारका । तस्यां नगर्यां कटकं-सैन्यं-तत्र तत्र राजभिः दत्तेन करेणैव (बलिरूपद्रव्येण)-न तु कोशस्थद्रव्येण- पुष्टं वर्तते । विलासिनां भोगास्पदायास्तस्याः प्रासादानां नेत्रस्थाने एव इन्दु-इनौ वर्तेते । नूनं तस्याः कनकमयवप्रकान्त्या समस्तं अम्बरमेव हेमवर्णोज्ज्वलम् । हंसगमनानां वनितानामाश्रये तस्यां सुधर्मानाम देवसंसत्संशोभते । एवंभूतायाः द्वारकायाः उपमानं विष्णोराकृतिरेव । सापि विष्णोः आकृतिः समीचीनसुदर्शन-चक्रयुता । देदीप्यमानकरेणैव तस्य हस्ताभरणानि कटकादीनि सौन्दर्यातिशयेन पुष्टानि । भोगीन्द्रस्य शेषस्य भोगं शरीरं तस्याः शयनीयम् । सूर्या-चन्द्रमसौ विष्णोः नेत्रगतौ । कनकवप्रवत् अतिपीतं विष्णोः अम्बरम् । हंसवाहनः ब्रह्मा तस्य नाभिकमलवासी, सुधर्मस्य रक्षको विष्णुः समुद्रशायी लक्ष्मी-धराभ्यामालिङ्गितः ।

Rarest Archive

एकेनैवानेन श्लोकेन द्वारकायाः सज्जनसम्पत्तिः लौकिकालौकिकसुखसमृद्धिः चन्द्रचुम्बिप्रासादवैभवं हेमनिर्मितवप्रोज्ज्वल्यं ललितललना इत्येते विषयाश्चारुतरं वर्णिताः।

अत्र च नगरीवर्णने रत्नखचितभवनानि,(१) कनकनिर्मितवप्राणि,(२) प्राकाराद्बहिः परिखायमानसमुद्रः,(३) अभ्रंलिहाग्राणां प्रासादानां उत्तुङ्गपताकाः,(४) पराक्रमशालिभटाः,(५) नागरिकाणां मनःप्रसन्नता,(६) यत्यादीनां धर्मैकनिष्ठता,(७) भगवद्भक्तानां श्रीकृष्णप्रवणमनस्कता,(८) सुधर्माख्या संसत्,(९) विद्वज्जनानां काव्यादिविमर्शकत्वं,(१०) एतदादीनां वर्णनानि समुपलभ्यन्ते।

(१) यस्यां सुवर्णवरवेष्टनभाजि तेजः-
प्रद्योतिताम्बरहरिन्मणिविद्रुमाद्यैः।
रत्नैः नवैः नवविधैः खचिते सहन्ते
प्रासादमूर्ध्नि न बुधाः कपिशीर्षनाम ॥ १७।६२

(२) कनकसद्मप्रातिपीताम्बरा । १७।७२

(३) पुरीमगम्यां परिखीकृताब्धिं निशम्य कृष्णस्य निरुद्धचित्तः।
स मागधोऽभूदिह योग्यनामा क्रमाज्जरासंहितगात्रसीमा ॥ (१७।३८)

(४) संसक्तमभ्रनिचयं परितः पतन्त्यः
स्वस्पर्धिगात्रमजयन् मरुता पताकाः। १७।६१

(५) निवारयन्तीह भटा यथेशो नवीनमार्गे विशतः कृतान्ते।
न चेक्षिपन्तीह वृका इवार्तान् अवीन् अमार्गे विशतः कृतान्ते ॥ १७।५८

द्वारवत्याः महद्वैशिष्ट्यं नाम श्रीकृष्णाश्रयत्वम्। यं खलु द्रष्टुकामाः तपोनिमग्नाः मुनयः मनसाऽपि नैव अवापुः, तं मुरारिं लब्धुं जनाः समूहमारच्यय्य अनसा इमां द्वारकापुरीं आगच्छन्ति। भगवद्दर्शनप्रतिबन्धकजातं समस्तं अनया द्वारवत्या विघटितमेव —

न मुनयोऽनुययुर्मनसा च यं तमपिलब्धुमिमामनसा चयम्।
दधदुपैति जनः सह जायया विघटिता प्रकृतिः सहजा यया॥(१७।५६)

एवं योगिनामपि दुर्लभं श्रीकृष्णसाक्षात्कारं प्रयच्छती द्वारवती।

अस्यां नगर्यां धर्मरक्षकं श्रीकृष्णं कृताधिवासं वीक्ष्य देवेन्द्रः सुधर्मां देवसभामेव तस्मै समर्पितवान्। कविस्तत्र उत्प्रेक्षते यत्, यथा द्वारवती देवनगरात्

पूर्वपृष्ठादनुवृत्तम्

(६) तनोति सा कोपिनि शान्तभावं
मनस्सु यः कोऽपि निशान्तभावम्॥१७।५९

(७) नयति न यतिरन्यद् भोज्यमात्रान्नमात्रात्
चरति च रतिभर्त्ता प्रेरितो नैव भोग्ये॥ १७।६३

(८) अधिष्ठिताः पोतममूं श्रयन्ते स्वकार्यलाभाय वणिक्समूहाः।
स्वरूपलब्ध्यै हरिपादपोतकृताश्रयाः सिद्धजनाश्च दूरात्॥ १७।२४

(९) सेयं सुधर्मावहा। १७।५२

(१०) काव्योचितश्लोकमपेक्षमाणा विचारयन्तीह पदे पदेऽर्थान्।
विद्वज्जनानन्दकरान् मनोज्ञा बुधा वदान्याश्च पुरे मुरारेः॥ १७।४०.

Rarest Archiver

अमरावतीतोऽपि सुभगाऽभवत् तथा सुधर्मासभातः अत्युच्चसभा द्वारवत्यां न भवतु इति विचिन्त्य इन्द्रः सुधर्मां ददौ—

सुधर्मपुञ्जावनमूलभूतं इहाच्युतं वीक्ष्य कृताधिवासम्।
सभां सुधर्मां प्रददौ पुरीवत्स्वसंसदत्युच्चसभाभियेव॥ (१७।३७)

अत्र च द्वारवत्याः, अमरावतीतोऽपि उत्कृष्टत्वं वर्णितम्। द्वारकायाः पावित्र्यस्य गमकं एकमभिधीयते कविना—

यदङ्घ्रितीर्थेन यदीयनाम्नो बलेन काशी प्रथिता किलासीत्।
मुरद्विषस्तस्य निवासभूता पुरी त्रिलोक्यामियमद्वितीया॥ (१७।४१)

मुरारेः पादतीर्थेन भागीरथ्या, तस्य च रामनाम्ना[1] पुनीता प्रथिता सा काशी। द्वारकायां साक्षात्स एव निवसतीति इयमद्वितीया। नगरीवर्णने चात्र उत्प्रेक्षादयः कल्पनाविलासाश्च नितरां सहृदयहृदयानन्ददा वर्तन्ते। समुद्रस्य मध्ये इदं पुरीरत्नं वर्तते इति समुद्रस्य 'रत्नाकरः' इति संज्ञा बभूवेति कवेः उत्प्रेक्षा। आसाधारण्येन व्यपदेशा भवन्तीति न्यायेन असाधारणपुरीरत्नोपेतत्वात् एव समुद्रस्य रत्नाकरसंज्ञा[2]।

कवेः दार्शनिकत्वमपि नगरवर्णनावसरे तत्र तत्र प्रकटितम्। इयं द्वारवती पुरी मुक्तानां आवलिभिः

(१) काश्यां महेशः रामनाम उपदिश्य जनान् तारयतीति प्रसिद्धेः— व्याख्या

(२) विचित्ररत्नावृतवप्रसौधशृङ्गाङ्गणा गोपुरवापिकौघम्।
इदं पुरीरत्नमवाप्य नूनं बभूव रत्नाकरशब्दितोऽब्धिः॥ १७।२१

Rarest Archive

सम्पूर्णा, आनन्दसन्दोहयुक्ता मोक्ष इवास्ति इति कविर्वर्णयति -

मुक्तावलीराजितसर्वगेहा नित्यं प्रमोदाशनसत्समूहा ।
दुष्टैरगम्या दयिता मुरारेः मुक्तिप्रभा द्वारवती पुरी सा ॥ (१७।३०)

अनया च श्लिष्टोपमया मुक्तेः नगर्याश्च स्वरूपे निरूपिते । मुक्तेः दुष्टैरगम्यत्वं, नित्यं प्रमोदवत्त्वं च प्रतिपादितम् । द्वारका च भगवद्द्वेषिणामगम्या, मुक्तामणिभिः पूर्णा आनन्दसन्दोहदा च इति मुक्तिवत् सर्वदा एतादृशसम्पद्धारितत्वमित्ययं विषयः उपमया व्याश्रितोऽस्ति ।

एवमेव नवविधभक्तिभाजः विरक्तियुजः जनाः कृष्णार्चका अपि विलसन्ति अत्र नगर्याम् -

तत्कथाश्रवणोत्सवेन कतिचित्सङ्कीर्त्य संस्मृत्य तं
तत्पादाब्जनिषेवया च सुधियः तस्यार्चया केचन ।
सख्येनाप्यपरे प्रणम्य बहुशः केचिच्च दासास्तथे-
त्यात्मानं च निवेद्य मोक्षनिरताः सन्त्यत्र कृष्णार्चकाः ॥ (१७।४७)

अत्र, श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥ (1)

इत्युक्तदिशा मोक्षनिरताः मुमुक्षवः द्वारवतीं संश्रिताः । केचिदपरे रामार्चकाश्च (2) नवविधभक्तिं विडम्बयन्तः विलासिनोऽपि प्रकारान्तरेण श्रवणकीर्तनाद्यासक्ताः सन्तः सन्ति अस्यामेव पुर्याम् - तद्यथा

(1) भागवतम् ७।५।२३ (2) रमाणां नारीणामर्चकाः

Rarest Archiver

अङ्गीकारगिरां श्रुतावभिरताः सङ्कीर्त्य ता मानिनीः
तत्पादौ परिगृह्य वन्दनमहो कृत्वा त्वदीया वयम् ।
त्वद्दासा वयमित्युदीर्य मनसाऽतीतां स्मरन्तो रतिं
नीवीमोक्षफलाय सख्यकुशलाः केचिच्च रामार्चकाः ॥(१७/४८)

अत्र हि कामिनां कामिनीः वशयितुं कृतमहाप्रयत्नानां कामिनीवशत्वं तदर्चकत्वं शब्दचमत्कारेण सरसशैल्या वर्णितम् ।

किञ्च अस्यां पुर्यां ब्रह्मज्ञानिनः योगिनः मन्मथजयं सम्पाद्य अप्रतिभटाः सन्तः स्वकीयं जयं दर्शयन्तः सञ्चरन्ति । एते विष्णुभक्ताः स्मरस्य भार्यां रतिं अपहृत्य विष्णोः स्नुषां तां विष्णुपादाब्जयुगे निधाय विराजन्ते ।

स्मरस्य भार्यामपहृत्य विष्णोः स्नुषां तदङ्घ्र्यब्जयुगे निधाय ।
जयं स्वकीयं भुवि दर्शयन्तः चरन्ति तस्यां परिपन्थिशून्याः ॥(१७/४७)

परिपन्थिशून्यानां ब्रह्मवर्चस्विनां योगिनां अयं विजयश्चेत् केषाञ्चिदन्येषां मन्मथमहाराजभीतानां तद्वशगानां कामिनां अवस्था काचिदन्यप्रकारा —

मारं दर्पकरं प्रतर्क्य सुहृदं मत्वा जगन्मोहनं
सेनां च प्रमदां शरांश्च विषमान् तस्यानुगान् व्योमगान् ।

(१) पुष्पीकृत्य शरासनं रतिपतेः पञ्चत्वभाजः शरान्
तत्सेनां अबलां विधाय सचिवं तूष्णीं वसन्तं क्वचित् ।
तन्मित्रं क्षयभाजनं तदनुगान् माधुर्यधुर्यान् गिरा
अनङ्गीकृत्य च तं जनोऽत्र चरति ब्रह्मास्त्रवान् प्रत्यहम् ॥(१७/४४)

कोदण्डं सुमनःसमूहविनुतं तैः पूरितं सारथिं
सेनां तामवलम्ब्य तस्य वशगाः तस्यां रमन्तेऽपरे ॥(१७।४६)

मन्मथस्य सेनां, सारथिं, शरान्, शरासनं सुहृदं च स्वरूपतः प्रबलान् दृष्ट्वा भीता इव तत्सेनां प्रमदारूपामवलम्ब्य इमे तस्यां द्वारवत्यां चिरं रमन्ते।

इत्थं द्वारकायां रागिणोऽपि सन्ति विरागिणोऽपि सन्ति। किन्तु तेषां फलं समानमेव —

सेयं पुरी वितनुते विषयोपभोक्तुः
प्रायः फलेन समतां विषयोज्झितस्य।
यत्कृष्णसङ्गतवधूषु ललामलेपैः
तद्ध्यानधूतदुरितेषु च तस्य साम्यम् ॥(१७।६८)

अत एवास्यां नगर्यां कृताधिवासं महीशकन्यानां षोडशसहस्र-सङ्ख्याकानां सकलार्थप्रदं अहि-ईश-क(ब्रह्मा) देवानां न्यासकलायाः-वैराग्योपेतज्ञानस्य- अर्थरूपं श्रीकृष्णं सिद्धाः विहायसा आलोक्य सालोक्यं विहायापि अत्र मुदा रमन्ते।[1] इत्थं वैकुण्ठादप्याधिक्यं प्रतिपादितं श्रीकृष्णनिर्मितद्वारकायाः।

(१) विहाय सालोक्यं उदारं अन्ते
विहायसा आलोक्य मुदा रमन्ते।
महीश-कन्या- सकलार्थरूपं
अहि-ईश-क-न्यासकला- अर्थरूपम् ॥(१७।६७)

Rarest Archive

समुद्रवर्णनम् - द्वारवतीं गच्छन्तः मुनयः मार्गे समुद्रं वर्णयन्ति। वारिधिः भूम्याः विचित्रं वस्त्रमिति अपूर्वतया अत्र वर्णितः महाकविना श्रीवादिराजेन —

स्वफेनकान्त्या सितपार्श्वयुग्मः शिखाभिरौर्वस्य सुपीतमध्यमः।

सितेतरोऽन्यत्र स भूतधात्र्याः विचित्रवस्त्रश्रियमातनोति॥ (१६/५१)

समुद्रस्य पार्श्वयुग्मं फेनकान्त्या सितम्। और्वस्य शिखाभिः मध्ये पीतवर्णता। अन्यत्र तु कृष्णतया दृश्यते समुद्रः। एवं च वसुन्धरायाः श्वेतपट्टिका पीतपुष्पाकृतिविशिष्ट-नीलाम्बरमिव भातीति अपूर्वमिदं वर्णनम्।

अत्र च समुद्रवर्णने रत्नानि, नदीसङ्गमः(१), चन्द्राद्वृद्धिः, ऊर्मयः, वाडवाग्निः इत्येतदादयः सुलभ-ग्राह्यतया चित्रिताः। स समुद्रः अनन्तानि रत्नानि स्वोदरे पिधत्ते। किन्तु अन्येभ्यः पानीयमपि न प्रदत्ते। अयं खलु लोभिनां स्वभावः(२)। सरित्पतिः समुद्रः विवेकं परित्यज्य नदीनां मुखतः वेलां विलङ्घयति। कविरर्थान्तरं न्यस्यति नार्या सह सङ्गतानां विवेकः वेला च न विद्येते इति —

सरित्पतिस्तन्मुखतो हि वेलां विलङ्घयत्यत्र विवेकहीनः।

तथा हि नार्या सह सङ्गतानां कुतो विवेकः कुत एव वेला॥ (१६/५३)

(१) स रम्यफेनासवशोभिवक्त्रास्तरङ्गहस्तैर्जघनं नदीनाम्।

विधूदये संस्पृशतीन्दुदृष्ट्या न कस्य कामः सरसस्य हि स्यात्॥ (१६/५५)

.... अनुवर्तते

Rarest Archiver

चन्द्रास्तेन समुद्रः आनन्दादिव वृद्धिं गच्छति, मैत्री नास्ति चन्द्रसूर्ययोः अधुना। किं कारणम्? समुद्रसम्बन्धिनीं पश्चिमादिगङ्गनामुपेत्य रागभाक् स चन्द्रमाः। एकस्यां अनुरक्तयोः यूनोः मैत्री कथं वा भवति?[1]

श्रीकृष्णः एतावत्पर्यन्तं जरासन्धादिभिः शत्रुभिः अजेय एवाभवत्। इदानीं समुद्रमध्ये नगरीं विधाय अत्यजेयः समभवत्। कविर्विनोदेन वक्ति - कलत्रवक्षाच्छादितं[2] पुमांसं कः खलु जिगीषति इति -

पुराऽप्यजेयो मुरजित्किलात्र पुरीं विधायाभवदत्यजेयः।
ममेत्थमाभाति कलत्रवक्षाकृतालयं कः खलु जेतुकामः॥(१६/५८)

समुद्रे विष्णुर्वर्णनीय इति आलङ्कारिकाभिमतम्। परन्तु कविरत्र विष्णोरजेयत्वमपि विचित्ररीत्या प्रत्यपादयत्।

—— पूर्वपृष्ठतोऽनुवृत्तम् —

(३) असह्यवह्निव्यथितोऽपि वार्धिः अनन्तरत्नान्युदरे पिधाय।
न जातु पानीयमपि प्रदत्ते धनस्य लाभादधिको हि लोभः॥१६/५२

(१) स्वीयाशायुवतिमुपेत्य रागभाजः
तोयेशः सुहृदपि वीक्ष्य नाशमिन्दोः।
आनन्दादनिशमुपैति वृद्धिमुच्चैः
एकस्यामभिरतिमिच्छतोः क्व मैत्री॥१६/५५

(२) भूमेः विष्णुपत्नीत्वात् समुद्रस्य भूवक्षःस्थानीयतया लोकधर्मं आश्रित्य इयं विनोदोक्तिः — तच्छ्लोकव्याख्या गुरुभावप्रकाशिकायाम्।

Rarest Archive

पर्वतवर्णनम् – श्रीकृष्णेन समुद्धृतस्य गोवर्धनपर्वतस्य वर्णनं रु॰ वि॰ काव्ये षष्ठे सर्गे उपलभ्यते। पूर्वकविभिः भूमिस्थस्य पर्वतस्य वर्णनं कृतं दृश्यते। अत्र तु आकाशस्थपर्वतः वर्ण्यते इति अयं विशेषः। गोवर्धनवर्णनावसरेऽपि कवेः भगवद्भक्तिभावस्य उचितमेव निरूपणं वर्तते। गोगोपगोपीगोकुलगुप्त्यै गोपालबालमौलिना उद्धृतो गोवर्धनगिरिः गोविन्दस्य गोपुरवद् भातीति वर्णयति कविः –

सुवर्णशृङ्गैः कलशोपमानैः मृगादिभिः कृत्रिमसन्निभैश्च
गुहोल्लसद्द्वारगणैः समन्तात् वृतो गिरिर्गोपुरतीव विष्णोः॥(६।४)

गोपुरस्यापि सुवर्णकलशोपशोभितत्वात्, चित्रलिखितमृगादिसमेतत्वात् चतुर्दिक्षु द्वारोपेतत्वात् च अस्य शृङ्ग-मृग-गुहोपेतस्य गिरेः गोपुरवदाचरणं समञ्जसम्। पर्वते वर्णनीयाः शृङ्ग मृग गुहाः एकत्रैवात्र वर्णिताः।

एवमेव वृष्टिवशात् पतिते जले दृश्यमानेन स्वप्रतिबिम्बेन मनोहरः सः पर्वतः अद्भुतसम्पुटत्वेनाप्युत्प्रेक्षितः, तथाहि –

पयःश्रितस्वप्रतिबिम्बलोलं पतत्प्रसूनाञ्चितशृङ्गजालम्।
स्वकुक्षिमध्यार्पितनन्दबालं जनोऽद्भुतं सम्पुटमाशशङ्के॥(६।११)

प्रतिफलनस्य वैपरीत्येन जायमानत्वात् प्रतिबिम्बस्य सम्पुटपूर्वार्धता, उपरिस्थितस्य बिम्बभूतस्य पर्वतस्य उत्तरार्धता इति सम्पुटत्वमुपपद्यते। सम्पुटे अन्तः भगवन्मूर्तिः स्थाप्यते। उपरि च पुष्पादिभिरलङ्क्रियते। अस्य च लोकविलक्षणत्वादद्भुतसम्पुटत्वम्।

Rarest Archiver

अत्र च पर्वतवर्णने मेघाः, गुहाः, मुनयः,[1] शृङ्गाणि, रत्नानि धातव[2] इत्यादयः उत्प्रेक्षा - उपमा - अर्थान्तरन्यासादिभिः वर्णिताः। श्रीकृष्णेनोद्धृतस्य गोवर्धनस्य स्फटिकनिर्मिते उत्तुङ्गे शृङ्गे त्रिविष्टपस्य आकाशस्य च प्रतिबिम्बे फलिते आस्ताम्। तत्र कवेरुत्प्रेक्षा यत् सः गोवर्धनः हरेराज्ञया वृष्टिकरणेन अपराधिनोः इन्द्रमेघयोः तौ आलयौ त्रिविष्टपाकाशौ कवलीकरोति इति—

त्रिविष्टपाभ्रप्रतिरूपधारी स पर्वतः स्फाटिकतुङ्गशृङ्गे।
हरेर्निदेशादपराधिशक्रघनालयौ तौ ग्रसतीव लोकौ ॥ (६।७२)

अत्र हि गोवर्धनगिरेः स्फटिकनिर्मितोत्तुङ्गशृङ्गवर्णनेन सह श्रीकृष्णाज्ञापालकत्वमुत्प्रेक्षितम्।

पौराणिककथानुसारिणी इयमुपमा विदुषां मनोहारिणी—

सभासुरश्रीशकपोललग्ननखोल्लसद्रत्नकराग्रसंस्थः।
बिभर्ति कूर्माश्रितनागराजफणास्थपृथ्वीश्रियमद्रिराजः ॥ (६।७४)

सः गोवर्धनाद्रिराजः, भासुरे श्रीशकपोले लग्नस्य नखाख्यैः रत्नैर्लसति कराग्रे संस्थितः सन् कूर्माश्रितस्य नागराजस्य

---

(१) खगान् स वृष्टेर्द्रुमकोटरेषु मृगान् जुगोप स्वगुहागृहेषु।
मुनीन् घनात्युध्धृतमेखलासु विपत्सु कः स्वीयमुपेक्षतेऽन्यः ॥ ६।८

(२) उद्गच्छदूष्मावलिधूमलिङ्गं अद्रिं द्रवद्धातुरसार्द्रशृङ्गम्।
विष्वक्पतद्रत्नचयस्फुलिङ्गं अग्न्यस्त्रमीशाचरितं प्रतर्के ॥ ६।७५

फणास्थपृथ्व्याः कान्तिं धृतवान् । अत्र श्रीकृष्णकपोलस्य वृत्तत्वात् पुष्टत्वात् स्निग्धत्वाच्च कूर्मसदृशता, नखानां स्वच्छत्वात् रत्नसाम्यं, करस्य दीर्घत्वात् मसृणत्वाच्च शेषशरीरौपम्यं कराग्रस्य विस्तृतत्वात् शेषफणासदृक्षता गोवर्धनाद्रेः पृथुत्वात् पृथ्वीस्थानीयता इति चारुतरमुपमा ।

वृष्टिः सर्वथा गता इति व्यङ्ग्यभङ्ग्या निरूपयन् कविः गोवर्धनः स्वस्मिन् विद्यमानैः तैस्तैः विशेषैः मेघं जिगाय इति वर्णयति —

अद्रिस्तं घनमिन्द्रनीलधरणीकान्त्या, शिखण्डश्रिया
तस्याखण्डलचापं, अम्बुनिचयं मुक्ताफलानां रुचा ।
सौवर्णस्थलशोभया च तटितं, पञ्चास्यनादेन त-
न्नादं साधु जिगाय किं न सुकरं नित्यं क्षमाधारिणः ॥(६।७६)

एवं च गोवर्धने इन्द्रनीलमणि-मुक्ताफल-सौवर्णस्थल-पञ्चास्य-शिखण्ड-इत्यादीनां महती सम्पत्तिरभिहिता ।

ऋतुवर्णनम्

वसन्तवर्णनम् – रु·वि·काव्ये चतुर्थसर्गगतवसन्तवर्णने श्रीकृष्णप्रविष्टस्य वृन्दावनस्य रमणीयावस्थितिरवलोक्यते । वसन्तः स्वस्वामिनं मन्मथं प्रद्युम्नरूपेण जनयिष्यतः श्रीकृष्णस्य वृन्दावने हार्दिकं स्वागतं तनोति । अपि च मन्मथं जनयितुं तन्मनः त्वरायुक्तं कर्तुं तत्सेवामपि सम्यक् करोति । तद्यथा —

Rarest Archiver

दाक्षिण्यं प्रकटीकरोति मरुता, रागं प्रवालैः, पिकै-
माधुर्यं, प्रियभाषणं शुकचयैः, गीतानि भृङ्गैर्मधुः।
स्नानं सन्मधुनाऽर्चनं च कुसुमैः, छत्रं तरुच्छायया
स्वाधीशं जनयिष्यतोऽस्य हृदयं व्यग्रं विधास्यन्निव॥(४।८५)

सः मधुः माधवाय मरुता दाक्षिण्य - दाक्षिणदिग्भवत्वं, सरलत्वं - दर्शयति। किसलयैः तं प्रति अनुरागः प्रकटितः। पिकैः माधुर्यं दर्शितम्। सः वसन्तः शुकसमूहैः प्रियं भाषते। भृङ्गैर्गीतानि निवेदितानि। पुष्परसैः स्नापितः श्रीहरिः। कुसुमैरर्चनं कृतं तस्य। छत्रमपि तरुच्छायाव्याजेन उद्धृतं तेन वसन्तेन। कार्यार्थिनो हि किं किं न कुर्वन्ति? एकस्मिन्नेव अस्मिन् पद्ये वसन्तर्तोः वैभवं वर्णितम्।

मधुमासे च मानवाः वनितासहायं लषन्तीत्यस्मिन् विषये आश्चर्यं न भवति। यतः अस्मिन् समये सरागाः सन्तः तरवः, वातैः चलिता अपि लताः न त्यजन्ति इति कविः प्रकृतेः रमणीयत्वं चित्रयति।(१)

अस्मिंश्च वसन्तवर्णने कतिपयैरपि पद्यैः निरवद्यं हृद्यं अर्थं निबद्धवान् कविः। उत्प्रेक्षाद्यलङ्काराणां प्रभूतं प्रयोगं प्रत्यक्षीकुर्मो वयमत्र। सहकारवने

(१) वसन्तकाले वनितासहायं लषन्ति मर्त्या इति किं विचित्रम्।
यतः सरागास्तरवोऽपि तन्वीर्लता न वाताचलितास्त्यजन्ति॥ ४।८६

Rarest Archiver

पिकान् इत्थं दर्शयति कविः -

परिलसत्सहकारनवाङ्कुरे पिकगणः शुशुभे शनकैर्ध्वनन्।
स्मररहस्यमनून् इव सञ्जपन् अखिलदर्पकदर्पकसायके ॥४।३९

सहकारस्य आखिलदर्पकस्य कन्दर्पस्य सायकत्वात् तदुन्-स्थितानां पिकानां ध्वननं मन्मथस्य गोप्यमन्त्राणां जपत्वेन उत्प्रेक्षणं सयुक्तिकं प्रतिभाति। अत एवास्मिन् वसन्ततौ कुसुमचुम्बनकृत् षट्पदः मधुरेण स्वीयध्वनिना विलासिजनान् प्रेयसीसरसाधरचुम्बनं बोधयति -

कुसुमचुम्बनकृन्मधुरध्वनिः प्रियजनानिति शिक्षति षट्पदः।
मृदुगिराब्जमुखीसरसाधरं पिबत मा बत मान इहोचितः॥(४।४०)

कुसुमसदृशवदनायाः नायिकायाः दलायमानं अधरं सान्त्वन वचनपूर्वकं मानं त्यक्त्वा प्रियजनाः पिबन्तु इति षट्पदः वदति। एका नायिका यदि अनुकूला भवति तर्हि नायिकान्तरं गन्तव्यमिदं षट्पदपदेन सूचितम्।

स्वसुहृदः मन्मथस्य वैरिणः शिवस्य प्रतिशिवं कर्तुं वसन्तेन प्रेरितः भुजङ्गसमूहः रहसि नूतनं शिवं रचयामासेति वसन्तकालीनविलासः उत्प्रेक्षितो वर्तते। अत्र कामविलासस्य तद्वैरिनिर्माणपरतया चित्रणं चमत्कारावहम् -

मधुनियुक्तभुजङ्गचयः स्तने रहसि नूत्नशिवं रचयन्निव।
नखपदेन्दुकलां वसनच्युतिं वितनुतेऽतनुतेजसि योषिताम् ॥(४।४२)

Rarest Archiver

स्मरहरं हरं बहिः विरोद्धुमशक्यत्वात् रहसि योषितां अतनुतेजसि स्तने एव शिवनिर्माणमभिहितम्। शिवनिर्माणे च तदाभरणत्वेन परिचितानां भुजङ्गानां सामर्थ्यमस्तीति द्योतनाय विटपदे भुजङ्गपदं प्रयुक्तम्। शिवश्चन्द्रमौलिः दिगम्बरश्च। विटाश्च स्तनप्रदेशे नखेन्दुकलां वसन-च्युतिं च कृतवन्तः। एवमेव

मृगमदेन सितेतरकण्ठतां करयुगाम्बुजवेष्टितमूर्धताम्।
हृदयमन्दिरतां समहस्यतां रुचिरतां चिरतान्तमुखैः स्वकैः॥(४।८३)

शिवः नीलकण्ठः, कस्तूर्या नीलकण्ठत्वं कृतम्। शिवः भक्तार्पिताम्बुजालङ्कृतः, तादृशालङ्कारश्च अत्र करयुगाम्बुजेन कृतं भुजङ्गैः। स्तने कस्तूरीलेपनं तत्करपरामर्शनं च अत्र उक्ते भवतः।

वसन्तश्रिया च वनदेवता मनोहारिणी भवति। फलपल्लवशुकपिकादिशोभितां तां वनदेवतां त्यक्तुं श्रीहरिरपि न शशाक! —

बर्हाक्षीं प्रसवाननामलिकुलोत्फुल्लालकां पल्लव-
प्रान्तस्कन्धभुजां लतामृदुतनुं रक्ताम्बरारञ्जिताम्।
माद्यत्कोकिलसुस्वनां शुकवचश्चाटुं पलाशाधरां
शक्तोऽभूद्वनदेवतां ऋतुमतीमप्युज्झितुं नो हरिः॥(४।३७)

वसन्तकाले, बर्हाणि वनदेवतायाः अक्षीणीव प्रतिभान्ति।

पुष्पाण्येव तदाननम् । अलिकुलमेव वनदेवतायाः फुल्लालकाः । पल्लवोल्लसत्स्कन्धाः तस्याः भुजायिताः । लता मृदुतनुः । प्रवालादिभिः रक्तेन अम्बराख्याम्बरेण सा आरञ्जिता । चूतपल्लवादिरसास्वाद-जन्यमदोपेतानां कोकिलानां सुस्वनः तस्या एव । शुकवचांस्येव तस्याः चाटूक्तयः । पलाशाधरोज्जृम्भितां तां वसन्तर्तुमतीं त्यक्तुं हरिः न शक्तोऽभूत् । यथा बर्हिवदाक्षियुक्तां पुष्पवन्मनोहराननां लताङ्गीं रक्ताम्बराराञ्जितां कोकिलवत्सुस्वनां नायिकां ऋतुमतीमपि रसिकः नायकः न त्यजेत् तथाऽत्याकर्षकत्वं वसन्तसमये वनदेवतायाः । एवं चात्र कविना वनदेवतां वर्णयता वसन्तश्रीः साधु सरसतया निरूपिता ।

वनलक्ष्मीरपि नरमानसमण्डनं श्रीहरिं मलयमारुतेन व्यजनवतीव अन्वगच्छत् तत्र वसन्तमासे।[१] वसन्तादपि श्रीकृष्णस्यैव उत्कर्षं वर्णयन् कविः वसन्तनिरूपणमुपसंहरति-

अधरपाणिपदर्जितपल्लवो मधुरवेणुरवः कलभाषणः ।
वदनगन्धवहश्वसनोऽजयत्सकुसुमः कुसुमाकरमच्युतः ॥(४।४७)

अच्युतस्य अधरपाणिपदानि पल्लवायितानि । मधुरवेणुनादः कोकिलस्वरमनुकरोति । स च कृष्णः कलभाषणः शुकवत् । तन्मुखवायुरेव मन्दानिलः सकुसुमः सर्वदा च्युतिरहितः अच्युतः कदाचिदेव वैभवोपेतं वसन्तमजयत् ।

(१) सजलशीकरदाक्षिणवायुना कुसुमसञ्चयकम्पनचुम्बुना ।
व्यजनपाणितलेव तमन्वगाद्वनरमा नरमानसमण्डनम् ॥(४।३८)

ग्रीष्मर्तुवर्णनम् - रु॰ वि॰ काव्ये पञ्चमसर्गारम्भे श्रीकृष्णस्य दावाग्निपानवर्णनावसरे ग्रीष्मर्तोः वैभवं वर्णितं विद्यते। ग्रीष्मस्य परसन्तापकरणसामर्थ्यप्रदं दावाग्निं कृष्णेन पीतं श्रुत्वा कोपोद्दीप्तः इव स ग्रीष्मः प्रादुरभवदिति ग्रीष्मवर्णनं उपक्रमते कविः।(1) अयं च ग्रीष्मः प्रज्वलितसूर्येण सहितः माधवस्य माधवपदाभिधेयस्य वसन्तस्य च वैरीवादृश्यत —

तापे तद्वनमाधवेन विजिते भास्वत्प्रभासम्भवे
दावे च व्रजमाधवेन दमिते ग्रीष्मो विजृम्भे क्षणात्।
कोपेनेव वसन्तपुष्पनिचयं शुष्कं विधाय, अनिलं
तप्तं, चम्पककम्पितांश्च मधुपान्, मूकान् पिकादीन् खगान्॥

पाथः शीतमशीतलोष्णधरिणीं भास्वद्बलेनोष्णयन्
ऊर्ध्वं गन्धवहं नयन् त्रिवृतमप्यम्भागपात्रं वपुः।
कुर्वन् कृष्णकृते विरोधमपि तद्वासं वाः शोषयन् [च]
विश्वं तस्य वशं दुवेन च दहन् वैरीव सोऽदृश्यत॥(5/5-6)

स्वमित्रस्य सूर्यस्य प्रभया सम्भूतं तापं वनमाधवेन वसन्तेन विजितं श्रुत्वा स्वसहायं दावं च व्रजमाधवेन दमितं दृष्ट्वा स निदाघः कोपाटोपवशं गतः वसन्तस्य प्रतीकारं विधातुमेव वसन्तपुष्पसमूहं स्वकाले शुष्कं चकार।

---

(1) निजबलकरमग्निं कृष्णपीतं निशम्य
ज्वलित इव ससूर्यः प्रादुरासीन्निदाघः।(5/4)

Rarest Archiver

मन्दानिलं तप्तं चकार। भ्रमरान् चम्पककम्पितान् चकार। पिकादीन् खगान् मूकान् चकार। कृष्णकृते विरोधं कुर्वन्निव स निदाघः कृष्णनिर्मितं यद्यद् वस्तु यादृशं यादृशं अभवत् तस्य तस्य वस्तुनः वैपरीत्यमकरोत्। स्वभावेन शीतं जलं भास्वद्बलेन उष्णं अकरोत्। प्रकृत्या अशीतलोष्णां भूमिं उष्णां व्यधात्। तेजोबन्धावृतमपि वपुः अभ्यागपाशं कृतम्। कृष्णस्य वासस्थानं नीरं च शोषितम्। कृष्णवशं च विश्वं दवेन नूनं दग्धं कृतं तेन ग्रीष्मेण। ग्रीष्मस्य तापेन न केवलं मनुजाः अपि तु ब्रह्मरुद्रविष्णवोऽपि तप्ताः, तस्मात् सन्तः शीतलाश्रयं गताः। तद्यथा —

अहो निदाघोत्थभयाद्दिवेशो बिभर्ति गङ्गां, जलधौ स शेते।
रमापतिः, पङ्कजविष्टरस्थ चतुर्मुखः तं विषहेत कोऽन्यः॥(५।७५)

अत्र च हरिब्रह्मरुद्रा एव निदाघभयभीता इति उत्प्रेक्षया ग्रीष्मस्य सत्त्वं अतीव तापकरत्वं च प्रतिपादितम्।

किन्तु एतादृते महातापकरे निदाघेऽपि सिद्धाः चतुरग्निमध्ये निमीलिताक्षाः सन्तः परमपुरुषं स्मरन्ति। फलार्थिनः सर्वं दुःखं सहन्ते एव। ग्रीष्मे तपस्विनामपि वर्णनेन कविरयं वैलक्षण्यं भजते।

---

(१) तदापि सिद्धाश्चतुरग्निमध्ये प्रहृष्टरोमावलयः स्मरन्ति।
निमीलिताक्षाः परमं पुमांसं फलार्थिनां किं न विषह्यमस्ति॥(५।७६)

केचिन्नागरिकास्तु गिरिकुञ्जेषु वसन्तः प्रियालिङ्गिताः, तदीयाधरजां सुधां पिबन्तः न तापं विदन्ति न वा पिपासाम्।(1) जनानां सूर्यप्रभाजन्यतापं श्रीकृष्णः स्वमुखेन्दुना सुधार्द्रवीक्षावृष्टिभिश्च परिहरति स्म ।

जहार कृष्णः तपनोत्थतापं मुखेन्दुना दृष्टिपथं गतेन ।
सुधार्द्रवीक्षामयवृष्टिभिश्च व्रजौकसां काननवासिनां च ॥(5/29)

वृन्दावनवासिनः गोकुलवासिनश्च गोपाः श्रीकृष्णस्य मुखेन्दुदर्शनेन तदवलोकनेन च ग्रीष्मस्य तापं विस्मरन्ति स्म। एवमस्मिन् ग्रीष्मवर्णनेऽपि कविश्रीवादिराजः नायकस्य श्रीकृष्णस्य उत्कर्षं वदन् स्वप्रतिभां प्रदर्शयति । वर्षर्तुवर्णनम् - ग्रीष्मवर्णनानन्तरं वर्षर्तोरपि मनोरमं वर्णनं रु॰वि॰काव्ये पञ्चमे सर्गे उपलभ्यते । उत्प्रेक्षा-अर्थान्तरन्यास-दृष्टान्ताद्यलङ्कारैर्वर्षावर्णनं नितरां हृदयावर्जकमास्ति ।

कृष्णः एक एव निदाघतापं तपनतापं च परिहरन् आसीत् ग्रीष्मसमये, तस्य कृष्णस्य सवर्णस्य सहायं विधातुमिव मेघाः आगताः -

मेघाः सवर्णस्य हरेः सहायं प्रायो विधातुं परितः समेत्य ।
भास्वन्तमङ्गैः पयसा निदाघं आच्छाद्य विश्वं पुपुषुस्तदीयम् ॥(5/30)

हरेः सहायं कर्तुं आगतास्ते मेघाः स्वाङ्गैः सूर्यमाच्छादितवन्तः

(1) प्रियास्तनाश्लिष्य परिरभ्य कुम्भान् सुधां तदीयाधरजां पिबन्तः ।
विदन्त्यहो नागरिका न तापं न वा पिपासां गिरिकुञ्जवासाः ॥(5/28)

Rarest Archive

पयसा च निदाघं आच्छादितवन्तः - एवं हरेः विश्वं ते पुपुषुः।

मेघाः परोपकारार्थं वर्षन्ति खलु। विष्णुपदाश्रितानां तेषां मेघानां जल(ड)नायकोऽपि समुद्रोऽपि सहायकारी अभवत। कविरत्र अर्थान्तरं न्यस्यति - नित्यं मुकुन्द चरणार्पितवैभवस्य मर्त्यानामुपकारनिरतस्य च पुंसः को वा न सहायो भवतीति —

आश्रित्य विष्णुपदमार्थिषु यच्छतोऽम्बु
मेघस्य सारथिरभूज्जलनायकोऽपि।
नित्यं मुकुन्द-चरणार्पितवैभवस्य
मर्त्योपकारनिरतस्य न कः सहायः॥(५।३१)

अत्र च भगवदाश्रितानां आर्थिषु दातॄणां परोपकर्तॄणां जनानां जडाः अपि सहायकाः भवन्तीति लौकिकालौकिकोन्नतेः साधनमभिहितं कविना। परोपकारनिरतानां ये केचित्सहाया भवन्तीत्येव न, किन्तु शत्रवोऽपि क्षेमकारका भवन्तीत्यपि मेघ-दृष्टान्तेन प्रतिपादयति कविराजः श्रीवादिराजः —

लोकस्य शोकहरवार्यभिवर्षतोऽलं
मेघस्य योगकृदभूदमतोऽपि वातः।
कामं परोपकृतिलग्नमनोरथानां
क्षेमङ्करत्वमुपयान्ति हि शत्रवोऽपि॥(५।३२)

लोकस्य श्रमहरं जलं अलं अभिवर्षतः मेघस्य,

Rarest Archives

झञ्झानिलेन मेघानां अपसरणकरणात् शत्रुभूतोऽपि वातः अधुना वर्षाकाले आकाशे मेघान्तरेण सङ्गतिकृदेवाभूत् ।

वर्षर्तौ च समुद्रस्य नदीनां नदानां सर्वेषामपि जलाशयानां समृद्धिः पूर्तिः सञ्जायते । समेषामपि जलागाराणां इयं सम्पत्तिः मेघाय समुद्रेण कृतस्य अब्बिन्दु-मात्रदानस्य फलमिति कविर्वर्णयति –

कादम्बिन्यै वितरति पयोबिन्दुमात्रं पयोधौ
आसीद् वृद्धिः सकलसरितां स्वात्मनश्चेति युक्तम् ।
नित्यं विष्णोः पदमधिगतायात्युदाराय दानात्
अब्बिन्दूनामपि शतगुणा वृद्धिरद्धा स्ववर्गे ॥ (५।२४)

प्रतिगृहीतुः पात्रत्वं विष्णोःपदमधिगताय, अत्युदाराय इति विशेषणद्वयेन अत्र अभिहितम् ।

वर्षाकालीनपयोधरोन्नतिवर्णनेन सह विलासिनां चित्रणमपि कविकल्पनावैभवप्रदर्शकमास्ति –

उद्यद् विद्युति वक्रशक्रधनुषि व्योमाग्रसीमाश्रये
वर्षत्यूर्जितगर्जितेऽति चकिता मर्त्याः पयोधारिणि ।
नेत्रान्तभ्रुकुटीबलं कृशलसन्मध्योर्ध्वभागोदितं
नारीपीनपयोधरं भयहरं भेजुः क्वणद्भूषणम् ॥ (५।२३)

एकस्मात् महाराजाद् भीताः समबलं राजान्तरं यथा संश्रयन्ते तथा वर्षाकालीनपयोधरेभ्यः अतिचकिताः मर्त्याः

Rarest Archive

तत्सदृशसामर्थ्यवन्नारीपीनपयोधरं आश्रितवन्तः। पयोधरेषु उद्यद्विद्युतः वक्रशक्रधनुषश्च बलं - नारीपयोधरेषु च एतत्प्रतिभटतया नेत्रान्तभ्रुकुट्योः - कटाक्षभ्रूभङ्ग्योः (१) बलं वर्तते। व्योमाग्रसीमाश्रयाणां पयोधराणां गर्जनेन चकिता मर्त्याः। अत एव व्योमसदृशकृशमध्योदितं क्वणद्भूषणेन भयहरं नारीपीनपयोधरं श्रिताः। अत्र च बिम्बप्रतिबिम्बभावेन चमत्कारावहत्वे सहृदयानां हृदयाण्येव प्रमाणम्।

शरद्वर्णनम् - शरद्वर्णनं शार्दूलविक्रीडितचतुष्टयेनैव करोति कविरयं तत्रैव पञ्चमे सर्गे। उपमोल्लासितेन यमकेन शरत्साम्राज्यस्य प्रकृतिरम्यत्वं वैशिष्ट्यं च चित्रितम् -

> साधूनां वरमानसाकृति सरः संशोधयत् तन्मुखप्रख्यं पद्मचयं प्रहर्षयदलं पङ्कं च सङ्खण्डयत्।
> हृद्योमेव घनापिधानरहितं कुर्वन्नभः संहरत् तामिस्रं हरिवीर्यकीर्तिसदृशौ सूर्योडुपौ स्पष्टयत्॥
> संसाराख्यमभेद्यबन्धनमिव प्रावृट्कृतं बन्धनं भिक्षूणां वणिजां अधःकृतजलं विच्छेदयत्, मोदयत्।
> मोक्षानन्दमहाप्रवाहतुलनैः गोक्षीरपानैर्जनान् सच्छ्रीसत्प्रतिकृत्यलक्ष्यत शरत्साम्राज्यमुज्जृम्भितम्॥(५/३६,३७)

(१) स्तनपरिरम्भणस्य कटाक्षविक्षेपादिना पुरुषवशीकरणानन्तरत्वाद्विवात - व्याख्या।

अत्र निरभ्राभ्रता, निर्मलजलाशयता, प्रफुल्लकमलता, सुस्पष्ट-सूर्यचन्द्रता, समृद्धगोक्षीरता च विशिष्टया प्रणाल्या चित्रिताः। इदं च शरत्साम्राज्यं सच्छास्त्रमिव (मध्वशास्त्रमिव) शोभते। सच्छास्त्रमपि साधूनां मानसं संशोधयति, तदाननं प्रहर्षयति, पङ्कं-पापं-खण्डयति, सज्जनानां हृदयाकाशस्थं निबिडान्धकारं अज्ञानात्मकं नाशयति, हरेः विभवं प्रदर्शयति, भिक्षूणां संसारबन्धनं विच्छेदयति मोक्षानन्देन च जनान् मोदयति। एवं शरत्काले च सरांसि निर्मलानि भवन्ति। पद्मानि च मेघाभावात् सूर्यकिरण-सम्पर्के विकसन्ति। कर्दमं नश्यति। घनापिधानरहिततया नभो भाति। सूर्याचन्द्रमसौ प्रकाशवैशद्येन विलसतः। प्रावृट्-कालीनः बन्धः भिक्षूणां वणिग्जनानां च परिह्रियते। बहुक्षीरादिना जनः मुदमाप्नोति।

शरत्काले वायुरपि सुखप्रदो भवति। विकसितपद्मानां परिमलः सर्वत्र प्रसरति मरुद्बलेन। शरत्कालीनआनन्दः परिमलोपेतवायुनैव स्पष्टीक्रियते। सर्वाभिनन्दितागमोऽयं वायुः विष्णुपदाश्रयः वेदान्तशास्त्रे आनन्दतीर्थवत् मूर्धाभिषिक्तः सन् विजयते[1]। एवमत्र शरद्वैभवं वर्णयता, मरुद्व्यापारं च प्रशंसता कविनाऽमुना वेदान्तशास्त्रस्य उत्कृष्टता स्वगुरोः आनन्दतीर्थस्य च श्रेष्ठता प्रतिपादिते।

(1) सच्छास्त्रे सुखतीर्थवन्मरुदभून्मूर्धाभिषिक्तस्तदा। (५।३१)

Rarest Archiver

हेमन्तवर्णनम् - शरद्वर्णनानन्तरं हेमन्तोऽपि वर्णितोऽस्ति।
सहोक्ति-उत्प्रेक्षाभूषितमिदं वर्णनं श्लोकद्वयपरिमितमपि हृद्यं भवति।

वियुक्तनारीमुखपद्मपुञ्जैः सहाम्बुजातं शिथिलं वितन्वन्।
प्रबोधकल्पं रविमल्पकान्तिं विधाय हेमन्त उपाजगाम ॥ (५।४०)

हेमन्ते पद्मानि ग्लानिमाप्नुवन्ति वियुक्तनारीमुखपद्मानि च।
आस्तां तावदन्येषां स्वयं रविरेवाल्पकान्तिर्भवति हेमन्तागमेनेति शैत्यातिशयः अभिहितः। हिमार्दिताङ्गः उष्णरश्मिरपि रविः सायं स्वकरैः अग्निं दधानः सन् नित्यं जलधिं विशतीति उत्प्रेक्षा-मुखेन कविः 'रविः सायं स्वकिरणान् वह्नौ निधाय अस्तं याति' इति आगमप्रसिद्धिं पोषयति[1]।

हिमार्दिताङ्गः सकृदुष्णरश्मिरपि स्म वह्निं स्वकरैर्दधानः।
विशत्यजस्रं जलधिं ततस्तां कथं हिमानीमबलाः सहन्ते॥[2] (५।४१)

'पतिं वशीकर्तुमयं हि कालः'[3] इति हेमन्ते एव गोपकन्याः कात्यायनीव्रतं वितेनुरिति च वर्णयन् कविः कथासम्बद्धत्वेन ऋतुगणं[4] चित्रयन् स्वकीयं वर्णनानैपुण्यं प्रदर्शयति।

(१) ऋ.सं १।७१

(२) हिममसहमानाः मानिन्यः प्रार्थनां विना स्वरमणान् अङ्गीकुर्वन्तीति भावः - व्याख्या

(३) रु.वि. ५।४२

(४) शिशिरर्तुवर्णनं रुक्मिणीशविजयकाव्ये नोपलभ्यते

Rarest Archiver

सूर्योदयवर्णनम् - रु० वि० काव्ये सूर्योदयवर्णनं वैलक्षण्यं भजते, सूर्योदयेन साकं श्रीकृष्णोदयोऽपि वर्णितोऽस्ति। मथुरायां जातः श्रीकृष्णः कंसभीत्या वसुदेवेन रात्रावेव मथुरातः गोकुलं प्रापितः। परेद्युः प्रातः सूर्योदयं वर्णयन् कविः तं सूर्यं श्रीकृष्णस्य पूजार्थं आगतः अर्चक इति उत्प्रेक्षते। सोऽपि पूर्वसमुद्रे अवगाह्य पद्मानि गृहीत्वा गोकुल-द्वारेषु 'कुत्र वर्तते कृष्णः' इति गवेषयन् इव स्वकरान् प्रातःकाले द्वारात् द्वारं प्रसारयति।(१)

उदयं प्राप्तः सहस्रराश्मिः रविः विष्णुपदार्पणाय मेरु-संस्थैः देवैः समुद्रवापीतः उपायात् समुद्धृतसहस्रपत्र-मिव भातीति सरलया शैल्या महतीं चमत्कृतिं निर्माति रु०वि०काव्यकारः श्रीवादिराजः -

सुमेरुसंस्थैरमरैरुपायात्समुद्धृतं विष्णुपदार्पणाय।
समुद्रवापीस्थसहस्रपत्रमिवोदितो भाति सहस्ररश्मिः॥(२/१०)

अत्र सहस्ररश्मेः विष्णुपदार्पणाय-आकाशप्रकाशनाय- समुद्धृत-सहस्रपत्रतया वर्णनेन कवेः विष्णुभक्तत्वं प्रकटीकृतम्।

(१)स्नात्वा पूर्वपयोदधावचलसत्पीठाधिरूढः करैः
पद्मानि प्रतिगृह्य सान्द्रतिमिराण्युन्मूल्य रागान्वितः।
सिञ्जत्पक्षिगणान्निशम्य परमं कृष्णावतारं रविः
तत्पूजार्थमिवोदितो व्रजगृहद्वारेषु तान्प्राहिणोत्॥(२/९)

Rarest Archiver

दिवि भुवि च रवेः कृष्णस्य चोदयं तेन च भुवि दिवि च प्रसादं वर्णयन्कविः अध्येतॄणां मनांसि लोकद्वये सञ्चारयति -

दिवि द्युरत्नेऽभ्युदितेऽम्बुजानि भुवि प्रसेदुर्भुवनोदयानि ।
इह प्रजाते यदुवंशरत्ने सुराननाब्जानि च नाकिलोके ॥ (२।११)

उष्णरश्मेरुदयं निरीक्ष्य तरुव्रजे पक्षिगणाः गानं चक्रिरे । दुष्टोष्णकसन्मरीचेः कृष्णस्य उदयं निरीक्ष्य व्रजे समागताः मागधबन्दिसूताः तं जगुः । (१)

तदा प्रातःकाले सरोवरेषु शनैश्चरन्त्यः राजहंस्यः जनैः लोचनगोचरीकृताः । मार्गेषु च यशोदायाः पुत्रोत्सवं श्रुत्वा तद्गृहं गच्छन्त्यः सुन्दर्यः गोप्यः अपि दृष्टाः ।

तदा स्ववंश्यैः सह राजहंस्यः जनैर्व्यदृश्यन्त शनैश्चरन्त्यः ।
बृहन्नितम्बस्तनभारभीरुतनुस्फुरन्मध्ययुताश्च गोप्यः ॥ (२।१३)

उदितः सूर्यः सहस्रशः गोगणं - किरणसमूहं - मुरारेः पदे आकाशे समर्पयामास, तथैव नन्दगोपः कृष्णोदयकाले स्वेन विप्रेभ्यः दत्तान् सुवर्णभासंवलितान् तान् गोगणान् 'श्रीकृष्णार्पणमस्तु' इति विष्णुपदे समर्पयामासेति कविरत्र सूर्यकृत- गोगणसमर्पणेन साकं नन्दकृतगोगणसमर्पणं वर्णयति । (२)

(१) तरुव्रजे पक्षिगणाश्चरन्तो जगुर्निरीक्ष्योदयमुष्णरश्मेः ।
व्रजे च दुष्टोष्णलसन्मरीचेः समागता मागधबन्दिसूताः ॥ २।१२

(२) सहस्रशो गोगणमुष्णदीप्तिः समर्पयामास पदे मुरारेः ।
सुवर्णभासंवलितांश्च नन्दः स्वगोगणान् विप्रकुलाय दत्तान् ॥ २।१५

उदितसूर्यस्य केचिन्मयूखाः ऊर्ध्वमुखा भवन्ति। केचिदधोमुखाश्च।
ते च ध्वजैः तोरणैश्च उपमिताः अत्र रु.वि.का.व्ये। आकाश
वर्णनेन साकमत्र व्रजस्यापि चित्रणं कृतम्- कृष्णोदये सति
व्रजभूः विचित्रध्वजैः स्फुरत्तोरणैश्च विभूषितासीदिति —

ध्वजप्रभैरूर्ध्वमुखैर्मयूखैरधोमुखैस्तोरणसम्मितैश्च ।

विभूषिता द्यौर्व्रजभूश्च। चित्रध्वजैः स्फुरत्तोरणसञ्चयैश्च ॥(२।१८)

अयं च सूर्यः मर्त्येषु धर्मप्रवृत्तकत्वेनापि वर्णितः। तं तीक्ष्णकरत्वादेव जनाः तं दृष्ट्वा धर्मकार्येषु प्रवर्तन्ते इति कविरत्र अर्थान्तरं न्यस्यति।(1) विष्णुपदानुषक्ताः क्रमेणोन्नतिं गच्छन्ति, इत्यत्र रविरेव प्रमाणम्।(2) कथासूत्रोतप्रोततया कृतमिदं सूर्योदयादिवर्णनं कथानकं त्यक्त्वा दूरतो नैव याति। श्रीकृष्णं चन्द्रवंशोत्पन्नं दृष्ट्वा सकोपमिव सूर्यः उदयकालीनं रागं परित्यज्य तीक्ष्णो बभूवेति उत्प्रेक्षमाणः कविः लौकिकानां स्वभावमपि प्रदर्शयति —

सोमान्वये जातमिनो निरीक्ष्य रामानुजं मन्युमिवादधानः।

रागं परित्यज्य बभूव तीक्ष्णः श्रेयोऽनुजस्यापि न वै सहन्ते॥(२।१८)

---

(1) विधौ प्रशान्तेऽभ्युदिते जनोऽयमभुङ्क्त भोगान्पुररुष्णभानौ।
करोति धर्मांश्चकितस्तथा तद् बिभेति सर्वः परुषात्न शान्तात्॥ २।२४

(2) नभः स्पृशन्नुन्मुखदीप्तिवृन्दैरसौ क्रमेणोर्ध्वमियाय भास्वान्।
तथाहि तद्विष्णुपदानुषक्तकरः कथं नोर्ध्वमुपैति लोकः॥ २।२३

Rarest Archiver

रात्रौ जायमानः सोमः सूर्यानुजः इति कविसमयः। लोके केचित् अनुजस्यापि उत्कर्षं न सहन्ते इति अर्थान्तरन्यासः कविवरस्यास्य सामाजिकानां विषये सूक्ष्मदर्शितासाक्षी। अयं च रविः मध्याह्ने अत्युग्रदीधितिरपि छायाश्रितानां जनानां तापकरो न भवति यतः 'छाया' इति सूर्यकलत्रनाम।[1]

म्लानं विधत्ते न मुखं जनानां छायाश्रितानामपि तिग्मभानुः
क्रूरोऽपि मर्त्यः स्वकलत्रसान्द्रसम्बन्धभाजां न हि तापदायी ॥(२।२७)

श्लिष्टमूलकार्थान्तरन्यासेनानेन क्रूरा जना अपि यथा स्वजाया-सम्बन्धिषु पेशला भवन्तीति मनोरममनुभवसिद्धं प्रतिपादितम्। सूर्योदये वर्णनीयाः रवेरुदयशैले प्रकाशः, अम्बुजानां विकासः, पक्षिणां विलासः, तमसां विनाशः इत्यादयः एकत्रैव अत्र दृश्यन्ते – कृष्णजरासन्धयुद्धे प्रातर्वर्णनमिदं –

सूर्येणोदयशैलमूर्ध्नि लसता शौर्योन्नतिं श्रीपतेः
तत्पोष्योदयमम्बुजैर्मधुकरैस्तद्वन्दिनां सम्पदम्।
ध्वस्तैः सन्तमसैश्च तामसदशां नीडे क्वणद्भिः खगैः
वेश्मान्तः परवैभवं प्रकटयन् स स्यान्मुहूर्तो मुदे ॥(१४।२२)

अत्र हि सूर्योत्कर्षेण श्रीपतेरपि उत्कृष्टता स्पष्टीकृता। इत्थं अवसर-प्राप्ततया तत्र तत्र[2] रु.वि.काव्ये वर्णितः सूर्योदयः सहृदयानाह्लादयति।

---

(१) छाया कान्तिः सूर्यजाया प्रतिबिम्बमनातपः – रत्नमाला

(२) रु.वि. ४।५५, ११।२९

सूर्यास्तवर्णनम् - रूपकोत्प्रेक्षाद्यलङ्कारोपेतं सूर्यास्तवर्णनमपि सूर्योदयवर्णनामिव मनोहारि वर्तते। अस्तं गच्छत् सुवर्णारुणं सूर्यमण्डलं माहेन्द्र्याः दिशः कर्णकुण्डलमिति वर्णितम् -

तप्तं हेम कृशानुसङ्गि गगने वातायने भाजने
माहेन्द्र्याः शुभकुण्डलं रचयितुं देवैरुपायाद्दिशः।
सङ्गृह्याम्बुनि सन्निवेशितमिवोत्तुङ्गस्फुलिङ्गावृतं
तेजोराशिरितो जगाम जलधिं रागाञ्चितः पश्चिमम् ॥ (६/२४)

यथा सुवर्णकाराः कुण्डलं रचयितुं हेम तप्तं कृत्वा जले निवेशयन्ति तथा सुवर्णारुणं सूर्यमण्डलं देवैः आकाशे कृशानुसङ्गि कृत्वा पश्चिमसमुद्रे उपायात्सन्निवेशितमिवासीत्। उपमामूलक-उत्प्रेक्षालङ्कारेणानेन सहृदयानां हृदयानन्दनिदानं सूर्यास्तसमयः वर्णितः। सूर्यः अस्तकाले स्वकरैः गिरीन् परितो गृहीत्वापि समुद्रे निपतति, अत्र कवेरियमुत्प्रेक्षा -

करैर्गिरीन्द्रान्परितो दधानोऽप्यसौ विवस्वान् पतितः किलाब्धौ।
ममेत्थमाभाति सरिच्छरीरविशोकं तत्पातिरग्रसीत्तम् ॥ (६/२५)

अथवा अयं विवस्वान् महातपस्वी। विष्णुपदाश्रितेन तेन तपःफलतया विष्णोर्धाम समुद्रः गम्यते, अतो नायं तस्य पातः -

त्यक्त्वा क्रमेण सहजातमपि स्वरागं
चक्राब्जमानितकरः प्रततोर्ध्वपादः।
आश्रित्य विष्णुपदमुग्रतपोऽतपच्च
तस्यैव धाम स जगाम कुतोऽस्य पातः ॥ (६/२६)

जन्मजातमपि रागं परित्यज्य, शङ्खचक्रं धृत्वा ऊर्ध्वपादो भूत्वा यथा तपस्वी तपः करोति तथाऽयमपि रविः रागं त्यजति, चक्र-अब्जभावित-करो भवति। विष्णुपदाश्रितस्य तस्य गम्यस्थानं विष्णुधाम लब्धं चेत् पातवार्ता काऽस्ति? अथवा तत्पातः युक्तः एव यतोऽयं रविः अपराधवान् —

तप्तं तपस्विनिवहं भुवि यस्ततान
पृथ्व्याश्च जीवनमहो स्वकरैर्जहार।
लक्ष्मीं तथोडुनिकरस्य वृथैव भानो-
स्तस्यास्य पातमपि युक्तिसहं वदामः॥(६।२७)

अयं खलु भास्वान् स्वकीयैः तीक्ष्णैः करैः तपोनिष्ठानां समूहं तापतप्तं करोति स्म। किञ्च निरपराधिन्याः पृथ्व्याः जीवनमेव जहार स्वकरैः। निष्प्रयोजनमेव नक्षत्रलक्ष्मीं अपहृतवान्। एतादृशपापकरस्य तस्य फलं उच्चस्थानात् पतनमभूत्। अनेन च काव्यलिङ्गेन पूर्वपद्यप्रकटितार्थ-विरुद्धोऽर्थोऽपि प्रतिभाप्रभावेण प्रतिपादितः कविना।

स च सविता मध्याह्ने ज्वलितोऽभवत्। तदा तं न कोऽपि निरीक्षते स्म। सायं समुद्रमध्ये प्रतिफलितं स्वस्यैव प्रतिबिम्बं हृदयङ्गममासीत्सर्वेषां जनानाम्। अनेन च उष्णरश्मेः ज्ञातं यत् शान्तो हि हृदयङ्गमो भवतीति। अतः सः सायङ्काले उग्रत्वं तीक्ष्णत्वं च परित्यज्य नितान्तं शान्तः सन् - यत्र स्वबिम्बं प्रतिफलितं - तमेवाम्भोधिं

Rarest Archive

विवेशेति वर्णयन् कविरत्र सायङ्कालीनस्य सूर्यस्य, सूर्यप्रतिबिम्बस्य प्रतिबिम्बविशिष्टसमुद्रस्य, समुद्रसनाथ-प्रकृतिरम्यत्वस्य च चित्रणं प्रदत्तवान् -

अम्भोधिहृत्कृतपदं प्रतिरूपमर्कः
सन्दृश्य साधु धवलीकृततज्जलौघम्।
शान्तो हि सर्वहृदयङ्गमतामुपैती-
त्यन्ते शमं समधिगम्य विवेश सोऽब्धिम् ॥(६।३०)

स्वप्रतिबिम्बेन समुद्रस्य जलौघमपि धवलीकृतं दृष्ट्वा कान्तिमत्वेऽपि क्रौर्याभावात् मनोहारित्वमवगम्य च सोऽपि मनोहारित्वं सम्पादयितुमिव जलधिं जगाम।

अयं च उष्णरश्मिः प्रतापशाली। तस्य जन्म पूर्वदिशि। प्रवर्धमानदशा च गगनस्य मध्ये। हन्त सोऽपि प्रतीच्यां विनाशमगात्। अत्र हि सूर्यास्तसमय-दृश्यं दृष्ट्वा विधेः बलवत्वं स्मारितं भवति। बलिनोऽपि विधिमुज्झितुं असमर्थाः सञ्जायन्ते -

स लब्धजन्मा दिशि वज्रपाणेः प्रवृद्धगात्रो गगनस्य मध्ये।
अगाद्विनाशं द्युमणिः प्रतीच्यां विधेर्निदेशो महताप्यलङ्घ्यः॥(६।२८)

सान्ध्यनभोवर्णने कवेः कल्पनाविलासोऽयम् -

रागं पयोधरतटे हरिदङ्गनानां रागी समर्प्य सविता समगाददान्तम्।
कूजद्विहङ्गमरवैरिव ता रुदन्त्यो भेजुस्तमस्ततिमथान्तरिवोरुदुःखम्॥(६।२९)

Rarest Archiver

अत्र च पयोधराः हरिदङ्गनानां पयोधराः, सान्ध्यो रागः सावित्रोऽनुरागः, विहङ्गमानां कूजनं तासां रोदनं, तमसैव ततिश्च तासां मूर्च्छावस्था इति श्लिष्टोज्जीवितोत्प्रेक्षालङ्कारेण रसो ध्वनितः शोभते। तदा सरसि सूर्यास्तेन मुकुलितं नलिनं सूर्योदयार्थं पद्मासनं प्रार्थयमानं तपोनिष्ठमिव यद् वर्णितं तत् कवेः योगित्वं तपस्वित्वं च प्रदर्शयति —

आकण्ठोदकवासि हृद्गमधुकृज्झङ्कारम्योंकृति
भ्राजत्कण्टककण्टकद्युति मुहुर्मन्त्रार्थसाच्चितया।
ईषत्कम्पितमूर्धशोभि नलिनं हंसौघसंशिक्षितं
स्वान्तस्थापितधातृ साधु तपतीवाकाङ्क्ष्य मित्रोदयम्॥(६।२३)

स्वविकासानुकूल्याय मित्रस्य उदयं आकांक्ष्य स्रष्टारं ब्रह्माणं स्वान्ते स्थापयित्वा तपःकरणं युक्तियुकम्।

समृद्ध शुद्धजलमध्यगतमपि पद्मं स्वमित्रे मित्रे अस्तं गच्छति सति मुकुलितं बभूव। कविरत्रार्थान्तरं न्यस्यन् स्नेहार्द्राणां मानसीं वार्तां स्पष्टीकरोति तेन च स्वकीयं सूक्ष्मेक्षणवैचक्षण्यमपि —

मित्रेऽम्बुजातनिकरस्य नितान्तमित्रे
ह्यस्तं समीयुषि मुखं मुकुलीबभूव।
पद्मस्य शुद्धजलगस्य च, मुद्रयन्ति
नष्टाः प्रियाः खलु समृद्धियुजोऽपि वक्त्रम्॥(६।२१)

चन्द्रोदयवर्णनम् - रुक्मिणीशविजयमहाकाव्ये षष्ठे सर्गे वर्णितः चन्द्रोदयः रूपक-उत्प्रेक्षा-अर्थान्तरन्यासाद्यलङ्कारोज्जृम्भितः सहृदयानां चेतांसि चमत्कारयति। उदयत् चन्द्रमण्डलं ऐन्द्र्याः दिशः नायिकायाः निबद्धनीलभ्रुकुटि वक्त्रमिति उत्प्रेक्षितम् -

दिगायताक्षीमपरामुपेत्य दिशापतौ रागमुपेयुषीन्दुः।
अदृश्यतैन्द्र्यां दिशि रोषरक्तं निबद्धनीलभ्रुकुटीव वक्त्रम्॥(६।३२)

अन्यासङ्गिनि प्रियकरे सति तं नायकं रोषेण पश्यन्त्याः मुखमिवेति वर्णनेन उदयकाले चन्द्रस्य रक्तिमा, मध्ये च दृश्यमाना नीलिमा अपि निरूपिते स्तः।

इन्दुबिम्बे परिदृश्यमानस्य कलङ्कस्यापि अत्र कारणमभिहितं कविप्रतिभाप्रसूतम् -

गते दिशां भर्तरि देशमन्यं दिवाकरे मन्दमुपेत्य चन्द्रः।
तदम्बरं यज्जगृहे करैः स्वैः ततः कलङ्कीति मम प्रतर्कः॥(६।३९)

दिशां पत्यौ दिवाकरे देशान्तरं गते सति, अयं चन्द्रमाः चोरवत् मन्दमुपेत्य तासां अम्बरं स्वकरैः गृहीतवान्। परदाराम्बरग्रहणात् कारणादेव तस्य कलङ्कित्वम्।

अपि च ताः दिगङ्गना अपि सहसा स्वेशं सवितारं विहाय अमुमेव चन्द्रमसं वव्रुः। नूनं नूत्नविषया आशाः एनः न गणयन्ति। अत्र आशानां अभिसारिकताऽभिप्रेता। नायकस्यायमुपपत्तिः -

चन्द्रस्य कोमलकरैः रचिताङ्गसङ्गाः
सान्द्रान्धकारमपि ताः सहसा विहाय।
ईशां, स्वपत्स्वखिलजन्तुषु वक्त्ररेनं
आशा हि नूत्नविजया गणयन्ति नैनः॥(६।३५)

अत्र हि ताः आशाः इति पराङ्गनाः, चन्द्रस्य इति सुन्दरपुरुषः, रचिताङ्गसङ्गा इति आलिङ्गनं, सान्द्रान्धकारमिति भर्तृविरहजं दुःखं इत्येतानि ध्वनितानि। अखिलजन्तुषु स्वपत्सु इति च परपुरुषगमनस्य जनसञ्चाररहितकालिकत्वमपि वर्णितम्। चन्द्रोदयस्य वर्णने इमे द्वे शार्दूलविक्रीडिते कवेः वर्णनानैपुण्यस्य परमोत्कर्षं दर्शयतः —

नक्षत्रालिभिरिन्द्रदिङ्मृगदृशं सन्धाय पूर्वं पुनः
तत्पादे प्रणतिं विधाय नितरामाशान्तरासक्तिजम्।
तस्याः कोपसमं तमः परिहरन् स्वीयैः करैः तां स्पृशन्
वक्त्राम्भोरुहचुम्बनाय शनकैरुद्याति नूनं शशी॥(६।३४)

पूर्वाब्धावववगाह्य फेननिचयश्रीखण्डलेपद्युतिः
स्वाङ्कालङ्कृतिमूलनीलतिलकस्तारौघहारान् दिशन्।
व्योमाख्यां कबरीं प्रमृज्य सुकरैराश्लिष्य दिक्कामिनीं
ऐन्द्रीमिन्दुरसौ चुचुम्ब सरसो रागेण तां रञ्जयन्।(६।३६)

यथा अपराधी नायकः सञ्जातकोपां नायिकां प्रति प्रथमतः सखीं सम्प्रेष्य, प्रणामकरणेन, हस्तग्रहणेन च अमर्षं

परिहृत्य वक्त्राम्भोरुहचुम्बनाय प्रवर्तते तथाऽयं शशी दिगन्तरासक्तिरूपापराधवान् पूर्वदिगङ्गनां प्रथमतः स्वस्मात् पूर्वमेवोदयवत्वात् सखीसदृशाभिः ताराभिः सन्धानं कृतवान् । ततः दिगधोभागे उदयन् तत्पादयोः प्रणाममपि विधत्ते । तस्यां दिशि विद्यमानं तमः परिहरति तस्याः कोपायितम् । चन्द्रकराणां तत्र प्रसरणं तत्करग्रहणं तत् । मन्दं चन्द्रमाः ऊर्ध्वं गच्छतीति तन्मुखचुम्बनप्रवृत्तिः प्रदर्शिता । अत्र च उपमा समासोक्त्यलङ्कारयोः सङ्करः नितरां चमत्कारकरः । द्वितीये पद्ये च शृङ्गाररञ्जितेन रूपकालङ्कारेण विलासिनः चन्द्रमसः चुम्बनव्यापारः सपरिकरं वर्णितः । पूर्वसमुद्रे स्नात्वा, फेनाख्यश्रीगन्धस्य लेपनं कृत्वा, अङ्काख्यं अलङ्कारप्रधानं नीलतिलकं धृत्वा, तारौघरूपान् हारान् तस्यै पूर्वदिक्कामिन्यै दत्वा, स्वीयैः ऊर्ध्वकिरणैः व्योमाख्यां कबरीं गृहीत्वा आलिङ्गनमपि कृत्वा रागेण तां रञ्जयित्वा च सरसोऽयं तां चुचुम्ब । एवमत्र चन्द्रोदयकालीननक्षत्राणि, चन्द्रस्य लाञ्छनं, ऊर्ध्वरश्मयः, तस्य रक्तिमा, तमोनाशश्च सर्वेऽपि इमे कविकल्पनाविलासलेपोल्लासिनः सन्तः संशोभन्ते ।

कवेरुपमावैभवस्य द्योतकमिदमुदितचन्द्राकाशवर्णनम् —

सुवर्णसंवीतवरेन्द्रनीलसुमध्यनिष्काञ्चितकृष्णवक्षः ।
सहारमन्वेत्युदितोर्ध्वरश्मिशशाङ्कसङ्गप्रभमुदारतारम् ॥ (६।३७)

अत्र प्रत्यग्रोदितस्य शशाङ्कस्य रश्मयः ईषद्रक्तत्वात् सुवर्णसूत्रोपमिताः। नक्षत्राणि हारसंस्थानि मुक्ताफलानि। चन्द्रस्य अङ्कः इन्द्रनीलमणिः। एतादृशं नभः श्रीकृष्णस्य वक्षःस्थलं अन्वेति। अनेन च चन्द्रोदयवर्णनमपि श्रीकृष्णे नायके एव समन्वितं भवति। उदित-चन्द्रस्य नभसः - श्रीकृष्णवक्षःसदृशस्य - दर्शनेन करिष्यमाणरासलीलायां अङ्गभूतानां गोपीनां उद्दीपनं भवति इत्यपि अस्मिन् वर्णने ध्वनितम् ।

अयं चोपमालङ्कारः चन्द्रबिम्बं श्रीकुचकोशसादृश्येन वर्णयतः कवेः अपूर्वं वर्णनाप्रावीण्यं स्पष्टीकरोति। यथा —

वार्वाहावृतसर्वभागमुदितं बिम्बं शशाङ्कं विधोः
ईषद्दर्शितकोणमच्युतमनस्तोषं नभोग्रास्थितम्।
रेजे कुङ्कुमशोभि रम्यवसनच्छन्नं मरुद्दर्शित-
प्रान्तं श्रीकुचकोशमीषदुदयन्मध्योपरिष्टादिव ॥(६।३८)

विधोर्बिम्बं वार्वाहावृतसर्वभागं, श्रीकुचकोशं रम्यवसनच्छन्नम्। चन्द्रमण्डलं शशाङ्कं, श्रीकुचमुकुलं कुङ्कुमशोभि। ईषद्दर्शितकोणं तत् इन्दुमण्डलं, मरुद्दर्शितप्रान्तं श्रीकुचकुड्मलम्। नभसः अग्रे स्थितं चन्द्रबिम्बं, सूक्ष्मत्वात् आकाशसदृशमध्योपरिष्टादुदितं श्रीकुचकोशम्। अच्युतमनस्तोषप्रदत्वं उभयनिष्ठम्। एवमनया पूर्णोपमया चन्द्रोदयस्य उत्कृष्टं वर्णनं संस्कृतवाङ्मयस्य सम्प्राप्तम्।

Rarest Archive

जलक्रीडावर्णनम् — रु॰ वि॰ काव्ये नवमे सर्गे जलक्रीडा-वर्णनं मनोहरितया कृतं भाति । यमुनाम्भसि विलास-चित्रणावसरे उद्रिक्तभावितः कविः श्रीकृष्णस्य अलौकिकीं सम्पदं वर्णयन् अनुनाथते —

नालीकागारमारत्रिपुरहरमुखैर्गीयमानाम्बरस्थैः
मालालङ्कारकान्त्या विघटितहृदयग्रन्थिरिन्दीवराभा ।
कालिन्दीतीरसंस्था करधृतमुरली कामिनीकेलिलोला
लीलापाङ्गावलोका लसतु मम हृदि प्रेयसी देवता सा ॥(९।३१)

जले विलासाय कालिन्दीतीरसंस्था या प्रेयसी श्रीकृष्णाख्या देवता सा मम हृदये विलसतु इति कविः प्रेमातिशयेन याचते। सा च देवता कमलभूकामकामारिप्रमुखैः दैवतैः अम्बरस्थैः संस्तूयते । मालालङ्कारकान्त्या च तस्याः गोपाङ्गनानां हृदयग्रन्थिः विघटिता । सा कामिनीकेलिलोला मुरलीसनाथा संशोभते ।

अम्भसि गाहमानः मुकुन्दः गजत्वेन वर्णितः।
इदं च साङ्गरूपकं श्रीकृष्णस्य जलविहारं चित्रयति —

श्रान्तालिभिः परिवृतोऽम्भसि गाहमानः
कान्ताकरेणुसहितः कनकोज्ज्वलाङ्गः ।
प्रान्तस्थिताब्जचयचुम्बिकरो मुकुन्द-
दन्ती निकृन्ततु ममान्तरमोहमोचाः ॥(९।३४)

मुकुन्दाभिधो दन्ती, परिमललोभेन बहुदूरगमनाच्छ्रान्ताभिः

अलिभिः परिवृतः । गोपीरूपकरेणुभिः सहितः । अयमपि गजः कनकोज्ज्वलाङ्गः । जले प्रान्तस्थितानां अब्जानां चुम्बिकरः । एतादृशः मुकुन्ददन्ती अस्माकं अन्तरे संवृद्धा मोहाख्यमोपाः नाशयतु इति कवेः प्रार्थना ।

कैमुत्यन्यायेन जलक्रीडासक्तानां गोपीजनानां रागोत्तेजकतां निरूपयन् कविः कालिन्दीं नदीमपि वर्णयति -

आभिगतिजलदानप्रेमसंश्लेषवेगात्
प्रकटितकुचभागाः दृश्यमानोरुदेशाः ।
कचविगलितमाल्याः सङ्गतैरङ्गरागैः
सरितमपि सरागां चक्रुरासां किमन्ये ॥(८।३५)

आभिमुख्येन गमनेन जलदानेन प्रेमालिङ्गनेन च गोपाङ्गनानां कुचभागाः प्रकटिताः, ऊरुदेशाश्च दृश्यमानाः आसन् । तदा च तासां परिसरणवेगात् कबरीभारात् माल्यानि विगलितानि । जलसङ्गतैः कुङ्कुमाद्यनुलेपनैः ताः गोप्यः तां यमुनां सरितमपि(1) सरागां - सानुरागां - चक्रुः । पुमांसः आसां दर्शनेन सरागा भवन्तीति किमु वक्तव्यम् ।

जलविहारकाले श्रीकृष्णेन समालिङ्गितायाः कस्याश्चिद्गोपिकायाः भ्रान्तिं गतायाः शब्दचित्रमिदम् -

(1) अपिपदेन रसानभिज्ञत्वमभिप्रैति । स्त्रीलिङ्गपदप्रयोगेन स्त्रीत्वं च । तथा च रसानभिज्ञां स्वसमानजातीयां स्त्रियमपीत्यर्थः - व्याख्या

गाढालिङ्गितवल्लभामथ जले निश्शब्दभूषावलीं
अब्जास्यामभिमृश्य काप्युपगता, सीत्कारनादश्रुतेः ।
क्रुद्धा भ्रूदृढचापलग्ननयनप्रान्तेषुपातात्पुरा
कृष्णेनापररूपिणा शशिमुखी साम्ना समालिङ्गिता ॥(९/३७)

आकण्ठं उदके निमग्नत्वात् गाढं आलिङ्गितवल्लभत्वाच्च कापि गोपी निश्शब्दभूषणगणाऽऽसीत् । जलोपरि केवलं तस्याः मुखं दृष्टम् । तद् दृष्ट्वा काचिदन्या गोपिका अब्जमित्येव भ्रान्त्या तत्समीपं गता, परन्तु चुम्बनसीत्कारध्वनिश्रवणात् सपत्नीवशं प्रियं कृष्णं ज्ञात्वा क्रुद्धाऽभूत् । कृष्णोऽपि तस्याः सकोपं दृष्टिपातात् पूर्वमेव, तां शशिमुखीं रूपान्तरेण सामोक्तिपूर्वकं समालिलिङ्ग ।

ताश्च गोपललनाः जले श्रीकृष्णं स्नानगन्धमाल्यार्पणप्रमुखैः अर्चयन्त्यः, यतियोग्यां गतिं साधयितुं प्रवृत्ता इव बभूवुः इति वर्णयन् अयं कविः मुकुन्दसङ्गतानां तासां अग सन्न्यासिसमानधर्मत्वं स्थापयति —

करधृतदृतितोयैः स्नापयित्वा मुकुन्दं
कुचतटगतगन्धालिप्तमालिङ्ग्य कृत्वा ।
शिरसि निहितमाल्यैरर्च्यमानञ्चुरेनं
गतिमिव यतियोग्यां साधयन्त्योऽबलास्ताः ॥(९/३८)

आलिङ्गनेनैव तस्य कुचतटगतगन्धार्पणं, शिरसि निहित-

Rarest Archiver

माल्यैश्च तस्यार्चनमिति विलक्षणं पूजावर्णनम् ।
मुकुन्दः दन्तित्वेन पूर्वं वर्णितः[7]। प्रकारान्तरेणापि तस्य
जलविहारकाले हस्तीश्वरतां कविरत्नश्रीवादिराजः कथयति —

सिक्तोऽपि रम्यकलनाकरपद्मपत्रैः
भृत्यामरावलिसमर्पितपुष्पपुञ्जे ।
विस्तीर्णरेणुनिकरं दधदात्मनोऽङ्गे,
हस्तीश्वरप्रकृतिमार्जयदेष देवः॥(१)३९)

गोपवनिताभिः साधु स्नापितोऽपि अमरावलिसमर्पितेन
पुष्पपुञ्जेन रेणुनिकरेण स हरिः पुनरस्नात इवाभवत् ।
यथा गजः स्नात्वाऽपि पुनः पांसुलिप्तो भवति तथा । अत्र
खलु श्रीकृष्णस्य वारिविहारकाले अमरावलिकृता पुष्पवृष्टिः सम्यग्वर्णिता ।
अस्मिन्नेवावसरे गोपीभिः कृतं पुष्पावचयमपि वर्णितं श्लोक-
-चतुष्टयेन । उत्प्रेक्षामयमिदं वर्णनं सर्वहृदयहारि —

द्विरेफशावाङ्कितशोभिवक्त्रां कृतक्षतं सुस्वरराजहंसैः ।
मनोरमं सारसकोशमेका घनस्तनस्पर्धि-चकर्त बाला ॥
माद्यद्द्विरेफैः कृतगीतजातं पद्मासनेष्टं पवनेन जुष्टम् ।
पद्मं सुगन्धि न्यकुनात्सपत्नीसद्माभिशङ्कयेव मुकुन्दयोग्यम् ॥
श्रीपतेरधरसीत्कृतिकाले गोपिकेक्षयति मामितरेति ।
कोपतप्तहृदयेव सरागं कापि कोकनदमेत्य जहार ॥

---

(७) रु॰वि॰ ९।३४

दृप्तभृङ्गसदपाङ्गविलोलं सत्सरोजमलुनात्किल काचित् ।
सीत्करिष्यति हरिः स मदीयं वक्त्रमेतदिति भीतियुतेव ॥(९/४०-४३)

अस्मिन् पद्यपुञ्जे, प्रथमश्लोके सारसकोशं घनस्तनस्पर्धितया, द्वितीये पद्मं सपत्नीसद्मतया, तृतीये इतरगोपिकायाः मुखतया चतुर्थे च स्वस्य। एव मुखतया वर्णितमिति कवेः कौशलम् ।

वारिविहारावसरे कदाचित् कापि गोपी सखीजनसमक्षं हरिं आकण्ठं अम्भसि स्थितं नीलोत्पलच्छलेन अजिघ्रत् —

आकण्ठमम्भसि गतस्य हरेर्मनोज्ञ-
मास्यं समीपगसखीजनजातलज्जा ।
नीलोत्पलं विलसदेतदधीरभृङ्ग-
माताम्रकेसरमिति प्रवदन्त्यजिघ्रत् ॥(९।४४)

अन्या चुम्बितं हरेर्वदनं सखीजनसमक्षं चुम्बितुं सम्माना सा गोपी इदं अधीरभृङ्गं आताम्रकेसरं नीलोत्पलमिति प्रवदन्ती सती चुम्बितवती । अत्र श्रीकृष्णस्य कटाक्षौ चञ्चलभृङ्गत्वेन, अधरोष्ठं आताम्रकेसरत्वेन चावर्णि ।

जलकेलिकाले कालिन्दी अपि कापि गोपीवालक्ष्यत —

सत्कैरवास्यविभवा, उत्पललोलनेत्रा
व्यक्तस्तनाभमधुपाङ्कितपद्मकोशा ।
आवर्तनाभिरुचिरा यमुनोर्मिहस्ता
गोपीव लक्ष्यजघनाऽस्ति सुफेनहासा ॥(९।३६)

Rarest Archiver

विकसितं कैरवं यमुनायाः वदनम्। नीलोत्पलमेव तस्याः विलोलं नेत्रम्। जलक्रीडावसरत्वात् ०यक्तकुच- सदृशं तस्याः मधुपाङ्कितं पद्मकोशम्। आवर्त एव तस्याः नाभिः। ऊर्मिः तस्याः हस्तः। सुफेनाख्यहास वती सा कालिन्दी दृश्यतीरा सती परिदृश्यमाननितम्बा गोपीव मनोहरा बभूव। एतादृशैरवसरोचितैर्वर्णनैः कविः रसिकानां हृदयं जयति। भक्तकविरयं भावुकानां मनः सम्बोध्य श्रीकृष्णाङ्गाख्ये सरसीतोये विहर्तुं बोधयति —

हे चेतःक्षितिपाल भक्तिरमणीयुक्तोऽक्षिमीनाश्रये
नाभ्यावर्तवति श्रुतिह्रदयुते केशौघशैवालिनि।
सुभ्रूसद्वलि पङ्क्तिमन्दहासितोत्तुङ्गोर्मिफेनाविले
हस्ताङ्घ्र्याब्जिनि विट्ठलाङ्गसरसीतोये रमस्वानिशम्॥(९।२३)

रमणीरहितवारिविहारः विहार एव न भवेदिति चेतःक्षितिपालस्य भक्तिरमणी अपेक्षिता। भक्तिरहितं भगवद्ध्यानं व्यर्थं खलु। अनेन च साङ्गरूपकेण श्रीविट्ठलस्य प्रत्यङ्गं सौन्दर्यातिशयः सुष्ठु प्रतिपादितम्। एवंगुणविशिष्टे अलौकिके सरसी- तोये मनःक्षितिपालः अनिशं रमणं कुरुतादिति कवेर्हृदम्। एवं कृ॰वि॰ महाकाव्ये लोकविलक्षणजलविहारवर्णनमपि समुपलभ्यते

(७) 'इन्द्रियाणां मनश्चास्मी'ति मनसो नियामकत्वात् क्षितिपालत्वमुक्तं युक्तम्।

Rarest Archiver

मधुपानवर्णनम् - साक्षान्मधुपानवर्णनं रु. वि. काव्ये नोपलभ्यते नोपपद्यते च । अथापि द्वित्रेषु स्थानेषु[1] प्रकारान्तरेण वर्णितं वर्तते । चुम्बनवर्णने मधुपानमुत्प्रेक्षितम् -

कान्ताननद्युतिनिवृत्तकटाक्षगण्ड-
बिम्बोष्ठरम्यरुचिभिर्मिलिता स्मितश्रीः ।
इन्दीवराम्बुरुहकोकनदैः सुगन्धि
सान्द्रं तयाऽनुकुरुते मधु पीयमानम् ॥ (९।५०)

चुम्बनावसरे गोपिकायाः स्मितश्रीः तया पीयमानं सान्द्रं मधु अनुकुरुते । सा च स्मितश्रीः कान्तस्य मुकुन्दस्य आननद्युतिभिः निवृत्ताभिः कटाक्ष-गण्ड-बिम्बोष्ठानां रम्यरुचिभिः मिलिता आसीत् । अत एव इन्दीवर-अम्बुरुह-कोकनदैः सुगन्धि यन्मधु तदनुकुरुते । सूर्यास्तवर्णने मधुपानजन्यपारवश्यं व्यञ्जितम् -

मधुवशीकृतचित्त इवोष्णभा वरुणपालितदिङ्मृगलोचनाम् ।
समधिगम्य दिवः स्वमपीपतत् दुरितवारितवाजिमना इव ॥ (४।५१)

रविः सायङ्काले मधुना[2] वशीकृतचित्त इव प्रतीचीदिगङ्गनां गतवान् । तद्दुरितेनैव तस्य रथस्य वाजिनां मनांसि क्षुब्धानि । अत एव दिवः समुद्रे पतितः ।

(१) रु.वि. ४।६२, ४।५१, ९।५०

(२) मधुना वसन्तेन, मद्यपानेन

Rarest Archiver

विवाहवर्णनम् - अत्र रुक्मिणा ब्राह्मणेन कृष्णं प्रति पत्रस्य प्रेषणं, कृष्णस्य रुक्मिण्यपहरणार्थं आगमनं, विवाहनिश्चयार्थं मूलमाधवगमनं, तत्र वरपक्षीयानां कन्यापक्षीयानां च संवादाः, अक्षतारोपणं विवाहे नरनारीसमूहः इत्यादीनां सविस्तरं वर्णनं रु. वि. काव्ये चतुर्दश-पञ्चदश-षोडश-सर्गेषु रसनिर्भरं समुपलभ्यते। भागवते रुक्मिणीपत्रं सप्त-श्लोकात्मकं अस्ति; अत्र तु रु.वि.काव्ये चतुर्दशश्लोकात्मकं (1) कृष्णविषयकप्रेमभावभूषितं विद्यते। कानिचिदेवात्र पद्यानि उद्ध्रियन्ते ——

कुर्वन्ति कामवशगा मयि चित्तमन्ये
कुरु अन्तिकागतयमानुचरान् रणे तान्।
देहि अङ्गजाकृतिशतोर्जितरम्यरूप,
देह्यङ्गजातनिलयाङ्घ्रिसरोजसेवाम्॥(14/40)

रुक्मिणी कथयति पत्रे-"हे हरे अन्ये शिशुपालादयः काम-वशगाः भूत्वा मयि चित्तं कुर्वन्ति। रणाङ्गणे तेषां अन्तिके यमानुचराः यथा आगच्छन्ति तथा कुरु। हे मन्मथशतोर्जितरूप, देहिनां नियामकतया तदङ्गजातनिलय, तवाङ्घ्रिसरोजसेवां मे देहि"। अत्र हि कामवशगान् शिशुपालादीन् युद्धे नाशयेति चमत्कारेणाभिहितम्। अपि च माङ्गल्यापेक्षिणी सा रुक्मिणी श्रीकृष्णस्यैव वरणे युक्तिमपि उपन्यस्यति यत् श्रीकृष्णः 'अच्युतः'

(1) रु. वि. 14/39-52

Rarest Archive

च्युतिरहितः इति। पत्युर्नाशाभावान्नित्यं सौभाग्यं स्वतः एव सेत्स्यति —

नित्यानन्दचिदाकृतिं यदुपते त्वामेव मन्ये पतिं
यत्तेऽस्त्यच्युतनाम विश्वविदितं वीराग्रगानन्यगम्।
तच्चिन्मात्रसमीक्षया यदि तदा सर्वेऽपि किं नाच्युताः
यद्येतच्चिरकालसंस्थितिकृतं पुंसो तव स्यात्तदा ॥(१४/४४)

यदुपतेः 'अच्युतः' इति नाम चिन्मात्रविवक्षया न वर्तते तथा सति सर्वेऽपि जीवाः अच्युतसंज्ञिता भवेयुः। यदि बहुकालावस्थान मात्रेण स्यात् तर्हि ब्रह्मा अपि अच्युत इति ख्यातो भवेत्। नित्यानन्दचिदाकृतिमत्वादेव यदुपतेः अच्युत इति सार्थकं नामधेयं संशोभते। लक्ष्मीस्वरूपिणी सा रुक्मिणी। नारायणावतारस्य कृष्णस्य अनादिजाया। अत एव तामपहरतोऽपि कृष्णस्य नास्त्येव दोषः —

किं रुक्मिणा भीष्मकेण किमन्यैर्नृपसंज्ञितैः।
अनादिसिद्धां मां जायां नयतस्ते प्रयोजनम् ॥(१४/४८)

एतदादिं पत्रगतालापं अवलोक्य स माधवः रुक्मिणीं नेतुं विदर्भदेशमगमत्। तत्र च सकलभूपालसमक्षमेव तामपजहार।[1]

(१) तदनु मदनमन्दीभूतचित्तेषु भूपे-
ष्वविदितगतिरुद्यद्रोमराजिं प्रहर्षात्।
विकसितनयनाब्जोद्भूतहर्षाम्बुधारां
निजरथमधिरोप्य स्वां प्रपेदे स्वतन्त्रः॥ १४/६७

Rarest Archive

द्वारकायां च विध्यनुसारं तस्याः पाणिग्रहणं चिकीर्षुः माधवः मूलमाधवमुद्यानं बन्धुभिः साकं प्रययौ[1] अत्र च कविः शार्दूलविक्रीडित-द्वयेन मूलमाधवाख्यं उद्यानं[2] उपमा-रूपकरञ्जितं वर्णयति —

नीलाश्मद्युतिपत्रशोभिभिः, अधोऽव्यालम्बिपुष्पस्फुर-
न्मुक्तादामभिः, उल्लसत्किसलयश्रेणीवितानोज्ज्वलैः।
सिन्धुप्रेषितरत्नसंहिततलैः वृक्षैः सुवर्णोन्नत-
स्तम्भाढ्यैः मणिमण्टपानुकृतिभिः युक्तं समानायतैः ॥(१५।२६)

विष्वग्लम्बिफलोच्चयं कलपिकैरारब्धगीतं वनं
गर्जद्वारिधिमर्दलं शुकवचस्तोत्रं स्वतन्वीक्षया।
नृत्यत्केकिनटीमनोज्ञं, अलिगीर्वीणानिनादं पत-
त्पुष्पौघाक्षतलाजवृन्दमविशन्माङ्गल्यवेश्मोपमम् ॥(१६।२७)

मूलमाधवाख्यं तद्वनं समानायतैः, सुवर्णोन्नतस्तम्भाढ्यैः मणिमण्टपसदृशैः वृक्षैः संशोभितमासीत्। माङ्गल्यवेश्मोपमे तस्मिन् वने पिकानां गीतं, वारिधेः गर्जनाख्यमर्दलं, केकिनट्यः अलिध्वनिवीणानिनादः पुष्पौघाख्यानि च अक्षतलाजवृन्दानि रेजिरे। नायकप्रविष्टस्य वनस्य मूलमाधवस्य वर्णने कविः स्वकीयं अद्भुतं कौशलं प्रकटीकृतवान् अत्र। अहमहमिकया तन्मुखात्

(१) करं जिघृक्षुः वैदर्भ्याः शरण्योऽथ यथाविधि।
प्रियया बन्धुभिः सार्धं प्रययौ मूलमाधवम् ॥ १५।१४

(२) काव्ये वर्णनीयं उद्यानमपि वर्णितं भवति।

पदपुञ्जानि आविर्भवन्ति सन्ति वाचकानां आश्चर्यं जनयन्ति। श्रीहरेर्विवाहानुकूल्याय स्वाभाविकमेव माङ्गल्यवेश्म सिद्धमभवत्। तत्र च मूलमाधववने केचन नृपाः भीष्मपुत्र्याः पक्षे, केचन अपरे मुरारेः पक्षे अवर्तन्त। तदा ज्योतिर्विद्भिः विवाहाङ्गानां राश्यादिकूटानां घटनाघटनारूपविचारावसरे तयोः रुक्मिणी श्रीकृष्णयोः समन्तात् किल घटना आसीत्। किन्तु कविरसौ एकत्र विघटनामुद्घाटयति। यथा —

विविच्य सर्वाङ्गविचारकाले तयोः समन्ताद्घटना किलासीत्।
सुपीनदेवीस्तनमध्यदेशे सुदुर्लभा सा परमच्युतस्य॥(७५/३१)

अत्र विवाहाङ्गविचारावसरे हस्ताद्यङ्गानामपि विचारेण, देव्याः घनस्तनाभ्यन्तरे अच्युतस्य घटना असम्भावितेति कवेर्विनोदः। कन्यापक्षीयाः "एनां भारकार्ये नैवोपदिश्या"दिति साग्रहमाहुः।(१) वरपक्षीयास्तु "भारकार्यं न किमपि विद्यते, केवलं ब्रह्माण्डाख्यं हरेर्गृहं विचारयतु सा" इति तान् विश्वस्तान् कुर्वन्ति —

ब्रह्माण्डाख्यगृहं चतुर्दशलसत्प्रासादशोभं हरेः
साध्वीयं सततं विचारयतु तन्मध्ये गृहस्योचितम्।
स्वर्णाद्रिक्षितिधान्यरत्नलवणक्षीरेक्षुसर्पिर्दधि-
स्वादूदादि, सुतांश्च पद्मजमुखान् तेषां धुरं मन्दिरम्॥(७५/३७)

(१) आर्यः स्वभार्यां यदि भारकार्ये नैवोपदिश्यात् न पुनः कदापि।
एनां त्यजेज्जात्वपि नैव कुप्येत् गृह्णातु तर्ह्यब्जमुखीकरं नः॥(७५/३५)

चतुर्दशभुवनशोभितं ब्रह्माण्डसंज्ञितं वरस्य हरेः मन्दिरम्। तत्र च कनकपर्वत एव निहितः। धनधान्यरत्नादिसमृद्धिः नितरां विद्यते गृहस्योचिता। लवणस्य क्षीरस्य सर्पिषश्च समुद्रा एव, किमु वक्तव्यमस्ति तण्डुलादिधान्यसम्पत्तिविषये। एतस्य ब्रह्माण्डमन्दिरस्य विचारणे रुक्मिण्याः न कोऽप्यायासः भवेत्, लीलाकटाक्षमात्रेण तन्वी इयं तनोतीत्यपि वरपक्षगतैः स्पष्टयक्रियत[1] अथ विवाहनिश्चयानन्तरं मुरारिः स्नातक-साधर्म्येण तीर्थक्षेत्रपर्यटनार्थं जिगमिषुरभवत्। स च तदा कन्यापक्षप्रविष्टैरेवं प्रेम्णा प्रत्यषिध्यत —

गङ्गादितीर्थनिकराः किल यत्पदाब्ज-
सङ्गात्पुनन्ति भुवि तानपि पावयन्ति।
अङ्गानुषङ्गकरणाद्भव दन्तरङ्गाः
किं गाहनेन तव तीर्थचयेषु तस्य॥(७४।५७)

यस्य श्रीहरेः पादपद्मसङ्गादेव गङ्गादितीर्थसमूहाः पवित्राः भवन्ति, तानपि गङ्गादितीर्थनिकरान् अन्तरङ्गे, श्रीकृष्णं सततं संस्मरन्तः सन्त एव पावयन्ति, तस्य श्रीकृष्णस्य तीर्थचयेषु अवगाहनेन किमपि प्रयोजनं न सञ्जायते। तीर्थाटनं कुर्वतां पवित्र्यं अभीप्सितं भवति। पवित्राणां

(1) कार्यं गृहिण्या गृहकृत्यमेतत् नो भारकार्यन्यजनैरसाध्यम्।
तन्वी तदेतत्सकलं स्वलोललीलाकटाक्षेण करिष्यतीयम्॥(७५।३८)

Rarest Archiver

अपि पावित्र्यदायिनः परमपुरुषस्य पूतत्वं कस्मात् तीर्थात् सञ्जायेत। अत्र हि हरेः लोकविडम्बनार्थमेव तीर्थादिसञ्चारः इति निरूपितम्। अथापि यदि मुकुन्दस्य तीर्थनिषेवणाभिलाषा, रुक्मिण्यां सर्वाण्यपि तीर्थानि विलसन्ति तां प्रत्येव यात्राऽस्तु इति चमत्कारेण रुक्मिण्याः सर्वाङ्गसौन्दर्यं वर्णितम् —

भ्रूकाशीं वरनाभिमानसवतीं हारावलीजाह्नवीं
नीवीदिव्यसरस्वतीं प्रविलसद्रोमालिसूर्यात्मजाम्।
काञ्चीशोभिकटिं कुचोच्चबदरीं नेत्रान्तयुग्मप्रभा-
कावेर्यन्तरगास्यचन्द्रसरसीं यात्राऽस्तु भैष्मीं प्रति॥ ५/७१

अत्र भैष्म्याः भ्रुवोः काशीवत् वक्रधनुराकारः, नाभेः मानस-सरोवरवत् गाम्भीरत्वं, हारावलेः जाह्नवीवत् शुभ्रत्वं, नीव्याः सरस्वतीवत् पीतवर्णत्वं, रोमावलेः यमुनावत् नीलनीलत्वं, अभिनवराजकन्यायाः तस्याः कुचयोः उच्चबदरीफलसदृशत्वं, नेत्रान्तयोः कावेरीवत् द्विधा विशीर्णत्वं च सम्यग्वर्णितम्। एकत्रैव अस्यां काशी-मानस-जाह्नवी-सरस्वती-यमुना-काञ्ची-बदरी-कावेरी-चन्द्रभागा इत्येतेषां सर्वेषां तीर्थक्षेत्राणां निषेवणलाभात् भैष्मीं प्रति यात्राया एव उत्कृष्टत्वं साधितम्। अनेन रूपकालङ्कारेण रुक्मिण्याः लावण्येन सार्धं पावित्र्यमपि ध्वनितम्।

षोडशे च सर्गे कविकल्पनाप्रसूते रुक्मिणीस्वयंवरे ब्रह्मादीन् सर्वान् वृन्दारकान् परित्यज्य यदुपतेरेव पतित्वेन वरणे

Rarest Archiver

कारणं सविवरणं अभिहितं तत्तद्देवतास्वरूपवर्णनव्याजेन। स्वबुद्धिरूपया सख्या विबोधिता रुक्मिणी समस्तवेदशास्त्रागमैक-प्रतिपाद्यं(१) समानशून्यं लक्ष्मीपतिं दृष्ट्वा तत्रैव गृहीतमाला सती तूष्णीं बभूव। तद्वर्णनमिदम्—

विवेकसख्येति विबोधिता सा बभूव तूष्णीं कमलात्तमाला।
प्रहर्षचिह्नानि परं तदोचुः प्रभुं तमाकाङ्क्षति रुक्मिणीति॥(७६।२३)

तद्दर्शनजन्येन आनन्देन सचेतना सा तूष्णीं स्थिता अचेतनानि तु प्रहर्षचिह्नानि तस्याः मनोगतं प्रोचुः॥

रुक्मिणीमुकुन्दौ अनादिदम्पती। तयोः सर्वदा अखण्डितः योगः। विवाहकाले अयं विषयः विवेकभाजां भक्तानां ज्ञातम्—

तयोर्मुहूर्तावधिमध्यदत्तपटं विनिर्भिद्य मिथः स्पृशन्त्यः।
प्रभाः सदाऽखण्डितयोगभाग्यं विबोधयान्ति स्म विवेकभाजः॥(७६।२४)

मुहूर्तपर्यन्तं तयोर्मध्ये 'अन्तःपटः' आसीत्। तमन्तःपटं नूनं विनिर्भिद्य रुक्मिण्याः प्रभाः कृष्णं अस्पृशन् कृष्णस्य च रुक्मिणीम्। लोकविलक्षणकान्तिमत्त्वं तयोरत्र वर्णितम्।

कृष्णरुक्मिण्योरयं अपूर्वः विवाहोत्सवः। अमू खलु लक्ष्मीनारायणस्वरूपौ। पूर्वं जातविवाहावेव बहुधा। स एवायं वरः श्रीकृष्णः, सैवासौ वधूः रुक्मिणी। विवाहकाले तदा

---

(१) समस्तवेदाः किल सेतिहासाः पुराणयुक्ताः स्मृतिभिः सहैनम्।
समानशून्यं प्रभुमामनन्ति प्रमथ्य योऽब्धिं लभते स्म लक्ष्मीम्॥ ७६।३१

मङ्गलार्थं सुमङ्गलीषु सीतास्वयंवरमहोत्सवं गायन्तीषु रमायाः आनन्देन पुलकाः सञ्जाताः, माधवस्य तु मन्दहासः ।

सीतास्वयंवरमहोत्सवगानकाले
जातौ रमापुलकमाधवमन्दहासौ ।
सा जानकीयमयमेव हि रामचन्द्रः
किं तन्मुहूर्तकथयेति हि शंसतः स्म ॥(१६।३५)

तदा समुद्भूताभ्यां रमापुलकमाधवमन्दहासाभ्यां सैवेयं जानकी, स एवायं रामचन्द्रः, तयोश्च मुहूर्तप्रतीक्षणं निष्प्रयोजनमिति उद्घोषितमिवासीत् । एवमेव कन्यावरयोः परस्परनिरीक्षणमपि हृदयस्पर्शितया वर्णितम् –

आसीत्परस्परनिरीक्षणकर्मकाले
भैष्मीमुखाम्बुजगतं नयनं मुरारेः ।
तस्याश्च नाभिसरसीनिलयं तदेतत्
युक्तं यदर्कदृगसावियमुत्पलाक्षी ॥(१६।३६)

परस्परनिरीक्षणकाले मुरारेः नयनं भैष्म्याः मुखाम्बुजे गतमासीत् । नवोढायाः तस्याश्च नयनं लज्जावशात् मुरारेः नाभिसरोवरे एव स्थितम् । कविः इदं कर्मद्वयं[1] प्रतिभाप्रोत्थितेन कारणेन समर्थयति – असौ मुरारिः

(1) मुरारिनयनस्य भैष्मीमुखाम्बुजगमनं, तस्याश्च नाभिसरसीगमनम् ।

Rarest Archiver

अर्कदृक्। इयं रुक्मिणी उत्पलाक्षी। अर्कस्य कमलोल्लास-करत्वात् मुरारिनयनस्य भैष्मीमुखाम्बुजविकासार्थं गमनं युक्तम्। उत्पलस्य सरसिजातत्वात् स्वस्य स्थितिसिद्धयै नाभिसरसीनिलयत्वं च साधु। कविरत्र सहजामपि क्रियां कारणेन युक्तामकारयत्। विवाहे हि कन्यया वराय माला प्रदातव्या, वरेण च कन्यायै तदा कञ्चुकादि दातव्यं इति सम्प्रदायः। तदित्थं चित्रितं रु॰वि॰काव्ये –

आकण्ठमापादतलान्मुरारेः नेत्रालिनीलोत्पलचारुमालाम्।
श्रीः सन्दधे, तत्क्षणहृष्टरोमसत्कञ्चुकं श्रीपतिरात्मपत्न्याम्॥(१६।३८)

मुखं द्रष्टुं लज्जया श्रीहरेः पादमारभ्य कण्ठपर्यन्तं अपश्यत सा रुक्मिणी, तद्दृष्टिरेव नीलोत्पलचारुमाला। तद्दर्शनेन सा हृदयदेशे मुदा पुलकिताऽभवत्। तत्क्षणहृष्टरोमाणि कृष्णेन प्रदत्तं कञ्चुकं अभवत्। अलौकिके विवाहे अलौकिकमेव मालाकञ्चुकदानं युक्तं खलु! समलङ्कृताङ्ग्यः नार्यः कृष्णरुक्मिण्योः नवकुङ्कुमाभान् अक्षतान् प्रववृषुः। तदैव ताभ्यः अक्षतं-नाशरहितं- फलं प्रददतुः तावपि दयार्द्रलोचनैः।[1]

(1) नार्योऽक्षतान् प्रववृषुः नवकुङ्कुमाभान्
सङ्गीतमङ्गलकथाः समलङ्कृताङ्ग्यः।
सौवर्णविष्टरगतौ सदयैरपाङ्गैः
कन्यावरौ च फलमक्षतमेव तासाम्॥(१६।४५)

Rarest Archiver

ब्रह्मरुद्रेन्द्रादीन् विहाय श्रीकृष्णस्यैव वरणे गमकं कथयति कविः रुक्मिण्याः बुद्धिरूपसख्याः मुखेन –

उग्रोऽयं सखि चञ्चलोऽयमबलं सोऽयं रमे गूढपात्
वृद्धोऽसौ ज्वलनोऽयमेव तपनः सद्वक्रतुण्डो ह्यसौ ।
मुग्धेऽदन्तक एव देवि जलराट् गोत्रासहोऽसौ क्षितौ
इत्याद्यभिधयैव धिक्कृतसुरा श्रीरासमासादच्युतम् ॥(७६।३९)(1)

तत्तन्नामधेयश्रवणमात्रेणैव सर्वानपि देवान् परित्यज्य सा रुक्मिणी 'अच्युतं' आससाद। अथ तेषां कार्यपरिशीलनेन अपि ब्रह्मादीनां धिक्करणं युक्तमिति वर्णयति –

वेधा वैदिकमौलिरेष पवनो मन्त्रं जपन् सन्ततं
शर्वोऽसौ सुविरक्तधीः स मघवान् व्यापारभाराकुलः।
सूर्यः पर्यटनप्रियः स तु शशी दोषाकरोऽसौ स्मरोऽ -
नङ्गश्चेत्यखिलानुपेक्ष्य कमला वव्रे यदूनां पतिम्॥(७६।४०)

चतुराननः चतुर्भिर्वदनैः सदा वेदाध्ययनरतः। पवनः सदा हंसमन्त्रजपासक्तः। शर्वः दिगम्बरः महावैराग्यभाग्यः। इन्द्रोऽहर्निशं देवलोकसंरक्षणभारभुग्नः। सूर्यस्तु नित्यसञ्चारी। चन्द्रः दोषाणां आकरः। स्मरस्तु-अनङ्गः-अङ्गोपाङ्गरहितः। एते सर्वेऽपि

(1) शिवः उग्रः, वायुः चञ्चलः, शेषः गूढपात् अदृश्यपादः, ब्रह्मा वृद्धः अग्निः ज्वलनः, सूर्यः तपनः, गरुडः वक्रतुण्डः, पूषा दन्तरहितः, समुद्रः जल(ड)राट्, इन्द्रः गोत्रासहः-पर्वतवैरी (वंशनाशकः)

Rarest Archiver

विवाहानर्हाः। विलासगन्धोऽपि नास्तीति नैकोऽपि इष्टपूर्तेः ईष्टे। अतः कमलाऽरविन्दलोचना तानुपेक्ष्य 'यदूनां पतिं' वव्रे।

किञ्च विरिञ्चवैरिञ्च्यादयः तदनुग्रहोपजीविन इत्यपि तेषां त्यागे कारणान्तरं वर्तते।(1) अतोऽपि श्रीपतिमेव सा सुदती रुक्मिणी तं वर्यं द्वारकानाथं वरयाम्बभूव।

रुक्मिण्याः करयोः सखीभिः ग्रथिता एका मालाऽसीत्। सा च हरेरितरेभ्यः समर्पणानर्हा एवाभवत्। अनयाऽपि मालया हेतुभूतया श्रीहरिमेव वरयामास।(2)

हरेः प्रसादैकभुजां सुराणामिमां प्रदास्यामि कथं त्विनीव।
रमा प्रमोदोत्थितरोमराजिः समर्पयामास मुकुन्दकण्ठे॥ (७६।४३)

हरिसर्वोत्तमत्वप्रतिपादकोऽयं वैष्णवाचार्यवर्यः कविः सर्वेषां सुराणां हरिनिवेदितपदार्थैकस्वीकर्तृत्वं दृढं मनुते।

---

(1) पुत्रो यस्य स पद्मभूः, फणिपतिः शय्या, खगेशो रथः
शम्भुर्यच्चरणाम्बुमौलिः, अमरिन्द्रा तद्दत्तसाम्राज्यभुक्।
नित्यं यत्पदसङ्गतौ विधुरवी, यद्वल्लभा श्रीवधूः
तं वर्यं वरयाम्बभूव सुदती सा द्वारकानायकम्॥ ७६।४१

(2) या वै चम्पकसम्पदाऽञ्जवसतेः, दूर्वाश्रिया स्वात्मनः
केतक्या विभवेन कृत्तिवसनस्य, अम्भोजकान्त्या विधोः।
सन्नीलोत्पलशोभया दिनमणेः, श्रीमत्तुलस्याऽमता
हेरम्बस्य हरेः परं समुचिता सा मालिका शोभते॥७६।४२

Rarest Archiver

हरेर्निवेदनानन्तरमेव अन्येषां स्वीकार्यं भवतीति कृत्वा सा रमा प्रमोदोद्रेकेण उत्थितरोमराजिः सती मुकुन्दकन्धरे प्रेमातिशयेन समर्पयामास। मालिकासमर्पणानन्तरं सा रुक्मिणी तत्पार्श्वमाश्रितवतीति सहोक्त्यलङ्कारेण उत्प्रेक्षया च इत्थं वर्णयति काव्यकारः –

सा धाराम्बुकदम्बकेन सह सुप्रेमाश्रुधारां हरेः
आजन्मालिकया समं प्रणयसन्मालां, सुनीराजनम्।
नेत्रान्तेन, शुचिस्मितामृतरसैर्नैवेद्यमावेद्य त-
त्पार्श्वं मन्दमुपाश्रयत्फलमिव व्यालोलहारोज्ज्वला ॥(१६।४४)

अभिषेक-पुष्पमाला-नीराजन-नैवेद्यादिभिः हरेः पूजनस्य फलं मोक्षमिव तत्सामीप्यं प्राप्तवती सा रुक्मिणी। विवाहे गृहीतपाणी तौ रुक्मिणीमुकुन्दौ लाजसमेधिताग्नेः किल प्रदक्षिणं प्रचक्रतुः। तत्र कवेरुत्प्रेक्षा – "मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत"(१) इति स्वमुखस्थं तं रम्यरहस्यगोष्ठ्यां आत्मीयं कर्तुमिव।(२) तत्र च विवाहोत्सवे उत्साहपूर्णाः भूषणोज्ज्वलाः स्वयं वधूवराभाः एव नराः नार्यश्च इतस्ततः सञ्चरन्ति स्म किल। ते ताश्च विवाहोत्सवस्य

(१) पुरुषसूक्तम् (ऋ.सं. १०।९०)

(२) गृहीतपाणी किल चक्रतुस्तौ प्रदक्षिणं लाजसमेधिताग्नेः।
वधूवरौ रम्यरहस्यगोष्ठ्यां विधातुमात्मीयमिवास्यगं तम् ॥ १६।४६

नितरां भूषणायिताः विलसन्ति ।

ज्वलत्कलापाः स्फुरदङ्गलेपाः विचित्रवस्त्राः स्मितशोभिवक्त्राः ।
स्वयंवरे तत्र नराश्च नार्यो वधूवराभाः किल सञ्चरन्ति ॥(१६।४९)

नूनं विचित्रवस्त्राणां अनिमित्तस्मितशोभिवक्त्राणां स्त्रीपुरुषाणां वैभवं कदाचित् औन्नत्यं भजते वधूवरेभ्योऽपि । विवाहानन्तरं रुक्मिणी श्रीकृष्णं यथा चातुर्येणातोषयत् तत् श्लोकेनैकेन समग्रतया वर्णितं रु॰ वि॰ काव्ये —

सा मन्दस्मितमौक्तिकेन, सदपाङ्गरम्यैर्हयैः, हृत्पुरा ,
वक्षोजद्विरदेन, कायकनकेन, उद्भूतरोमानुगैः ।
तत्संसक्तमनोरथेन, विविधाङ्गश्री विचित्राम्बरैः
तद्योग्यामृतसाधनाधरभुवा सन्तर्पयामास तम् ॥(१६।४८)

विवाहनिश्चयावसरे कन्यापक्षीयैः "न पारिबर्हं बहुदातुमीशाः"(१७।४७) इत्युक्तमासीत् । रुक्मिणी तु कृष्णाय सर्वमपि पारिबर्हं विचित्रं समर्पितवती । तस्याः मन्दस्मितं शुभ्रत्वात् मौक्तिकम् । अपाङ्गाः चाञ्चल्यात् हयाः । हृदयं तु तदावासयोग्यत्वात्पुरम् । वक्षोजौ उत्तुङ्गत्वेन द्विरदौ । कायः सुवर्णवर्णत्वात्कनकम् । कृष्णानुसारित्वाद्रोम्णां अनुगत्वम् । तत्संसक्तमनोरथः एव रथो बभूव । हस्तपादादि विविधाङ्गकान्तीनां एकान्ते श्रीकृष्णदेहसम्बन्धयोग्यत्वात् वस्त्रात्वम् । समुद्रमथने स्वयमपीत्वा तत् अमृतं देवेभ्यो ददौ हरिः । तद्योग्यं अमृतं तु रुक्मिण्यधरामृतमेव । एवं रु॰ वि॰ काव्ये विवाहोत्सवः सविस्तरं वर्णितः ।

Rarest Archiver

श्रीकृष्णरुक्मिण्योः आपादमौलिपर्यन्तवर्णनम् –

रु. वि. काव्ये सम्पूर्णे अष्टादशे सर्गे, एकोनविंशे सर्गे प्रारम्भे श्रीकृष्णरुक्मिण्योः सर्वावयववर्णनं अपूर्वाभिः कल्पनाभिः अनितरसाधारणेन प्रकारेण भक्तिभावोल्लासेन च विहितं सहृदयहृदयानन्ददं संशोभते । पाद-जानु-ऊरु-मध्य-नितम्ब-उदर-त्रिवलि-वक्षः-कन्धर-बाहु-अधर-नासा-नयन-अलक-मुकुटादीनां प्रतिभाप्रभाविलासेन वर्णनं कवेः वर्णनाप्रावीण्यं प्रदर्शयति । स्थालीपुलाकन्यायेन कानिचित् पद्यानि उदाह्रियन्तेऽत्र । इदं तावत् रुक्मिणीकृष्णयोः पादपङ्कजवर्णनम् –

रक्ताभीयतलत्विषा, प्रविलसद्वी योर्ध्वभागश्रिया
स्वच्छेन्दुच्छविकृत्तसन्नखरुचा, स्वासक्तभूषावलेः ।
यच्छन्त्यद्भुतरत्नबन्धनमहः श्रीरुक्मिणीकृष्णयोः
दम्पत्योः पदपङ्कजानि भजतां सम्पत्कराणि ध्रुवम् ॥(१८।१)

श्रीरुक्मिणीकृष्णयोः पदपङ्कजानि रक्ततलेन, ऊर्ध्वभागेन स्वच्छनखैश्च स्वासक्तानां मञ्जीराद्याभरणानां जडानामपि पद्मराग-इन्द्रनील-मुक्तामणिरूपाणां विचित्ररत्नानां बन्धनस्य सुषमां यच्छन्ति । एवंभूतानि तत्पदपङ्कजानि स्वभजकानां चेतनानां सम्पत्कराणीति किं वक्तव्यमस्ति ? मञ्जीरादिभूषाणां महसा पादसौन्दर्यवर्णनं काव्यान्तरेषु उपलभ्येत, परन्तु कविरयं पादपङ्कजानां, भूषणानामपि भूषणत्ववर्णनेन, तेन च चेतनानां

Rarest Archiver

भक्तानां अभीष्टप्रदत्वसमर्थनेन शोभातिशयवर्णने नूनं
सफलोऽभूत । श्रीकृष्णपादे शङ्ख-पद्म-अङ्कुश-वज्रादयः
अङ्किताः वर्तन्ते । तत्र कवेरुत्प्रेक्षा इयम् –

शङ्खाम्भोजनिधी समीहितधनप्रत्यर्पणेन, अङ्कुशं
हस्तिन्यान्तरकर्षणेन, दितिजप्रध्वंसनेनाशनिम् ।
निर्जित्य ध्वजमुत्पताकमदधात् यः कृष्णपादो मुदा
प्रायस्तेऽपि च तस्य लक्षणगणव्याजेन भेजुस्तलम् ॥(१५६)

श्रीकृष्णस्य पादः भक्तानां आभिलषितधनप्रदानेन शङ्खाख्यं
पद्माख्यं च निधिं निर्जिगाय । हस्तिनीनां हृदयाकर्षणेन च
अङ्कुशं निर्जितवान् । असुराणां प्रध्वंसनेन वज्रायुधमपि
पराभवं प्रापितवान् । अतो विजयशालित्वादस्य पादः
उत्पताकध्वजरेखां अदधात् । एतद्विजयध्वजं वीक्ष्य तेऽपि
पराभूताः शङ्खपद्मवज्राङ्कुशाः तस्य पादस्य लक्षणगणच्छद्मना
तदेव पादतलं भेजुः । अनया चोत्प्रेक्षया श्रीकृष्णपाद-
स्थितानां ध्वजवज्राङ्कुशशङ्खपद्मरेखाणां मनोहरं
वर्णनं अकारि कविना । श्रीकृष्णपादकमलं अस्माकं
सम्पत्प्रदं भूयादिति सम्प्रार्थयन् कविवर्यः भक्त्या
कमलालालितपादकमलं तत् वर्णयति –

अङ्गीकृतः कमलयोच्चगतिः सदेति
सन्दर्शनाय कमलाकरसङ्गतं प्राक् ।

Rarest Archiver

पश्चात्क्रमेण कुचफालकच्याग्रलग्नं

श्रीकृष्णपादकमलं कुरुतां श्रियं नः ॥(७८।१)

सम्पदभिमानिन्या लक्ष्म्या परिगृहीतः पुरुषः सन्ततं उत्कर्षं प्राप्नोति इति प्रकटीकरणाय इव, रमया हरिचरणस्य परिचरणे क्रियमाणे प्रथमं तस्याः करसङ्गतं पश्चाच्च कुच-फाल-कच्याग्रेषु संलग्नं श्रीकृष्णस्य पादकमलं श्रीविलासपात्रत्वात् सम्पत्प्रदानसामर्थ्यात् अस्माकं श्रियं कुरुतात्। अत्र हि कविः श्रिया कृष्णपादस्य परिचरणप्रकारं प्रशंसन् स्वाभीष्टं सम्प्रार्थयमानः सन् स्वस्य विलक्षणकविताचातुरीं विलक्षणभक्तिभरं च अदर्शयत्। अस्मिन् सर्गे प्रतिवर्णनं अभीष्टप्रार्थनं विद्यते एव।

<u>जानुवर्णनम्</u>- पूर्णस्य तज्जानु निजप्रचारैः सानन्दनन्दावसथाङ्गणे प्राक्।

चूर्णीकृतानेकरजोऽस्मदीयमेनो धुनोत्वद्य हृदङ्गणस्थम् ॥(७८।१२)

श्रीकृष्णस्य जानु प्रागपि गोकुले नन्दगृहाङ्गणे रजश्चूर्णीकरोति स्म, अत एवाधुना अस्माकं हृदयाङ्गणे वर्तमानं पापमपि चूर्णीकरोतु इति आशंसनम्। सर्वत्राप्यत्रावयववर्णनेषु कविः इष्टं प्रार्थयते, प्रसादं अनुनाथते, मङ्गलमाशास्ते, लौकिकालौकिकश्रियमपेक्षते, रक्षणमाकाङ्क्षते पोषणं समीहते च।

<u>ऊरुवर्णने</u> च ऊर्वोः परस्परमेव समानधर्मत्वं वर्णितम्। परस्परयोः एव समानधर्मत्वस्पष्टीकरणार्थमिव रुक्मिणीमुरभिदोः ऊरू

Rarest Archiver

द्वन्द्वात्मतां सम्प्राप्तौ।(1)

रुक्मिणीनीवीवर्णनम्- रुक्मिण्या धृतस्य पीताम्बरस्य नीवी आपादपद्मं परिलम्बमाना सती, रुक्मिणीपादयोः कान्त्या निर्जितस्य अत एवाधोमुखीभूतस्य रमणीयकाञ्ची-मध्यस्य प्रभाः इव प्रतिभातीति वर्णनेन लक्ष्मीपादयोः अधोमुखा भवन्ति सर्वेऽपि इति सूचितमस्ति(2)

हरेरुदरवर्णनम्- श्रीकृष्णस्य उदरे त्रिवलिः अङ्कस्थितायाः रुक्मिण्याः तर्जनी-मध्यम-अनामिकाङ्गुलीनां कान्तिरिव शोभते। रोमावलिस्तु तस्य, तस्याः कृष्णनाभिं प्रविश्य ऊर्ध्वं गता नेत्रकान्तिरिव विलसति।(3)

---

(1) सत्कान्त्या हरिनीलकाञ्चनसमौ हस्तीन्द्रहस्तोपमौ
विष्वग्वर्तुलतागुणेन, मृदुताधर्मेण कुन्दस्रजः।
कल्पौ यद्यपि रुक्मिणीमुरभिदोरूरू कथञ्चित्तुला
लावण्येन परस्परं परमिति द्वन्द्वात्मतां बिभ्रतौ॥ १८।१३

(2) आपादपद्मं परिलम्बमाना नीवी रमायाः रमणीयकाञ्च्याः।
विष्वक्स्फुरद्रत्नगणस्य मध्यलक्ष्म्या विनम्रा इव भाति भासः॥(१८।१८)

(3) अङ्कस्थितोदधिसुतोच्चकराङ्गुलीनां
कान्तिस्त्रिधोदरगतेव वलिर्विरेजे।
नाभिं प्रविश्य शनकैरुदिता तदीय-
नेत्रान्तकान्तिरिव रोमलता च तन्वी॥ १८।२०

Rarest Archiver

रुक्मिण्याः रोमावलिः वक्षोजकुम्भीन्द्रकुम्भयुग्मात् अवतीर्णां मदोदकधारां जिगाय इति वर्णयन् कविरयं रोमवलिचित्रणे वैशिष्ट्यमावहति ।

सुवर्णवर्णोदरमध्यलग्ना मनोज्ञरोमावलिरिन्दिरायाः ।
जिगाय वक्षोजकरीन्द्रकुम्भयुगावतीर्णां मदवारिधाराम् ॥(१८/२१)

अत्र च सुवर्णवर्णोदरस्य वक्षोजयोश्च पर्यायेण वर्णनं विहितं विलसति । मुकुन्दस्य मध्यं तादृशीं सूक्ष्मतां भजते यत्पूर्तिं विधित्सया इव रुक्मिणी तन्मध्यं कराब्जेन सर्वदा आलिङ्गितवती ।(१) लावण्यगुणैकधाम तत् विठ्ठलस्य वक्षः सदा अस्मान् रक्षतु इति कवेः प्रार्थना । तल्लावण्यं एतादृशं अस्ति यत् सपत्नीवक्षोजलब्धाङ्कमपि तत् लक्ष्मीः नैव त्यजति ।(२) विश्वजनन्याः रुक्मिण्याः कुचमण्डलं अस्मान् पोषयतु इति श्रीवादिराजतीर्थैः प्रार्थ्यते —

उद्यन्मनोज्ञमुखनिर्मलपूर्णचन्द्र-
मुद्वीक्ष्य मन्दहसितामृतशोभिबिम्बम् ।
बिभ्रत्सदा मुकुलिताम्बुजकोशकान्तिं
पुण्णातु विश्वजननीकुचमण्डलं नः ॥(१८/२४)

(१) मध्यं मनोज्ञं मृदुलं सुवृत्तं बुद्धौ सदा तिष्ठतु, यत्कृशत्वम् ।
उद्वीक्ष्य तत्पूर्तिविधित्सयेव पद्मा कराब्जेन सदाऽऽलिलिङ्गे ॥ १८/२८

(२) तत्याज यन्नैव चिरं सपत्नीवक्षोजलब्धाङ्कमपि स्म लक्ष्मीः ॥ १८/२९

Rarest Archiver

रुक्मिण्याः नित्यतारुण्यात् कदापि कुचशैथिल्यं नास्तीति वर्णने मन्दस्मितामृतशोभिमुखचन्द्रदर्शनेन सर्वदा मुकुलित-कमलकोशसाम्यमिति निरूपयन् कविवरः अद्वितीयतया विद्योतते। लक्ष्मीवक्षोजवर्णने कवयः असमर्था एव भवन्तीति रु.वि.काव्य-काराभिप्रायः। यतः सः स्तनः स्वजन्मभूमिं वक्षःप्रदेशं आच्छाद्यैव जायते। इत्थं उरसः आच्छादनात् मातृद्रोहि-सदृश्यस्यापि स्तनस्य सर्वधर्मसंरक्षकः श्रीहरिः करं यच्छति - बलं ददाति - तं वर्णयितुं को वा कविः समर्थः?

आच्छादितोरःस्थलमूलदेशं जातस्य यस्याखिलधर्मगोप्ता।
शौरिः करं यच्छति तं रमायाः चारुस्तनं वर्णयितुं क ईशः॥(१८/३३)

मातृद्रोहरूपाधर्मनिरतस्य कुचयुगस्य धर्मगोप्ता करं ददाति इति वक्षोजस्य सौन्दर्यातिशयः निरूपितः।

<u>हरेर्हस्तवर्णनम्</u> - श्रीकृष्णस्य चत्वारो हस्ताः युद्धेऽपि कठोरकर्मणि कुशलाः उपयुक्ताश्च तथा रहःकेलिषु अपि चत्वारः हस्ताः चतुराः फलिताश्च इति कथयन् कविः कृष्णस्य हस्तानां वैभवं वर्णयति।(१)

---

(१) शार्ङ्गस्य ग्रहणे मनोरमगुणस्याकर्षणे, सायकस्यादाने
युधि माधवस्य फलिताः सन्धानकर्मण्यपि।
चत्वारः कबरीं प्रगृह्य, कमलामालिङ्ग्य, गण्डस्थलीं
सङ्गृह्याधरजामृतं च पिबतो हस्ताः रहःकेलिषु॥१८/३६

Rarest Archiver

रुक्मिणीमङ्गलसूत्रवर्णनम् — नित्यमुक्तायाः बन्धरहितायाः मङ्गलदेवतायाः तस्याः रुक्मिण्याः मङ्गलसूत्रं नित्यं तत्कण्ठे बन्धयुक्तम् । कविरिदं बन्धोज्झितसम्बन्धि नित्य-बन्धनं एवं समर्थयति —

बन्धोज्झिताया अपि सिन्धुपुत्र्याः माङ्गल्यसूत्रं किल नित्यबद्धम् ।
मुग्धाबलामोहनकण्ठयोगे मोक्षोऽप्यनाकाङ्क्षित एव नूनम् ॥ (५/४६)

लौकिकसुखैकलोलुपानां मोक्षोऽपि अनपेक्षित एव भवति इत्यमर्थान्तरन्यासः कवेः सूक्ष्मनिरीक्षणं स्पष्टयति ।

मुखवर्णनम् — चन्द्रस्य एणाङ्कपरित्यागेन नायकमुखसाम्य-वर्णनं सामान्यमेतत् । श्रीवादिराजस्तु श्रीकृष्णरुक्मिण्योः मुखं ततोऽपि उत्कृष्टतया करोति —

दूरे विधूय हरिणं सुभगं तदीय-
नेत्रं स्वबिम्बखचितं वितनोतु चन्द्रः ।
साम्यं तथापि न समेति शुचिस्मितस्य
लोलालकस्य कमलाच्युतसन्मुखस्य ॥ (१८/४८)

चन्द्रमाः स्वाङ्कभूतं हरिणं विहाय, तदीयं नेत्रं स्वबिम्ब-खचितं कृत्वाऽपि कमलाच्युतसन्मुखस्य साम्यं नैव प्राप्नोति । तथा च हरिणनयनस्य शुचिस्मितशोभितस्य लोलालकविलसितस्य कमलाच्युतसन्मुखस्य सौन्दर्यं कलङ्किनः चन्द्रात् आधिकाधिकमिति वर्णितं भवति ।

Rarest Archiver

अलकवर्णनम् - तयोः वक्रालकराशिः अन्धकार इव इति कवेरूहः । स च मुकुटाख्यविवस्वतो भयात् अधो व्यालम्बते । अधश्च मुखचन्द्रकान्त्या भीतः उन्मुखो भवति । अथापि कर्णनीलोत्पलश्रिया निजदैन्यं परिहृत्य अन्धकारः तत्र मुकुटमुखयोर्मध्ये कथञ्चित् वर्तते । अस्य वर्णनस्य मनोहारित्वे सहृदयाः प्रमाणम् —

मुकुटरविभियाऽधो लम्बमानं मुखेन्दोः
प्रविलसदुरुभासा चोन्मुखं तन्मुखस्थम् ।
कुटिलमलकराशिं कर्णनीलोत्पलश्री-
परिहृतनिजदैन्यं तर्कयाम्यन्धकारम् ॥ (१९।१०)

रुक्मिण्याः सौन्दर्यातिशयवर्णनेनेदं प्रकरणं समाप्यते —

कार्श्यं काये मनोज्ञे कचभर-करयोः लम्बमानत्व-दैर्घ्ये
चक्षुः-मध्य-ऊरुदेशेषु अधिकचपलता-अदृश्यता-मार्दवानि ।
तत् ते तानि क्रमेण द्विरदपरिलसत्कुम्भशोभापहारिणि
अस्ति स्तः सन्ति लक्ष्म्याः कुचकलशतटे नास्ति नास्तो न सन्ति ॥ (१९।६)

कार्श्यं मनोज्ञे कायेऽस्ति, कुचकलशतटे नास्ति । लम्बमानत्व-दैर्घ्ये कचभर-करयोः स्तः, कुचकलशतटे नास्तः । अधिक-चपलता-अदृश्यता-मार्दवानि च क्रमेण चक्षुः-मध्य-ऊरुदेशेषु सन्ति, कुचकलशतटे न सन्ति । अत्रहि रुक्मिणीशरीरे कार्श्यादीनां भावाभावाभ्यां समस्तशरीरस्य कुचकलशयोश्च सौन्दर्यातिशयः "अस्ति स्तः सन्ति लक्ष्म्याः कुचकलशतटे नास्ति नास्तो न सन्ति" इति समस्यापूरणेन वर्णितः ।

— x —

Rarest Archiver

षष्ठोऽध्यायः   पात्रचरित्रचित्रणम्

रूपकेषु पात्रचरित्रचित्रणं यथा वैशिष्ट्यं महत्त्वं च भजते तथा संस्कृतमहाकाव्येष्वपि काव्यान्तर्गतानां पात्राणां स्वभावस्य चित्रणं महत्त्वपूर्णं वर्तते। सर्वेषामपि पात्राणां तत्तद्वैलक्षण्यचित्रणे पोषणे च कवेः महद्वैलक्षण्यमपेक्षते। नायकप्रतिनायकादीनां स्वरूपं दशरूपकादिष्वपि लक्षितमेव। संस्कृतकवयश्च तल्लक्षणानुसारमेव पात्राणां पोषणं तथा पालनं कर्तुं कृतप्रयत्नाः सफलाश्च। तल्लक्षणनिर्वाहार्थं कवीनां दत्तावधानत्वात् रामचन्द्रस्य पात्रं श्रीकृष्णस्य च पात्रं तत्तन्नायकेषु काव्येषु प्रायः एकरूपमेवोपलभ्यते। रु॰वि॰काव्ये च पात्राणां चित्रणं सुष्ठु विहितं परिदृश्यते।

श्रीकृष्णः — श्रीकृष्णः काव्यस्यास्य नायकः। अयं खलु न मानवः नापि कश्चिद्देवः किन्तु देवतासार्वभौमः। काव्येऽस्य नायकसामान्यगुणाः धनञ्जयेनोक्ताः सर्वेऽपि अस्मिन् श्रीकृष्णे महाकविना वादिराजतीर्थेन अप्रयासं चित्रिताः। वस्तुतो हि अनन्तकल्याणगुणगणपरिपूर्णश्रीमन्नारायणस्य पूर्णावतारे श्रीकृष्णाख्ये परब्रह्मणि केवलं काव्यनायकताप्रयोजक-धर्मवत्त्ववर्णनं न महत्त्वापादकं, परं तेषामपि गुणानां सम्प्राप्तिः श्रीकृष्णे स्पष्टीकृता सदृष्टान्तं निरूपिता च। विनीतता

---

(१) यस्मिन् मङ्गलदेवताऽखिलजगन्माता रमा नायिका
पद्मापद्मभवादिवन्द्यचरणस्तद्वल्लभो नायकः॥ — रु॰वि॰ १९/३८

मधुरता, त्यागः, दक्षता, प्रियंवदता, लोकानुरक्तता, शुचिता, वाग्मिता, रूढवंशोद्भवता, स्थिरता, यौवनं, बुद्धिमत्ता, उत्साहिता, स्मृतिः, प्रज्ञावत्त्वं, कलासम्पत्तिः मानिता चेत्येतैः गुणैः साकं धीरोदात्ते नायके महासत्त्वता, अतिगम्भीरता, क्षमाशीलता, अविकत्थनता, निगूढाहङ्कारता, दृढव्रतता चेतीमे गुणाः अपि अपेक्षिताः इति धनञ्जयः प्रतिपादितवानस्ति।[1] एते खलु गुणाः श्रीकृष्णे काव्यनायके श्रीवादिराजेन स्फुटीकृता एव। हरिभक्तिरसामृतसिन्धौ च रूपगोस्वामिना श्रीकृष्णे चतुष्षष्टिगुणान् वर्णयता[2] धीरोदात्तताप्रयोजकाः पूर्वोक्ता एव धर्माः प्रतिपादिताः।[3] न केवलमेतत्, श्रीकृष्णः

(१) नेता विनीतो मधुरः त्यागी दक्षः प्रियंवदः।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा॥
बुद्ध्युत्साहधृतिप्रज्ञाकलामानसमन्वितः।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः॥ द.रू. २/१-२
महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः।
स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रतः॥ तत्रैव २/४

(२) समस्तविविधाश्चर्यकल्याणगुणवारिधेः।
गुणानामिह कृष्णस्य दिङ्मात्रमुपदर्शितम्॥ ह.भ.र.सि. दक्षिणविभाग १/७५

(३) गम्भीरो विनयी क्षन्ता करुणः सुदृढव्रतः।
अकत्थनो गूढगर्वो धीरोदात्तः सुसत्त्वभृत्॥ तत्रैव १/८१

Rarest Archiver

एव सर्वेषां नायकानां मूर्धन्यः यतोऽयं सर्वगुणाकरः इति तत्र अभिप्रेतम् - नायकानां शिरोरत्नं कृष्णस्तु भगवान्स्वयम्

यत्र नित्यतया सर्वे विराजन्ते महागुणाः ॥(1)

रु॰वि॰काव्ये श्रीकृष्णे विनयादयः गुणाः सम्यक् चित्रिताः समुपलभ्यन्ते । श्रीकृष्णः गुरुषु विनयवान् मधुरः प्रियभाषी च । कंसध्वंसानन्तरं हरिः पितरौ देवकीवसुदेवौ प्रणतिपूर्वकं वक्ति - अथ धर्मपथाध्यक्षो जगदे जगदेकराट् ।

वार्तयाऽहं भवत्पुत्रः यश्चकार न वां हितम् ॥(१२।७५)

पित्रोः परिचरणाकरणात् स्वस्य पुत्रत्वमेव न मनुते हरिः। धर्मपथाध्यक्ष इत्यनेन धार्मिकत्वमपि निगदितम् । पित्रोः परिचर्या पुत्रस्य धर्मः। अत एव -

जगत्पित्राऽथ पितरौ मृदुभाषणपूर्वकम् ।

नतौ न तौ पुत्रबुद्धिं चक्रतुः चक्रिणीश्वरे ।१२।७३

इति जगत्पितृकर्तृक-पितृउद्देश्यक प्रणतिरपि अभिहिता । मृदुभाषणपूर्वकमिति(2) श्रीकृष्णस्य मार्दवमपि प्रोक्तम् । श्रीकृष्णस्य त्यागशीलता दानशौण्डता इत्थं चित्रितं यत् - कृष्णाख्येन मेघेन सर्वदा वृष्टं वित्ताम्बु प्रतिपद्य द्वारकानगर्यां विप्रसद्मारव्यसमुद्रः तत्क्षणमेव मुक्तामयः

(1) हरिभक्तिरसामृतसिन्धौ । दक्षिणविभागे प्रथमलहरी सप्तदशः श्लोकः

(2) अनेन च कृष्णस्य सद्वृत्तमपि चित्रितम् ।

Rarest Archive

सञ्जायते इति। समुद्रे स्वातावेव वृष्टं नीरं पश्चाद्धीरेण मुक्तामणिः भवति। सर्वदा वित्तवर्षकोऽयं श्रीकृष्णः इति दातृत्वोत्कर्षः।(1)

दक्षता- क्षिप्रकारिता दक्षता। रुक्मिण्यपहरणावसरे कृष्णस्य दक्षता प्रादर्शि कविना -

तदनु मदनमन्दीभूतचित्तेषु भूपे-
ष्वविदितगतिरुद्यद्रोमराजिं प्रहर्षात्।
विकसितनयनाब्जोद्भूतहर्षाम्बुधारां
निजरथमधिरोप्य स्वां प्रपेदे स्वतन्त्रः॥(14/67)

रुक्मिणीदर्शनेन मदनशङ्कितानां भूपानां पुरत एव तैरज्ञातगतिरयं रुक्मिणीं निजरथमाधिरोप्य निन्ये इति महादक्षता।

लोकप्रियता- रुक्मिणीं नेतुं आगतस्य विदर्भनगराद्बहिरेव कृतवसतेः श्रीकृष्णस्य दर्शनौत्सुक्येन समागतैर्बहुभिर्नागरिकैः सा स्थली पुरीमजयदिति चित्रणेन तस्य लोकप्रियताऽभिव्यक्ता।(2)

शुचिता- शुचिता द्विविधा। पापनाशकत्वं, त्यक्तदूषणत्वं चेति। यथोक्तम् -

पावनश्च विशुद्धश्चेत्युच्यते द्विविधः शुचिः।
पावनः पापनाशी स्यात् विशुद्धः त्यक्तदूषणः॥(भ.र.सि.दक्षिण 1/50)

---

(1) अन्तर्हस्ततटेषु विप्रजलधेः कृष्णाब्दवृष्टं सदा
वित्ताम्बु प्रतिपद्य तत्क्षणमहो मुक्तामयो जायते॥ 17/41

(2) दुष्टौघपूर्णां नगरीं प्रवेष्टुं कृष्णो ह्यनिच्छन् बहिरेव वासम्।
चक्रे स्थली नागरिकैर्वृता सा तदीक्षणोत्कैरजयत्पुरीं ताम्॥(14/57)

Rarest Archiver

पापनाशकत्वं यथा - रम्याधरोष्ठसुधया रचितात्मवृत्तीः
न त्यक्तुमर्हसि नवाम्बुदनीलमूर्ते ।
त्वत्सङ्गभङ्गकरजोघन पापभङ्ग,
शक्नोति हि क्षपयितुं तव लोचनान्तः ॥(१०।३८)

अत्र तत्कटाक्षविक्षेपणमार्गेण पापानां पापिनां च नाशः प्रतिपादितः। शुचित्वे द्वितीयो विधः त्यक्तदोषत्वं। तद्यथा रुक्मिणीस्वयंवरे बुद्धिसख्या अखिलदोषशून्यतया हरिः परिचाययितः।(१) मनोनिर्मलताऽपि शुचिता एव, सा दृश्यते श्रीकृष्णे -

स कृष्णः कंसविध्वंसी तत्पित्रे तन्महीं ददौ ।
परार्थैकफलः साक्षात् पुराणपुरुषो ह्यसौ ॥ (१२।७)

अत्र श्रीकृष्णस्य साम्राज्यनिरपेक्षतया शुचिताऽभिहिता भवति।

वाग्मिता - व्यक्तातिकोमलमनोरमवर्णपूर्णं श्रुत्यर्थवृत्ति मधुरस्वरमत्यगाधम् ।
सत्क्लेशदुर्विषशमेऽमृतवर्षकल्पं तत्त्वं निजं हरिवचः परिबोधयेमाम् ॥(९।५३)

अत्र हि वासुदेवस्य वचोवैचित्र्यं चित्रितम्। तद्वचासि खलु वर्णाः व्यक्ताः, कोमलाः मनोरमाश्च। विषयः श्रुत्युपबृंहितः। उच्चारणं कर्णानन्ददम्। अर्थः अतिगम्भीरः। प्रयोजनं च एतादृशवचसः सतां क्लेशनाशः।

<u>रूढवंशोद्भवत्वम्</u> - श्रीकृष्णः चन्द्रवंशोदितः। स्वावतारेणैव <u>तत्कुलस्य जगत्प्रसिद्धिश्चाभूतम्। वसुदेवेन श्रीकृष्णं प्रति</u>

(१) अयं मुकुन्दः सखि चित्प्रमोदमयाव्ययाङ्गोऽखिलदोषशून्यः। १६।२९

प्रोक्तं - सर्वंतात कृतं त्वया यदुदितं प्रीत्याऽस्मदीयान्वये

तेनेदं तिलकी बभूव हि कुलं कीर्तिश्च मे विस्तृता ॥ (१२।१६)

जन्मरहितस्य परमात्मनः कृष्णस्य कस्मिंश्चिदपि वंशे जन्म नैव भवति किन्तु अवतार एव। हरिभक्तिरसामृतसिन्धौ चायं गुणो न गणितः, अस्मादेव कारणादिति भाति।

स्थैर्यं - कोपाटोपेन कंसे आगतेऽपि श्रीकृष्णः तं मूर्ध्नि प्रगृह्य पृथ्व्यां निपातितवान् इति तस्य मनःस्थैर्यं चित्रितं भवति।

कान्तः स एव यः स्थैर्यशौर्यसौन्दर्यसागरः।

सुखस्यान्तकरं कान्तमपरं नकियामहे ॥ (६। ६०)

अत्र वेणुनादं श्रुत्वा कृष्णसान्निध्यं समागताः गोप्यः स्थैर्यशौर्यातिमत्तया श्रीकृष्णस्यैव कान्तत्वं कथयन्ति।

यौवनम् - कृष्णं प्रति प्रेषिते पत्रे रुक्मिणी स्पष्टयति —

भवतापहरापाङ्ग, भवताऽपहृतैव धीः।

चरणाङ्ककृताङ्कां मां चरणाङ्गणतो नय ॥ (१४।६१)

अपहृतचित्तत्वात् भैष्म्याः, कृष्णस्य यौवनमभिव्यज्यते।

बुद्धिमत्वम् - मथुरायां कुवलयापीडनाशने हरेर्बुद्धिमत्ता —

पुच्छे प्रगृह्य पुरुसत्त्वममुं पुनश्च

कृष्णश्चकर्ष बहुदूरमपारशक्तिः।

धावन् विभुः निजविपातविशङ्किनोऽस्य

भूलग्नदन्तयुगलं शिथिलीचकार ॥ (११।३४)

Rarest Archiver

अत्र कृष्णस्य अपरिमेयशक्तिः, दन्तिनः भ्रान्तिमुत्पाद्य तस्य दन्तयुगलशिथिलीकरणे बुद्धिश्च वर्णिते। बलं कौशलं च चित्रिते।

उत्साहः – द्वारकायां स्वजनान् निधाय श्रीहरिः कालयवनं दिधक्षुः सन् मुचुकुन्दगुहां प्रति विदुद्रुवे इति तस्य यात्रादौ उद्यमरूपः उत्साहः प्रकाशितः।[1]

स्मृतिः – सदापरोक्षीकृतविश्वस्य स्मरणं कथं घटते। विवाहनिश्चयकाले कन्यापक्षीयैः "अस्मान् जात्वपि नैव विस्मरेत् हरिः" इत्युक्ताः वरपक्षीयाः कथयन्ति –

सदापरोक्षीकृतसर्वविश्वः कथं स्मरेद्वः स्मरणीयशीलः।
तथापि युष्मासु कृपां स कुर्यात् स्मृतेः फलं स्वाङ्घ्रियुगाश्रयेषु॥(१५।४४)

अस्मिन् वरपक्षीयवचने कृष्णस्य स्मरणीयशीलत्वं चिन्तनीयसद्वृत्तत्वं चित्रितम्।

कलाज्ञातृत्वम् – वेणुवादनावसरे श्रीकृष्णस्य सङ्गीतकलाभिज्ञता[2] महारासलीलायां च तस्य नाट्यविशारदता च निरूपिते स्तः।

मानः – चीरहरणप्रसङ्गे कविना कृष्णस्य मानित्वं प्रतिपादितम्। "ददौ मुदा तद्वसनानि मानी"[3] इति जलगताः ताः गोपकन्याः स्वसङ्गयोग्याः तर्कयन्नेव तद्वसनानि प्रादात् ताभ्यः मुकुन्दः।

---

(१) विदुद्रुवेऽथो यवनं दिधक्षुः स्वभक्तहर्यक्षदरीमरिघ्नः। १५।३२

(२) वेणुं क्रमेण च रणन् बहुतानमानगानज्ञमौलिरुदगायदधीश्वरोऽसौ। ६।४६

(३) रु॰वि॰ ५।४१ अन्यच्च ५।५२

शौर्यम्- युद्धत्रयवर्णनं रु.वि. काव्ये उपलभ्यते। तत्र सर्वत्र हरेः प्रतापवर्णनं सम्यक् कृतम्।

अहयीत अहयी कश्चित् अनंसीदपरोऽच्युतम्।
नाक्रमीदपरो विद्धः विक्रमार्कोदये हरेः॥ (१५।७)

श्रीकृष्णस्य शौर्यं दृष्ट्वा हयं त्यक्त्वा एव कश्चिद्गतवान्। अन्यः तं प्रणतवानेव। कोऽप्यन्यः क्रमितुं न शशाक।

<u>शास्त्रचक्षुष्मत्ता</u> - स्वेनानीतायाः रुक्मिण्याः पाणिग्रहणं शास्त्रानुसारं चिकीर्षुः हरिः मूलमाधवं गतः -

करं जिघृक्षुः वैदर्भ्याः शरण्योऽथ यथाविधि।
प्रियया बन्धुभिः सार्धं प्रययौ मूलमाधवम्॥ (१५।१४)

अत्र यथाविधि विवाहेच्छया शास्त्रचक्षुष्मत्ता चित्रिता।

न केवलमेते एव गुणा वर्णिताः श्रीकृष्णे किन्तु नायकस्य पात्रचित्रणे कविः निरतिशयं दत्तावधानोऽस्ति। हरेः सुरम्याङ्गता (१) इत्थमत्र प्रत्यपादि -

हे चेतःक्षितिपाल भोः रमणीयकोऽक्षिमीनाश्रये
नाभ्यावर्तवति श्रुतिद्वयुते केशौघशैवालिनि।
सुभ्रूसज्जलिपङ्क्ति मन्दहसितोत्तुङ्गोर्मिफेनाविले
हस्ताङ्घ्र्याब्जिनि विट्ठलाङ्ग सरसीतोये रमस्वानिशम्॥ (९।२२)

अस्मिन्पद्ये नेत्रादीनां मीनाद्याकारवत्त्वेन आद्यानामङ्गानां सन्निवेशचित्रणेन सुरम्याङ्गता अभिहिता।

---

(१) आद्याङ्गसन्निवेशो यः सुरम्याङ्गः स कथ्यते॥ ह.भ.र.सिं. दाक्षिण १।३७

कृष्णस्य प्रतिभान्वितत्वप्रतिपादनप्रणालीयं प्रदृश्यताम् –

कस्त्वम्?, कश्चन निर्जरोऽहं, इह ते स्वर्गः क्व? तत्त्वद्गृहं
पीयूषं क्व? तवाधरेऽस्ति सुभगे, क्वास्ते तवानिद्रता?
त्वत्प्रेम्णां सखि चिन्तया, अनिमिषता कुत्र? प्रिये पश्यतः
त्वद्रूपं त्विति बल्लवीं प्रियगिरा चक्री स चक्रे निजाम्॥(३।६३)

अस्मिंश्च वाकोवाक्ये कृष्णस्य नवनवोल्लेखिज्ञानं दर्शितमिति प्रतिभाप्रकर्षः। एतादृशाश्च श्लोकाः रु॰वि॰काव्ये बहवः एव तत्र तत्र विराजन्ते।[१]

<u>क्षमाशीलता</u>[२] – श्रीहरेः, अपराधसहनसामर्थ्यं

आधिक्षिप्तोऽपि तेनाध्वन्यदत्तोत्तर ईश्वरः।
असत्प्रलापमसद्वर्गैः सतां संशिक्षयन्निव॥(१४।३४)

कालयवनेन मार्गे आधिक्षिप्तोऽपि हरिः क्षमया सहते स्म।

<u>समत्वम्</u> – रागद्वेषमुक्तत्वम्। श्रीकृष्णः कस्यचित्पक्षपाती न भवेत्। अपराधिनां दण्डः, निरागसां वरश्च भवतः तस्मात्। कालियामर्दनावसरेऽयं गुणः दर्शितोऽस्ति –

स दन्दशूकस्य मुखं विभिन्दन् तदीयपुच्छं जगृहे करेण।
यथापराधं ननु दण्डदाता निरागसं कं वरयेन्न शौरिः॥(४।६५)

अत्र निर्दोषस्य पुच्छस्य करेण ग्रहणात्समत्वं प्रदर्शितं भवति।

---

(१) रु॰वि॰ ३।४०,४१. ५।४८. ९।२६,२७,२८,५३,५४,५५ इत्यादयः

(२) क्षमाशीलोऽपराधानां सहनः परिकीर्त्यते। <u>ह॰भ॰र॰सिं</u> दक्षिण॰ १।५२

Rarest Archiver

इत्थमयं श्रीकृष्णः महाकाव्यस्यास्य नायकः गुणपूर्णः दोषदूरः भक्तानुग्रहकारकः धीरोदात्तश्च इति चित्रितोऽस्ति ।

रुक्मिणी

इयं काव्यनायिका; कृष्णस्य अनादिजाया, ब्रह्मादिवन्दिता च ।

सिञ्जन्नूपुरशोभिपादकमलां मन्दस्मितोद्यन्मुखीं
कञ्जाक्षीं कुचभारभीरुविलसन्मध्यां क्वणत्कङ्कणाम् ।
शम्भ्वाद्यैः परिसेवितां सुवसनां जाम्बूनदालङ्कृतां
अम्बां तां प्रणतोऽस्मि कृष्णरमणीं लम्बालकां रुक्मिणीम् ॥(१।४)

एवं खलु प्रणामप्रसङ्गे रुक्मिण्याः स्वरूपं सुन्दरेण शब्दवृन्देन सुन्दरतरेण अर्थवैशद्येन सुन्दरतमेन च वर्णनाप्रकारेण चित्रितम् । लक्ष्मीस्वरूपिणी इयं रुक्मिणी मङ्गलदेवता अखिलजगन्माता च । चतुर्दशे सर्गे रुक्मिणीप्रेषिते पत्रे, तामानेतुमागतस्य श्रीकृष्णस्य सन्दर्शनोत्सुकानां नागरिकाणां सम्भाषणे, पञ्चदशे सर्गे विवाहनिश्चयावसरे षोडशे सर्गे स्वयंवरे विवाहे च, अष्टादशे सर्गे आपादमौलिपर्यन्तवर्णने एकोनविंशे च सर्गे रुक्मिण्याः काव्यनायिकायाः पवित्रं चरित्रं भव्यतया चित्रितम् ।

शम्भुः पुत्रसमः स मे पुररिपुः पौत्रः, शशी सोदरः
सिन्धुर्मे जनकायितः मधुसखो मत्सूनुकल्पः प्रभो ।
अम्बाऽहं सकलस्य चेति कमला कृष्णैकलग्नं मनो-
भृङ्गं दर्शयितुं कृतोग्रशपथा स्वं रूपमस्पष्टयत् ॥(१४।८३)

Rarest Archiver

यथा लोके काचित् सुदती विवाहप्रस्तावे अनाभिप्रेते पुरुषे स्वस्यानङ्गीकारं सूचयितुं, वृद्धश्चेत् त्वं मम पिता इति शपथं करोति, अनाभिप्रेतो युवा चेत् त्वं मम सोदर इति शपथं करोति, अथवा ह्रस्वाकृतिं प्रति त्वं शिशुरिति वा अपहसेत् तथा इयं रुक्मिणी कृष्णैकलग्नं स्वमनोभृङ्गं दर्शयितुं, सिन्धुः मम जनकायितः, शशी मम सोदरः इत्यादिरीत्या शपथं कृत्वा तत्तदनङ्गीकारं असूचयत्। तया च अनेन उग्रशपथेन स्वं रूपं स्पष्टीकृतमेवाभूत्। समुद्रोत्पन्नत्वात् तस्याः सिन्धुः जनकायितः। सहजातत्वात् चन्द्रः सोदरः भवति। स्वभावतो हि उत्पत्त्यभावात् लक्ष्म्याः सिन्धुः जनकायितः इत्युक्तम्। 'अच्युतस्य' रमणी सा रुक्मिणी सर्वदा सुमङ्गली सौभाग्यवती। अत एव नित्यमुक्तायाः अपि तस्याः माङ्गल्यसूत्रं नित्यबद्धम्।(१) अत एव कविः तस्याः माङ्गल्यसूत्रं वर्णयन् सन्ततं सम्पदं प्रार्थयते —

सन्नीलरत्नरुचिरं सततं श्रियै स्यात्
माङ्गल्यसूत्रमिह मङ्गलदेवतायाः।
यत्कण्ठदेशधृतं अब्जदलायताक्ष्या
न प्राग्व्ययुङ्क्त न वियोक्ष्यति नो वियुङ्क्ते॥ (१८।४७)

---

(१) बन्धोज्झितायाअपि सिन्धुपुत्र्याः माङ्गल्यसूत्रं किल नित्यबद्धम्।
मुग्धाबलामोहनकण्ठयोगे मोक्षोऽप्यनाकाङ्क्षित एव नूनम्॥ १८।४६

Rarest Archive

अत्र 'न प्राग्व्ययुङ्क्त न वियोक्ष्यति नो वियुङ्क्ते' इति समस्यापूर्तिकरणेन रुक्मिण्याः अनाद्यनन्तकालं सुमङ्गलीत्वं चित्रितम्। विदर्भनगराद् बहिः कृताधिवासं कृष्णं दृष्ट्वा पौराणामियं प्रार्थना —

श्रीरेव सा भीष्मसुता मनोज्ञा श्रीवल्लभोऽयं सुभगाग्रगण्यः।
"एतौ समेतौ भवतां" इतीमे धातारमात्मेष्टदमर्थयन्ते॥ (१४।६०)

नागरिकैः भीष्मसुतायाः मनोज्ञत्वमभिहितम्। 'एतौ समेतौ भवतां' इति तेषां धातारं प्रति अभ्यर्थनया तयोः जनप्रियत्वं चित्रितम्। कुलदेवयात्रायां च कृष्णदर्शने रुक्मिणीचित्रणमिदम् —

अलसविलसदक्षिस्तम्भितान्याक्षवृत्तिः
जलजकुलजगन्धस्पर्धिसौरभ्यसान्द्रा।
वदनमदनशस्त्रागण्यलावण्यचित्रा
गजगतिरजतातं भीष्मपुत्र्यैक्षतैनम्॥ (१४।६७)

अत्र अलसपदेन, श्रीकृष्णदर्शनेन लज्जावशात् निवृत्तिरभिहिता। विलसदिति पुनस्तदवलोकने प्रवृत्तिर्निरूपिता। एतादृशेन अक्षिविलासेन अन्येषां मोहः सञ्जातः। अनेन विलासातिशयः चित्रितः। जलजकुलजगन्धस्पर्धिसौरभ्यसान्द्रतया रुक्मिण्याः पद्मिनीजातित्वं सूचितम्। वदनमेव मदनशस्त्रं- (अरविन्दं) इति अगण्यलावण्यं वर्णितं। गजगतिः इति कृष्णागमने प्रत्याशया रुक्मिणीकृतं अतिमन्दगमनं सूचितम्।

स्मरः तदा तद्दृष्टिजन्मा सकलान् तान् नृपालान् मूर्छावशानकार्षीदिति

Rarest Archiver

तस्याः सौन्दर्यातिशयः प्रकारान्तरेणापि कविनाऽत्र चित्रितः।
इयं च देवी श्रीकृष्णस्य नित्यावियोगिनी सम्व्यापिनी चास्ति —

नैनां संसदि सन्त्यजेन्न रहसि स्वैरावतारेषु वा
स्नानाभ्यञ्जनभोजनादिविविधक्रीडासु वाऽस्यै दिशेत्।
स्वाङ्गाश्लेषसुखं, विभूषणगतं बिम्बोष्ठजं चामृतं
वंशाद्याश्रितं एतया विरहितं देशं परं सन्त्यजेत् ॥(१५।३१)

विवाहनिश्चयकाले "जात्वपि कन्यामिमां न त्यजेद्धरः" इति कन्यापक्षीयैः प्रोक्ते वरपक्षीयानामुत्तरमेतत्पद्यम्। अत्र हि देशतः कालतश्च रुक्मिण्याः सम्व्याप्तत्वं वर्णितम्। रामाद्यवतारेषु सीतादिरूपेण अवतरितत्वात् स्नानादिपूजास्वीकारे लक्ष्मीसहितत्वात्, विभूषणानां श्रीरूपत्वात् श्रीकृष्णरुक्मिण्योः वियोगकथैव वृथाऽस्ति।

स्त्रीणां विभूषणकरी लज्जा रुक्मिण्यां साधु चित्रितम् —
"आकण्ठमापादतलान्मुरारेः नेत्रान्तनीलोत्पलचारुमालाम्" (१६।३८)
इत्यत्र लज्जावशादेव मुखादर्शनात् पादमारभ्यकण्ठपर्यन्तं दर्शनात् नेत्रान्ताख्यनीलोत्पलमाला सम्भूत। विवाहानन्तरं एकान्ते तस्याः लज्जाभावोऽपि वर्णितः।(१) सुरतरुसाम्येन अपि रुक्मिणी चारुतरं चित्रिता —

स्वर्णाङ्गी वरनीलरत्नसदृशापाङ्गी प्रवालोल्लस-
त्पादा या स्मितमौक्तिका मरकतस्कन्धाग्रनीलाजटा।

---

(१) तद्योग्यामृतसाधनाधरभुवा सन्तर्पयामास तम्। १६।४८

Rarest Archiver

वैडूर्याग्र्यनखा नखक्षतलसन्माणिक्यपुष्पोष्ठस-

ङ्गोमेदा रदवज्ररुक्, सुरतरुं नास्यै ददौ श्रीपतिः ॥(१९।५)

पारिजातवृक्षः सुवर्णात्मकः। तस्य नीलरत्नात्मकानि पर्णाणि, प्रवाल-रूपमूलप्रदेशः, मुक्तात्मकानि कुड्मलानि, मरकतस्कन्धाः स च सुरतरुः वैडूर्यमाणिक्यगोमेदोपेता। इयं रुक्मिणी तादृशी एवेति श्रीहरिः सुरतरुं अस्यै न ददौ किन्तु सत्यभामायै। एवं काव्य-नायिका रुक्मिणीदेवी लावण्यमयी मङ्गलदेवता पतिव्रता चेति चित्रिता।

कंसः – कंसः भोजराजः काव्यस्यास्य प्रतिनायकः। यद्यपि बहुवारं पराजयः युद्धसन्नाहाश्च बार्हद्रथस्य जरासन्धस्यैव अस्मिन् काव्ये वर्णितौ तथापि कंसस्यैव कृष्णेनोच्छेद्यतया (१) चित्रितत्वात् कृष्णमातुलः कंस एवास्मिन् रु.वि. महाकाव्ये प्रतिनायकप्रासादाधिरोहिणीमाधिरोढुमर्हतीति प्रतिभाति। कंसवधार्थमेव जातत्वात् कृष्णस्य, जरासन्धस्य च कंसार्थं हि युद्धसन्नद्धत्वात् कंसस्य प्रतिनायकत्वं युक्तम्। कंसस्यापकर्षः सम्यगुत्कर्षं प्रापितः श्रीवादिराजतीर्थस्य वर्णनप्रणाल्या। कंसो जन्मत एव दुष्टः, असुरसञ्चये वरिष्ठः। दशमे सर्गे नारदर्षिः कंसमभ्येत्य कौशलेन कंसकृष्णयोः निन्दास्तुती विदधाति– 'हे कंस वराकोऽयमुग्रसेनः न तव पिता' इति (२)

---

(१) अन्यायवांस्तदुच्छेद्यः उद्धतः प्रतिनायकः–श्रीकृष्णकविः मन्दारमरन्दचम्पूः ८।२६

(२) पिता न सोऽयं तव भोजराजः त्वमङ्ग मायामयजारजातः। १०।१६

पूतनाशकटादयः सर्वेऽपि कंसेनैव प्रेषिताः श्रीकृष्णवधार्थं किन्तु यमालयं प्रापिताः कृष्णेन । श्रीकृष्णभयाभिभूतः कंसः येन केनापि प्रकारेण कृतप्रयत्नः विफलश्च । धनुरुत्सवे रामकृष्णौ आनाय्य मारयितुं कुवलयापीडेन दन्तिना चाणूरमुष्टिकाभ्यां मल्लाभ्यां महता बलेन च सन्नद्धोऽभूत् । श्रीकृष्णं मथुरां नेतुं आगतः कंसप्रेषितः अक्रूरोऽपि कृष्णं वक्ति —

कंसः सम्प्रति कार्मुकोत्सवकथाव्याजेन ते विप्रियं
कर्तुं वाञ्छति तेन मातुलमहं सार्थं विधातुं भवान् ।
गत्वा तत्र विभुर्धुनोतु सबलं शत्रुं पुनः प्रस्फुरद्-
भ्रूचापेत्सवमारचय्य भजताभाधिं समाधिप्रियः ॥(१०/२१)

कंसः अधुना धनुरुत्सवच्छलेन कृष्णस्य विप्रियं (विशेषेण प्रियं, विगतप्रियं) कर्तुमिच्छतीति कंसप्रेषितः एवाक्रूरः वक्ति । अनेन व्यापारेण च कंसस्य लोकाप्रियता व्यक्ता ।

एकादशे सर्गे कंस-भयोच्चययोः[1] संवादे च कंसस्य नैजं हार्दं स्वरूपं प्रकटितम् । कंसस्य उद्धतत्वमत्र चित्रितम्-

भयं प्रति कंसः — कस्त्वम् ?

भयं — सोऽहमरे त्वदन्तकतराद्भ्यागतो वै भटः ।
कंसः - पृथ्व्यां क्वास्ति ममान्तकः ?
भयं - स भुवनेष्वन्तर्बहिर्वर्तते । (११/१८)

---

(१) चापभञ्जनात् कृष्णाद्भीतः कंसः । कृष्णविषयकः भयोच्चयः कविना कंसं प्रति कृष्णप्रेषितदूतत्वेन वर्णितः ।

Rarest Archiver

कंसः - मल्लाः शैलसमाः बलं च जगति प्रख्यातमेवास्ति मे
हस्ती हस्तिसहस्रसम्मितबलः तत्क्वास्ति मृत्युर्मम। (११।१९)

एवं स्वकीयैः बलमल्लहस्त्यादिभिः गर्वितोऽपि कृष्णभयेन निद्रामपि नैव प्राप्तवान् -

इत्थं साध्वससन्दिग्धबुद्धिर्निद्रां न सोऽध्यगात्।
लब्धनिद्रोऽपि दुःस्वप्नैः स्पर्धोन्नद्धो व्यबोध्यत॥ (११।२८)

कृष्णाद् भीतत्वं कंसपात्रस्य प्रधानं लक्षणम्। तदस्मिन् दशश्लोकात्मके (१०।१८-२७) कंसभटयोः संवादे स्पष्टं चित्रितम्। चाणूरमुष्टिकयोश्च मल्लयोः पराजये नाशे सति कंसो हताशो भूत्वा आक्रोशति। तदाक्रोशेनापि कंसस्य कृष्णनिर्जितत्वं स्पष्टम्।(१) पश्चाच्च पापमिव उत्पतन्तं तं कंसं कृष्णः विस्तृतकचं कृत्वा भूमौ निपात्य चकर्ष। बालेन कृष्णेन हतः सः कंसः मुखं दर्शयितुं सलज्ज इव अन्धं तम एवागमत्। कंसोऽयं निजवंशपांसनकृतिः इति वर्णितः। अयोग्यराजस्वरूपमेतत् -

सर्वेशे भुवि यस्य भक्तिरमला नैवैतदाज्ञात्मके
धर्मे वा न रतिः तदाश्रितजने सन्मानलेशोऽपि वा।
दुष्टप्रीतिरतस्य निष्ठुरगिरः दुर्मन्त्रदत्तश्रुतेः
साम्राज्यं निजवंशपांसनकृतेः कंसस्य संसारवत्॥ (१२।७७)

---

(१) कृष्णं मन्नगराद् बहिष्कुरुत तत्पक्षैः समं मद्भटा नन्दं मारयताशु मर्दयत तं हीनोग्रसेनं भुवि। कंसेनेत्थमुदीरिते .... ११।५०

अत्र दुष्टराजानां लक्षणानि दुष्टप्रीतिरतत्वं, निष्ठुरवचनत्वं दुर्मन्त्रादत्तश्रुतित्वं इत्यादीनि कंसनिष्ठत्वेनैव स्पष्टीकृतानि। कंसशरीरे च सज्जीवस्यापि प्रवेशः वर्णितः। अत एव कंसस्य मोक्षो नाम कंसशरीरगतसज्जीवस्यैव।(१) श्रीकृष्णेन हतः कंसः अन्धं तमः प्राप ; तद्गतः सज्जीवस्तु श्रीविष्णोः धाम जगाम इति वर्णितं वर्तते —

कंसोऽन्तर्भृतगर्वपर्वतवरः पोतस्य घाताहतो
वक्त्रं दर्शयितुं सुलज्जित इव प्रापोग्रमन्धं तमः।
अन्यः श्रीरमणस्य धाम सुमहस्तोमं जगाम, द्विषा
मुक्तं मां हरिरग्रहीत्करुणयेत्याशा०प०भ०योत्सवः ॥(११।६२)

कृष्णद्विषा कंसेन मुक्तमपि सज्जीवं हरिरग्रहीदिति हरेः कारुण्यमप्यत्र चित्रितम्।

जरासन्धः — अयं मगधाधिपतिः बार्हद्रथः कंसस्य श्वशुरः। जामातृवधं श्रुत्वा मदान्धो भूत्वा कृष्णं संहर्तुमनाः मधुरां जगाम। शिशुपालस्य परमसुहृदयं बहुवारं कृष्णोपरि आक्रमणं कृत्वा निर्जितोऽभूत्। महासैन्यसागरमेव संसाधयित्वा मधुरां समागतः मागधः श्रीकृष्णस्य भूभारहरस्य सहायकारी इति कविश्चित्रयति– "अनेकदेशाश्रितभूमिभारहरस्य सारथ्यकृतः अच्युतस्य" (१३।२९) इति। तदा जरासन्धभयाच्च भगवत्पुरीं

(१) कंसादिमोक्षवचनान्यपि मुक्तियुक्तमानान्तरोदितमनो मधुरार्थभाञ्जि ॥ २।५२

मथुरां कुन्तैः कुठारैः कुद्दालैश्च बभञ्जुः - वादिनः कुतर्कैः आद्यां उपनिषद्विद्यामिव इति उपमया जरासन्धस्य भगवद्द्वेषिणां अग्रणीत्वं चित्रितम्। युद्धे च बलभद्रेण गृहीतो ह्यासीदयं मागधः, तस्य वाजिसारथिरथाश्च चूर्णिताः, किन्तु प्रभोः कृष्णस्य वाचा तं मुमोच हली।(१) श्रीहरिरपि मागधं नावधीत्, मागधत्वादेव - स्तुतिपाठकत्वात् -

यो मागधस्य साधर्म्यं आपन्नानपि नावधीत्।
स मागधवधं हीनं मेने वीरशिरोमणिः॥ (१४।३०)

इत्थं सः कृष्णेन बहुवारं पराभवं प्रापितः।(२)

<u>अक्रूरः</u> — श्वफल्कगान्दिनीनन्दनोऽयमक्रूरः कंसदूततया गोकुलमागतः श्रीकृष्णभक्तः। मथुरातः तदागमनकालीन-वर्णनेनैव तत्स्वभावः चित्रितो भवति —

इतीरयित्वाब्जजनेः स्तुते गते व्यदृश्यतारिप्रहितः श्वफल्कजः।
मृगाधिपग्रस्तविमुक्तवीक्षितस्ववर्गहृष्यन्मृगशावविभ्रमः॥ (१०।२२)

मृगाधिपेन ग्रस्तः, दैवात् विमुक्तः, ततः स्ववर्गस्य दर्शनं प्राप्तः मृगः - नहि नहि, मृगशावः, तस्य विभ्रमः अस्य <u>अक्रूरस्य आसीत्। अनेन हि तदवस्थाविशेषः मनोभावना च</u>

(१) रामश्चूर्णितवाजिसारथिरथं कृत्वा जरासंहित-
प्रायं मागधमागृहीतमपि तं वाचा मुमोच प्रभोः। १४।१६

(२) स इत्थमाजौ बहुवारमेनं विजित्य बार्हद्रथमुग्रसेनम्। १४।३१

Rarest Archive

सम्यक् चित्रिते। गोकुले च गोदोहनकर्माणि स्थितं तं गोविन्दं सन्दृश्य अमन्दानन्दसन्दोहतुन्दिलितहृन्मन्दिरोऽभूत्- अयमत्र अस्य आनन्दसम्भ्रमः -

ननाम नारायणमादिपूरुषं ननर्त नव्योत्सवजातसम्भ्रमः।

ननाद नानादुरितौघमर्दयन् ननन्द नन्दस्य तपःफलोदयम्॥(१०।२४)

श्रीकृष्णस्य दर्शनेन नमनं नर्तनं नन्दनं नादः इत्येते युगपदेव सञ्जाताः अक्रूरस्य। अत एवास्य अक्रूरस्य, तेन मथुरां नीयमानः श्रीहरिः मार्गे यमुनाम्बुमध्ये स्वीयं लोकविचित्रं रूपं प्रदर्शितवान् -

पुण्यक्षेत्रनिवासिनां सुविमलज्ञानानुरक्तात्मनां

पारम्पर्यसमागतं प्रभुमपि श्रीकृष्णपक्षाप्रियम्।

दूरेणोत्सृजतां सुशान्तमनसां तीर्थाटनं कुर्वतां

वेद्यं हृद्यमपश्यदम्बुनि हरेः रूपं श्वफल्कात्मजः॥(१०।४८)

अत्र हि अक्रूरे पुण्यक्षेत्रनिवासित्वं, विमलज्ञानानुरक्तत्वं, कृष्णद्वेषिराजस्य त्यागः, सुशान्तमनस्कत्वं तीर्थाटनकारित्वं च इतीमे गुणाः भक्तोचिताः सम्यक् चित्रिताः। अत एव कविः अक्रूरस्यैव भगवद्भक्तत्वं प्रतिपादयति -

भक्तो नाम स एव यः करगते कृष्णेऽपि वेदोदितं

तत्कर्माचरत् (१०।४९) इति। करगतकृष्णत्वेऽपि भगवत्सम्बन्धि वेदोक्तं कर्म कृतवानक्रूरः इति भक्तेर्निश्चलता।

Rarest Archiver

मथुरानगरीप्राप्तौ च श्रीकृष्णः नगराद् बहिरेव तिष्ठन् पुरतो गन्तुं अक्रूरं आज्ञापितवान्। एतावत्कालपर्यन्तं श्रीकृष्णसन्निधानसन्तुष्टः अक्रूरः अधुना तत्सङ्गमविच्छेद-भयात् अतीव निर्विण्णः सञ्जातः। पुत्रकलत्रादिविषये वैराग्यं प्राप्तः सः अक्रूरः संसारासारासिन्धोः पारं गन्तुं हरिपादपोतं प्रार्थयते।(1) लौकिकविषयकवैराग्यभाग्यं प्रार्थयते।(2) सर्वदा भगवद्भक्तिः मनसि भूयादिति तं याचते।(3) तन्नाम सङ्कीर्तनं प्रशंसति च।(4)

स्वामिन् विट्ठलसज्जनश्वशुरतः प्राप्तां दिगन्ताम्बरां
उत्क्रान्तावपि योगिनीं मननसज्ज्ञानादिभिर्भूषिताम्।
मोक्षापत्यवतीं विरक्तिरमणीं संक्लिश्यतोऽहर्निशं
कालो गच्छतु नान्यथा कुरु तदा कामो यदालम्बते ॥(10।80)

अत्र खलु अक्रूरस्य नितरां द्रुतचित्तत्वं अभिव्यक्तोऽस्ति। कवेरपि भगवद्भक्तिः विरक्त्यासक्तिः अत्र प्रकटिते भवतः। अक्रूरः अन्ततः कृष्णं प्रति वदति —

स्वान्तं तदेव यत्तेऽङ्घ्रिकमले चञ्चरीकति।
स्वान्तकारीतरन्मन्ये भ्रमद्भुजगसन्निभम् ॥(10।82)

भगवत्पादारविन्दानुरागाभावे स्वान्तं स्वस्य अन्तकमेव भवतीति अक्रूरस्य दृढा मनीषा। एवमक्रूरः ज्ञानभक्तिवैराग्यसम्पन्नत्वेन चित्रितः।

(1) र.वि. 10।75 (2) 10।77 (3) 10।80 (4) 10।81

Rarest Archiver

उद्धवः – रु॰ वि॰ काव्ये उद्धवोऽपि श्रीकृष्णभक्तत्वेन तत्सन्देशवाहकत्वेन च चित्रितोऽस्ति। अयं च वासुदेवस्य पितृव्यपुत्रः। श्रीकृष्णस्य सन्देशामृतं मथुरातः गोकुलं प्रति आनीतवानुद्धवः कृष्णादेशानुसारम्। गोकुलागमने च श्रीकृष्णविरहासहिष्णुरयं मार्गे तद्दुःखं तदीयसन्देशैः दूरीकृतवान्। श्रीकृष्णं संस्मरन्, श्रमं विस्मरंश्च वर्त्मनि ययौ अथमुद्धवः।–

स च प्रियायोगसमुत्थसाध्वसं तदीयसन्देशवरैर्विदूरयन्।
प्रपन्नवात्सल्यमदो मधुद्विषः स्मरन्, श्रमं वर्त्मनि विस्मरन् ययौ॥(१३।२)

अत्र साधनभक्तेरङ्गभूतं गुणानुस्मरणं उद्धवस्य चित्रितम्।(1) गोकुलप्रवेशे च धृतवेणून् गोपान्निरीक्ष्य, कृष्णस्य शैशवविलासमनुस्मरन्सः मोदाम्बुपूर्णनयनः पुलकाङ्कितोऽभूत (१३।६) कृष्णसदृशसन्दर्शनेनापि आनन्दाश्रुपुलकाः सञ्जायन्ते तस्य भक्तस्य उद्धवस्य। तं च कृष्णभृत्यं कृष्णभुक्तभूषणमाल्यधरं निरीक्ष्य गोकुले गावः सर्वाः एनं श्रीकृष्णाधियाऽवलोक्य उद्धवमनोऽभ्युदयं वितेनुः। अथमुद्धवः स्वयं नन्दस्य गृहं प्रविशन् तन्मनांसि अपि उद्धवं ततान। नन्दादिषु हरेः कृपां वर्णयन् तान् आनन्दसमेतान् चकार प्रियोक्तिभिः। नन्द-यशोदाभ्यां, 'हरेः वियोगवार्तां उत्सृज्य परब्रह्मधिया भजध्वं' इति वदन् उद्धवः स्वस्य भगवत्तत्वज्ञानमपि

(1) ध्यानं रूपगुणक्रीडादिः सुष्ठु चिन्तनम्। ह॰ भ॰ र॰ सि॰ पूर्वविभाग २।२३

स्पष्टीकृतवान् । गोपाङ्गनाश्च उद्धवं वीक्ष्य सलज्जाः सक्रोशाश्च सत्यः भृङ्गमेकं लक्षीकृत्य श्लिष्टोक्त्या तं ऊचुः - मधुप, दूरं याहीति (७।२९) ताः प्रियोक्तिभिः प्रीणयित्वा सः मथुरां यातः । इत्थमुद्धवः श्रीकृष्णप्रेमपात्र सन्देशवाहकतया रु.वि. काव्ये चित्रितः ।

उग्रसेन-नन्द-वसुदेव-यशोदा-देवकीमुख्याः अपि कृष्णभक्ततया तत्प्रीत्यास्पदतया च वर्णिताः । शिशुपाल-कालयवनौ च कंसपक्षीयौ श्रीकृष्णेन हतौ । शिशुपाले जीवद्वयावेशः उक्तः ।[1] कालयवनः मुकुन्देन, मुचुकुन्दनयनाग्निना भस्मीकृतः ।[2]

गोपाङ्गनाः - गोपस्त्रियः श्रीकृष्णचरित्रे विशिष्टं स्थानं भजन्ते । रु. वि. काव्ये च इमाः श्रीकृष्णप्रियात्वेन, प्रियकृष्णेन, वाक्कौशलवत्त्वेन ज्ञानित्वेन च वर्णिताः । गोकुले श्रीकृष्णदोलान्दोलने ताः एवं प्रशंसिताः कविना -

लोलत्कङ्कणपाणिपद्मधृतया नीलोच्चलत्कुन्तला
बालाः स्रस्तदुकूलहारवलयाः मौलिस्खलन्मल्लिकाः ।
लोलाङ्ग्यः क्वणदङ्घ्रिभूषणगणाः ईषच्चलत्कुण्डलाः
व्यालोलं सह दोलया मृगदृशः कृत्वोपनिन्युः प्रियम् ॥ (३।१४)

अत्र बाल्ये एव तं व्यालोलं कृत्वा प्रियं विहितवत्य इति

---

(१) (तथापि) चैद्ये जयनामकः सन् तथा परस्मिन् विजयाभिधानः ।
निरन्तरद्वेषफलस्य मूलं बलेन रक्षोऽपि हि तर्हि सिध्येत् ॥ २।५६

(२) प्रदास नयनाग्निना यवनकाननं भूपतेः । १४।३७

तासां विलासेन वर्णितम्।

तृतीये सर्गे यशोदां प्रति कृष्णस्य क्षीरदधिनवनीत-चौर्याद्यपराधनिवेदने गोपीनां भूतभविष्यद्दशातत्त्वं सूचितम्—

मन्त्रात्मा स कवाटमाशु विवृतं कर्तुं समर्थो, वृथा
बन्धं नित्यविमुक्तिदः रचयितुं, विश्वम्भरोऽयं जगत्।
वक्त्रे दर्शयितुं, कठोरवचसां विस्मापनं, कर्हिचित्
वृक्षः पाटयितुं च तद्विटपिनो किं देवि कुर्मो वयम्॥(३।५८)

हे यशोदे अयं तव पुत्रः मन्त्रसिद्धः कवाटं आशु विवृतं कर्तुं समर्थः।(१) बन्धविध्वंसनेऽपि शक्तः।(२) कठोरवचसां अस्माकं आश्चर्यं जगत् मुखतो दर्शयति।(३) कुत्रापि वृक्षस्थेन अयं तद्विटपि विपाटनेऽतिपटुर्वर्तते। देवि, किं कुर्मो वयम्? अत्र हि वसुदेवकारागारकवाटपाटनं, कंसकृतनिगडस्य मोचनं, करिष्यमाणं च मातुः स्वमुखे विश्वदर्शनं, अर्जुन-वृक्षपाटनं च- इत्येतानि गोपीनां ज्ञातानि इति चिन्तितम्।

षष्ठे सर्गे, मुरलीनिनादाकृष्टाः गोप्यः श्रीकृष्णं प्रति स्वस्वगृहकृत्यानि परित्यज्य गच्छन्ति। तदा तासां वाग्वैखरी प्रदर्शिता। आगताः आगताः ताः गोपाङ्गनाः वीक्ष्य कृष्णः

---

(१) अत एवायं मन्त्रात्मा। मन्त्रसिद्धो हि कवाटार्गलादिकं छिनत्ति।
(२) अत एवायं नित्यविमुक्तिदः
(३) अत एव विश्वम्भरः श्रीहरिः

Rarest Archive

वक्ति — पितृभर्तृजनन्यादीनां सेवार्थं व्रजमेव गन्तव्यं ताभिः इति।[1] गोप्यस्तदा कृष्णं वदन्ति —

यदीश तेषां हितमेव कार्यं तदाङ्गनाज्ञापय गन्तुमस्मान्।
वियोगदग्धैः बत नः शरीरैः महीं नतां प्रेतमहीं विधेहि॥(६।५६)

श्रीकृष्णं परित्यज्य पुनर्गोकुलगमने तत्प्रेतभूमिर्भवतीति तासां श्रीकृष्णाकृष्टत्वं वाक्कुशलत्वं च ध्वनिते।

ताश्च गोप्यः "कान्त"पदस्य निर्वचनं कुर्वन्ति —

कान्त स एव यः स्थैर्यशौर्यसौन्दर्यसागरः।
सुखस्यान्तकरं कान्तं अपरं तर्कयामहे॥(६।६०)

अत्र सौन्दर्यादिशाली एव कान्तः भवति अन्यस्तु 'कस्य सुखस्य अन्तः यस्मात्सः' इति सुखनाशकारी इति वाक्कौशलं प्रदर्शितम्।

कृष्णप्रीतिपात्रत्वं च तासां तद्गृहस्थदुग्धादिचौर्येण, महारासविलासेन, मथुरातः उद्धवेन प्रेषितेन सन्देशेन च सविस्तरं वर्णितं वर्तते। रासोत्सवे च तासां सङ्गीताद्यभिज्ञता अपि स्फुटीकृता वर्तते। इत्थं कवि-श्रीवादिराजः काव्येऽस्मिन् स्वस्ववैचित्र्योपेतपात्रचरित्रचित्रणे नितरां सफलोऽस्ति।

— x —

---

(1) पितृभर्तृजनन्यादेः परिचर्या यतोऽर्थदा।
व्रजत व्रजमेवातः कुरुत स्मरतां हितम्॥ ६।५५

Rarest Archiver

सप्तमोऽध्यायः रसाभिव्यक्तिः

रसास्वाद एव काव्यानन्दस्य प्रधानं स्वरूपम्। अलङ्कारा अपि रसपोषणार्थमेव प्रयोक्तव्या भवन्ति। चमत्कृतिमात्रजनने प्रयुक्ता अलङ्कारास्तु कवेर्वैदग्ध्यप्रदर्शका भवेयुः। सद्यःपरनिर्वृतिः खलु रसास्वादात्मिका भवति। अत एव काव्येषु रसपोषणे कविभिर्दत्तावधानैर्भावितव्यम्। विश्वनाथस्तु "वाक्यं रसात्मकं काव्य"मिति काव्यं लक्षितवान्(1)। रसं विना काव्यस्य महत्त्वं नास्ति। एवं समस्तेषु काव्याङ्गेषु रसस्य सर्वोत्कृष्टता वर्तते। सहृदयानां हृदयस्थः रत्यादिः स्थायिभावः विभावानुभावसञ्चारिभावैः रसत्वं प्राप्नोति(2)। स्थायी भावो नाम अविच्छिन्नप्रवाहः चित्तवृत्तिविशेषः यथा ललनादिविषयकरत्यादिः। विभावश्च द्विविधः। आलम्बनविभावः उद्दीपनविभावश्चेति। यान् खलु अवलम्ब्य रत्यादीनामाविर्भावो भवति ते ललनादयः आलम्बनविभावाः। प्रादुर्भूते च स्थायिभावे तत्परिपोषकाः चन्द्रोदयादयः उद्दीपनविभावाः। रत्यादिजन्याश्च कायिकवाचिकमानसिकभेदाभिन्नाः कटाक्षप्रभृतयः अनुभावा इति निगद्यन्ते। स्थायिभावोल्लिखितकार्यस्य जनने प्रतीतौ वा सहायभूताः निर्वेदादयः व्यभिचारिभावा इति व्यपदिश्यन्ते।

---

(1) सा.द. 1/3

(2) विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम्॥ तत्रैव 3।1

Rarest Archiver

काव्ये च एक एव रसः प्रधानो वर्तते, अन्ये च तस्य अङ्गानि भवन्ति[1]। श्रीकृष्णस्य रुक्मिणीशता प्रतिपादके ह्यस्मिन् रुक्मिणीशविजयमहाकाव्ये शृङ्गारः प्रधानो रसोऽस्ति। वीरादयः तदङ्गतया संशोभन्ते।

शृङ्गाररसः — शृङ्गाररसस्य पोषणं रु.वि. महाकाव्ये लोकविलक्षणतया कृतं वर्तते। जगत्पित्रोः कृष्णरुक्मिण्योः शृङ्गारवर्णने कविना शृङ्गारस्य 'शुचिः' इति सञ्ज्ञान्तरं सार्थकीकृतम्। अश्लीलगन्धमपि यथा न भवेत् तथाऽत्र प्रतिपादनेन कवेः चातुर्यमपि चरितार्थं सञ्जातम्। अतिरञ्जितं अन्तःपुरीयं विलासवर्णनं नैवात्रोपलभ्यते। श्रीकृष्णविषयकभक्तिभावनिरन्तरेऽस्मिन् काव्ये भव्यं शृङ्गारं वयं पश्यामः। श्रीमन्नारायणनिर्विशेषे श्रीकृष्णे लोकविडम्बनेन लोकशिक्षणार्थं कृतावतारे मानवमात्रगुणानामपि अभिव्यक्तिः नासम्भवनीया भवति। शृङ्गारलक्षणं विश्वनाथेनोक्तमेवं —

शृङ्गं हि मन्मथोद्भेदः तदागमनहेतुकः।
उत्तमप्रकृतिः प्रायः रसः शृङ्गार उच्यते॥[2]

अस्य च शृङ्गाररसस्य प्रेमालापाः चन्द्रादयश्चोद्दीपनविभावाः। भ्रूभङ्गादयश्चानुभावाः। रतिश्च स्थायी भावः।

(१) शृङ्गारवीरशान्तानां एकोऽङ्गी रस इष्यते।
अङ्गानि सर्वेऽपि रसाः ... सा.द. ६/३१७

(२) सा.द. ३/१८३

रु.वि.काव्ये शृङ्गाररसस्य विप्रलम्भसम्भोगयोः द्वयोरपि भेदयोः सविस्तरं चित्रणं वर्तते। अस्मिन् काव्ये तत्र तत्र शृङ्गाररसस्य विलक्षणोऽनुभवः सञ्जायते सहृदयानाम्।

विप्रलम्भशृङ्गारः – षष्ठे सर्गे शृङ्गारोद्दीपकानां चन्द्रोदय-वृन्दावनादीनां वर्णनं वर्तते। वृन्दावने च मन्दानिल-पिक-गानादीनामपि वर्णनं कृतम्। वेणुनिनादमाधुरी च अत्रैव विस्तारिता। एतैः उद्दीपनविभावैः व्याकीर्णकामाः गोप्यः स्वगृहकृत्यमपि त्यक्त्वा श्रीकृष्णं प्रति जग्मुः[1] तत्र च गोपीनां वाग्वैखरीं निरीक्ष्य प्रीत इव श्रीकृष्णः प्रियोक्ति-परिरम्भण-चुम्बनाद्यैः तासां मदनं प्रबोध्य, स्वस्य कामि-विदूरतां दर्शयन्निव तदा अदृश्यः समभूत्।

वाग्वैखरीमिव निरीक्ष्य स बल्लवीनां
प्रीतः प्रियोक्तिपरिरम्भण-चुम्बनाद्यैः।
सुप्तं प्रबोध्य मदनं समभूददृश्यः
सत्यां विधातुमिव कामिविदूरतां स्वाम्॥ (६।६४)

एवं श्रीकृष्णस्य तिरोधानेन प्रारभ्यते गोपीनां विप्रलम्भः।

(१) चन्द्रे जृम्भति तन्मुखच्छिवि मुहुर्मन्दानिले तद्वपु-
र्गन्धे वाति वियोगवह्निसचिवे तत्कोमलालापवत्।
वेणौ कूजति पञ्चबाणविशिखैः शाणाशितैस्ताडिता
मानिन्योऽपि ययुर्मनोभवपितुः श्रीयोषिधिं सन्निधिम्॥ ६।५१

Rarest Archiver

अस्मिंश्च विप्रलम्भे गोपीनां 'श्रीकृष्णः परमात्मा' इति ज्ञानं न कुत्रापि च्युतिं प्राप्नोति। तासां श्रीकृष्णमार्गणप्रकारः एवं वर्तते —

ताः पत्यपत्यभवनेषु विरक्तचित्ता श्रीपुण्डरीकनयनेक्षणकार्यसक्ताः।
आरण्यकेषु मुनिवर्ग इवातिमुग्धाश्चेरुर्विमृग्य बहुधा तमरण्यकेषु॥(६/६५)

मुनयः आरण्यकेषु भगवन्तं यथा मृगयन्ति तथा वृन्दावने ताः मुग्धाः श्रीकृष्णार्थं बहुधा चेरुः। अत एव ताः पति-अपत्यादिषु विरक्तचित्ता अभवन्। पूर्वं पञ्चमे सर्गे कात्यायनीपूजावर्णनावसरे गोपीनां कृष्णाभिलाषः व्यञ्जितोऽस्ति —

नेमुस्तां प्रणयापराधशमने नम्रोऽस्तु कृष्णास्त्विति
प्रेम्णा पुष्पमवेदयन् स कबरीं तैः सन्दधात्वित्यकम्।
धूपं मज्जनमारचय्य सह तद्धूमेन तां शोषयतु
आलिङ्ग्यातनुतादितीव तिलकं गन्धं च तस्यै ददुः॥(५/४७)

अत्र हि उत्प्रेक्षया तासां श्रीकृष्णविषयकः अभिलाषः सूचितः। तत्रैव चीरहरणप्रसङ्गे अभिलाषोपचयोऽपि वर्णितः —

ततः क्रमेणाङ्कुरिताङ्गजाताः निरीक्ष्य ताश्चञ्चललोचनान्ताः।
स्वसङ्गयोग्या इति तर्कयन्स ददौ मुदा तद्वसनानि मानी॥(५/५०)

चञ्चललोचनान्तानां तासां अङ्कुरिताङ्गजातत्वात् - समुत्पन्नकामत्वात् - कामजननीत्वात्, कामजनन्या श्रीकृष्णपत्नीत्वात् स्वसङ्गयोग्या इति कृष्णः तर्कितवान्। अत्रापि कृष्णदर्शनेन गोपीनां अभिलाषावस्था वर्णिता वर्तते।

सर्वाङ्गसुन्दरे कान्ते दृष्टे तस्मिन् स्पृहा अभिलाषः इति कथ्यते।[1] श्रीकृष्णं दृष्ट्वा, तेन तु व्रजं गन्तुं चोदिताः गोप्यः कथयन्ति — कान्तः स एव यः स्थैर्यशौर्यसौन्दर्यसागरः।

सुखस्यान्तकरं कान्तमपरं तर्कयामहे॥ (६।६०)

अत्र हि श्रीकृष्णस्य सौन्दर्यादिगुणाम्भोधित्वं निरूपितम्। श्रीकृष्णतिरोधानेन च ताः गोप्यः तं प्राप्तुं चिन्तावस्थां[2] समापन्नाः सत्यः वृन्दावने तं एवं जगुः —

समभुदितविमोहावस्थया क्वापि मुग्धाः
समुदितघनचिन्तावस्थया क्वापि शान्ताः।
वशयितुमिव कान्तं योगिपूगैकचिन्त्यं
मधुरवचनदक्षाः तं जगुस्ताः परोक्षम्॥ (६।६६)

अत्र कासाञ्चिद्गोपीनां उन्मादावस्था कासाञ्चनान्यासां चिन्तावस्था च चित्रिता। वृन्दावने निशीथे कृष्णदर्शनाय चरन्तीः वृक्षेषु पक्षिषु मृगेषु विचारयन्तीः ताः गोपाङ्गनाः अतीव मुग्धाः चेतनाचेतनज्ञानशून्याः सञ्जाताः। मुग्धावस्थां गता अपि ताः श्रुततत्त्वानां तत्त्वज्ञानिनां कान्तिभाजो ह्यासन्।[3]

---

(१) अभिलाषः स्पृहा तत्र कान्ते सर्वाङ्गसुन्दरे॥ दशरूपक ४/५३

(२) चिन्ता प्राप्त्युपायादिचिन्तनम्॥ सा॰ द॰ ३/१९१

(३) वृक्षेषु पक्षिषु मृगेषु विचारयन्तीः
प्रेक्ष्य प्रमुग्धहृदयाः श्रुततत्त्वकान्तीः। रु॰ वि॰ ७/५२

इदं च उन्मादावस्थावर्णनं (१) सविस्तरं वर्तते। अश्वत्थवृक्षं प्रेक्ष्य तन्मध्यस्थिताय हरये बल्लवीजनदशां ज्ञापयितुं प्रार्थयन्ते गोप्यः। जडे च तस्मिन् अदत्तोत्तरे विषादं प्राप्नुवन्ति —

न वदति बत सख्यो नः प्रियं विप्रियं वा
न दिशति फलमिष्टं स्वैरमाराधितोऽपि ।
हरिचरणविदूराः को नु सम्भाषयेन्नः
सुकृतमपि तदाज्ञारूपमापादयेत्किम् ॥(७/४)

अत्र हि गोपीनां मुग्धामुग्धत्वं प्रतिपादितम्। तरुत्वात् अश्वत्थः न वदतीति अज्ञानम्। हरिचरणविमुखानां पुण्यमपि न फलति इति विवेकः। जातिमालतीमल्लिकादिकुसुमैः उद्दीपिताः ताः गोपाङ्गनाः श्रीकृष्णेन योगं दातुं प्रत्युपकारत्वेन प्रार्थयन्ते, यतो हि ताभिः ताभ्यः मल्लिकादिभ्यः श्रीकृष्णेन योगः जन्मान्तरे दत्तं भवेत्।(२) वृन्दावने जाताभिः जातिमालत्यादिभिः उद्दीप्तकामाः व्रजसुन्दर्यः ताः लताः स्वासां वृन्दस्य अवनं कर्तुं, कन्दर्पबाणदलितं च नैव कर्तुं याचन्ते —

वृन्दावनं किल वनं भवदीयवासश्चान्द्रप्रमोदकरचारुकराभिरामम्।
कन्दर्पबाणदलितं बत यूयमासां वृन्दं वृथा कुरुत हा व्रजसुन्दरीणाम्॥(७/५)

---

(१) उन्मादश्चापरिच्छेदः चेतनाचेतनेष्वपि। सा.द. ३/१९१

(२) हे जाति मालति तुलस्यपि मल्लिकेऽस्य योगं समादिशत योगिजनप्रियस्य।
यर्ह्येकजन्मनि कदापि तदङ्घ्रिसङ्गो युष्मभ्यमाभिरबलाभिरदायि साध्व्यः॥(७/७)

अत्र चन्द्रस्य चारुचन्द्रिका, जाती, मालती, मल्लिका, कृष्णस्य प्रिया तुलसी च उद्दीपनविभावाः सम्यग्वर्णिताः ।

स्मृत्यवस्था - द्वेषो यत्रान्यकार्येषु तदेकाग्रं च मानसम् ।
श्वासैर्मनोरथैश्चापि चेष्टास्ताः स्मृतिरुच्यते ॥ सा.द.पृ. १७१

कार्यान्तरद्वेषात्मिका स्मृत्यवस्थापि गोपीनां इत्थं वर्णिता -

करोऽतिकार्यो दधिमन्थसङ्गमपि स्म कर्तुं यतते न तेन ।
त्वदङ्घ्रिजुष्टेरपरं मुरारे करोति काऽऽर्या उदधिमन्थसङ्ग ॥(८/११)

गोकुले श्रीकृष्णविरहदशायां दधिमन्थनमपि तासां कारः न करोति स्म । अत्र तु निशायां तदङ्घ्रिसेवां विना अन्यत्र तासां मनःप्रवृत्तिरेव नास्ति ।

गुणकथनावस्था - सौन्दर्यहासितालापैः नास्त्यन्यस्तत्समो युवा ।
इति वाणी भवेद्यत्र तदुक्तं गुणकीर्तनम् ॥ सा.द. पृ. १७१.

अनितरसाधारण्येन सौन्दर्यादिवर्णनं क्रियते चेत् गुणकीर्तनं भवति गोपीभिः कृतं कृष्णवर्णनमेतत् -

अयि रमण मुरारे सुन्दरीकान्त शौरे
नरकमथन कृष्ण प्रौढ वाराशिधिष्ण्य ।
करजितसुरवृक्ष अह्नकृतालीयशिक्ष
स्वकविजयसहाय ध्वस्तधर्मान्तराय ॥(७/५१)

अत्र हि श्रीकृष्णस्य अप्रतिमसौन्दर्यादिवर्णनेन तासां उत्कण्ठा निवेदिता ।

Rarest Archiver

उद्वेगावस्था - यस्मिन् रम्यमरम्यं वा न च हर्षाय जायते ।

प्रद्वेषः प्राणितव्येऽपि स उद्वेगोऽभिधीयते॥ सा.द. पृ.१७१

यत्र हि जीवितेऽपि आसक्तिः न स्यात्तदा उद्वेगः इति कथ्यते। कापि गोपी कथयति कृष्णं प्रति —

यदि निगमविदूरः त्वं नृणां दूरदूरो

हृदयकमलतः किं नाथ नापैषि तर्हि ।(७।४२)

श्रीकृष्ण यदि त्वं आगमविदूरः असि, तर्हि अस्माकं हृदयतोऽपि दूरं गच्छेति वदन्तीं काचिदन्या पृच्छति -

'तरुणि, तनुवियोगः सम्मतस्ते मनोज्ञे'

सा पुनर्वक्ति - 'प्रियपुरुषवियोगाद्दुस्सहं तं न मन्ये' (७/४२)

प्रलापावस्था(७) - प्रलापावस्थापन्नाः चित्तभ्रमेण अलक्ष्यवचांसि प्रयुञ्जते । रु.वि.महाकाव्ये च इयमप्यवस्था सप्तमे सर्गे वर्णिताऽस्ति । तद्विरहोत्कण्ठितास्ताः तं श्रीकृष्णं अदृष्ट्वा एव तं प्रति कथयन्ति -

समायतेयं न शरैः समायते समायते स्वेषु किलासमायते ।

समाय तेनाङ्ग नभः समाय ते स मा यतेर्वर्त्म भजासमायवते॥(८/१०)

अत्र हि 'हे असमाय ते यतेर्वर्त्म मा भजेति अलक्ष्यवाक् प्रयुक्ता इति प्रलापावस्था । इयं निशा समायता शरैः समा न अयते। हे असमायते - असदृशव्याप्तिविशिष्ट - भवान् स्वेषु समायते - समवदाचरति किल। सर्वत्र समाय ते नभः।

(७) अलक्ष्यवाक्प्रलापः स्यात् चेतसो भ्रमणाद् भृशम् ॥ सा.द. ३/१९२

Rarest Archiver

गोपीनां चित्तभ्रमेण प्रलापित्वेऽपि श्रीकृष्णविषये नैव भ्रमोऽस्तीति अयं विशेषः कवेः प्रतिपादनप्रणाल्याः।

अशोक एषोऽपरवेदनाज्ञः पदाहतेरेव परोपकर्ता।
न कार्यकारी शिथिलात्मनां नः ततोऽपरत्र प्रतियाम सख्यः॥(७/२४)

अशोकं वृक्षं दृष्ट्वा वृन्दावने व्रजाङ्गनाः वदन्ति यत् - 'अयं 'अशोकः' शोकानभिज्ञः पादप्रहारेणैव परोपकारी। वयं तु श्रीकृष्णवियोगेन शिथिलात्मानः। अतोऽनेनाशोकेन कार्यापेक्षणं न योग्यमिति। अत्र शिथिलात्मतोक्त्या जडता सूचिता भवति। इत्थं अत्र अभिलाषादयः कामदशाः चित्रिताः(1)।

सर्वत्र आसु दशासु श्रीकृष्णः आलम्बन-विभावः। वृन्दावने मन्दमारुत-ज्योत्स्ना-कुसुमादयः उद्दीपनविभावाः। उन्मादादयः सञ्चारिभावाः। प्रलापादयः अनुभावाः। एभिः विभाव-अनुभाव-सञ्चारिभावैः गोपीनां हृदयस्थः स्थायी भावः रतिः व्यक्तः विप्रलम्भशृङ्गारः इति निगद्यते।

अपि च, नयनप्रीतिः प्रथमं चित्तासङ्गः ततोऽथ सङ्कल्पः।
निद्राच्छेदस्तनुता विषयनिवृत्तिः त्रपानाशः।
उन्मादो मूर्छा मृतिः इत्येताः स्मरदशा दशैव स्युः॥

---

(1) अभिलाषश्चिन्ता स्मृतिगुणकथनोद्वेगसम्प्रलापश्च।
उन्मादोऽथ व्याधिः जडता मृतिरिति दशात्र कामदशाः॥ सा.द. ३/१९०

इत्युक्ताः कामदशा अपि स्पष्टमवलोक्यन्ते कविकाव्ये विप्रलम्भवर्णने।

चिन्तासङ्गः - कान्तोपमानेन दिवापि कुट्यां अन्तर्हितं कालभ-तेजसा यम्।
स्वान्ते बिभर्मीशि विनेह तं त्वां अन्तः हितं कालभतेऽज सायम्॥ (७/५६)

सङ्कल्पः - अन्या च तं हृदि निधाय निमीलिताक्षी
धन्या प्रियं पुलकशोभितसर्वगात्री।
सर्वाभिराभिरनुभूतमभुङ्क्त भोगं
किं नाम नास्ति मुनिमार्गजुषां हि लोके॥ (६/४४)

निद्रानाशः - स विधिरपि निदेशं तस्य नूनं विधत्ते
विरहदहनशान्तिं यन्न मूर्छा ददाति।
अपि निशि हृदयान्तः कृष्णसंश्लेषशङ्की
न दिशति च सुषुप्तिं हा हताः किं विधेयम्॥ (७/४७)

तनुता - त्वयि न वहति मानं न प्रगल्भेति कृष्णा
यदजनि तनुकार्श्यं दैन्यमन्तः क्षणेन।
न हि सखि मम दैन्यं दीननाथप्रयुक्तं
कृशतरनिखिलाङ्गाः किन्तु विश्लेषवह्नेः॥ (७/४३)

विषयद्वेषः - बत नतजनबन्धुं सान्द्रसौन्दर्यसिन्धुं
यदुनृपकुलसारं यच्छतोदारहारम्।
तदनु शिरसि युष्मान् धारयामः कृतेष्टाः
परमपदयुगाब्जे पूरयामः प्रहृष्टाः॥ (७/११)

जात्यादिकुसुमानि प्रति गोपीनामुक्तिरियम्। कृष्णप्राप्तेः अनन्तरमेव युष्मान् शिरसि धारयामः इत्युक्त्या अधुना तासां स्रगाद्यसहत्वं

Rarest Archiver

सूचितम्। अष्टमसर्गारम्भे च तासां मन्दानिलासहत्वमाभिहितम्।

त्रपानाशः – नयनगनलिनेषुं कान्तवक्त्रेन्दुकान्त्या

नवपदरविभासा नः कुचस्थोत्पलेषुम्।

शमय, सदय गाढालिङ्गनेनार्धगात्रीः

विरचय तव दासीः तेन कन्दर्पदर्पम् ॥(७/७०)

अत्र हि गौरवागणनया कृष्णप्रार्थनेन त्रपानाशः।

उन्मादः - अष्टमे सर्गे चेतनाचेतनापरिच्छेदवर्णनादुन्मादावस्था।

मूर्छा - इत्थं गिरा कापि तमर्चयन्ती यं तीव्रयोगैर्मुनयोऽगुरन्ते।

रन्तेति मत्वा गलितात्महारा हा रामकृष्णेत्यपतच्छुचार्ता ॥(७/६४)

मृतिः - मरणाभावेऽपि गोपीनां मरणापेक्षा प्रकटिताऽस्ति।

व्रजे महं तोषयितं विकुण्ठं भजेम चक्षुर्विषये त्वयीशे।

व्रजेम हन्त उषसि तं विकुण्ठं न चेत्त्वदीक्षोत्सवभङ्गहीनम् ॥(८/८)

त्वद्दर्शनालाभे उषसि वैकुण्ठं व्रजेम इति तनुत्यागः विवक्षितः।

गोपीनां तासां जीवितं मरणं च नापेक्षिते इति कविचमत्कारेण वक्ति -

कररुहपदभास्वद्गात्रविश्लेषभीत्या

न मृतिरनुमता नः कृष्ण तेऽदर्शनाच्च।

असुभृतिरपि तस्मात्सौम्य सौन्दर्यधामन्

अधिगहनमुभाभ्यां बद्धकण्ठा इव स्मः। (८/४१)

कृष्णकृतनखक्षतेन विलसन्तं देहं त्यक्तुं नापेक्षा, तददर्शनाच्च देहधारणेऽपि नापेक्षा, इति ताः वृन्दारण्ये उभयतः पाशबद्धा इवाभूवन्।

Rarest Archiver

गोपीनां विप्रलम्भः पुनरपि अक्रूरेण सार्धं श्रीकृष्णस्य मथुरा-गमनकाले वर्णितोऽस्ति । अयं च प्रयाणप्रयुक्तः विप्रलम्भः —

यियासुं त्वां समालोक्य नः प्राणोऽपि यियासति ।
युवयोरविनाभावं अक्षैरीक्षामहेऽधुना ॥ (७०/३६)

हरिर्यदि गच्छति तर्हि प्राणवायुरपि गच्छतीति गोपीभिः स्वासां कृष्णैकनिष्ठत्वं प्रदर्शितम् । अक्रूरेण कंसस्य धनुरुत्सवार्थं मथुरां प्रति नीयमानः आसीत् श्रीकृष्णः । तदा व्रजयोषितस्तु ताः कंसप्रकटितकार्मुकोत्सवे शराणां प्रथमतया लक्ष्यत्वं स्वासामेवाभूदिति विलपन्ति ।

किमु दुरितमकारि येन कंसप्रकटितकार्मुकसम्भ्रमे शराणाम् ।
विधिरकृतविवेकहीनः मृदुलकलेवरमस्मदीयमादौ ॥ (७०/३७)

स्वकीयेनैव जन्मान्तरपापपाकेन कृष्णवियोगोऽयमापन्नः इति ताः दुःखिता भवन्ति ।
कयाचिद्गोप्या श्रीकृष्णं स्वालयं आनेतुं प्रेषिता दूती श्रीकृष्णाय तस्याः गोप्याः विरहोत्कण्ठितायाः अवस्थां वर्णयति श्लोकद्वयेन ।
अस्मिंश्च श्लोकद्वये विप्रलम्भस्य अतीव हृदयसंवेद्यं चित्रणं महाकविना कृतमस्ति —

आर्यायाहि गृहं त्वया विरहितं सन्त्यज्य सा सत्वरा
द्वार्यास्ते न पुनर्विविशति तनुं त्वद्योगहीनामिव ।
चित्तं त्वच्चरणे निधाय विवशा चित्रार्पितेव प्रभो
नो चेत्तत्तनुशाखिना, इश, भवनं स्यादेव तत्काननम् ॥

Rarest Archiver

निर्यान्ती प्रविशन्त्यदो गृहमसौ प्रत्याक्षिपन्ती मम
प्रेमालापमपि श्वसन्त्युरुशुचा हस्ते निवेश्याननम्।
पश्यन्ती तव वर्त्म साश्रुनयना मां याचमाना मुहुः
मोहं क्वापि वहन्त्यसौ न सदयं कस्येश कुर्यान्मनः॥(९।४५,४६)

अत्र सा दूती व्रजसुन्दर्याः तस्याः कृष्णविरहप्रयुक्तां चिन्तां जडतां विषयद्वेषं तदैकलग्नत्वं शरीरत्यागसिद्धतामपि चारु चित्रयति ।

चतुर्दशे च सर्गे कृष्णाय रुक्मिणीप्रेषिते पत्रे रुक्मिण्याः विप्रलम्भशृङ्गारवर्णनं पुनरुपलभ्यते। अत्र खलु रुक्मिणी कृष्णं प्रति हार्दिकं प्रेम अविच्छिन्नां च प्रीतिं पत्रमुखेन प्रकटितवती शोभते।

धिक्कृत्याहमुमेशहंसगमनौ स्वर्गीश्वराग्नी भव-
त्सूक्तासक्तहृत् अङ्ग लोकमखिलं देवौघमान्यान्मुनीन्।
सन्ध्यास्नाध्वनि कोविदानपि बुधान् त्वय्येव यत्सस्पृहा
विश्वाधीश्वरतां भवद्म भवतः तान्नोक्षिनोमि प्रभो॥ (१४/४२)

रुक्मिण्या स्पष्टीकृतं साक्षिप्रामाण्येन यत् श्रीहरिरेव विश्वस्य अधीश्वर इति। यतो हि तस्या स्पृहा ब्रह्मरुद्रेन्द्राग्निप्रमुखान् देवान्, देवौघमान्यान् मुनीन् अन्यान् बुधांश्च धिक्कृत्य श्रीहरावेव वर्तते। नारदमुखात् श्रीकृष्णस्य वचनं वर्णनं च श्रुत्वा तस्मिन्नेवासक्तहृदया समभवत् रुक्मिणी।

Rarest Archiver

अत्र हि चिंतासक्त्यवस्था प्रदर्शिता । श्रीकृष्णः आलम्बनविभावः । नारदमुखेन तदुक्तिश्रवणं उद्दीपनविभावः । औत्सुक्यधृत्यादयः सञ्चारिभावाः । एभिश्च रुक्मिण्याः रतिः स्थायी भावः विप्रलम्भशृङ्गारतामाप्नोति ।

श्रीकृष्णेक्षणोत्कण्ठता रुक्मिण्याः इत्थं चित्रिताऽस्ति —

दिश असुनाथ ईक्षणं आश्रितायाः मुकुन्दसौन्दर्यसमुद्रसान्द्र ।
दिशासु नाथे क्षणं आश्रिताः याः तदीयभाग्यस्य न चेच्चरन्ती ॥(१४/५०)

श्रीकृष्णं आश्रितायाः तस्याः असुनाथः मुकुन्दः सौन्दर्यसमुद्रसान्द्रः ईक्षणं यदि न दिशति तर्हि सा तं हरिं क्षणमेव याः गोप्यः आश्रिताः अभवन् तासामेव भाग्यं - अल्पकालदर्शनं अपि - अपेक्ष्यते तया रुक्मिण्या दिक्षु दिक्षु चरन्त्या । यदि मुकुन्दः रुक्मिणीं द्वारकां न नेष्यति तर्हि तस्या शरीरत्यागः अपेक्षितः ।

नयेश मामन्यजनैरभोग्यां त्वदङ्घ्रियुग्मार्चनकर्मयोग्याम् ।
इमामवस्थामवधूय नो चेत् भवामि भूम्नो हृदयस्य योग्या ॥(१४/४९)

इमां रुक्मिण्यवस्थां परित्यज्य गुणगणैः भूम्नः तस्य श्रीहरेः हृदयस्य योग्या भवामीति कृष्णैकलग्नं मनः प्रदर्शितम् । रुक्मिण्याः लक्ष्मीस्वरूपत्वात् लक्ष्म्याश्च हरेः वक्षः निवासस्थानमिति 'हृदयस्य योग्या भवामी'त्युक्तम् ।

इत्थं शृङ्गारस्य विप्रलम्भप्रकारः महाकविना श्रीवादिराजेन सपरिकरं सहृदयहृदयावर्जकं विस्तारितः ।

Rarest Archive

सम्भोगशृङ्गारः - अनुकूलौ निषेवेते यत्रान्योन्यं विलासिनौ ।
दर्शनस्पर्शनादीनि स सम्भोगो मुदान्वितः ॥ (दशरूपक ४/५०)

यत्र हि विलासिनोः दर्शन-स्पर्शन-सम्भाषण-आलिङ्गन-चुम्बनादयः भवन्ति तत्र सम्भोगः शृङ्गारः भवति । रुक्मिणीशविजयः शृङ्गाररस्य हृदयङ्गमो रङ्ग इव भाति । विप्रलम्भानन्तरं सम्भोगः, सम्भोगानन्तरं विप्रलम्भः इति पौनःपुन्येन अनयोः शृङ्गारप्रकारयोः संयोजनं तत्र तत्र रु.वि. महाकाव्ये सहृदयानां आनन्दं सन्तनोति । सम्भोगशृङ्गारे नायिकानायकयोरुभयोः सम्भोगाभिव्यञ्जकानां व्यापाराणां वर्णनं अपेक्षितम् । यतः उभयोः आनन्दोपभोगतया व्यक्तः रतिभावः एव शृङ्गाररसतामुपैति । अन्यथा एकत्र स्थितत्वे दर्शनस्पर्शनादीनां समग्रतया वर्णनेऽपि शृङ्गाराभासः भवति ।

यद्यपि सम्भोगशृङ्गारे दर्शनस्पर्शनादीनां प्रत्येकं विशेषा वर्तन्ते । तथापि कविभिः स्वकाव्येषु द्वयोः त्रयाणां वा सम्मेलनेन वर्णनं क्रियते । रु.वि.काव्येऽपि सम्मिलितानामप्येतेषां दर्शनादिव्यापाराणां समुपवर्णनं तत्र तत्र दृश्यते । ऋतुवर्णनेषु, गोपीकृष्णयोः कृष्णरुक्मिण्योश्च सम्भोगशृङ्गारः कविश्रीवादिराजेन मनोहरं चित्रितः वर्तते ।

Rarest Archiver

वसन्तवर्णने सम्भोगशृङ्गारः —

मधुनियुक्तभुजङ्गचयः स्तने रहसि नूतनशिवं रचयन्निव ।
नखपदेन्दुकलां वसनच्युतिं वितनुतेऽतनुतेजसि योषिताम् ॥
मृगमदेन सितेतरकण्ठतां करयुगाम्बुजवेष्टितमूर्धताम् ।
हृदयमन्दिरतां समदृश्यतां रुचिरतां चिरतान्तमुखैः स्वकैः ॥
मदनवह्निसखः प्रियशीतलः कुसुमगन्धवहः किल सेव्यते ।
मरुदुपारतमन्मथसङ्करैः स परितः परितप्तमुखैर्नरैः ॥ (४/४२-४४)

मधुमासे विलासिनां वर्णनमेतत् । भोगिनः योषितां अतनुतेजसि स्तने प्रतिशिवं रचयितुमिव नखक्षताख्यां इन्दुकलां, वसनच्युतिं, नीलकण्ठतां, अम्बुजवेष्टितत्वं, हृदयमन्दिरतां, सम्यग् अदृश्यतां रुचिरतां च चक्रुरिति वर्णनेऽत्र मधुमासः मन्दवायुश्च उद्दीपनविभावः । योषितः आलम्बनाः । नखक्षतादयो हि अनुभावाः । स्वेदादयः व्यभिचारिभावाः । एतैः तेषां रतिः स्थायी भावः व्यञ्जितः इति सम्भोगशृङ्गाररसोऽयम् ।

ग्रीष्मवर्णने सम्भोगशृङ्गारः —

प्रियास्तनाख्यान् परिरभ्य कुम्भान् सुधां तदीयाधरजां पिबन्तः ।
विदन्त्यहो नागरिका न तापं न वा पिपासां गिरिकुञ्जवासाः ॥ (५/८)

अत्र विलासिनां आलिङ्गनं चुम्बनं च वर्णिते स्तः । प्रियाः आलम्बनविभावाः । गिरिकुञ्जवासः उद्दीपनविभावः । चुम्बनं आलिङ्गनं च अनुभावकोटिप्रविष्टे । मद-उन्मादादयः सञ्चारिभावाः इति रतिः स्थायी रसतामेति ।

Rarest Archiver

वर्षावर्णने सम्भोगशृङ्गारः –

उद्यद्विद्युति वक्रशक्रधनुषि व्योमाग्रसीमाश्रये
वर्षत्यूर्जितगर्जिते ऽति-चकिता मर्त्याः पयोधारिणि ।
नेत्रान्तभ्रुकुटीबलं कुशलसन्मध्योर्ध्वभागस्थितं
नारीपीनपयोधरं भयहरं भेजुः क्वणद्भूषणम् ॥(५/३३)

अस्मिन् दृष्टान्तालङ्कारशोभिते पद्ये सम्भोगशृङ्गारः नितरां चमत्कारितया निरूपितः। राज्ञा एकेन खलु त्रस्ता यथा समबलं राजान्तरं समाश्रयन्ते तथा वर्षाकालीनेन पयोधरेण चकिता मर्त्याः पयोधरान्तरं समाश्रिता इति चित्रणेऽत्र नार्यः आलम्बनाः। भूषणानां क्वणनं उद्दीपनविभावः। कटाक्षविक्षेपाः अनुभावाः। भयादयः सञ्चारिभावाः। एतैः सर्वैः रतिः स्थायी भावः व्यक्तः रसत्वं भजते। ऋतवः, सूर्यास्तः, चन्द्रोदयः, वृन्दावनं, पिकानां गीतं इत्यादयः उद्दीपनविभावाः शृङ्गाररसपोषणार्थं रु.वि.काव्ये समञ्जसं वर्णिताः तैः विभावैः व्याकीर्णकाम इव श्रीकृष्णः व्रजवधूराकर्षयन्निव वेणुं वादितवान्। (१)

(१) व्याकीर्णकाम इव तैर्विविधैर्विभावैः
आकर्षयन् व्रजवधूः निजसङ्गयोग्याः।
वेणुं क्रमेण रणयन् बहुतानमान-
गानज्ञमौलिरुदगायदधीश्वरोऽसौ ॥(६/४६)

Rarest Archiver

वेणुवादनं श्रुत्वा गोपललनाः मुग्धाः श्रीकृष्णस्य सन्निधिं समागताः। तत्र च परस्परं गोपीनां कृष्णस्य गुणकथनरूपं सम्भाषणं सञ्जातम्।(1) इदमपि सम्भोगशृङ्गाराङ्गतां भजते।

सप्तमे अष्टमे च सर्गे विस्तृततया विप्रलम्भ-शृङ्गारवर्णनानन्तरं अष्टमसर्गान्ते समग्रतया नवमे सर्गे सम्भोगः शृङ्गारः पुनर्वर्णितोऽस्ति।(2) गोपीनां परितापं प्रलापं च श्रुत्वा इव हरिः पुनः स्वात्मानं प्रकटीचकार। तदा तद्दर्शनेन तासां व्रजाङ्गनानां आनन्दोद्रेकः सञ्जातः –

गोपीनां परितापमित्युडुपतिः कृष्णाय शंसन्निव
प्रापाभ्यन्तिकं, अच्युतेन्दुरुदितः तत्पुण्यपुञ्जाचलात्।
वक्षोजाख्यगिरिं करैः परिमृजन् नेत्रोत्पलं हर्षयन्
हृद्योमाप्यनुरञ्जयन् विरचयन् वृद्धिं प्रमोदाम्बुधेः॥(८/३८)

अत्र गोपीनां रत्यारम्भो वर्णितः। श्रीकृष्णः चन्द्रायमाणः तदा गोपीनां पुण्यपर्वतादेव प्रादुरभूत्। अत्र श्रीकृष्णः आलम्बनः। वक्षोजपरिमार्जनं अनुभावः। हर्षादयः व्यभिचारिभावाः। तैश्च गोपीकृष्णानां रतिः स्थायी व्यञ्जितो वर्तते। अष्टमसर्गस्य अन्ते नानाप्रकाराणां चुम्बनानां वर्णनं विद्यते।(3)

---

(1) रु॰वि॰ ६/५५–६३

(2) इदं च युक्तं यतः – न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते।
सं॰कं॰ ५/५२

(3) रु॰वि॰ ८/४०, ४१, ५५, ५८

रु॰ वि॰ काव्ये शृङ्गारवर्णनस्य शुचित्वे इदं पद्यं प्रमाणम्—

अन्या च तं हृदि निधाय निमीलिताक्षी
धन्या प्रियं पुलकशोभितसर्वगात्री ।
सर्वाभिराभिरनुभूतमभुङ्क्त भोगं
किं नाम नास्ति मुनिमार्गजुषां हि लोके ॥ (८।४४)

गोपी कापि निमीलिताक्षी सती कृष्णं हृदि निधायैव अन्याभिः गोपीभिः चुम्बनालिङ्गनादिभिरनुभूतं प्रभूतं सुखं प्राप्तवती । यतो हि सा मुनिमार्गे वर्तमाना । अनया सङ्कल्पावस्थया गोपीशृङ्गारस्य मुनिजनध्यानसमानत्वं चित्रितम् । न केवलं एतत्, श्रीकृष्णविहितरासोत्सवस्य मोक्षसदृशताप्युत्प्रेक्षिताऽस्ति ।

स्वानन्दं प्रकटीचकार सुखदं सायुज्यमालिङ्ग्य ताः
साधर्म्यं स्वकृतानुलेपतिलकैर्मोक्षं हृदिस्थावृतेः ।
ताभिः सस्मितमीक्षितो यदुपतिः सारूप्यसार्ष्टी दिशन्
रासाख्यं च तथोत्सवं न हि कथा व्यर्था परब्रह्मणः ॥ (८।४६)

ताभिर्गोपीभिः सस्मितमीक्षितो यदुपतिः तासां हृदिस्थावृतेः[1] कुचाच्छादनस्य मोक्षं[2] प्रकटीचकार । स्वानन्दश्च प्रकटितः[3] ताः आलिङ्ग्य हरिः सायुज्यं स्फुटीचकार । आलिङ्गनेन स्वस्य अनुलेपतिलकाभ्यां साधर्म्यं व्यक्तं कृतवान् । समानरूपत्वमपि

(१) जीवहृदये स्थितस्य प्रकृतिबन्धस्य
(२) मोक्षः—अपसरणं, संसारान्मुक्तिश्च
(३) स्वरूपानन्दः इत्यपि विवक्षितः, यः मोक्षे प्रकटीक्रियते ।

Rarest Archive

सार्ष्टिः (१) च तेन दत्ते । इत्थं रासोत्सवः समभवत् । अत्र वीक्षणं, कुचस्पर्शादयः, आलिङ्गनं सार्ष्टिक्रीडा च वर्णिताः । तेनैव मार्गेण स्वरूपानन्दाविर्भावः सायुज्य-साधर्म्य-सारूप्य-सार्ष्टिमुक्तयोऽपि सूचिताः, एवं श्रीहरिकृता सा रासक्रीडा मुक्तिसदृशी इत्यपि कविर्वर्णयति । इदं खलु रासोत्सव-वर्णनशार्दूलविक्रीडितम् —

कण्ठाश्लेषकराग्रपातमधुरव्याहारमन्दास्मितैः
लोलापाङ्गनिरीक्षणेन मरुता गीतेन शीतांशुना ।
शृङ्गारं रसमुद्भवैः कुसुमिते वृन्दावने पोषयन्
गोपीमण्डलमण्डितं मधुपती रासोत्सवं निर्ममे ॥ (८/४८)

अत्र कण्ठाश्लेषादयः अनुभावाः, मरुद्गीतादिकं उद्दीपनम् । गोप्यः आलम्बनाः । अतोऽत्र शृङ्गाररसः संशोभते ।
अन्यच्च पद्यं गोपीनां श्रीकृष्णविषयकप्रेमोत्कर्षं वर्णयत् रासोत्सवमेवं चित्रयति —

प्रेष्ठस्यांसयुगं करैरुभयतः प्रेमोत्थरोमोद्गमैः
सुष्ठ्वालिङ्ग्य पुनः पलायनभियेवौत्सुक्यतो वीक्षताम् ।
सिद्धानां नयनैः समं समुदितं शृङ्गारसंज्ञं रसं
मध्यस्थं मुमुचुर्मिथो धृतकराः गन्तुं बहिर्न क्वचित् ॥ (८/४९)

समुदितं शृङ्गाररसं, वीक्षतां सिद्धानां नयनानि च

---

(१) अन्योन्यकण्ठलम्बितपाणितया खेलनं सार्ष्टिः — व्याख्या

मण्डलाकारेण स्थितानां तासां गोपीनां मध्यात् बहिः नैव परिचेलुः। एवं अतीव प्रसादमय्या वाण्या रासविलासस्य वर्णनं समुपलभ्यते यत्र शृङ्गारतरङ्गिणी संवहति —

कृष्णांसविन्यस्तकराब्जमाला हृष्टाः स्त्रियस्ता ननृतुः सलीलाः।
आनन्दमूर्तिं परिरभ्य मर्त्यः को नाम नो नृत्यति सिद्धकृत्यः॥(८/५२)
काचिच्चुचुम्बे कमलेक्षणस्य कारुण्यसिन्धोः करमब्जनेत्रा।
आश्लिष्य कण्ठं बत पूर्वजन्मां स्वीयां न मुञ्चेति तमभ्यचयन्ती॥(८/५५)

अत्र गोपीनां आलिङ्गनचुम्बनादयो ह्यनुभावाः हर्षादयः व्यभिचारिभावाश्च सम्यक् चित्रिता वर्तन्ते।

रासविलासस्य मनोहरं आद्यन्तप्रासोपबृंहितं मृदुमधुर पदपुञ्जरञ्जितं रसोत्कटं वर्णनं रु.वि.काव्यस्य नवमे सर्गे प्रारम्भे संशोभते। अस्मिन् खलु एकादशस्वागतावृत्तात्मके कुलके(१) श्रीकृष्णस्य रमणीयता, तन्निष्कलङ्कमुखेन्दुः, तद्भूषणानि, तदीक्षणं, तत्सौन्दर्यातिशयः, गोपीनां आनन्दः, तासां कर्णकुण्डलादि-भूषणानि, नर्तनशीलता, श्रीकृष्णगण्डचुम्बनकुतूहलः, तद्गुणकथनं, कबरीबन्धमोचनं, नखक्षतानि, ब्रह्मरुद्रेन्द्रादिदेवानां आकाशे विद्यमानानां आनतिः, तैर्वृष्टस्य स्वःकुसुमानां सम्पातिः, स्वादुगीतं, वृन्दावनस्य दर्शनीयता, तत्रस्थानां पक्षिणां पशूनां वृक्षाणामपि प्रमोदः इत्यादयः विषयाः निसर्गोज्ज्वलेन प्रकारेण सानन्दं सभक्तिभरं

(१) मण्डलीकृतमनोरमरामाकुण्डलद्युतिसुदीपितसीमा।
गण्डचुम्बनकुतूहलकामाखण्डितानन सरोरुहधामा॥ ९।१

सरसं च कविराजेन श्रीवादिराजेन संवर्णिता: विराजन्तेतमाम् ।

(पूर्वपृष्ठतोऽनुवृत्तम्)

मुच्यमानकबरीभरबन्धः प्रोच्यमानरसदातृमुकुन्दः ।
प्रथ्यमाननखलाञ्छनचन्द्रः कथ्यमानहरिविक्रमवृन्दः ॥ २ ॥
हृष्टरोमनिकरैर्वनसत्त्वैः दृष्टरम्यविभवो हृतचित्तैः ।
तुष्टनिर्जरगणैर्गगनस्थैः वेष्टितस्स्तुतमुकुन्दचरित्रैः ॥ ३ ॥
चारुपादतलसन्नखकान्त्याऽधीरनूपुररुचा विरचन्त्या ।
साररत्नमयमण्टपपङ्क्त्या हारिभूमिविभवो विलसन्त्या ॥ ४ ॥
वेणुवाद्यपटुना व्रजनारीमानदेन हरिणान्तरहारी ।
आनताब्जजनिमारुतगौरीप्राणनाथनयनोत्सवकारी ॥ ५ ॥
पादसञ्चरणदर्शिततालः स्वादुगीतवरविभ्रमजालः ।
मोदिताद्रिजमृगाङ्घ्रिपशैलः श्रीधरेक्षणरसायनलोलः ॥ ६ ॥
कृष्णमूर्तिशतवासवनीलः पुष्टगोपतरुणीमणिमालः ।
घृष्टपाणिवरदामविलोलः चित्रहारसरहारणशीलः ॥ ७ ॥
हारभास्वदुरसा सकलाशापूरितस्मरशताधिकभासा ।
शारदाम्बुजदृशा वरभूषाधारिणाऽतिरुचिरः कमलेशा ॥ ८ ॥
सप्रियामरविमानवितानः तृप्तवन्दिचयमानवितानः ।
स्वल्पमेघरवमर्द्दलसान्द्रः स्वःप्रसूनरुचिमद्दलसान्द्रः ॥ ९ ॥
जृम्भमाणनवपल्लवशोभे शम्बरारिपितृपल्लवशोभे ।
अम्बुजेऽर्पितहृदा हिमदाम्ना जृम्भितश्च मरुताऽहिमदाम्ना ॥ १० ॥
मञ्जुशिञ्जदतिभासुरभूषः कञ्जनाभबहुसुन्दरवेषः ।
अंसलग्नकरसारसपाशः संस्तुतो जयति रासविलासः ॥ ११ ॥

Rarest Archiver

जलक्रीडावसरेऽपि च सम्भोगशृङ्गारः निरूपितोऽस्ति।(१)

गृहमागतस्य प्रेष्ठस्य कृष्णस्य आतिथ्यविधिरयं गोप्याः-

नेत्रानन्दजलेन मञ्जुकलशप्रख्यस्तनस्थायिना
पाद्यार्घ्ये हिमवारिणेव मधुभिः स्नानं प्रसूनस्नुतैः।
आश्लिष्याङ्गकलापरम्यतिलकश्रीखण्डलेपांश्च सा
लोलेन्दीवरमाल्यमोष्ठजसुधां प्रादात्प्रियेऽभ्यागते॥(६।४९)

पूजायां यथा अर्घ्यं, पाद्यं, स्नानं, श्रीगन्धः, माल्यं नैवेद्यं च इत्येते समर्प्यन्ते तथा इयमपि गोपी आगच्छन्तं कृष्णं वीक्ष्य आनन्दबाष्पाकुला बभूव। आनन्दाश्रूणि च तस्याः निबिडे स्तनप्रदेशे अपतन्। मञ्जुकलशप्रख्यस्तनस्थायिना तेनैव शीतलेन नेत्रानन्दजलेन कृष्णस्य पाद्यं ददौ। पादप्रणामसमये तस्याः स्तनकलशपतितं जलं तस्य पादयोः पाद्यमभवत्। ततः ततः कृष्णेन वक्षःस्पर्शे कृते तज्जलेनैव अर्घ्यं दत्तमभवत्। अथ तस्य पुष्पालङ्करणे प्रसूनस्नुतैः मधुभिरेव तस्य स्नानं समजनि। आलिङ्गनेन तस्य तिलकश्रीखण्डलेपादयः सञ्जाताः। तदनु ओष्ठजसुधानैवेद्यं च निवेदितम्। इत्थं अस्मिन् पद्ये शृङ्गारविलासाः दर्शन-चुम्बन-स्तनस्पर्श-आलिङ्गन-अलङ्करणादयो वर्णिताः। विभावानुभावसञ्चारिभावैः व्यक्तः तयोः रतिः स्थायिभावः रसतां प्राप्नोति।

(१) रु.वि. ६।३७,३८

Rarest Archiver

नवमे सर्गे आसर्गसमाप्ति सम्भोगशृङ्गार एव प्रपञ्चितोऽस्ति। दशमे सर्गे च मधुराप्रयाणसमये गोपीनां विलापानन्तरं कृतं सुरतस्य मल्लविद्यायाश्च साम्येन वर्णनं विचित्रतया श्लाघ्यं वर्तते यत्र हि गोप्यः कृष्णस्य गुरुस्थानीयाः सञ्जाताः।

पादस्पर्श-करग्रह-प्रियतमाङ्गाश्लेष-केशग्रह-
प्रेक्षा-अधःकरण-उपरिस्थिति-मिथोमुष्ट्यादि जुष्टे रते।
गोपीनां कुचकुम्भमर्दनकृता मल्लेन्द्रविद्यार्जिता
येनेभार्दनवैखरी च स कथं तास्त्यक्तुमीष्टे प्रभुः॥(१०/४४)

गोपीनां रतेन मल्लेन्द्रविद्यां, तत्कुचकुम्भमर्दनेन कुवलयापीडादि-करिकुम्भमर्दनवैखरीं च कृष्णः ताभ्यः प्राप्तवान्। ताः विद्याद्वये गुरुस्थानीयाः त्यक्तुं विस्मर्तुं वा हरिः शक्तो नैवाभूत्। अत्र गोपीनां कृष्णानुरागानुग्रहपात्रत्वं चमत्कारावहं वर्णितम्।

रुक्मिणीकृष्णयोः शृङ्गारवर्णनप्रसङ्गे कविनाऽमुना प्रकृष्टं प्रावीण्यं प्रदर्शितं प्रविभाति काव्येऽस्मिन् रुक्मिणीशविजये। कुलदेवयात्रां पूरयित्वा पुरं आयान्ती सा रुक्मिणी यदा श्रीकृष्णमैक्षत तदा तयोः शृङ्गाराङ्कुरः सञ्जातः। तं दृष्ट्वा सा 'विकसितनयनाब्जोद्भूतहर्षाम्बुधारा' अभवत्। कृष्णस्य अनादिजाया सा रुक्मिणी स्वकीयापाङ्गदूत्या एवानुरागं न्यवेदयत्। अतः कृष्णोऽपि तदा स्वसङ्गतां व्यतनोत्। इन्दिरायाः तस्या इन्दिरारमणेन तेन पुनर्विवाहेन किं प्रयोजनम्?

रथमाधिरोप्य गमनकाले रुक्मिणी तमेवावस्थाविशेषं पाणिग्रहणात् विवाहात् अधिकं मेने । तद्यथा —

कृष्णास्येन्दुसमीपलग्नमुदितभ्राजत्कपोला प्रभोः
हस्ताम्भोजयुगेन वेष्टितलसन्मध्या श्रियेवाऽञ्जसा ।
भर्त्रंसद्वयसंहितायतभुजा मोदाम्बुधौ मग्नधीः
सा पाणिग्रहणादपीममधिकं मेने विवाहोत्सवम् ॥ (१[illegible]।६९)

अत्र नायिकानायकयोः चुम्बनं आलिङ्गनं च चमत्कारतया सञ्जाते इति पाणिग्रहणमात्रात् विवाहात् अयमेव विवाहोऽधिकः । षोडशे सर्गे विवाहकाले कृष्णरुक्मिण्योः परस्परनिरीक्षणादिभिः व्यापारैः सम्भोगशृङ्गारः पोषितो वर्तते ।[1] एकेनैव श्लोकेन तयोः शृङ्गारः विव्रियते —

सा मन्दस्मितमौक्तिकेन सदपाङ्गाख्यैर्हयैर्हृत्पुरा
वक्षोजद्विरदेन कायकनकेनोद्धूतरोमानुगैः ।
तत्संसक्तमनोरथेन विविधाङ्गश्रीविचित्राम्बरैः
तद्योग्यामृतसाधनाधरभुवा सन्तर्पयामास तम् ॥ (१६।४८)

श्रीकृष्णः आलम्बनं विभावः । तद्गुणरूपादयः उद्दीपनविभावाः । रोमाञ्च-मन्दस्मित-कटाक्षादयः अनुभावाः । औत्सुक्यादयः सञ्चारिणः । अत अत्र एतैः आलम्बनादिभिः व्यक्तः रतिः स्थायिभावः रसव्यपदेशतां प्राप्नोति ।

---

(१) रु. वि. १६/३३, ३५, ३६, ३८, ४७

सप्तदशे सर्गे द्वारकायां विलासिनां वर्णने च सम्भोगशृङ्गार-
रसः पुनः प्रतिपादितोऽस्ति[1]। एवं श्रीवादिराजतीर्थः विप्रलम्भ-
सम्भोगयोः शृङ्गारप्रकारयोः वर्णने स्वकीयं चातुर्यं प्रदर्शितवानस्ति ।

वीररसः - वीरः चतुर्धा विभक्तः। धर्मवीरः, दानवीरः, दयावीरः
युद्धवीरश्चेति । उत्साहः अस्मिन् स्थायी भावः।
विजेतव्यः शत्र्वादिः आलम्बन विभावः। शत्रुचेष्टादयः
उद्दीपनविभावाः। धृति-गर्व-रोमाञ्च प्रमुखाः सञ्चारिभावाः।
स्पर्धादयः अनुभावाः भवन्ति । एतैरुत्साहः रसतामेति ।

दानवीरः प्राकाराद्बहिरत्र वारिधिरयं प्राप्याम्बुदैरर्पितं
स्वातौ वारि ततश्चिरेण हृदये मुक्तामयो जायते ।
अन्तर्हस्ततटेषु विप्रजलधिः कृष्णाब्दवृष्टं सदा
वित्ताम्बु प्रतिपद्य तत्क्षणमहो मुक्तामयो जायते ॥(१७।४१)

द्वारकायां कृष्णदत्तं वित्तं प्रतिपद्य विप्राः तत्क्षणे एव मुक्तामयाः
भवन्ति इति वर्णितम्। अत्र विप्राः आलम्बनाः। कृष्णस्य दाने
प्रवृत्तिः उद्दीपन विभावः। कृष्णस्य त्यागोत्साहः स्थायी भावः।
हर्षः व्यभिचारिभावः। सहृदयैः एवं रसाभिरीवीरः आस्वाद्यते ।
अन्यश्चायं द्वारकावर्णनश्लोको यत्र सर्वदानवैभवं चित्रितम् -

परमाप रमा यस्यां आश्रमं, मा श्रमं दिवि।
निवसन्निव संवेति सर्वदा सर्व-दानतः॥(१७।५७)

(१) रु. वि. १७।४६, ४८

द्वारकायां निवसन्तः सर्वदा सर्व-दानेन ते जनाः सदा दिवि निवसन्त इव वर्तन्ते। अत्र हि श्रीकृष्णविहितदानस्य परमसीमा चित्रिता। उग्रसेनाय कंसराज्यप्रदान चित्रणेन अपि दानवीररसः समुज्जृम्भितः कृतः महाकविना वादिराजतीर्थेन।

उग्रसेनं यदुपतिं चक्रे चक्रधरः किल।
यदुमात्राधिपत्येन तस्य विश्वेश्वरस्य किम् ॥(१२/६)

अत्र चक्रिणः त्यागोत्साहः स्थायिभावः। अनुग्राह्य उग्रसेनः आलम्बनविभावः। उग्रसेनस्य राज्यार्हत्वं उद्दीपनविभावः। यदुमात्राधिपत्येनेत्युक्तः गर्वः सञ्चारी भावः। एवं रसज्ञानां दानवीररसः आस्वाद्यो भवति।

<u>धर्मवीरः</u> - द्वादशे सर्गे श्रीकृष्णबलरामयोः उपनयनोत्सवस्य वर्णने तत्कृतब्रह्मचर्यपरिपालनचित्रणावसरे धर्मवीरत्वं व्यञ्जितम्। तत्र नित्यकर्मानुष्ठानवर्णनं जपादिवर्णनं च हृदयानन्ददे भवतः। यथा

दिने दिनेऽग्नौ समिधो जुहाव तथा श्रुतीनां जननीं जजाप।
स्वकुक्षिपूर्तौ न रतिर्हि कस्य निजानुभावस्मरणोत्सवे च ॥(१२/२८)

अत्र श्रीकृष्णस्य कर्मानुष्ठानोत्साहः स्थायी। आश्रमधर्म एव आलम्बनविभावः। श्रुतिप्रतिपाद्यमाहात्म्यं उद्दीपनविभावः। स्मृतिहर्षादयः सञ्चारिभावाः। प्रतिदिनं अग्निकार्यकरणं गायत्रीजपकरणं च अनुभावौ। इत्थं धर्मवीरताऽभिव्यक्ता।

Rarest Archiver

दयावीरः - कारुण्यवारांनिधेः श्रीकृष्णस्य वर्णने दयावीरोऽपि तत्र तत्र परिपुष्टोऽस्ति ।

स यामुनाम्भस्यवगाहनोत्थशरीरशैत्यं शमयाञ्चिवेशः ।
निशि प्रवृद्धं नवकाननाग्निं पपौ दयार्द्रः स्वजनस्य गुप्त्यै ॥(५।१)

अत्र श्रीकृष्णकृतं दावाग्निपानं वर्ण्यते । श्रीकृष्णस्य भक्ताः आलम्बनाः । श्रीकृष्णस्य दयोत्साहः स्थायीभावः । स्वजनानां संरक्षणेच्छा अग्निवृद्धिश्च उद्दीपनविभावौ । वह्निपानं अनुभावः । एवमत्र उत्साहः दयावीरतया व्यपदिश्यते ।

युद्धवीरः - रु.वि.काव्ये युद्धवीररसस्य पोषणं त्रयोदशे चतुर्दशे पञ्चदशे च सर्गेषु विशेषतो दृश्यते ।

धात्रीं प्राक् परिपोषणाय पतगं वातं विलासाय तान्
वत्सानोवृषधेनुकादिदितिजान् तद्भारवोढानिव ।
अश्वेभौ रजकं च मातुलकृते सम्प्रेष्य मल्लांश्च त-
त्सेनां प्रेषयति स्म गाढतमसे सम्प्रेषयिष्यन्क्रमात् ॥(१३।५८)

पूतनामारभ्य कुवलयापीडमल्लपर्यन्तान् कंसबन्धून् संहृत्य तत्सेनया युध्यतः श्रीकृष्णस्य वर्णनमिदं रणाङ्गणे । अत्र श्रीहरेर्युद्धोत्साहः स्थायिभावः । जेतव्यः शत्रुः कंसः आलम्बनविभावः । तत्कृतापराधाः उद्दीपनविभावाः । मल्लादीनां ध्वंसनं अनुभावः । क्रमात्सम्प्रेषणे धृतिः व्यभिचारिभावः । एवं वीररसस्य परिपाकः सञ्जातः सहृदयैरनुभूयते ।

Rarest Archiver

त्रयोदशे सर्गे जरासन्धेन सार्धं युद्धोद्यमे उत्साहभावः सपरिकरं अभिव्यञ्जितः। कृष्णेन मधुरारक्षार्थं चतुर्धा विभज्य स्वचमूः सम्प्रेषिता यथा बादरायणेन उपनिषद्रक्षार्थं चतुरध्यायोपेता ब्रह्मसूत्रचमूर्विनिर्मिता –

कृष्णोऽपि स्वचमूं सुवर्णखचितां कृत्वा चतुर्धा प्रभुः
तत्राग्र्यांश्चतुरो विधाय नगरीरक्षार्थमीशोऽदिशत्।
भास्वत्सूत्रचमूमिवोपनिषदां रक्षार्थमत्यूर्जितां
अध्यायैः सहितां चतुर्भिरमलैस्तन्मानपादोज्ज्वलैः॥ (१३।४४)

अत्र खलु वीररसस्य उद्दीपनविभावः सेनासम्पत्तिरभिहिता। अयं च कृष्ण-जरासन्धयोः युद्धप्रसङ्गः तत्त्ववादि-मायावादिनोः वादसाम्येन वर्णितोऽस्ति।

श्रीकृष्णभृत्यानां युद्धोत्साहोऽपि सम्यग्वर्णितो वर्तते।

आप्यायिताः किल मुरान्तकमुख्यवायु-
सञ्जातशङ्खमधुरश्रुतिरम्यशब्दैः।
शत्रून्निहत्य समरे परितः पुरीं तां
चक्रुर्मुकुन्दगुणवर्णनशोभमानाम्॥ (१३।५२)

श्रीकृष्णस्य रम्यशङ्खध्वनिभिः परिहृतश्रमाः तद्भटाः जरासन्धपक्षीयान् शत्रून् समन्तात् निहत्य तां पुरीं मुकुन्दस्य गुणवर्णनेनैव शोभमानां वितेनुः यथा मुकुन्दस्य गुणपूर्णत्वं संस्थाप्यते तत्त्ववादिभिः।

Rarest Archive

युद्धवर्णने श्रीकृष्णः विलक्षणमेघोपमितः चित्रितः -

स्वाङ्गाच्छादितशत्रुशौर्यतरणिः शार्ङ्गेन्द्रचापोज्ज्वलः
श्रीदेवीस्थिरविद्युत् अद्भुतरथश्रीमत्समीरेरितः ।
काव्योद्गीतकथः शरौघकरकावर्षैः स कृष्णाम्बुदो
राजन्याननपाणिपादकमलव्रातानलावीक्षणे ॥ (७४।७२)

अत्र कृष्णस्य युद्धोत्साहः स्थायी भावः। शत्रुराजन्याः आलम्बनविभावाः। रणाङ्गणे तत्प्रदर्शितशौर्यम् उद्दीपनविभावः। शरौघवर्षणं अनुभावः। उज्ज्वलेतिसूचितः गर्वः सञ्चारिभावः। इत्थं जरासन्धराजन्यनाशकस्य हरेरुत्साहः रसत्वं प्राप्य आस्वाद्यते। बहुवारं जरासन्धः बहुलं सैन्यं समासाद्य कृष्णेन सह युद्धाय आगतोऽपि पराजयमेवाप। चतुरङ्गं सैन्यं तत्र अपारैः शरैः आच्छादितवान् श्रीहरिः -

शरैरपारैस्तत्सैन्यं चतुरङ्गं सुपूरयन्।
ममेषुवारिधेर्नीलं तव सेनेति शंसति॥ (७४।२६)

अगण्यप्रतापस्य हरेर्भटाः रुक्मिणीहरणावसरे रुक्मिपक्षीयान् वीरान् छिन्नभिन्नान् वितेनुः तत्तदपराधानुरोधेन -

ये भैष्म्याः परिरम्भणं चकमिरे तेषां भुजान् चिच्छिदुः
ये वा तन्मुखचन्द्रचुम्बनरुचिं तेषां शिरांसि द्विषाम्।
ये तल्पे शयनं तया सह खला लोकाम्बया सङ्गरे
प्रेतैः सार्धमशीशयन् हरिभटाः तान् दुर्मदान् सायकैः॥ (७५।२)

Rarest Archiver

अनया च उत्प्रेक्षया हरिभटानां पराक्रमशालित्वं रुक्मिणीविषयिणी भक्तिश्च प्रकाशिते। समराङ्गणे हरेर्विक्रमदर्शनेन वैरिभटाः केचित्पलायिताः, केचिन्नतमस्तकाः केचिन्मूर्छिताश्चाभवन् -

अहयीत अहयी काश्चित अनंसीदपरोऽच्युतम्।

नाक्रमीदपरो विद्धः विक्रमार्कोदये हरेः॥(१५/७)

अनेन प्रकारेण रु. वि. काव्ये विभावानुभावादिभिः परिपुष्टः वीररसः कवेः नैपुण्यं प्रदर्शयति।

करुणरस – उद्धवः श्रीकृष्णसन्देशमावहन् गोकुलमागतः गोपीजनानां मन्दिराणि ययौ। तदा तत्र तासां कृष्णविरहजः[1] शोकः तेन दृष्टः। नायं विप्रलम्भशृङ्गारः यतो हि पश्चात् गोपीभिः कृष्णः न प्राप्तः।[2] कंसवधार्थं मथुरां गतः श्रीहरिः पुनर्गोकुलं नाययौ। अतः पुनः प्रियास्यभावात् शोकस्थायिभावकः करुणरस एवायं भवितुमर्हति। अस्य च करुणरसस्य शोकः स्थायीभावः। नष्टः अथवा अदृष्टः इष्टः आलम्बनः। क्रन्दितादयः अनुभावा भवन्ति। गोकुले 'सुदुष्करोग्रव्रतकर्शिताङ्गमुनीन्द्रवृन्दाश्रमसम्मितानि' गोपीजनमन्दिराणि उद्धवः दृष्टवान्। तत्र काचित् गोपी श्रीकृष्णेन सहैव शय्यां प्राप्तुं तदा अधःशयनव्रतोपेताऽभूत्। धन्या अन्या कापि गोपकन्या ताम्बूलमेव तत्याज।

---

(१) रु. वि. १३/१७-२७

(२) विप्रलम्भे रतिः स्थायी पुनःसम्भोगहेतुकः। सा.द. ३/२२६

Rarest Archive

तन्दुलकशेषोदनलुब्धचित्ता नित्यं किलैकानशनव्रतस्था ।
स्वप्नेऽपि तत्सङ्गमिवाप्तुकामा स्वस्थाऽपि शेते किल कापि दीना ॥(१३।१९)

अत्र, अदृष्टः श्रीकृष्णः आलम्बनः। तन्दुलकोदनस्मरणमुद्दीपनम् । अनशनव्रतं अनुभावः । दैन्यं व्यभिचारिभावः। श्रीकृष्णादर्शन-जन्यशोकः स्थायिभावः। इत्थं व्यञ्जितः शोकः रसतामेत्य सहृदयानां आस्वाद्यो भवति । कस्याश्चिदन्यायाः कन्यायाः इयमवस्थाऽभूत यत् जनन्या जनकेन वा निजैःवा साकं किमपि न भाषते — कृष्णेन सार्धं रम्यगोष्ठ्यभावे अन्यैः सम्भाषणैः किं वा प्रयोजनमिति विचार्य इव —

निजैर्जनन्या जनकेन साकं न भाषते किञ्चन कापि गोपी ।
प्रियेण सार्धं बत रम्यगोष्ठीमकुर्वता किं वचसेति दीना ॥(१३।२२)

अत्रापि उत्प्रेक्षया सूचितेन सम्भाषणान्तरस्य निष्प्रयोजनत्वेन गोपीनां शोकः घनीभूतः सहृदयानां हृदयं द्रवीभूतं तनोति । अनया प्रणाल्या महाकविवादिराजतीर्थः शृङ्गारमिव करुणमपि चित्रयितुं समर्थ इति स्पष्टीकृतं भवति ।

रौद्ररसः – रु॰वि॰काव्ये क्रोधभावोऽपि अभिव्यक्तोऽस्ति । रौद्ररसस्य क्रोधः स्थायी भावः। अरिरालम्बनो भवति । सङ्ग्रामसम्भ्रमादयः उद्दीपना भवन्ति । क्रूरसन्दर्शनादयः अनुभावाः । युद्धवीरादस्यभेदः रक्ताक्षत्वादिभिर्भवति ।[1]

(१) सा॰द॰ ३।२३१

चाणूरमुष्टिकयोः संहारानन्तरं कंसः कृष्णादीन् स्वनगरात् बहिर्यापयितुं आक्रोशेन वदति तत्र रौद्ररसस्यैवानुभूतिः।(1) जरासन्धभटैश्च कृष्णनगरीनाशार्थं कृताः क्रियाः रौद्रस्य पोषकाः।(2) कंसं अधो निपात्य श्रीकृष्णः यदा तं हन्ति तदापि क्रोधस्थायिभावस्य अभिव्यक्तिर्वर्तते।(3)

---

(1) कृष्णं मन्नगराद्बहिष्कुरुत तत्पक्षैः समं मद्भटा

नन्दं मारयताशु मर्दयत तं हीनोग्रसेनं भुवि।

कंसेनेत्थमुदीरितेऽखिलखलश्रेणीवनोग्रानलः

तस्याज्ञाधरवज्जगाम सुजनस्तोमान्तकस्यान्तिकम्॥ (11/50)

(2) कुन्तैः कुठारैः कुद्दालैः बभञ्जुर्भगवत्पुरीम्।

आद्यामुपनिषद्विद्यां कुतर्कैरिव वादिनः॥ 12/81

उपवनमुपवेदप्रायमुन्मूलयन्तः सुकृतसमुदारं द्वारभाराद्बभञ्जुः।

प्रतिभयवरशक्त्याघूर्जिताधारमुक्ताः खलमतिहृतचित्ता दृप्यदुर्मन्त्ररूपाः॥ 12/82

बाध्यां तां सह निश्चलार्थनिकरैः क्रुद्धाः खला निर्गुणा-

गारामन्तरहो विधातुममता यत्नं वितेनुः किल।

कृष्णेनापि समुज्झितां समयिनो युक्त्याऽऽत्मपक्षेऽञ्जसा

कृत्वैक्यं समयोजयन् गतभया दुर्भाग्यपुञ्जैरपि॥ 12/83

(3) कोपाटोपवशेन रक्तनयनं तं खड्गचर्मोल्लस-

त्पाणिं पापमिवोत्पतन्तममतं मूर्ध्नि प्रगृह्य प्रभुः।

पृथ्वीमेत्य निपात्य विस्तृतकचं त्रस्तं चकर्षाच्युतः

प्रेमप्राविलसाधुसङ्घनयनैः सानन्दमालोकितः॥ 11/60

Rarest Archiver

द्वारकावर्णनेऽपि रौद्ररसस्य अनुभूतिर्विद्युत् इव भवति -

निवारयन्तीह भटा यथेशो नवीनमार्गे विशतः कृतान्ते ।

न चोत्क्षिपन्तीह वृका इवार्तान् अवीन् अमार्गे विशतः कृतान्ते ॥(१७/५८)

कृतयुगस्यान्ते शिवः नवीनधर्ममार्गानुसरकान् दुष्टान् यथा नाशयति तथा हरिभटाः नगरीं प्रविशतः दुर्जनान् निवारयन्ति । अथापि अमार्गे विशन्ति चेत् कृतान्ते एव क्षिपन्ति ।— वृकाः राजमार्गं त्यक्त्वा अटव्यां अमार्गे सञ्चरतः आर्तान् अवीन् इव । अत्र रुद्राधिदैवतः रौद्रो रसः रुद्रोपमानानां हरिभटानां चित्रणेन अभिव्यक्तः । द्वारकां प्रविशन्तः दुर्जना आलम्बनाः । निवारितत्वेऽपि प्रवेशापेक्षा उद्दीपनविभावः । हरिभटानां क्रोधः स्थायी भावः । कृतान्ते क्षेपणं अनुभावः । एवमत्राभिज्ञानां सहृदयानां रौद्रो रसः आस्वाद्यो भवति ।

भयानकरसः - भयस्थायिभावः भयानकरसः । यस्मादुत्पद्यते भीतिः तदत्रालम्बनं मतम् ।[1] इदमत्रोदाहरणम् —

भग्नश्चापः स्वभर्तुः प्रतिभयनिनदैः धैर्यचौर्यं ततान

व्यग्रस्वान्तान् स्वपालान् दृढतरशकलद्वन्द्वघातैर्जघान ।

भङ्क्त्वैवोग्रमल्लप्राकरहृदि भयं भल्लकल्पं चखान

द्वैधीभावं विपक्षे विरचयति बत स्वीय एव स्वशत्रुः ॥(१७/६४)

श्रीकृष्णकृतचापभञ्जनवर्णनमिदम् । चापभञ्जनेनैव

---

(१) सा॰द॰ ३/२३६

कंसादीनां हृदये भयं सञ्जातम् । व्यग्रस्वान्तेति व्यभिचारिणः धैर्यचौर्यं ततानेति अनुभावः भयङ्करध्वनिना च उद्दीपनं च प्रोक्तम् । कंसस्य शत्रुः श्रीकृष्णः अत्र आलम्बनः ।

कंसस्य मनसि सञ्जातः भयोच्चयः श्रीकृष्णस्य दूतत्वेन वर्णितोऽस्ति । कृष्णभय-कंससम्भाषणे भयानकरसस्य परिपुष्टिर्वर्तते । भयजन्याः विकाराः भृशं चित्रिताः । कंसं प्रति भयदूतः कथयति —

सत्त्वं निष्फलमातनोमि मलिनं खिन्नं मुखं वेपथु-
ग्रस्तं गात्रमधीरमक्षियुगलं चित्तं च चिन्ताकुलम् ।
दैन्यं वाचि विरक्ततां च विभवे त्यागं च भोगावलेः
लज्जामानयशःश्रुतिं विस्मये चित्तेऽहमुज्जृम्भितः ॥(११/२३)
युद्धार्थं न कदापि गच्छति गतोऽप्योजस्विनां पृष्ठतः
तिष्ठति, अन्यमवेक्ष्य शस्त्रनिकरं पृथ्व्यां क्षणेनोज्झति ।
शत्रुं स्तौति तृणाङ्गुलीदलमदन् कम्पी पतन्धावति
स्तब्धेत्थं बहुलोकनिन्दितदशां सम्प्रापयिष्याम्यहम् ॥(११/२६)
गाथा तिष्ठतु भूप सम्प्रति भवान् निद्राति किं निद्रितः
स्वप्नं शोभनमेव पश्यसि रिपुं किं नानिशं शङ्कते ।
धैर्यं किं हृदि सन्दधात्यनुचरान् धीरान् किमुद्वीक्ष्य ते
स्वैरं मद्वशमानसस्य भवतः सौख्यं क्व सौख्यार्थिनः ॥(११/२७)

एवं कंसनिष्ठं श्रीकृष्णभयं एभिर्विभावानुभावसञ्चारिभावै रसतामेति ।

Rarest Archive

बीभत्सरसः(1) - बीभत्सरसस्य जुगुप्सा स्थायिभावः। जुगुप्सा-
भावव्यञ्जका अपि वर्णनप्रकाराः रु. वि. काव्ये युद्धादौ दृश्यन्ते।
युद्धे मृतानां जरासन्धभटानां वर्णनमिदम् —

सञ्चूर्णिताङ्गाः समरे शरौघैः साञ्छिन्नपादोदरकण्ठहस्ताः।
विरेजुरश्नन्त इवासृगब्धौ फलं निराकारमतस्य तावत् ॥(१४।११)

युद्धे रक्तसमुद्रे लुठतां साञ्छिन्नपादोदरकण्ठहस्तानां जरासन्धस्य
भटानां अवस्थावर्णनेऽत्र जुगुप्सा अभिव्यक्ता।
रासक्रीडावर्णनानन्तरं उद्रिक्तभक्तिः कविः मनः सम्बोधयति -

भ्रान्त स्वान्त विनिन्दितैः क्रिमिशतैर्विष्ठार्तिपुष्टैर्वृतं
मूत्रामत्रममेध्यपूयमबलाकायं विगेयं त्यज।
नित्यं निर्मलविग्रहं निजवशं नीलोत्पलश्यामलं
प्रेष्ठं संस्मर विठ्ठलं व्रजवधूतृष्णासमुज्जृम्भकम् ॥(९।२५)

अत्र अबलाकायस्य आलम्बनस्य वर्णनमात्रेण जुगुप्सा
अभिव्यज्यते। तत्त्यागः अनुभावः। विष्ठार्तिपुष्टक्रिमिशतैः
आवृतत्वं उद्दीपनम्। व्यभिचारिभावाः ऊह्याः भवन्ति।
श्लोकस्य उत्तरार्धे च पूर्वोक्तदूषणातिदूर निर्मलविग्रह-
प्रेष्ठविठ्ठलस्मरणोपदेशेन नितान्तशान्तरसात्मकेन मनसः
बीभत्सभावः भक्तिभावे परिणामितो वर्तते।

---

(1) जुगुप्सास्थायिभावकः विण्मूत्राद्यालम्बनकः दुर्गन्धाद्युद्दीपितः निष्ठीवना-
द्यनुभावितः ग्लान्यादिसञ्चारितः बीभत्सः - सा.द. पृष्ठं १५०.

Rarest Archiver

अद्भुतरसः - अद्भुतरसस्य विस्मयः स्थायिभावः। लोकविलक्षणं वस्तु आलम्बनं भवति। तन्महिमा उद्दीपनविभावः। रोमाञ्चः नेत्रविकासः इत्यादयः अनुभावाः, हर्षाद्याः सञ्चारिणो भवन्ति।(1) अद्भुतरसस्य अद्भुतः परिपाकः ऊ. वि. काव्ये विद्योतते इति नाश्चर्यं, यतो लोकविलक्षणः श्रीकृष्णः अत्र नायकः। तस्य बाललीलासु वा पौगण्डवयसि वा प्रौढक्रियासु वा सर्वत्र विस्मयावहाः व्यापाराः संवर्णिताः। प्रतिकथं अद्भुतरसोऽत्र स्यन्दते। लोकाश्चर्यकरालौकिकगुणगणमण्डितस्य श्रीकृष्णस्य चरित्रचित्रणे प्रवृत्तस्यास्य काव्यस्य अद्भुतरसाभिव्यञ्जकता अपि अनितरसाधारणा संशोभते।

तृतीये सर्गे गोपीभिः यशोदायै शिशोः श्रीकृष्णस्य दुग्धचौर्यादि निवेदने विस्मयभावः प्रकटितोऽस्ति —

प्रगृह्य घण्टामपरेण पात्रं करेण चान्येन पयः पिबन्तम्।
निशाम्य मित्राणि च तर्पयन्तं सुविस्मिता कापि बभूव तूष्णीम्॥(3।34)

अत्र पयश्चौर्यनिरतो हरिरालम्बनः। करचतुष्टयेन शिशोस्तस्य व्यापाराः उद्दीपनविभावाः। विस्मयेन तूष्णीभावः अनुभावः। श्रीकृष्णस्य गृहे गृहे दुग्धादिपानं दृष्ट्वा कापि गोपी यशोदां पृच्छति —

गृहे गृहेऽयं नवनीतदुग्धदधीनि सर्वाण्यपहृत्य भुङ्क्ते।
तथापि तृप्तिं न सुतस्तवैति किमस्य भूतानि वसन्ति कुक्षौ॥(3।48)

---

(1) सा० द० 3।242-244

भूतग्रस्तानां बहुभोक्तृत्वात् कृष्णस्यापि बहुभोक्तृत्वं दृष्ट्वा विस्मिता सा एवं 'किमस्य भूतानि वसन्ति कुक्षौ' इति पृच्छति। वस्तुतस्तु अनया उत्प्रेक्षया समस्तभूताधारत्वमेवोक्तम्।
एतादृशालौकिकवर्णनोपेतानि गोपीनां निवेदनानि कानिचित् —

अहो यशोदे तव बालकोऽयं गृहे गृहेऽत्युष्णमपीह दुग्धम्।
पिबन् न तापं लभते कदापि किमस्य वक्त्रे जलराशिरास्ते॥(३/५८)
विलोक्य दूरस्थितदुग्धभाण्डमुलूखलाद्यैर्यतते गृहीतुम्।
शिशुः स तावत्क्वचिदेधतेऽहो किमेष गूढाद्भुतमहाविभूतिः॥(३/५९)
तातान्धकारार्पितदध्यमत्रमपि स्वथास्त्र नयनान्तलक्ष्म्या।
समीक्षते लोचनयोः किमेषः बिभर्ति बालस्तव पुष्पवन्तौ॥(३/६०)

अत्र सर्वत्र कृष्णः आलम्बनः। तन्महिमातिशयेन गोपीनां विस्मयः अद्भुतरसतामाप्तो रसज्ञैरनुभूयते।
जरासन्धेन सह युद्धे च —

शार्ङ्गं बिभ्रन्निषङ्गान्निशितशरचयानाददानो मुहुर्ज्यां
आकर्णान्तं विकर्षन् प्रबलरिपुवपुः पूरयन्मार्गणौघैः।
अन्यातङ्कं स्वशङ्खं रणधुरि रणयन् अङ्घ्रिमूले नतानां
तन्वन्दोष्णाऽभयं च प्रथयति मुरजिद्विस्मितः पाणिना स्वान्॥(७/२०)

अत्र च शार्ङ्गधारणं, शरादानं, ज्याकर्षणं, शरैः रिपुवपुः पूरणं शङ्खरणनं अभयप्रदानमिति नानाविधव्यापाराणां युगपत् मुहुर्मुहुः करणात् अद्भुतरसस्याविष्कारो भवति।

Rarest Archiver

शान्तरसः – विभावादिभिराभिव्यक्तः शमः शान्तरसतामाप्नोति।[1]
रु.वि. काव्ये भगवद्भक्त्या सहितमेव जगदनित्यत्वं वैराग्यं च
प्रतिपादिते वर्तेते :—

संसारासारसिन्धौ जनिमरणजरायूर्मिभिर्बाधितानां
दारागारादिभाराः किमिह सुखकराः प्रेमपाशैर्निबद्धाः।
कृष्ण त्वत्पादपोतं प्रदिश तदनिशं सत्पताकं सकेतुं
रम्यं कर्मेन्द्रिगम्यं भवजलधिभवत्खेदविच्छेदहेतुम् ॥(१०/७५)

मधुरापुराद्बहिः स्थित्वा श्रीहरिः अक्रूरं पुरतो गन्तुं आज्ञापयति, तदा
तत्सङ्गभङ्गनिर्विण्णस्य अक्रूरस्योक्तिरियम्। संसारस्यासारत्वात्
भगवत्पादाश्रयणेन संसारसञ्जातदुःखं परिहरणीयमिति
श्लोकस्यास्याकूतम्। अत्र दुःखकरत्वेन परिभाव्यमानं
जगद् आलम्बनम्। कृष्णस्य सान्निधिः उद्दीपनविभावः।
श्रीकृष्णपादाश्रयणमनुभावः। निर्वेदादयः व्यभिचारिभावाः।
शमः स्थायी भावः। एवमत्र शान्तरसस्यानुभूतिर्भवति।
साम्राज्ये अभिषिच्यमाणोऽपि तदनपेक्षमाणः उग्रसेनः वक्ति –

यथा त्वं सततं पूर्णः साम्राज्यं नेच्छसि प्रभो।
तथा त्वत्सेवया पूर्णाः वयमम्बुजलोचन ॥(१२/४)

अत्र उग्रसेनस्य साम्राज्यानपेक्षा कृष्णसेवया मनस्तृप्तता च
अभिहिते वर्तेते। एवं उग्रसेनस्य शमभाव निरूपितो भवति।

(१) शान्तः शमस्थायिभावः उत्तमप्रकृतिर्मतः। सा.द. ३/२४५

वत्सलरसः - पुत्रस्नेहोऽस्य स्थायीभावः । पुत्राद्यालम्बनम् । तच्चेष्टाः उद्दीपनाः । हर्षगर्वादयः सञ्चारिभावाः । (१)

यशोदाकृतकृष्णलालनवर्णने वत्सलरसस्यानुभवो भवति —

अङ्कोज्झितेन्दुप्रतिमाननं तमङ्कसमारोप्य मुहुर्मृजन्ती ।
पङ्कं मनोज्ञाङ्गगतं क्षुधार्तशङ्का स्तनक्षीरमपाययत्सा ॥(४।२)

अत्र श्रीकृष्णः आलम्बनः । तत्सौन्दर्यमुद्दीपनम् । अङ्कारोपण-पङ्कापनोदनादयः अनुभावाः । क्षुधादिशङ्का व्यभिचारिभावः । एतैरभिव्यक्तः पुत्रस्नेहः वत्सलरसतयाऽऽस्वाद्यते रसज्ञैः । यशोदया कृतस्य कृष्णलालनस्य वर्णनेन वत्सलरसाविष्करणे कविरयं अतीव सफलोऽस्ति इति वक्तुं प्रमाणमिदं पद्यद्वयम् —

दोलाविलासचलितालकशोभिफालं
बालं शुचिस्मितसुधारसशोभितास्यम् ।
श्यामं समीक्ष्य समयं किल शम्मयं सा
तेने क्वणत्कनकनूपुरशोभिपादम् ॥(३।९)

गण्डं वराङ्गुलिदलैर्लघु चालयन्ती
मन्दस्मिताननमथो परिरम्भयन्ती ।
सान्द्रस्तनस्नुतपयः किल पाययन्ती
नन्दस्य राज्यभवदित्थमहर्नयन्ती ॥(३।१०)

---

(१) स्फुटं चमत्कारितया वत्सलं च रसं विदुः ।
स्थायी वत्सलतास्नेहः पुत्राद्यालम्बनं मतम् ॥ सा०द० ३।२५१

कविरपि अत्र शिशोः कृष्णस्य रूपं सर्वदा स्वहृद्गतं भूयादिति आशंसति।[1] एतेन कृष्णेन पुत्रवती सा यशोदा धन्या इति स्तुता च।[2]

कंसवधानन्तरं श्रीकृष्णः देवकीवसुदेवयोः निगडबन्धं विमुच्य तौ प्रणमति। दृष्टकृष्णयोः पित्रोः वात्सल्यमिदम् —

सर्वं तात कृतं त्वया यदुदितं प्रीत्यास्मदीयान्वये
तेनेदं तिलकीबभूव हि कुलं कीर्तिश्च मे विस्तृता।
येनानेकखलान्निहत्य बालिनं कंसं च वंशद्रुहं
बन्धग्रन्थिरयं व्ययोजि दयया किं किं कृतं न त्वया॥(७/१६)
अम्बा तं परिरभ्य फुल्लकरसन्माल्येन तस्यार्चनं
नेत्रानन्दजलेन सिञ्चनमुरोजोद्यत्पयोधारया।
नैवेद्यं च निवेद्य वीक्षणलसन्नीराजनं शोभनं
भाविस्वीयविमुक्तिकल्पलतिकाबीजं निजं निर्ममे॥(७/१७)

श्रीकृष्णोत्कर्षेण उद्दीप्तस्नेहयोः पित्रोः परिरम्भणादयो सत्र वर्णिताः। यशोदा तु अर्चन-स्नाननैवेद्यादिपूजोपचारानेव कृतवती।एतादृशैः विभावानुभाव सञ्चारिभावैः परिपोषितः पुत्रस्नेहः वत्सलरसतां कोटिमाटीकते।

---

(१) रु.वि. ३/२९,३०,३१ नव्यस्खलद्वचनन्दितसर्वलोकः
सुव्यक्तकुन्तलततिः सुभगाग्रगण्यः।
दिग्वस्त्रदर्शितकटिर्दिननाथदीप्तिः
हृद्गः सदाऽस्तु स शिशुर्हृदयङ्गमो मे॥(३/३१)

(२) रु.वि. ३/२७

हास्यरसः – रु॰वि॰काव्ये हास्यरसप्रसङ्गाः विनोदोक्तयश्च स्थाने स्थाने विद्यन्ते। अयं च विकृताकारादिभिः सञ्जायते। विकृताकारवत्तया आलम्बनत्वं भवति(२)। मथुरां प्रविष्टः कृष्णः कुब्जां दृष्ट्वा मनसि एवमकरोत् –

मुष्टिप्रमाणतनुमध्यवतीं स्वकर्ण-
विश्रान्तनिर्मलगुणां रुचिरां त्रिवक्राम्।
विष्वक्प्रयुक्तनयनान्तशरां निरीक्ष्य
कोदण्डमुद्भवकथाविषयं स मेने ॥(११/६)

त्रिवक्रां कुब्जां निरीक्ष्य श्रीकृष्णः 'उद्भवेनोक्तः कोदण्डः' इत्यस्य-विषयः इयमेव भवेदिति मेने। देहे त्रिषु स्थानेषु वक्रतोपेतां तां श्रुत्वा हासोल्लासो भवति। अत्र कुब्जा आलम्बनभूता। तस्याः त्रिवक्रता विष्वग्दृष्टिः इत्याद्याः उद्दीपकाः। कोदण्डविचारः हासश्च अनुभावौ। आवेगचापल्यादयः व्यभिचारिभावा भवन्ति।

कृष्णेन रुक्मिण्यां नीयमानायां युद्धार्थमागतस्य रुक्मिणो दशा इयम् -

अर्धीकृपन्मुण्डितमूर्धजं तं शचीपतिस्तुत्यकृतिर्मुरारिः।
उपेक्ष्य यद्गेहमगाद्धि लक्ष्मीः तदेतदस्यानुगुणं खलस्य ॥(५/१०)

अत्र विकृतस्वरूपं रुक्मिणं दृष्ट्वाऽधिकारिभेदेन स्मितादयो जायन्ते।

(१) विकृताकारवाग्वेषचेष्टादेः कुहकाद्भवेत्।
हासो हासस्थायिभावः श्वेतः प्रमथदैवतः॥ सा॰द॰ ३/२१४

(२) विकृताकारवाक्चेष्टं यमालोक्य हसेज्जनः।
तमत्रालम्बनं प्राहुः तच्चेष्टोद्दीपनं मतम्॥ तत्रैव ३/२१५

Rarest Archiver

सर्वानपि सुरान् परित्यज्य रुक्मिण्या श्रीकृष्णवरणे कारणमिदम् —

वेधा वैदिकमौलिरेष चपलो मन्त्रं जपन् सन्ततं
शर्वोऽसौ सुविरक्तधीः स मघवान्व्यापारभाराकुलः।
सूर्यः पर्यटनप्रियः स तु शशी दोषाकरोऽसौ स्मरः
अनङ्गश्चेत्यखिलानुपेक्ष्य कमला वव्रे यदूनां पतिम् ॥ (१६/४०)

अत्र रुक्मिण्याः हासः स्थायिभावः। सुराः आलम्बनाः। तेषां कार्यजातं जीवितक्रमः उद्दीपकौ। तत्रोपेक्षा अनुभावः। आक्षिसङ्कोचादयो व्यभिचारिणो भवन्तीति हास्यरसानुभूतिः। भूम्याः विचित्रवस्त्रायिते समुद्रे(१) कृताधिवासस्य श्रीकृष्णस्याजेयत्वे कवेरियं विनोदोक्तिश्चमत्कारावहा —

पुराऽप्यजेयो मुरजित्किलात्र पुरीं विधायाभवदत्यजेयः।
ममेत्थमाभाति कलत्रवस्त्रकृतालयं कः खलु जेतुकामः॥ (१६/५८)

अत्र, भूम्या विष्णुपत्नीत्वात् समुद्रस्य भूम्या वस्त्रतया स्वेनैव कविना वर्णितत्वात्, कलत्रवस्त्राच्छन्नं न कोऽपि जेतुमिच्छतीति पुरीनिर्माणानन्तरं, अजेयस्य मुरारेः अत्यजेयत्वमभवत्। एवमेव रु.वि. काव्ये हासोल्लासकराणि वर्णनानि बहुत्रोपलभ्यन्ते।(२)

(१) समुद्रवर्णनम् - स्वफेनकान्त्या सितपार्श्वयुग्मः शिखाभिरौर्वस्य सुपीतमध्यः।
सितेतरोऽन्यत्र स भूतधात्र्या विचित्रवस्त्रश्रियमातनोति॥ रु.वि. १६/५१

(२) रु.वि. ३/४५, ४६, ४९, ५०. १०/४६, ११/४, १२/२७. १४/१६
१६/३७, ३९ १७/३८, ४८ इत्यादयः।

भक्तिः – रु.वि. महाकाव्ये श्रीकृष्णविषया भक्तिः[1] सर्वत्र अभिव्यक्तास्ति । देवादिविषया रतिः भावत्वेन परिगणिताऽस्ति मम्मटेन[2] भगवद्विषयः भक्तिभावः अत्र एवं प्रकटितः –

कामस्तेऽङ्घ्रियुगार्चनेऽमलधियां लोभः, सुपुण्यार्जने
मात्सर्यं, चरितानुकीर्तनसुधापानान्मदः, शत्रुषु ।
क्रोधो, भक्तजनेषु राग उदयाच्छ्रीविट्ठलान्यत्र नो
यत् शत्रुर्नहि शत्रुः उच्चानिलयस्य, अन्यस्य शत्रुर्भवेत् ॥ (१०/७८)

अत्र कामक्रोधादयः भक्त्यनुकूलतया वर्णिताः । कविरयं वादिराजतीर्थः भगवद्भक्ताग्रगण्यः । दशमे सर्गे यमुनाम्बुमध्ये अक्रूरेण दृष्टस्य भगवतः विचित्ररूपस्य वर्णनं विंशतिपद्यैर्विहितम्।[3] अष्टादशे सर्गे च कवेर्भक्तिभाव एव प्रपञ्चितः येन खलु समस्तोऽपि सः सर्गः श्रीकृष्णरुक्मिण्योः आपादमौलिपर्यन्त-वर्णनेन भरितोऽभवत् । विष्णुसर्वोत्तमत्वसंस्थापकः वैष्णवसिद्धान्त-प्रतिष्ठापनाचार्यः कविवर्योऽयं काव्याभ्यासिनां मनः श्रीकृष्णप्रवणमेव करोति । श्रीकृष्णभक्तानामपि महिमा अस्मिन् काव्ये उपलभ्यते। द्वादशे सर्गे उग्रसेनमुखेन विष्णुभक्तानां वैराग्यप्रियताऽपि प्रकटिता ।[4]

---

(१) माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः ।
स्नेहो भक्तिरिति प्रोक्तः तया मुक्तिर्नचान्यथा ॥ म.भा.ता.नि.

(२) रतिर्देवादिविषया व्यभिचारी तथाऽञ्जितः। भावः प्रोक्तः, का.प्र ४।३५

(३) रु.वि १०/५०-७० (४) रु.वि. १२/२-५

इयं भक्तिः रसात्मिका भवति–नहि नहि भक्तिरस एव प्रधानो रसः अन्ये तु तदन्तर्गता एवेति गौडीयवैष्णवाचार्याणां रूपगोस्वामिप्रभृतीनां आघोषः। तन्मतानुसारेण[1] मुख्यगौणभेदेन द्विविधः भक्तिरसः। मुख्योऽपि शान्तभक्तिरसः, प्रीतिभक्तिरसः, प्रेयोभक्तिरसः, वत्सलभक्तिरसः मधुरभक्तिरसश्चेति पञ्चधा विभक्तः। गौणस्तु हास्य-अद्भुत-वीर-करुण-रौद्र-भयानक-बीभत्सभेदेन सप्तधा विभक्तः। भगवद्विषया रतिरेव स्थायिभावः। अत्र च गुणपूर्णः श्रीहरिरेव विषयालम्बनः, भक्तः आश्रयालम्बनः। तस्य सौन्दर्यप्रमुखा गुणाः, चेष्टाश्च उद्दीपनविभावा भवन्ति।

एतेषामपि उदाहरणानि रु·वि· काव्ये दृश्यन्ते। ये तु वाचकाः भगवद्भक्तिविशिष्टाः तैरत्र भक्तिरसः अनुभूयते एव। रासविलासवर्णने भक्तैर्मधुरभक्तिरसः आस्वाद्यते, अन्येषां सः सम्भोगशृङ्गार एव भवतु। न हि सर्वेऽपि रसिकाः सर्वानपि रसानास्वादयन्ति। केषाञ्चित् शृङ्गारे मनःप्रवणता भवेत्, केषाञ्चिद्वीरे, अपरेषां हास्ये, अन्येषां रौद्रे एकेषां अद्भुते वा। न हि तद्व्यतिरिक्तानामन्येषां रसानां अभावस्तन्मात्रेण भवति। यथा शान्तरसविषये विप्रतिपत्तिर्विद्यते तथा भक्तिरसविषयेऽपि विद्योतते। अथवा, भावो वा भवतु रसो वा भवतु भक्तिः, भक्तिप्रतिपादनं तु रु·वि· महाकाव्ये आचूलमूलं जरीजृम्भते।

(१) रूपगोस्वामिविरचित हरिभक्तिरसामृतसिन्धुः, दक्षिणविभागे ५।९६,९७.

अष्टमोऽध्यायः   कवेः शैली

मृदुसरसकवेः पुरः किमीड्या कठिणपदप्रियकाव्यकारशीला - (रु.वि. ११।६४)
श्रीकृष्णचाणूरयोः मल्लयुद्धप्रसङ्गे इयमुक्तिरुक्ता श्रीवादिराजस्य।
अशनिसदृशस्य चाणूरमल्लस्य हस्तघातः हरेर्मृदुनि कलेवरे
निष्फलोऽभूदित्यस्मिन् विषये[1] निदर्शनतया मृदुसरसकवेः कठिण-
पदप्रियकवेश्च वृत्तान्तो ह्यभिहितः । अनेनास्य कविवरस्य
मृदु सरस कविता पोषकत्वं सूचितम् । द्वारकावर्णने च—
काव्योचितश्लोकमपेक्षमाणा विचारयन्तीह पदे पदेऽर्थान् ।
विद्वज्जनानन्दकरान् मनोज्ञा बुधा वदान्याश्च पुरे मुरारेः॥ (७।४०)
काव्योचितं यशः अपेक्षमाणा वदान्याः क्षणे क्षणे धन-
कनकाद्यर्थान् अस्मिन् पुरे विचारयन्ति। कवयश्च अस्यां पुर्यां
काव्ये योग्यानि पद्यानि अपेक्षमाणाः सन्तः श्रोतृविद्वज्जनानां
आनन्दकरान् अर्थान् - अभिधेयान् शब्दे शब्दे विचारयन्ति ।
अत्र च पदे पदे विद्वज्जनानन्दकरार्थवत्त्वं काव्यश्लोकेषु
महत्वं भजते इति सूचितं कविना ।

रु.वि. काव्यस्य विषयप्रतिपादनशैली कथा-
वर्णनप्रणाली च रसस्यन्दिन्यौ वर्तेते। व्याख्यां विनापि
वाचकानां अर्थस्फूर्तिर्भवतीति प्रसादशीला श्रीवादिराजवाणी।
मृदुमधुरपदावलीसंशोभितेयं रु.वि.काव्यसरणिः सहृदयानां

(१) अशनिसमकठोरमल्लघातो मृदुनि हरेरफलः कलेवरेऽभूत् ॥ ११।६४

Rarest Archiver

मनोहारिणी चमत्कारिणी च ।

ऐतिहासिकतया कविरसौ वादिराजतीर्थः विद्वत्कविभ्यः भारवि- माघ- श्रीहर्षादिभ्यः अनन्तरमेव संस्कृतसाहित्य- साम्राज्ये सन्दृष्टोऽपि तेषां वैदुष्यैकप्रदर्शनपरां बहुशः कठिणपदप्रियां व्याख्यागम्यार्थशालिनीं प्रणालीं नानुससार । स्वयं प्रकाण्डपाण्डित्यप्रचुरः स्वसिद्धान्तप्रतिष्ठापनपरः सन् प्रौढशास्त्रीयप्रबन्धप्रणेताऽपि श्रीवादिराजतीर्थः स्ववाक्संयमं प्रदर्शयन् रु.वि.काव्ये विराजते ।

श्रीवादिराजस्य शैली वैदर्भीशैली । माधुर्यव्यञ्जकपदैः समेता प्रसादगुणभूषिता च । ओजः-प्रसाद- श्लेष-समता - समाधि-माधुर्य- सौकुमार्य-उदारता- अर्थव्यक्ति कान्तयः बन्धगुणाः[1] समग्रतया वर्तन्ते इति वैदर्भीरीतिः हृदयाह्लादिनी भवति । अयमेको दृष्टान्तः —

स्वामिन् विट्ठल सज्जनश्वशुरतः प्राप्तां दिगन्ताम्बरां
उत्क्रान्तावपि योगिनीं मननसज्ज्ञानादिभिर्भूषिताम् ।
मोक्षापत्यवतीं विरक्तिरमणीं सान्निध्यतोऽहर्निशं
कालो गच्छतु नान्यथा कुरु तदा कामो यदालम्बते ॥(रु.वि. १०।८०)

अक्रूरकृतप्रार्थनात्मकोऽयं श्लोकः ओजःप्रसादादिगुणगुम्फितः । तथा हि -

(१) ओजःप्रसादश्लेषसमतासमाधिमाधुर्यसौकुमार्योदार्यार्थव्यक्ति - कान्तयो बन्धगुणाः ॥ काव्यालङ्कारसूत्राणि ३-१-४

समग्रगुणा वैदर्भी । तत्रैव १-२-११.

Rarest Archiver

ओजःप्रसादादिगुणानां श्लोकेऽस्मिन्समन्वयः —

(१) स्वामिन् विट्ठल सज्जनश्चतुरतः

अत्र बन्धस्य गाढत्वात् ओजो गुणो वर्तते। गाढबन्धत्वं ओजः।[1] विट्ठल सज्जन इत्यत्र गाढबन्धत्वहेतुभूत-संयुक्ताक्षरसद्भावात् ओजोगुणः। सज्जनश्चतुरतः इत्यत्र गाढबन्धानन्तरं बन्धस्य शैथिल्यं[2] वर्तते इति ओजोगुणेन सम्प्लवात् प्रसादः।

संश्लिष्यतोऽहर्निशम्

अत्र मसृणतायाः कारणात् श्लेषगुणो भाति। मसृणत्वं श्लेषः।[3] अत्र सर्वत्र गच्छतु कुरु आलम्बते इति कर्तरि प्रयोगात् प्राप्तां इत्यादिषु च कर्मकारकप्रयोगात् एकमार्गत्वात् मार्गाभेदरूप समता वर्तते।[4]

नान्यथा कुरु तदा — अत्र 'आरोहावरोहक्रमः समाधिः'[5] अस्ति। नान्यथा इत्यत्र आरोहः, कुरु तदा इति च अवरोहः।

---

(१) काव्यालङ्कारसूत्राणि ३-१-५

(२) शैथिल्यं प्रसादः -तत्रैव ३-१-६

(३) तत्रैव ३-१-११ मसृणत्वं नाम यस्मिन् सति बहून्यपि पदानि एकवद्भासन्ते - तद्वृत्तिः

(४) तत्रैव ३-१-१२ येन मार्गेणोपक्रमः तस्यात्यागः।

(५) तत्रैव ३-१-१३

कामो यदालम्बते ।

अत्र समासाभावान्माधुर्यगुणो वर्तते (1)

दिगन्ताम्बराम् ।

अत्र बन्धस्य श्रुतिसुखत्वात् सौकुमार्यगुणयोगोऽस्ति (2)

मननसज्ज्ञानादिभिर्भूषिताम् ।

अत्र बन्धस्य विकटत्वात् (3) उदारता वर्तते । बन्धस्य विकटत्वं नाम तादृशशब्दश्रवणेन जनस्य पदानि नृत्यन्तीव भासन्ते । अस्य पद्यस्य झटित्यर्थप्रतिपत्तिर्भवतीति अर्थव्यक्तिः दृश्यते । (4) अस्मिन् पद्ये सर्वाणि पदानि उज्ज्वलानीति कान्तिगुणोऽपि (5) विद्यते । औज्ज्वल्यरूपकान्त्यभावे तु पुराणच्छाया भवति ।

इत्थमस्मिन् पद्ये वामनोक्तानां सर्वेषां बन्धगुणानां सत्त्वात् वैदर्भीशैल्याः उत्कृष्टं उदाहरणं भवति । एतत्सदृशानि च पद्यानि समग्रे काव्ये समुपलभ्यन्ते ।

---

(1) पृथक्पदत्वं माधुर्यम् । तत्रैव ३-१-२१ समासदैर्घ्यनिवृत्तिपरं चैतत् — तद्वृत्तिः ।

(2) अजरठत्वं सौकुमार्यम् । तत्रैव ३-१-२२ बन्धस्य अजरठत्वं कोमलत्वं श्रुतिसुखत्वमिति यावत् — तद्व्याख्या कामधेनुः ।

(3) विकटत्वमुदारता । तत्रैव ३-१-२३ लीलायमानत्वमित्यर्थः — तद्वृत्तिः ।

(4) यत्र झटित्यर्थप्रतिपत्तिहेतुत्वं स गुणः अर्थव्यक्तिः तत्रैव ३-१-२४ वृत्तिः ।

(5) औज्ज्वल्यं कान्तिः । तत्रैव ३-१-२५

Rarest Archiver

इमे च दशगुणाः विश्वनाथेन माधुर्य-ओजस्-प्रसादः इत्येतेषु त्रिष्वेवान्तर्भाविताः।[1] तेन च वैदर्भी रीतिः एवं लक्षिता - माधुर्यव्यञ्जकैर्वर्णैः रचना ललितात्मिका।

अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ॥[2]

माधुर्यव्यञ्जकैर्वर्णैरुपेता ललितार्थाभिधायिका असमासा अल्पसमासा वा रीतिः वैदर्भीरीतिः। पूर्वोक्तप्रकारेण च एतादृशी वैदर्भीरीतिः रु॰वि॰काव्ये सर्वत्रोपलभ्यते।

रङ्गत्तरङ्गचयसङ्गतवायुना त्वं
माङ्गल्यदा किल समीपकृतालयानाम्।
भृङ्गारिवान्तिकवने तव सञ्चरन्तीः
सङ्गीतकृष्णचरिताः किमुपेक्षसे नः ॥ (७।२६)

श्रीकृष्णवियुक्ताः व्रजाङ्गनाः कालिन्दीं प्रार्थयन्तेऽस्मिन् पद्ये। अत्र माधुर्यव्यञ्जकाः[3] ङ्ग, न्त, ञ्च इति वर्णाः विद्यन्ते इति अल्पवृत्तिश्च इयमिति वैदर्भीरीतिः।

अयं च वादिराजमार्गस्य विशेषः यत् सर्वत्रापि प्रसादगुणः शोभते इति। स च गुणः अनलः शुष्केन्धनमिव

(१) गुणा माधुर्यमोजोऽथ प्रसाद इति ते त्रिधा। सा॰द॰ ८।१

(२) तत्रैव ९।२

(३) मूर्ध्नि वर्गान्तवर्णेन युक्ताः टठडढान् विना।
रणौ लघू च तद्व्यक्तौ वर्णाः कारणतां गताः॥ तत्रैव ८।२

चित्तं क्षिप्रं व्याप्नोतीति विश्वनाथेन निरूपितम्।[1] सम्पूर्णमेव रु॰वि॰महाकाव्यं प्रसादगुणशोभितमिति पृथक् स्पष्टीकरणं न खलु अपेक्ष्यते। अथापि कानिचिदुदाह्रियन्ते —

स लब्धजन्मा मधुराख्यपुर्यां व्रजेऽभिवृद्धः कतिचिद्दिनानि।
उपेत्य वृन्दावनमेष कृष्णः त्रिधामतां दर्शयतीव देवः॥ (४।२२)

वियुक्तनारीमुखपङ्कपुञ्जैः सहाम्बुजातं शिथिलं वितन्वन्
प्रबोधकल्पं रविमल्पकान्तिं विधाय हेमन्त उपाजगाम॥ (५।४०)

वृन्दारण्यनिकुञ्जमन्दिरगतं मन्दानिलैर्वीजितं
चन्द्रामन्दकरेण सेवितपदं कन्दर्पतातं निशि।
मन्दारादिलसत्प्रसूननिचयैर्वृन्दारकप्रेषितैः
सन्दृश्य प्रियवर्त्म गोपललनावृन्दं शनैः पद्यते॥ (९।५६)

सर्वत्राप्यत्र सुलभतयाऽर्थबोधो भवतीति सहृदयाः प्रमाणम्।

रु॰वि॰काव्ये पाण्डित्यस्य प्रतिभायाश्च सुन्दरं सम्मेलनं दृश्यते। अत एवास्य काव्यस्य शास्त्रकाव्यत्वं युक्तं भवति। पाण्डित्यप्रसादयोः सामानाधिकरण्यमत्र साधु शोभते इति कवेः शैल्याः वैशिष्ट्यान्तरमेतत्।

तत्र तत्र क्लिष्टार्थप्रतिपादकानां शब्दानां प्रयोगाः वादिराजस्य अन्यद् वैशिष्ट्यम्। यत्र यत्रावसरो लभ्यते

(१) चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः।
स प्रसादः समस्तेषु रसेषु रचनासु च॥ सा॰द॰ ८।७

तत्र तत्र द्व्यर्था अभिधीयन्ते एव । अस्य च श्लिष्टपदयोगस्य परमोत्कर्षः सप्तदशे सर्गे उपलभ्यते । तत्र चतुर्विंशतिपद्यैः एकार्थेन श्रीकृष्णवर्णनं, एकार्थेन च मत्स्यकूर्माद्यवताराणां वर्णनं विलसति ।

कमलासनाद्य भवतोऽभवतो महतीन्दिरा किल तया नतया ।
तरुवद् भवान् परिवृतोऽरिवृतोदयदाव सेदमनु ते मनुते ॥(८।२९)
करणपालनशील नते स्थितिं जलजनाभ वदन्ति कमाश्रिताः ।
विदुरमी वरदामधरोदर प्रियजुषो यजुषोऽखिललीनिव ॥(१७।१२)

अनयोः पद्ययोः नानार्थाः स्वयं वादिराजेन 'उपन्यासरत्नमालायां' प्रदत्ताः। (परिशिष्टे द्रष्टव्याः)

वृत्त्यनुप्रासान्त्यानुप्रासप्राचुर्यं काव्यस्यास्य (१) अन्यो गुणः। अर्थालङ्कारेषु उत्प्रेक्षा कवेः कल्पनाविलासं दर्शयति। अस्य च विस्तारश्चतुर्थेऽध्याये कृतः।

---

(१) कवेरस्य शब्दालङ्कारवैभवं शास्त्रग्रन्थेषु स्तोत्रग्रन्थेष्वपि दृश्यते। युक्तिमल्लिकायां द्वितीयश्लोकोऽयं वेदव्यासवन्दनात्मकः —

पारं भवाख्यजलधेर्भुवनैकसारं स्वैरं कृतोरुविधवेदमतप्रचारम् ।
आराधितामरगणं सुरुचिच्छरीरं धीरं स्मरामि हृदि सत्यवतीकुमारम् ।

दशावतारस्तुतौ श्रीकृष्णावतारवर्णनात्मकं द्वादशप्रासभूषितं पद्यमेकम् -

वृन्दावनस्थपशुवृन्दावनं विनतवृन्दारकैकशरणं
नन्दात्मजं निहतनिन्दाकृदासुरजनं दामबद्धजठरम् ।
वन्दामहे वयममन्दावदातरुचिमन्दाक्षकारिवदनं
कुन्दालिदन्तमुत कन्दासितप्रभतनुं दावराक्षसहरम् ॥

Rarest Archiver

समासभूयिष्ठा ओजोगुणोपेता गौडीरीतिरपि[1] रु·वि·का०ये क्वचित उपलभ्यते -

हयास्यनासापुटजातवात विघातधूताघपलालजात: ।
मुनीशवागीशसुत: सुरम्यां हरे: कथां शंसति वादिराज: ॥ (१।८)

अत्र प्रथमद्वितीयपादे पुट घात धूत अघ इत्येतेषु ओज:प्रकाशका:[2] वर्णा वर्तन्ते इति गौडीरीतेरुदाहरणम् ।[3]

इत्थं साध्वससन्दिग्धबुद्धिर्निद्रां न सोध्यगात ।लब्धनिद्रोऽपि दुस्स्वप्नै: स्पर्धोनद्धो व्यबोध्यत ।(११।२८) कृष्णभीतकंसवर्णनात्मिदं गौडीरीतेरुदाहरणं भवति ।

पाञ्चालीरीते: पद्यान्यपि रु·वि·का०ये नोपलभ्यन्ते इति न । इदं तावदस्तिमद्-

नालीकागारभारत्रिपुरहरमुखै: गीयमानाऽम्बरस्थै:
मालालङ्कारकान्त्या विघटितहृदयग्रन्थिरिन्दीवराभा ।
कालिन्दीतीरसंस्था करधृतमुरली कामिनीकेलिलोला
लीलापाङ्गावलोका लसतु मम हृदि प्रेयसी देवता सा ॥ (९।३१)

ओज:कान्तिसमन्वितत्वादयं श्लोक: पाञ्चालीप्रणालीं भजते ।

---

(१) ओज:प्रकाशकैर्वर्णै: बन्ध आडम्बर: पुन: ।
समासबहुला गौडी . . ॥ सा·द ९।३

(२) वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ ।
उपर्यधो द्वयोर्वा सरेफौ टठडढै: सह ।
शकारश्च षकारश्च तस्य व्यञ्जकतां गता: ॥ सा·द ८।५-६

(३) उदाहरणान्तराणि – ९।२०, १०।४४, १८।४५, १९।३६

वादिराजतीर्थस्य अन्यद् वैलक्षण्यं नाम शृङ्गारेण वैराग्यभावप्रतिपादनम् । रु॰वि॰ महाकाव्ये अस्य नैकानि उदाहरणानि उपलभ्यन्ते । इदं तावत् श्रीकृष्णेन गोपाङ्गनाभिः कृतस्य रासविलासस्य वर्णनमुखेन कवेः प्रार्थना –

यस्मिन्नुद्यति नागकेकिनकुला फेरुण्डसिंहद्विपाः
गोशार्दूलमृगाः किरातविहगाः वैरं विसृज्यं स्फुटम् ।
मित्रामित्रकलत्रपुत्रनिरसाः तस्थुः समं बद्धिभून्
तद्वृन्दावनरासमण्डलमहः स्वान्तस्थितान्कृन्ततु ॥(९।११)

अत्र हि रासोत्सववर्णने गोशार्दूलादीनामपि सहजवैरादित्यागकथनेन कवेः विलक्षणा वर्णनप्रणाली व्यक्ता । रासोत्सवस्मरणलालसमानसानां पुंसां संसारबन्धः नश्यतीति नाश्चर्यमिति कविः कैमुत्यन्यायेन स्थापयति –

रासोत्सवस्मरणलालसमानसानां
नासह्यबन्धमिह मोचयतीत्यपूर्वम् ।
यत्केशपक्षकुचकञ्चुकरम्यनीवी-
बन्धं स विश्लथयते व्रजवल्लवीनाम् ॥(९।१८)

अत्र व्रजवल्लवीनां केशपक्षबन्धस्य कुचकञ्चुकबन्धस्य रम्यनीवीबन्धस्य च विश्लथनसमर्थस्य रासोत्सवस्य स्वस्मरणासक्तजनानां एकस्यैव संसारबन्धस्य मोचकत्वं नाश्चर्यकरमिति कविः चमत्कारेण समर्थयते । संयमिकुल

Rarest Archive

सार्वभौमस्यास्य श्रीवादिराजस्य कृतौ एतादृशवैराग्यप्रतिपादक पद्यसमूहानां[1] सम्भवः नाश्चर्यकरः। अत एव च श्रीकृष्णभक्ति भूषिताश्च श्लोकाः रु. वि काव्ये शतशः-सहस्रशः दृष्टिपथमायान्ति।[2]

क्वचिच्च वादिराजस्य सरस्वती सम्भाषणमयी विद्योतते। तत्र च कवेः चातुर्यं प्रतिवादिमूकीभावकरण-कौशल्यं प्रदर्शितम्।[3] श्रीकृष्णस्य मनुष्यादिवत उत्पत्तिः नास्ति किन्तु अवतारः आविर्भाव एवेत्ययं विषयः एवं प्रतिपादितः —

जानाति माता परमात्मजातं नूनं पिताऽपि क्वचिदेव लोके।
ताभ्यामनङ्गीकृतकृष्णजन्म को वा पुमान् साधयितुं समर्थः॥ (१।५०)

माता।पितृभ्यामेव 'अयं नास्मकं पुत्रः' इत्युक्ते को वा अन्यः तस्य तत्पुत्रत्वं साधयेत। अनया च प्रणाल्या वादिराजस्य वादपटुत्वं स्वसिद्धान्तसंस्थापनप्रावीण्यं च सूचितं भवति।

आनन्दादिप्रकाशनप्रसङ्गेषु कविरयं क्रियापदमालां वा कृदन्तसमूहं वा प्रयुङ्क्ते।[4]

---

(१) रु.वि. ८।४६, ३।३८, ४१, ५८. १०।४४, ८०, १३।२५

(२) रु.वि. ३।१७, २०-२५, ३१, ६२, ६४, ४।१. १०।५०-७० १२।१०, १२ इत्यादयः

(३) रु.वि. १।५०-५४. २।४२-५३. ११।१८-२७ ११।३०-३२ १३।१६-२४

(४) रु.वि. ६।४७, १०।१४, २४, ४६

Rarest Archiver

श्रीवादिराजतीर्थः आलङ्कारिकप्रक्रियाणां अतीव निश्चिततया अनुसारी न वर्तते। अत एव छन्दोबन्धनेषु, सर्गे सर्गे नानावृत्तानि प्रयुक्तानि। सर्गान्तभागे भिन्नवृत्तानि अन्यत्र एकमेव वृत्तं इति तु काव्येऽस्मिन् नैव वर्तते।

उक्तिप्रयुक्ति-चातुर्यविशिष्टानां वाकोवाक्यालङ्काराणां प्रयोगाः रु॰वि॰ काव्ये बहवः चमत्कारावहाः वर्तन्ते।(1)

समस्यापूर्तिवैचित्र्यमपि कविरयं वादिराजः रु॰वि॰ काव्ये प्रदर्शितवानास्ति।(2)

वर्णनीयतादात्म्यापत्तिः भक्तकवेः अस्य अन्यद् वैशिष्ट्यम्। रासोत्सववर्णनावसरस्थं एकं पद्यमिदम् –

बर्हीं तर्हि ननर्त यं प्रति नगाः पुष्पं समर्प्यार्चयन्
स्वैरं मञ्जुरवा जगुर्मधुकराः प्रेक्षन्त साक्षान्मृगाः।
उत्क्षिप्तोच्चफणाः फणीश्वरगणाः कम्प्रेन यं पर्यगुः
सोऽयं श्रीरमणो मया रचितया प्रीणातु देवोऽर्चया॥(९।१७)

अत्र रासास्थितं हरिं वर्णयन् कविः स्वस्यापि काव्यरचनारूपया सेवता प्रीणातु इति बर्ह्यादिभिः साकं स्वयमपि आनन्दमावहति।(3)

(१) रु॰वि॰ २/१२,१३,४०,४१,४२ ५/४८-६/६२ ७/४३, ९/२६, ६२ इत्यादयः।

(२) न प्राग्व्ययुङ्क्त न वियोक्ष्यति नो वियुङ्क्ते।१८/४७

अस्ति स्तः सन्ति लक्ष्म्याः कुचकलशतटे नास्ति नास्तो न सन्ति।१९।६

(३) एतादृशश्लोकान्तराणि - ९।१६, २०, २४, ५५, ६२, १२/१०, १२, १८/५४

अच्युतशब्दः साभिप्रायं नैकवारं प्रयुक्तोऽस्ति (४/४७, १३/३८, १४/४४ १६/३९) विष्णुपदपदं आकाशार्थे मुरारिपादार्थे च अनेकशः प्रयुक्तोऽवलोक्यते।[1] तथैव करशब्दः श्लेषेण हस्तार्थे तथा बलिरूपार्थे पौनःपुन्येन उपयुक्तो दृश्यते।[2] मरणार्थाः शब्दाः क्वचिदेव प्रयुज्यन्ते। तद्वर्णनावसरे यमातिथिः (१/५५) अन्तिकागतयमानुचरः (१४/४०) अन्धं तमो गतः (११/६२) इत्यादिभिः शब्दान्तरैरेव मरणावस्था निरूपिता।[3] अज-अजनि शब्दौ च श्रीकृष्णार्थे तत्र तत्र उपयुक्तौ वर्तेते (७/५६, ५/२०, २४, २८, १७/२ इत्यादिषु। शब्दचित्रप्रदानेऽपि कविरयं सिद्धहस्तः (२/२९-३१ १०/५०-७०, ९/२७ १६/३६). रु. वि. काव्ये कर्णाटेषु अधुनापि प्रयुज्यमानानां न्यायोक्त्यादीनां प्रयोगः क्वचिद् दृश्यते- करस्थदेवस्य कुतोऽन्तरायः (१/५९) इत्यादिषु।[4] शब्दचमत्कारेणैव क्वचित अर्थाः प्रतिपाद्यन्ते रु. वि. काव्ये। अत्रापि स्वकीयमेव वैशिष्ट्यं वादिराजस्य प्रदर्शितं भवति। यथा द्वादशे सर्गे राजनीति-प्रतिपादनावसरे —

---

(१) रु. वि. २/१०, १५, २३, ६७, ३/५, ५/३१, ३४, ६/२६, १३/३१

(२) रु. वि. १०/८, १५, ११/९, १८/३३

(३) रु. वि. ८/८

(४) न केवलं कर्णाटभाषायां अन्यास्वपि भारतीयभाषासु भवेयुः।

(५) रु. वि. ५/२८, १/५०, ५/८ १४/१६, १७/५८

उत्साहसङ्गता नीतिः सूते नरवरोचितौ ।
कीर्तिप्रतापौ राजेन्द्र नालस्यं प्रतीपकृत् ॥(१२।६४)

उत्साहेन सङ्गता नीतिः कीर्तिप्रतापौ सूते आलस्येन सङ्गता न सूते इति वर्णने लिङ्गचमत्कारेण अर्थः पोषितः । अत्र उत्साहः पुल्लिङ्गशब्दः । नीतिः स्त्रीलिङ्गशब्दः । आलस्यं च नपुंसकलिङ्गशब्दः । नपुंसकसङ्गतायाः स्त्रियः अपत्योत्पादनं यथाऽसम्भावितं तथा आलस्येन नीतिर्व्यर्था भवतीति सूचितम् । कीर्ति-प्रतापशब्दप्रयोगेण च कन्या-पुत्रोत्पत्तिः अभिहिता भवति । अन्यथायं दृष्टान्तः -

विषयेषूपभुक्तेषु तृतीयांशोऽस्य जीर्यते ।
शिष्टं तु विषसारूप्यात् कष्टाय परिकल्पते ॥(१२।६८)

उपभुक्तेषु विषयेषु तृतीयः अंशः अस्य जीर्णो भवति । शिष्टं - "विषयः" इत्यत्र तृतीयांशेन यकारेण वर्जितं विषसारूप्यं भजते इति शब्द-चमत्कारेणैव विषयप्रतिपादनम् ।

सरसेऽस्मिन् रु.वि.काव्ये चक्रबन्ध-पद्मबन्ध-यमकादयः ये वर्तन्ते तेनास्य कवेः काले जनानां पाण्डित्याभिरुचिः व्यक्ता भवति । शास्त्रकाव्येऽपि अस्मिन् कविः कवित्वं विहाय केवलं मतप्रक्रिया-प्रचारकः न भवति । शास्त्रीयप्रक्रियाप्रतिष्ठापनाय रचितनैकग्रन्थान्तरः कविः काव्यमार्गमेवात्र पोषितवानस्ति ।

—x—

Rarest Archive

Chapter-9

नवमोऽध्यायः कवेर्वैदुष्यम् वेदवेदाङ्गानि

श्रीवादिराजतीर्थः वादकोविदः सिद्धान्तप्रतिष्ठापनाचार्यः प्रौढशास्त्रीयप्रबन्धप्रणेता चेति पूर्वं कविपरिचयात्मकेऽध्याये अस्त्येव निरूपितम्। नानाशास्त्रवैदुष्यपरिपाकपरिबृंहितानि तद्वचांसि भान्ति। श्रीवादिराजतीर्थः शास्त्रकविः। त्रिधापि शास्त्रकविः। येन खलु शास्त्रं निर्मितं, शास्त्रे काव्यं विहितं, काव्ये च शास्त्रार्थः निधत्तः।[1] शास्त्रार्थपरिचयं विना शब्दजालमात्रेण काव्यनिर्माता विद्वत्सदसि पृष्टश्चेत्कष्टं भजते इति क्षेमेन्द्रः स्पष्टीकृतवानेव।[2] काव्यनिर्माणे प्रतिभया सह व्युत्पत्तिरपि अपेक्ष्यते। राजशेखरस्तु श्रुति-स्मृति-इतिहास-पुराण-प्रमाणविद्या-समयविद्या-राजसिद्धान्तत्रयी-लोक-विरचना-प्रकीर्णकैः सार्धं उचितसंयोग-योक्तृसंयोग-उत्पाद्यसंयोग-संयोगविकरणान् मेलयित्वा षोडश काव्यार्थहेतून् निजगाद।[3] एवं मम्मटोऽपि शक्तिः निपुणता अभ्यासः इत्येतेषां समुदितानां काव्योद्भवहेतुत्वं न्यरूरुपत्।[4]

---

(1) तत्र त्रिधा शास्त्रकविः। यः शास्त्रं विधत्ते, यश्च शास्त्रे काव्यं संविधत्ते, योऽपि काव्ये शास्त्रार्थं निधत्ते। राजशेखरकृतकाव्यमीमांसा, पञ्चमोऽध्यायः।

(2) न हि परिचयहीनः केवले काव्यकष्टे
कुकविरभिनिविष्टः स्पष्टशब्दप्रविष्टः।
विबुधसदसि पृष्टः क्लिष्टधीर्वीति वक्तुं
नव इव नगरान्तर्गह्वरे कोऽप्यधृष्टः॥ कविकण्ठाभरण पञ्चमसन्धिः।

(3) काव्यमीमांसा अष्टमोऽध्यायः।

(4) शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्
काव्यज्ञशिक्षयाऽभ्यासः इति हेतुस्तदुद्भवे॥ का.प्र. 1।3

रु॰वि॰महाकाव्ये वादिराजतीर्थस्य बहुमुखं पाण्डित्यं अभिव्यक्तं वर्तते। स्वयमेव कविरयं काव्यान्ते विद्वद्भिः खलु इदं काव्यं विभाव्यमिति स्पष्टीचकार।[1]

<u>वेदवेदाङ्गानि</u> – वेदाः अपौरुषेयाः सनातनाश्च (२/५२). श्रुतिः (१/१५, २/४९, ४/७९, ६/६२, १०/४१, १२/२२, २७, १३/५१, ५२, १५/३) वेदः (१/५८, २/५२, ७/५७, १०/२९, ४९, १६/२) आम्नायः (१२/४५, १४/३१) आगमः (१३/४६, १७/१५) निगमः (७/४२, ८/३०) छन्दः (१३/६१) इत्येतैः शब्दैरभिहितोऽस्त्यत्र वेदः। वेदाः ऋग्यजुः-सामाथर्वभेदेन चतुर्विधाः। रु॰वि॰काव्ये आद्यत्रयाणां उल्लेखो दृश्यते।[2] वेदानां नानाशाखोर्जितत्वं १/२२ पद्ये निरूपितम्।

काव्यस्य प्रथमे एव मङ्गलाचरणपद्ये वेदान्तानां[3] अचलत्वेन वर्णनमस्ति। क्षीरसमुद्रतीरे पद्मासनः पुरुषसूक्तेन (ऋ॰सं॰ १०/९१) हरिं तुष्टाव, सहस्रकार्येषु स समर्थ इति ज्ञापयितुमिव।[4]

---

(१) तद्व्यासानुगवादिराजरचितं काव्यं विभाव्यं बुधैः। रु॰वि॰ १९/३८

(२) ऋग्वेद - ९/१२ यजुर्वेदः - १७/१२ सामवेदः - ८/४, १४/३९

(३) श्रीवेदान्तमहाचलं हि परितः संयोज्य सूत्राहिपम्। १/१.
अनित्यत्वलक्षण-चलनाभावात् आरण्यकत्वाद्वा वेदान्तानां महाचलत्वोक्तिः — तद्व्याख्या।

(४) सहस्रकार्येषु भवान् समर्थः सहस्रनेत्राननपाणिपादः।
इतीव विज्ञापयितुं विरिञ्चिः स्तुतिं स पुंसूक्तगतां ततान॥ १/२१

Rarest Archiver

श्रीहरिः जन्मादिरहितः। श्रुतिसिद्धं[1] तज्जन्मादिरहितत्वं अस्मिन्काव्ये अजः, अजनिः, अजन्मा इत्यादिभिः पदैः[2] अभिहितमस्ति। ब्रह्मज्ञानादेव मोक्षः भवति न मार्गान्तरेणेति श्रुतिर्वक्ति[3]। अयमभिप्रायः श्रीकृष्णावतारानन्तरं कारागारे देवकीवसुदेवयोः निगडबन्धहरणे प्राकटितोऽस्ति। (१।४५) ज्ञानमार्ग एव श्रुत्यभिप्रेतमार्गः (२।४९) यदीयरूपं यः प्रकटीकरोति स तस्य पिता इति वेदवादः।[4] अयं सिद्धान्तः वसुदेवस्य, अप्राकृतशिशोः कृष्णस्य पितृत्वस्थापनाय उपयुक्तो वर्तते। (१।४८)। उपनिषत्सु च जडानां जलादीनां वक्तृत्वं[5] अभिहितम्। तत्र च ब्रह्मसूत्रनिर्णयानुसारेण अभिमानिनीनां देवतानां परिग्रहः[6]। अस्य च जडादीनां वक्तृत्वनिराकरणस्य प्रसक्तिः रु॰वि॰काव्ये भक्त्यैव मुक्तिः न द्वेषतः इति विषयस्य समर्थने द्वितीय सर्गे वर्तते। यथा आपोऽब्रुवन् (श॰प॰ब्रा॰ ६.१.३.२) इत्यादिषु

---

(१) न जायते म्रियते वा कदाचित् (कठ॰ २।१८)

(२) रु॰वि॰ १।४४, २।२७, २९ इत्यादयः

(३) नान्यः पन्थाः अयनाय विद्यते - श्वेताश्वतरोपनिषत् ३।८

(४) कविर्यः पुत्रः स इमा चिकेत यस्ता विजानात्स पितुष्पितासत् (ऋ॰ १.१६४.१६) कविः सर्वज्ञः यः पुत्रः चतुर्मुखः स एव विश्वमकरोत्। यस्ताः विष्णोर्मूर्तीः व्यजानात् विज्ञापयामास। अत एव चतुर्मुखः पितुः स्वपितुः विष्णोः पिता असत् आसीत्। - रु॰वि॰ १।४८ म श्लोकस्य व्याख्या

(५) तत्तेज ऐक्षत (छा॰ ६-२-३) ता आपः ऐक्षन्त (छा॰ ६-२-४). मृदब्रवीत (श॰प॰ब्रा॰ ६.१.३.४)

(६) अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ब्र॰सू॰ २-१-५

Rarest Archiver

सनातनवेदवाक्येषु जडानां जलादीनां चेतनव्यापारः नोच्यते तथा भागवतोक्तं कंस-पूतना-शिशुपालानां मोक्षः तद्भक्तसज्जीनपर इति प्रमाणान्तरैः निर्णेतव्यमिति स्पष्टीकृतम् । (१) (२।५२)

सृष्टिकाले यत् यस्मादुत्पद्यते प्रलये च तत् तस्मिन् लीयते । वायोः आकाशाज्जातत्वात् (२) वायुः आकाशे लीयते । तृणावर्तासुरः यदा वायुरूपेण आगतः श्रीकृष्णं आकाशं निनाय तदा कवेरियमुत्प्रेक्षा यत् वायुरूपः सः स्वनाशयोग्यस्थलस्य काङ्क्षया इव कृष्णं आकाशं नीतवानिति । (३।१)

निद्रावस्था प्राज्ञनामकपरमात्मालिङ्गनरूपा । अस्याश्चावस्थायाः मनोहारि निरूपणं यशोदाकृष्णसंवादे उपलभ्यते । निद्रामाश्रयितुं यशोदा कृष्णं वक्ति । निद्रानाम का इति तेन पृष्टा सा "निमीलिताक्षयुगलः प्राज्ञं यदालिङ्गति" इत्याह । (३) श्रीकृष्णस्तु तदा स्वात्मानमेवालिङ्गितवान् !

---

(१) आपोऽब्रुवन्निति सनातनवेदवाक्यात्किं चक्लृता जडजलस्य तथा शुकोक्तौ ।
कंसादिमोक्षवचनान्यपि युक्तियुक्तमानान्तरोदितमनोमधुरार्थभाञ्जि ॥ कृ॰वि २।५२

(२) आकाशाद्वायुः वायोरग्निः अग्नेरापः ...... तैत्तरीयोपनिषत् ब्रह्मवल्ली १.

(३) निद्रामाश्रय किं तदाश्रयफलं भुक्तां व्रजेज्जीर्णतां
निद्रा काम्ब निमीलिताक्षयुगलः प्राज्ञं यदालिङ्गति ।
अस्त्वेवं त्विति मुद्रिताक्षनयनः स्वाङ्गं समालिङ्ग्य त-
त्सर्वं जीर्णमथो दिशेति जननीं शंसन्निजं सोऽवतात् ॥ (३।१२)

Rarest Archiver

परमात्मा विश्वतश्चक्षुः विश्वतो मुखः विश्वतो बाहुर्वर्तते।[1] एतत्प्रमेयं श्रीकृष्णस्य बाललीलासु युद्धे च स्मारितं अस्ति। क्षीरादि-चौर्यकाले श्रीकृष्णः क्वचित्करेणैव पश्यति स्म क्वचिच्च पादेन, समागताश्च गोपाङ्गनाः पृष्ठतः। इत्थं सः विश्वतश्चक्षुरिवाभवत्।[2] युद्धे च हस्तेन शार्ङ्गं बिभ्रन्, निषङ्गात् शरान् आददानः, मुहुर्ज्यां विकर्षन्, मार्गणैश्च रिपून् पूरयन्, शङ्खं रणयन् नतानां अभयं तन्वंश्च श्रीहरिः विश्वतः पाणितां स्वां प्रथयति स्म।[3]

परमात्मनः चक्षुषोः सूर्यचन्द्रमसौ वर्तेते।[4] इति श्रुत्युक्तम्। श्रीकृष्णस्य नयनयोः सूर्यचन्द्रत्वं श्रीवादिराजतीर्थः उत्प्रेक्षया उपमया च वर्णितवान्। श्रीकृष्णस्य दध्यादि-चौर्यनिवेदने गोप्यः यशोदां प्रति वदन्ति यत् "अन्धकारेऽपि अयं तव बालः क्षीरादिपात्रं स्वभास्वन्नयनात् लक्ष्म्या निरीक्षते एव। देवि, अस्य लोचनयोः

---

(१) विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतःपात् - ऋ. १०-८१-३

(२) क्वचित्करेणैव स दुग्धभाजनं क्वचिच्च पादेन समीक्षते सखि।
समागताः पश्यति पृष्ठतस्तदा स विश्वतश्चक्षुरिवास्ति बालकः॥ २।५१।

(३) शार्ङ्गं बिभ्रन्निषङ्गात् निशितशरचयानाददानो मुहुर्ज्यां
आकर्णान्तं विकर्षन् प्रबलरिपुवपुः पूरयन्मार्गणौघैः।
अन्यातङ्कं स्वशङ्खं रणधुरि रणयन् अङ्घ्रिमूले नतानां
तन्वन्दोष्णाऽभयं च प्रथयति मुरजित् विश्वतःपाणितां स्वाम्॥ १४।२७

(४) सूर्याचन्द्रमसावस्य चक्षुषी

Rarest Archiver

सूर्यचन्द्रमसौ वर्तेते किम्?" इति[1]। द्वारकावर्णने च समुद्रमध्यगा द्वारका अनेकैः श्लिष्टविशेषणैः विष्णोर्मूर्त्या उपमिताऽस्ति। तत्र "नेत्रस्थानगतेन्दिना" इति द्वारकायाः नेत्रस्थाने सूर्येन्द्वोः वर्णनं वर्णयता कविना विष्णवाकृतेः नेत्रयोः इन्दु-इनयोः आस्तित्वं निरूपितं चमत्कारि वर्तते।[2]

पुरुषोत्तमः श्रीहरिः उपनिषदेकसमाधिगम्योऽस्ति। प्रत्यक्षादिभिः तज्ज्ञानं न सञ्जायते।[3] कालियमर्दनवर्णनावसरे, कालियस्य सर्पजातिस्वभावेन श्रवणरहिततया श्रुत्युक्तः श्रीकृष्णमहिमा न श्रुतोऽभवत्। अत एव तद्बलं अविजानन् सः कालियः अपः कलिलयन्तं श्रीकृष्णं कालिन्दीह्रदे दंशितुमग्रहीत्।[4]

रुक्मिणीस्वयंवरे च बुद्धिसख्या मुकुन्दः शास्त्रैकसमाधिगम्यत्वेन

---

(1) बतान्धकारार्पितदृश्यमत्रमपि स्वभास्वन्नयनान्तलक्ष्म्या।
समीक्षते लोचनयोः किमेषः बिभर्ति बालः नव पुष्पवन्तौ॥ रु.वि. ३/५७

(2) सच्चक्रा करपुष्टरम्यकटका भोगीन्द्रभोगास्पदा
नेत्रस्थानगतेन्दिना कनकसद्भ्रान्तिपीताम्बरा।
भाति स्वोदरवासिहंसगमना सेयं सुधर्मावहा
विष्णोराकृतिवत् समुद्रहृदये लक्ष्मीधरालिङ्गिता॥ रु.वि. १७/५२

(3) नावेदविन्मनुते तं बृहन्तं (तै.आ. ३-१२-९) तं त्वौपनिषदं पुरुषं (बृ.उ. ३-९-२६)

(4) कलिलयन्तमपः पुरुषोत्तमं फणिपतिः किल दंशितुमग्रहीत्।
न हि स वेत्ति बलं श्रवणोज्झितः परमया रमया श्रुतिभिः स्तुतम्॥ रु.वि. ४/५९

Rarest Archiver

वर्णितोऽस्ति।(1) गोवर्धनोद्धारे च श्रीकृष्णस्य निगमैकवेद्यत्वं प्रसक्तम्। इन्द्रयागत्याजनेन कुपितः सहस्रनेत्रः श्रीकृष्णे प्रवर्षणार्थं मेघानादिदेश। कविर्वक्ति "निगमैकवेद्ये तस्मिन् श्रीहरौ अक्षिबाहुल्यं किं प्रयोजनमुपैति" इति।(2)

आग्निः परमात्मनः मुखादुत्पन्नः इति वेदो वक्ति।(3) अस्य प्रमेयस्य उल्लेखः दावाग्निपानवर्णने उपलभ्यते। श्रीकृष्णेन कृतं वनवह्निपानकर्म सर्वे स्तुवन्तु, न वयं स्तुमः यतो वह्निः स्वस्य जन्मस्थानमेव गतः इति कविना व्याजस्तुत्या तस्य वेदप्रतिपाद्यमाहात्म्यं अभिहितम्।(4) श्रीकृष्णरुक्मिणी विवाहवर्णने च इदमेव प्रमेयं उत्प्रेक्षामुखेन अभिव्यक्तम्। वधूवरौ रुक्मिणीकृष्णौ विवाहे लाजसमेधिताग्नेः प्रदक्षिणं चक्रतुः - आस्यगं तं रहस्यगोष्ठ्यां आत्मीयं विधातुमिव।(5)

(1) जगज्जनिस्थेमलयादिधर्माः भवन्त्यमुष्मात्किल शास्त्रयोनेः।
अमुष्य साम्यं कतमः सुराणां उपैति यद्रोमसु विश्वकोशाः॥ १४/२०

(2) सहस्रनेत्रोऽपि स कृष्णसत्त्वं मनागविज्ञाय दिदेश मेघान्।
प्रवर्षणार्थं निगमैकवेद्ये किमाक्षिबाहुल्यमुपैति कृत्यम्॥ ५/५६

(3) मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत (ऋ.सं. १०/९१

(4) स्तुवन्तु सर्वे वनवह्निपान कृतानुभावं न वयं मुरारेः।
स्वजन्मभूमिं शिखिनि प्रविष्टे क ईशितुस्तेन कृतोऽनुभावः॥(५/२)

(5) गृहीतपाणी किल चक्रतुस्तौ प्रदक्षिणं लाजसमेधिताग्नेः।
वधूवरौ रम्यरहस्यगोष्ठ्यां विधातुमात्मीयमिवास्यगं तम्॥ १६/६६

परमात्मन एव जगत्सृष्ट्यादिकं भवति।[१] ग्रीष्मर्तुः कृष्णकृतेः जगतः विरोधं कर्तुं इव यद्यद् वस्तु यादृशं यादृशं कृतं तद्विपरीततया कृतवान् (५।६)। यमुनाह्रदे अक्रूरेण दृष्टस्य परमात्मनः विचित्ररूपवर्णनेऽपि जगज्जन्मादिकारणत्वं अभिहितमस्ति।[२]

श्रीहरेः वेदवचसामप्यगोचरत्वं[३] विप्रलम्भावस्थायां गोपीभिः अभिव्यक्तं वर्तते।[४] अस्ति रासवर्णनेऽपि एवमेवनिरूपितम्।(९।१२)

सुषुप्तिदशायां बाह्याभ्यन्तरपदार्थज्ञानाभावः गोपीभिरेव सप्तमे सर्गे विप्रलम्भदशायां सूचितो वर्तते। ताः कथयन्ति यत्- "कृष्णेन वियुक्तानामस्माकं अस्यां निशि स विधिरपि सुषुप्तिं न दिशति, मूर्छामपि न ददाति यया ऽवस्थया अस्माकं विरहदहनशान्तिः सञ्जायेत" इति।[६] (७।४७)

---

(१) यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति। तैत्तरीयोपनिषत्. भृगुवल्ली. १.

(२) विश्वस्येमलयोत्पत्तिमुक्त्याद्येर्मुख्यकारणम्।
अच्छशेषफणारत्नच्छत्रशोभितमैक्षत ॥ कृ.वि. १०/६९

(३) यतो वाचो निवर्तन्ते अप्राप्य मनसा सह. तै. २।४

(४) यदि निगमविदूरस्त्वं नृणां दूरदूरो
हृदयकमलतः किं नाथ नापैषि नहि ॥ ७/४२

(५) प्राज्ञेनात्मना सम्परिष्वक्तः न बाह्यं किञ्चन वेद नान्तरम्. बृह. ४।३।२१

(६) स विधिरपि निदेशं तस्य नूनं विधत्ते विरहदहनशान्तिं यन्न मूर्छां ददाति।
अपि निशि हृदयान्तः कृष्णसंश्लेषशङ्की न दिशति च सुषुप्तिं हा हताः किं विधेयम् ॥

Rarest Archiver

अम्भृणीसूक्ते (ऋ.१०।१२५)[1] लक्ष्म्याः ब्रह्मरुद्राद्युत्तमत्वं, तत्पतित्वेन समुद्रान्तःशायिनः हरेः उत्तमत्वं च अभिहितम्। एतत्प्रमेयस्य प्रसक्तिः अष्टमे सर्गे गोपीभिः कृते कृष्णस्तवने[2], चतुर्दशे सर्गे रुक्मिणीप्रेषिते पत्रे च वर्तते।[3]

---

(१) अस्य सूक्तस्य लक्ष्मीपरव्याख्यानं श्रीवादिराजतीर्थकृतं परिशिष्टे प्रदत्तम्।

(२) कमलासनाच्च भवतोऽभवतो महतीन्दिरा किल तया लतया ।
तरुवद्भवान्परिवृतोऽरिवृतोदयदाव सेदमनु ते मनुते ॥ ८/२९

अत्र खलु इन्दिरायाः कमलासनात्, भवतः(रुद्रात्) अभवतः भव-रहितात् मुक्तसमूहात् उत्तमत्वं 'यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तं ऋषिं तं सुमेधां' (ऋ.सं. १०।१२५।५) इति श्रुत्यनुसारेणाभिहितम्। तथा हरेः परिवृतत्वोक्त्या 'मम योनिरप्स्वन्तः समुद्रे' इति श्रुतिवाक्यं सूचितं भवति।

(३) धिक्कृत्याहमुमेशहंसगमनौ स्वर्गीश्वराग्नी भव-
त्सूक्तासक्तहृदङ्ग लोकमखिलं देवौघमान्यान् मुनीन् ।
सन्ध्याख्याध्वनि कोविदानपि बुधान् त्वय्येव यत्सस्पृहा
विश्वाधीश्वरतां भवस्य भवतः तन्निश्चिनोमि प्रभो ॥ १४/४२

समस्तस्यापि वेदस्य श्रीहरावेव महातात्पर्याङ्गीकारात् अम्भृणीसूक्तमपि भवत्सूक्तमिति कृष्णं प्रति भैष्म्या प्रोक्तम्। नारदोक्तं कृष्णवचनमिति भवत्सूक्तमित्यनेनापातत उक्तिः, सकलजगत्स्वामिकायाः स्वस्या अपि उत्तमत्वेन, श्रीकृष्णस्य विश्वाधीश्वरता निरूपिता।

विष्णुसर्वोत्तमत्वप्रतिपादका: निगमाश्च गोपीकृतकृष्णस्तवेऽपि सूचिता: सन्ति। यैश्च ते आगमा नैवाङ्गीक्रियन्ते तै: जनै: स्वसिद्धान्त: केन वा प्रमाणेन संसाध्यते इत्यपि पृष्टं तत्रैव। वेदानां प्रामाण्यमपि अङ्गीकरणीयमिति खलु निरूपितमत्र।(1) न केवलं वेदै: किन्तु इतिहासपुराणादिभिश्च श्रीकृष्णस्य सर्वदेवतोत्तमत्वं रु.वि.काव्ये संसाधितं वर्तते।

उपनिषदुक्तं मोक्षस्य आनन्दपूर्णत्वं रु.वि.काव्ये रासक्रीडावर्णने सूचितं विद्यते।(2)

---

(1) एष सर्वेश्वर: - बृहदारण्य, ६-४-२२

निगमोऽस्ति ते मतिमतोऽतिमतो निखिलेश्वरत्वसमयेऽसम ये।
तमपि त्यजन्त्यसुभृत: सुभृत: स्वनय: कुतोऽक्षरहितै: अहितै:।।८।३०

श्रीकृष्णस्य निखिलेश्वरत्वसिद्धान्ते प्रमाणभूतान मतिमत: पुंस: अतिमतान निगमान ये खलु वादिन: त्यजन्ति ते तु कवेरभिप्राये अक्षरहिता अहिता: एव।

(२) एतमानन्दमयमात्मानमुपसङ्क्रम्य इत्यादि तै. भृगुवल्ली. ५
सोऽश्नुते सर्वान कामान सह ब्रह्मणा तै-२१. स तत्र पर्येति
जक्षन क्रीडन रममाण: स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वाज्ञातिभिर्वा- छा.८-१२-३

स्वानन्दं प्रकटीचकार सुखदं सायुज्यमालिङ्ग्य ता:
साधर्म्यं स्वकृतानुलेपतिलकै: मोक्षं हृदिस्थावृतै:।
ताभि:सस्मितमीक्षितो यदुपति: सारूप्यसार्ष्टी दिशन
रासाख्यं च तयोत्सवं नहि कथा व्यर्था परब्रह्मण:।।८।८६

Rarest Archive

भगवतः आप्तकामत्वं नित्यपूर्णत्वं श्रुत्युदितं [1] रु. वि. काव्ये तत्र तत्र सूचितमस्ति उत्प्रेक्षादिभिरपि [2]। परमात्मदर्शनेन च कर्मक्षयः भवति हृदयस्याज्ञानग्रन्थिश्च भिद्यते इति उपनिषत्सिद्धान्तः [3] रासक्रीडावर्णने सूचितोऽस्ति। [4]

पुरुषसूक्तोक्तस्य ब्राह्मणादिवर्णोत्पत्तिप्रकारः पुरुषस्य च नानादेवानां आश्रयत्वं विलक्षणया प्रणाल्या रासक्रीडावर्णने नवमसर्गे प्रतिपादिते। कयाचिद् गोपिकया सह श्रीहरेः लीलावर्णनमिदम् —

---

(१) देवस्यैष स्वभावोऽयं आप्तकामस्य का स्पृहा - माण्डूक्य २।९
अथैष परम आनन्दः — बृ. ६-३-३२

(२) बहूनि पुण्यानि स नन्दपत्न्याः हृदि स्थिरीकर्तुमुरोजकुम्भम्।
पपौ प्रदेशार्थितयैव शौरिः न चेत्सुतृप्तस्य कुतस्तदिच्छा ॥ रु.वि. २।३०
किमाप्तकामस्य तवाभिरीश तथापि नस्तोषयसे विलासैः।
इतीरयन्तीव करं मुरारेः स्तने न्यधात्कापि बलेन बाला ॥ ८।५९

(३) भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ मुण्डक. २।९

(४) मालालङ्कारकान्त्या विघटितहृदयग्रन्थिरिन्दीवराभा। रु.वि. ९।३१
अत्र व्याख्याकारः - मालायाः वनमालायाः अलङ्कारस्य कुण्डलादेः कान्त्या विघटितः विमोचितः हृदयग्रन्थिः कञ्चुकग्रन्थिः। मनोरमपुरुषदर्शने कञ्चुकग्रन्थिर्भिद्यते इति प्रसिद्धिः इत्यपि व्याख्यातवान्।

Rarest Archiver

प्रीतेर्लाभमवेक्ष्य चित्तमपि या तस्मै ददौ, अङ्कगां
तां कृत्वा, रतिसङ्गरस्थहृदयां आलिङ्ग्य रम्यैर्भुजैः।
तस्या दृष्टिपथं गतं मुखमलं चित्ताय संरोचयन्
कस्तूरीतिलकेन भूषयति यः स स्यान्मुदे विठ्ठलः॥ (९।६४)

गोपी कापि प्रीतेर्लाभापेक्षया श्रीकृष्णाय आन्तरं अदेयं(१) चित्तमपि ददौ। लाभापेक्षया दानं वैश्यानां धर्मः। अतः वैश्यधर्मोपेतां तां श्रीकृष्णः वैश्यजात्युत्पत्तिकारणाङ्कस्थां कृतवान्। सुरतयुद्धे संसक्तहृदयां तां गोपीं सः कृष्णः रम्यैर्भुजैरालिलिङ्ग। युद्धासक्तेः क्षत्रियाणां धर्मत्वात्, तेषां च हरेर्भुजोद्भूतत्वात्। पूर्वं स्वविरहेण औष्ण्यतया तिलकाभावेन च सूर्यसदृशं स्वदृष्टिपथं गतं तस्या मुखं आसीत्। सूर्यस्य हरेः चक्षुषोः समुत्पन्नत्वात् सूर्यसदृशं तस्याः मुखं केवलं लोचनगोचरं अभूत्। श्रीकृष्णदर्शनादिना विरहशान्त्या चन्द्रसदृशं गोप्याः तन्मुखं श्रीहरिः चित्ताय संरोचयन् कस्तूरीतिलकेन भूषयति। चन्द्रस्य श्रीहरेः मनसः जातत्वात् चन्द्रसदृशस्य मुखस्य चित्ततोषदायित्वव्यापारः वर्णितः। एवमत्र गोपीप्रदर्शित-गुणानुगुणविलासवर्णनं कवेर्वैदुष्यप्रदर्शकमप्यास्ति।

---

(१) ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत। चन्द्रमा मनसो जातः चक्षोः सूर्यो अजायत. ऋ. सं. १०।९१.

Rarest Archive

हरेरूर्वोः वैश्यजातिकारणत्वं अष्टादशे सर्गे श्रीकृष्ण-ऊरु वर्णने पुनरपि प्रसक्तं वर्तते।[1] कठोपनिषदुक्तं बुद्धेः सारथित्वं मनसः प्रग्रहत्वं इन्द्रियाणां च हयसदृशत्वं रु०वि०का०ये किञ्चिद् विपर्ययेण सूचितं वर्तते।[2] कृष्णस्य मधुरागमनसमये तद्विरहकातराः गोपललनाः रथेन दूरं यान्तं तं इत्थं ददृशुः —

रथेन दूरे रमणं व्रजन्तं व्रजास्त्रियस्तं परितोऽनुजग्मुः।
दृगध्वभाजा दृढभक्तिदाम्ना मनोरथेनामलबुद्धियन्त्रा॥ (१०।४६)

हृदयस्य ब्रह्मपुरत्वं श्रीकृष्णस्य मधुराप्रवेशावसरे[3] उपमया वर्णितं ११/२ ये श्लोके। भक्तानां हृदये ब्रह्मनाडीमिव श्रीकृष्णः मधुरायाः राजमार्गनाडीं विवेश इति वर्णने श्रुत्यर्थजातवैदुष्यस्य निदर्शनमुपलभ्यते।

---

(१) अपरिमितसुखौघं स्वाश्रिताया रमायाः
शतगुणितविकासं वाससः स्वाश्रितस्य।
अपि गतनिजलाभः सन्ततं यो विधत्ते
स किल मुरभिदूरुः कारणं वैश्यजातेः॥ १८/१५

(२) आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥
इन्द्रियाणि हयानाहुः विषयांस्तेषु गोचरान्।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः॥ काठक ३/३,४

(३) हृदयं ब्रह्मपुरम्

Rarest Archiver

श्रीमन्नारायणस्य दृश्यमानश्रूयमाणसर्वजगद्व्यापकत्वं (१) कंस-भयाख्यदूतयोः संवादे चमत्कारेण निरूपितमस्ति। (२) भगवद्भयादेव सूर्यचन्द्रवाय्वग्न्यादीनां नित्यव्यापारो धर्मः (३) तत्रैव अभिहितोऽस्ति। (४)

गायत्र्याः वेदमातृत्वं रु० वि० काव्ये श्रीकृष्णस्य उपनयनकथनप्रसङ्गे उक्तं वर्तते (५) गायत्र्याश्च बुद्धिप्रचोदकत्वेन भगवत्प्रतिपादकत्वमपि वर्णितमस्ति। कृष्णाय गायत्र्युपदेशे गर्गाचार्येण कृते कवेरुत्प्रेक्षा इयम् —

(१) यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः॥ महानारा० ११।६

(२) कंसः — पृथ्व्यां क्वास्ति ममान्तकः ?
भयदूतः- स भुवनेष्वन्तर्बहिर्वर्तते।

(३) भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः। — तैत्तिरीयोपनिषत् २।८

(४) भयदूतः कंसं प्रति स्पष्टयति —
नित्यं मन्नियतः स वाति पवनः पाकं विधत्तेऽनलः
सूर्योऽसौ समुदेति तं हरिं ऋते सर्वं जगन्मद्वशम्॥ ११।२२

(५) दिने दिनेऽग्नौ समिधो जुहाव तथा श्रुतीनां जननीं जजाप। १२।२८
त्रिषु स्थानेषु विस्तीर्णा मधुसूदनवाहिनी।
त्रिपदा वेदमातेव रिपुसेनामहन् क्षणात्॥ १४।२३

Rarest Archiver

आचार्यः सकलविदे पुराणपुंसे
गायत्रीमनुं अदिशत् ममेत्थमूहः।
तदृण्याजात् तनगुणचिन्तकाय मह्यं
सद्बुद्धिं प्रदिशेत्यसौ ययाचे ॥(१२।१४)

अत्र सर्वज्ञाय अनादिपुरुषाय आचार्यकृतः गायत्रीमन्त्रोपदेशः, तदर्थस्य अनुसन्धानपूर्वकं श्रीकृष्णं प्रति याचनमिति गायत्र्यर्थः निरूपितोऽस्ति। तैत्तिरीयोक्तं गुरुदक्षिणाप्रदानमपि[1] श्रीकृष्णेनाचरितमिह वर्णितम्।[2]

त्रयोदशे सर्गे श्रीकृष्णजरासन्धयुद्धवर्णने चमत्कारिण्या शैल्या वेदप्रामाण्यं समर्थितम्। श्रीकृष्णमुक्तः शरः युद्धे अरीन् नाशयन् वेदस्य अन्वर्थतां समर्थयामासेति एवं चित्रितम् -

अन्धानामपि कृष्णसद्गुणमणिं सन्दर्शयित्वा जगद्-
वन्द्यां कीर्तिवधूं परानलसमां सन्धाय लोकत्रये।
सान्द्रे रक्तजले च रत्नदृषदां वृन्दं स सम्प्लावयन्
छन्दोऽन्वर्थमलं समर्थ्य सुधियां सन्देहमाच्छिनत् ॥(१३।६१)

सः कृष्णमुक्तशरः मूर्खाणामपि आविपालगोपालानामपि श्रीकृष्णस्य शौर्यधैर्यपराक्रमादिसद्गुणमणिं सन्दर्शयामास। अनेन अन्धो मणिमविन्दत इति वेदोक्तार्थस्य प्रामाण्यमुक्तं भवति। पुनः, जगद्वन्द्यां श्रीकृष्णस्य कीर्तिवधूं

---

(१) आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। तै. १।११
(२) गुरुं ततोऽपृच्छदुपायनं द्विजान् सुतं ययाचे विमलीकृतान्वयः॥ कृ.वि. १२।३१

लोकत्रये शत्रूणां अग्निसदृशीं स्थापितवान सः शरः।
जगद्व्याप्तां श्रीकृष्णकीर्तिं विचिन्त्य शात्रवः दुग्धा अभूवन्।
अनेन च योषिमग्निं ध्यायीत इति वेदवाक्यस्य
अनुपपन्नार्थतया अप्रामाण्यशङ्का निरस्ता। किञ्च युद्धे
सः शरः सान्द्रे रक्तजले च छिन्नाङ्गभूषणानां प्लावनात्
रत्नदृषदां वृन्दमेव समप्लावयत। अनेन च ग्रावाणः प्लवन्ते
इति वेदस्य प्रामाण्यं समर्थितम्। एवं सः शरः छन्दः
अन्वर्थं अलं समर्थ्य सुधियां सन्देहं आशु अच्छिनत्।

परमात्मनः, जीवकृतशुभाशुभकर्मसाक्षित्वं साक्षाद्दीक्षण-
कर्तृत्वं[1] युद्धवर्णने अभिहितमस्ति।[2]

षोडशे सर्गे रुक्मिणीस्वयंवरे मुख्यप्राणवर्णनमेतत् –
अयं सखि प्राणगणाधिनाथः स्वयम्भुवा सर्वगुणैः समानः।
शिवादिदेवा व्यवदन्त पूर्वं ततोऽस्य सत्त्वं प्रकटीबभूव॥(१६।१२)
अत्र अहमुक्थमस्म्यहमुक्थमस्तीति त्वा अब्रुवन्
इति श्रुत्युक्तकथा सूचिता। वायोश्च रक्षोवशता नास्तीत्ययं[3]
विषयः तद्वर्णने तत्रैव उपलभ्यते।[4]

---

(१) कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च श्वेता. ६.११
(२) अच्युतः शुभकृतेः साक्षी –रु.वि. १४।२८
(३) बृ. १।३।७
(४) क्वचिद्धि रक्षोवशता सुराणां भवेदमुष्मिन्न कदापि साऽस्ति॥१६।१४

Rarest Archive

रुक्मिणीस्वयंवरे सर्ववेदप्रतिपाद्यत्वं सर्वोत्तमत्वं च - नते विष्णो जायमानो न जातो देव महिम्नः परमं तमाप (ऋ.सं. ७।९९।२ यो देवानां नामधा एक एव (तै.सं. ४-६-२-२) सर्वे वेदा यत्पदं आमनन्ति (कठ. १-२-१५) नामानि सर्वाणि यमाविशन्ति (भाल्लवेयश्रुतिः) विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि (ऋ.सं. १।१५४।१) इत्यादिश्रुतिप्रतिपाद्यं एवं पुनः निरूपितम् —

समस्तवेदाः किल सेतिहासाः पुराणयुक्ताः स्मृतिभिः सहैनम्।
समानशून्यं प्रभुमामनन्ति प्रमथ्य योऽब्धिं लभते स्म लक्ष्मीम् ॥(२६।३१)

यजुर्वेदस्य यज्ञतन्त्रता उपमया, दामोदरवर्णने उपलभ्यते —

करणपालनशील नते स्थितिं जलजनाभ वदन्ति कमाश्रिताः।
विदुरमी वरदामधरोदर प्रियजुषो यजुषोऽग्निबलीनिव ॥(१७।१२)[1]

अत्र, यजुर्वेदात् यथा यज्ञानां स्थानप्राप्तिः तथा त्वद्भक्ताः नते - प्रणते भक्ते ते स्थितिं विदुरित्युक्तम्।

मत्स्यावतारवर्णने च वेदापहारिदैत्यनाशनेन वेदानयनं वर्णितं वर्तते —

भुवनवास्यनिशं मनुसंस्तुतो विधिविरोधिविनाशकृदन्वहम्।
अनिमिषप्रभुरागमहर्षदो निजवशो जनशोभितसागरः ॥(१७।१५)

अनिशं जलधिवासी मत्स्यावतारो हरिः विधिविरोधिनां वेदापहरणेन ब्रह्मद्रोहिणां नाशकृत्, वेदानां आनयनेन च आगमहर्षदोऽस्ति।

---

(१) इदमपि पद्यं स्वयं श्रीवादिराजतीर्थैः व्याख्यातम्। परिशिष्टे प्रदत्तम्।

Rarest Archiver

अणोरणीयान्महतो महीयान् (कठ.१-२-२०) इति श्रुत्युक्तं अविरोधेन विरुद्ध-
धर्माश्रयत्वं परमात्मनः श्रीकृष्णस्य पादवर्णने एवं सूचितम् –

धर्मा विरुद्धगतयोऽपि हरौ विरोधं सन्त्यज्य सन्ति बहुशास्त्विति बोधयन्तौ ।
पद्मस्थचन्द्रकलिकाद्युतिमन्नखाङ्कौ श्रीरुक्मिणीशचरणौ शरणं ममास्ताम् ॥(१८।७)

पादयोः पद्मसदृशत्वात् नखानां चन्द्रकलासदृशत्वात्, तयोः
विरुद्धत्वेऽपि अत्र श्रीकृष्णचरणयोः सहावस्थानात्, अविरोधेन
विरुद्धधर्माश्रयत्वं हरेः सूचितं भवति ।

वेदेषु उपनिषत्सु यत्र परमात्मा, आत्मा, ब्रह्म
इत्यादयः शब्दाः प्रवर्तन्ते तत्र सर्वत्र गुणपूर्णस्य श्रीकृष्णस्यैव
प्रतिपाद्यत्वं रु.वि.काव्ये वर्णितमस्ति । मध्वमतोद्धारकश्री-
वादिराजतीर्थैः निर्गुणब्रह्मण एवानङ्गीकारात् गुणगणपूर्णं
श्रीकृष्णाख्यं ब्रह्मैव तन्मतानुसारं परदैवतमिति प्रथमम्
आकलनीयं वर्तते ।

सनातनवैदिकसिद्धान्तस्य कुवादिभयमपि वर्तते इति कविरयं
काव्येऽस्मिन् तत्र तत्र कथितवानप्यस्ति ।(१)

एवं कवेः श्रीवादिराजस्य वैदिकवाङ्मयवैदुष्यं विपुलमुपलभ्यते रु.वि.महाकाव्ये ।

---

(१) दैत्योऽग्रहयदागमान्तललनागर्भं कुवादीव तम् (रु.वि.३।२) तृणावर्तेन
श्रीकृष्णे आकाशं नीते आच्छादिते च इदं वचनं कवेः ।
कुन्तैः कुठारैः कुद्दालैः बभञ्जुर्भगवत्पुरीम् ।
आद्यां उपनिषद्विद्यां कुतर्कैरिव वादिनः ॥ १२।४१.
जरासन्धभटैः मधुराभञ्जने प्रवृत्ते कवेरियमुक्तिः ।

Rarest Archiver

छन्दोबन्धनम् — नानाविधानां छन्दोविशेषाणां प्रयोगेण कवेः श्रीवादिराजस्य छन्दःशास्त्रपाण्डित्यं अभिव्यक्तमेवास्ति। रु.दि. काव्ये आहत्य १२४१ पद्यानि सन्ति। सर्वेषु सर्गेषु नानावृत्तानां एव प्रयोगो विहितः महाकविना श्रीवादिराजेन। इदं च शार्दूलविक्रीडितं कवेः छन्दःपाण्डित्यस्य चमत्कारावहं प्रमाणम् —

तद्वृन्दावनभूगणं पदरुचा प्रागङ्कयन् सोऽसकृत्
पश्चात्तद्गमरुङ्गणं च वरयन् कुर्वन्निवान्तर्वनम्।
सद्भास्वद्गुणशोभि, लेखसवयोहृद्योगणौ चाश्रयन्
लक्ष्मीशोऽनुकरोति तत्र विचरन् शार्दूलविक्रीडितम्॥(४।२८)

वृन्दावने वत्सासुरवधावसरे श्रीकृष्णः शार्दूलविक्रीडितं वृत्तं अथवा व्याघ्रव्यापारं अनुकरोति स्म। अत्र वत्सासुरवधे शार्दूलव्यापारानुकरणं उचिततया वर्णितम्। तदा वृन्दावनभूप्रदेशस्य पादकान्त्या अङ्कनेन, तत्रस्थवायोः श्रमपरिहारार्थमिवाङ्गीकरणेन पुनश्च स्वपादयोः कान्त्या एव अन्तर्वनं भास्वद्गुणेनेव प्रकाशनेन ततः लेखानां सवयसां च हृद्योमहर्षणेन श्रीकृष्णः शार्दूल इव अभवत्। शार्दूलविक्रीडितं वृत्तमपि एवमेवास्ति। "सूर्याश्वैर्यदि मःसजौ सततगाः शार्दूलविक्रीडितं" इति तल्लक्षणात् शार्दूलविक्रीडितेऽपि प्रथमं भूदेवताकः मगणो वर्तते। तदत्र वृन्दावनभूगणं पदरुचा (सुबन्ततिङन्तादिपदानां रुचा) अङ्कनमिति सूचितम्। पश्चाच्च

Rarest Archive

मरुद्देवताकं सगणद्वयं वर्तते । तयोर्मध्ये च सूर्यदेवताकः जगणः भवति। अत एव अन्तर्वनं भास्वद्गणशोभितत्वं अभिहितम् । तदनु वृत्ते आकाशदेवताक तगणद्वयं भवति। तच्च लेखसखयोः हृदयाकाशौ आश्रयन्नित्युक्तम् ।[1] एवं छन्दःशास्त्रस्य मयरसतजभनगणानां तत्तद्देवतानां च विषयः अस्मिन् पद्ये उपमया निरूपितोऽस्ति ।

रु.वि.काव्ये शार्दूलविक्रीडितवृत्तानामेव बाहुल्यं वर्तते। वर्णनाप्रधानप्रसङ्गेषु भावोद्रेकाभिव्यक्तिषु च शार्दूलविक्रीडितमेव प्रयुक्तं दृश्यते।[2] इन्द्रवज्रोपेन्द्रवज्रवृत्तयोः तदनन्तरं पौष्कल्यं विद्यते। इन्द्रवज्रोपेन्द्रवज्रानुष्टुपवृत्तानां कथाप्रवाहसञ्चारार्थं[3] उपयोगो विहितोऽस्ति द्रुतविलम्बितवृत्तानि तु चतुर्थपादे यमकोपेतान्येवोपलभ्यन्ते रु.वि. महाकाव्ये ।[4] मालिनीवसन्ततिलकयोः प्रयोगोऽपि सुन्दरतया विहितोऽस्ति।

---

(१) सकलगुरुलघू भूनागदेवौ मनौ तौ प्रथमगुरुलघू चन्द्राम्भूतेशौ भयौ स्तः। इह गुरुलघुमध्यौ जौ च सूर्यानिलेशौ गुरुलघुचरमौ स्तौ वायुदेवालयेशौ ॥
— इति तत्तद्गणदेवताः वाग्वल्लभः पृष्ठ. ३३.

(२) रु.वि. १/१,२,४,२२,३७,६६. २/९,९८. ३/२,७,१२-१५,२७,२८ इत्यादिसर्गभागेषु

(३) रु.वि. १/७-२१, २३-३६. ३७-४७ २/१-८, २२-३९. ३/४१-५५
१३/१-४, १४-२५ इत्यादयः

(४) रु.वि. ४/३८-४४, ४७-५७, ५९ १७/१-२४, ५६

Rarest Archiver

सर्गानुक्रमेण रुक्मिणीशविजयकाव्यस्थानां वृत्तानां विवरणम् -

प्रथमः सर्गः

शार्दूलविक्रीडितानि	९.	(१, २, ४, ६, २२, ३७, ४९, ६६, ६७)
वसन्ततिलका	१.	(५)
इन्द्रवज्रा	८.	(७, २४, २६, २७, ३०, ४३, ४६, ५०)
उपेन्द्रवज्रा	४८	(८-२१, २३, २५, २८, २९, ३१-३६, ३८-४२, ४४, ४५, ४७, ४८, ५१-६५
आहत्य	६७	

द्वितीयः सर्गः

शार्दूलविक्रीडितानि	२	(९, ६८)
वसन्ततिलका	७	(१४, १७, २१, ४०, ५२, ५८, ६०)
इन्द्रवज्रा	७	(२४, २५, ४५, ४७, ४८, ५१, ५९)
अनुष्टुभ्	१	(३२)
उपजाति (इ+उ)	२	(४९, ५०)
उपेन्द्रवज्रा	४९	(१-८, १०-१३, १५, १६, १८-२०, २२, २३, २६-३१, ३३-३९, ४१-४४, ४६, ५३-५७, ६१-६७)
	६८	

तृतीयः सर्गः

शार्दूलविक्रीडितानि	१५	(२, ७, १२-१५, २७, २८, ३२, ४०-४२, ५०, ५८, ६३)
वसन्ततिलका	७	(८-११, २९-३१)

Rarest Archive

उपेन्द्रवज्रा ३९ (१,३-६,१६-२६,३३-३९,४३-४९,५१,५२,५४,५५,
५६,५७,५९,६०,६२)

इन्द्रवज्रा २ (५३, ६१)

६२

चतुर्थः सर्गः

शार्दूलविक्रीडितम् ११ (१,१९,२०,२२,२८,३१,३४,३७,४५,५८,७३)

इन्द्रवज्रा ४ (२,९,६७,७१)

मालिनी १ (३)

उपेन्द्रवज्रा ३२ (४-८,१०-१८,२१,२३-२७,२९,३०,३३,३५,३६,६१,
६३,६५,६६,६८,६९,७०,७२)

स्रग्धरा १ (३२)

द्रुतविलम्बितम् १९ (३८-४४,४७-५७,५९)

अनुष्टुभ् ३ (६०-६२)

वसन्ततिलका १ (६४)

७३

पञ्चमः सर्गः

शार्दूलविक्रीडितम् १३ (५,६,७,२०,२८,३३,३६-३९,४५,४६,४८,५९)

उपेन्द्रवज्रा २९ (१,२,८,९,१०,१२-१९,२१-२४,२९,४०-४३,४७,४९,५४-५८)

अनुष्टुभ् २ (३,५०)

मालिनी २ (४,२६)

Rarest Archive

इन्द्रवज्रा ७ (११, २५, ३०, ३५, ४४, ५२, ६२)

द्रुतविलम्बितम् १ (२७)

वसन्ततिलका ३ (३१, ३२, ५१)

मन्दाक्रान्ता १ (३४)

५९

षष्ठः सर्गः

शार्दूलविक्रीडितम् १४ (१६, १८, १९, २४, ३२, ३४, ३६, ३८, ४७, ५१-५३, ५८, ६७)

उपेन्द्रवज्रा १९ (१, ४, ५, ८-१४, २५, २८, ३३, ३७, ३९, ४२, ५६, ५९, ६३)

वसन्ततिलका १९ (२, ३, २१, २२, २३, २६, २७, २९-३१, ३५, [illegible]-४६, ४८, ६१, ६४, ६५)

दोधक १ (६)

अनुष्टुभ् ६ (७, १७, २०, ५४, ५५, ६०)

इन्द्रवज्रा ३ (१५, ५७, ६२)

स्रग्धरा १ (४०)

तुरगाय १ (४१)

मालिनी ३ (४९, ५०, ६६)

६७

सप्तमः सर्गः

शार्दूलविक्रीडितम् १० (२, ३, ५, ६, २०, २१, २९, ३२, ३५, ६५)

मालिनी १६ (१, ४, ८, २८, ३०, ३१, ४२-५१)

वसन्ततिलका १७ (७, ९, १०, ११, १३-१७, १९, २२, २५, ३४, ३६, ३७, ४१, ५२)

इन्द्रवज्रा ७ (१२, १८, २३, २७, ३९, ५६, ६४)

उपेन्द्रवज्रा ७ (२४, २६, ३३, ३८, ५५, ५९, ६१)

अनुष्टुभ् ६ (४०, ५३, ५४, ५७, ६०, ६२)

प्रमिताक्षरा २ (५८, ६३)

६५

अष्टमः सर्गः

शार्दूलविक्रीडितम्	६	(३८, ४६, ४८, ४९, ५४, ६२)
द्रुतविलम्बितम्	१	(१)
इन्द्रवज्रा	३	(२, ५२, ५५)
अनुष्टुभ्	३	(३, ५, ९)
तोटकम्	१	(४)
उपेन्द्रवज्रा	१२	(६, ८, ११, १२, १३, २६, २७, ५०, ५७, ५९, ६०, ६१)
स्रग्विणी	१	(७)
वंशस्थम्	२	(१०, १७)
प्रमिताक्षरा	२२	(१४, १५, १६, १८-२५, २८-३७, ४५)
वसन्ततिलका	१०	(३९-४४, ५१, ५३, ५६, ५८
उपजाति(इ+उ)	१	(४७)
	६२	

नवमः सर्गः

शार्दूलविक्रीडितम्	२८	(१७, १९-२५, ३७, ४५, ४६, ४९, ५१-५७, ५९, ६१-६५)
स्वागता	१६	(१-१४, ४२, ४३)
वसन्ततिलका	१०	(१५, १८, २९, २४, ३६, ३९, ४४, ४८, ५०, ६०)
इन्द्रवज्रा	२	(१६, ४१)
मालिनी	३	(३०, ३५, ३८)
स्रग्धरा	३	(३१, ३२, ५८)
आर्या	१	(३३)
उपेन्द्रवज्रा	१	(४०)
अनुष्टुभ्	१	(४७)
	६५	

Rarest Archiver

दशमः सर्गः

शार्दूलविक्रीडितम्	१८	(६,१०,१४, २७-३१,४०,४४,४८,४९,७७-८१,८४)
इन्द्रवज्रा	५	(१,७,२६,७१,७६)
वसन्ततिलका	३	(२,३,२५)
उपेन्द्रवज्रा	१८	४,५,९,११-१३,१५-२१,३८,४२,४५-४७)
मालिनी	३	(८,४१,४३)
वंशस्थ	४	(२२-२५)
अनुष्टुभ्	३०	(३२-३४,३६,५०-७०,७२-७४,८२,८३)
पुष्पिताग्रा	२	(३७,३९)
स्रग्धरा	१	(७५)
	८४	

एकादशः सर्गः

शार्दूलविक्रीडितम्	१९	(१८-२७,४३,४५,५०,५८-६२,६५
अनुष्टुभ्	१३	(१,३,४,१६,१७,२८,३९-४१,४८,४९,६४)
स्रग्धरा	२	(२,१४)
मालिनी	५	(५,७,८,१५,४२)
वसन्ततिलका	१२	(६,१०,११,३०-३८)
इन्द्रवज्रा	२	(१२,६३)
शिखरिणी	१	(१३)
उपेन्द्रवज्रा	८	(२९,५१-५७)
पुष्पिताग्रा	१	(४४)
स्वागता	१	(४६)
उपजातिः	१	(४७)
	६५	

Rarest Archiver

द्वादशः सर्गः

शार्दूलविक्रीडितम्	१०	(२,३,५,१०,१२,१६,१७,२२,५५,७०)
अनुष्टुभ	३५	(१,४,६-९,११,१३-१५,२३,२८,३९,४०,४४,४५,४९,५१-५६,५८-६९)
उपेन्द्रवज्रा	९	(१८,२५,२७,२९,३०,३२,३५,४१,४३)
	१	(१९)
इन्द्रवज्रा	४	(२०,२६,२८,४६)
उपजाति	५	(२१,४२,४७,४८,५०)
वसन्ततिलका	१	(२३)
प्रहर्षिणी	१	(२४)
वंशस्थं	४	(३१,३४,३६,३७)
	७०	

त्रयोदशः सर्गः

शार्दूलविक्रीडितम्	११	(४२-४५,४७,४८,५६,[illegible],६१,६२,६४,६५)
उपेन्द्रवज्रा	१७	(१,२,८,१४-१७,२१-२३,३९,४०,५४,६०,६२)
वंशस्थं	६	(३,४,९,१०,११,१२)
वसन्ततिलका	८	(५-७,२६,२७,३८,५०,५२)
अनुष्टुभ	४	(१३,२८,३७,४१)
इन्द्रवज्रा	१२	(१८-२०,२४,२५,४६,४९,५१,५३,५५,५८,५९)
मालिनी	९	(२९-३८,४२)
	६५	

चतुर्दशः सर्गः

शार्दूलविक्रीडितम्	१३	(६,१०,१२,१६,२२,२८,२९,३५,४२-४४,६९,७०)
इन्द्रवज्रा	१३	(१,२,४,३९,४५,४७,५७-६२,६६)

Rarest Archiver

उपजाति	३	(३, ९, ११)
उपेन्द्रवज्रा	१२	(५, ७, २१-२३, ४६, ४९-५२, ६३, ६८)
वसन्ततिलका	६	(८, १५, ३६, ४०, ५५, ५६)
वंशस्थं	१	(१३)
शिखरिणी	१	(१८)
अनुष्टुभ	१६	(१७-२१, २३-२६, ३०, ३४, ३८, ४१, ४८, ५३, ५४)
स्रग्धरा	१	(२७)
पृथ्वी	१	(३७)
मालिनी	३	(६४, ६५, ६७)
	७०	

पञ्चदशः सर्गः

शार्दूलविक्रीडितम्	१४	(२, ३, ४, ६, ७, १२, २२, २६, २७, ३७, ३९, ४७, ५९, ६२)
	१	(१)
अनुष्टुभ्	६	(५, ८, १३, १४, ४३, ५३)
इन्द्रवज्रा	१३	(९, १५, २०, २५, २९, ३४, ३५, ३८, ४९, ५०, ५२, ६०, ६१)
उपेन्द्रवज्रा	९	(१०, ११, २८, ३१, ४४, ४५, ४६, ४८, ५१)
वसन्ततिलका	१२	(१६, १७, २३, ३०, ३२, ३६, ४०, ४१, ५५-५८)
वंशस्थं	२	(१८, १९)
उपजातिः	४	(२१, २४, ३३, ४२)
मालिनी	१	(५४)
	६२	

Rarest Archiver

षोडशः सर्गः

शार्दूलविक्रीडितम्	८	(१०, ३९, ४०-४२, ४४, ४८, ६२)
अनुष्टुभ्	३	(१, ५०, ६१)
वसन्ततिलका	९	(२, ३, १९-२१, २५, ३५, ३६, ४५)
उपेन्द्रवज्रा	३८	(४-९, ११-१८, २२-२४, २६-३४, ४३, ४६, ४७, ४९, ५१-५४, ५७-५९, ६०)
उपजातिः	१	(३७)
इन्द्रवज्रा	२	(३८, ५६)
पुष्पिताग्रा	१	(५५)
	६२	

सप्तदशः सर्गः

शार्दूलविक्रीडितम्	९	(४४, ४६-५२, ७१)
द्रुतविलम्बितम्	२५	(१-२४, ५६)
अनुष्टुभ्	३	(२५, ५७, ६७)
उपेन्द्रवज्रा	२१	(२६-२९, ३१-३९, ४१-४३, ४५, ५४, ५८, ५९, ६५)
इन्द्रवज्रा	२	(३०, ६९)
उपजातिः	२	(४०, ६६)
रथोद्धता	२	(५३, ५५)
वसन्ततिलका	४	(६०-६२, ६८)
मालिनी	२	(६३, ६४)
स्रग्धरा	१	(७०)
	७१	

Rarest Archiver

अष्टादशः सर्गः

शार्दूलविक्रीडितम्	७	(१, ६, १३, २२, ३६, ४५, ६१)
वसन्ततिलका	२७	(२-५, ७-१०, २०, २५-२७, ३०, ३२, ३४, ३७, ४१, ४२, ४७, ४८, ५१, ५३-५६, ५९, ६०)
इन्द्रवज्रा	१९	(११, १२, १४, १७, १८, २३, २४, २८, २९, ३१, ३३, ३५, ३८, ४४, ४६, ४९, ५०, ५२, ५७)
मालिनी	२	(१५, १९)
उपेन्द्रवज्रा	४	(१६, २१, ३९, ४०)
अनुष्टुभ्	१	(४३)
	१	(५८)
	६१	

एकोनविंशः सर्गः

शार्दूलविक्रीडितम्	१४	(५, १२-१५, २५, २८, ३३, ३६-४१)
वसन्ततिलका	८	(१-४, ७, ८, ११, २६)
स्रग्धरा	१	(६)
इन्द्रवज्रा	८	(९, १६, १९, २१, २३, २७, २९, ३४)
मालिनी	१	(१०)
उपेन्द्रवज्रा	९	(१७, १८, २०, २२, २४, ३०, ३१, ३२, ३५)
	४१	

Rarest Archiver

निरुक्तम्- महाकविरयं श्रीवादिराजतीर्थः प्रतिभाप्रसूतं विलक्षणं चमत्कारि निर्वचनं विधातुं समुत्सुकः प्रतिभाति। स्वप्रयुक्त-शब्दानां यौगिकानां, रूढितः अन्यार्थप्रतिपादकानां निर्वचन-प्रदानेन स्वकीयं वैशिष्ट्यं प्रदर्शितं रु० वि० काव्ये कविराजेन श्रीवादिराजेन। अकाराद्यनुक्रमेण तत्प्रदत्तानि निर्वचनानि अधो निर्दिष्टानि सन्ति।

अक्रूरः — धनुरुत्सवाय श्रीकृष्णं आमन्त्रयितुं कंसप्रेषितस्य अस्य अक्रूर(1) इति नाम अपार्थः इति गोपीभिरभिहितम्।

अयमपि च विरुद्धनामधेयो नयति विलापमुपेक्ष्य कामिनीनाम्।
प्रियसरसविलासमग्र्यवेषं कमलदृशां कमनीयचारुहासम्॥ (१०।३९)

अचला - अचला इति पृथिव्या नाम।(2) न चलति इति अचला।(3) अथवा अचलाः (= गिरयः) अस्यां सन्तीति अचला। रु० वि० काव्ये पृथिव्याः अचलत्वं एवं उक्तम् —

रसा पिपासोग्रभराशनाया विषह्य विष्णुं मनसाऽचलेन।
तदानुधावती, अचलेति सर्वंसहेति नूनं जगदे जगत्याम्॥ (१।२०)

क्षीरपयोऽब्धितीरे गोरूपधरा धरा सा अचलेन मनसा विष्णुं स्मरन्ती अचलशब्दाभिधेया बभूव। पिपासादीनां सहनाच्च सा सर्वंसहा इत्यपि जगत्यां गदिताऽभूत्।

(1) न क्रूरः अक्रूरः (2) अमरः २-१-२

(3) चल कम्पने

Rarest Archive

अच्युतः - न विद्यते च्युतं स्खलनं यस्य स अच्युतः इति व्युत्पत्त्या च्युतिरहितः अच्युतः। श्रीकृष्णनामैतत्।(1) श्रीकृष्णस्य न केवलं चितः (ज्ञानस्य) किन्तु शरीरस्यापि च्युतिरहिततया तस्यैव अच्युत इति नाम विश्वविदितं वर्तते इति रुक्मिणी स्वकीये पत्रे लिलेख- 'यत्तेऽस्त्यच्युतनाम विश्वविदितं श्रीराघ्रगानन्यगम्' (४/४८)

अनङ्गजित् - क्षीरपयोब्धितीरे शिवः विष्णोरन्येषु वस्तुषु अरक्तचित्तत्वात् अनङ्गजिद् बभूव इति कविः शिवस्यानङ्गहरत्वं कारणान्तरेण निरूपयति —

तदा तदन्यान्यपहाय हेयान्यरक्तचित्तः स विरिञ्चपुत्रः।
स्तुवन् गिरीशोऽपि गिरा मुरारिमनङ्गजिद्दिग्वसनो बभूव॥ (१/१९)

अत्र हि गिरीशशब्दोऽपि चमत्कारेण निरुक्तः। गिरि वाचि ईशः गिरीशः। गिरा हरेः स्तुतिकरणात् गिरीशोऽभवत् शिवः तदा।

अनिमिषाः - सुराणां नामैतत् ।(अमरः ३-३-११८) न निमिषन्ति इति व्युत्पत्त्या निमिषाभावेन हेतुना सुराः अनिमिषशब्देन आभिधीयन्ते। निमिषाभावे हेतुरुक्तः रुक्मिणीस्वयंवरे —

इमे सुराः श्रीपतिनित्यसेवावियोगभीत्याऽनिमिषा विनिद्राः।
प्रपेदिरे तत्करुणाप्रभूतसुधारसास्वादनतोऽमरत्वम्॥ (१६/२७)

अत्र सुराणां अमरत्वमपि निरुक्तम्। निद्रारहितता च देवानां अभिहितम्। अस्वप्नपदत्वमपि तेषां क्षीरपयोब्धितीरे निद्रां विहाय तपःकरणादुक्तम्।

---

(१) अमरः १-१-

(२) बभूवुरस्वप्नपदाश्च देवाः (१/१९)

अनिरुद्धः — श्रीकृष्णपौत्रोऽयम् । तस्यानिरुद्धसंज्ञा एवं निरुक्ता —
सपत्नसैन्यैरनिरुद्धमाजौ यमाभनन्ति ह्यनिरुद्धसंज्ञम् ।
सदाऽऽश्रिताभीप्सितवित्तराशिप्रदानकालेऽप्यनिरुद्धमन्यैः ॥ (१९/३१)
युद्धे दाने च निरोधाभावात् अनिरुद्धः इति यथार्थं नाम ।
अशोकः — अयं वृक्षविशेषः । अशोकः परेषां शोकमपि
न जानातीति निर्वचनं कृतम् । 'अशोक एषोऽपरवेदनाज्ञः' (७/२४)
अश्वः — वाजिनामैतत्[1] । रु॰ वि॰ काव्ये तु न विद्यते श्वः
यस्य इति निरुक्तम् । केशी दैत्यः अश्वरूपेण नन्दव्रजमगात् —
मुकुन्दमाजौ प्रति यास्यतो मे न जीविताशा ननु विद्यते श्वः ।
इतीव निश्चित्य जगाम केशी जवेन नन्दव्रजमश्वरूपी ॥ (१०/११)
अश्वत्थः — न श्वः तिष्ठतीति अश्वत्थः । कृष्णस्य तिरोधाने
सति वृक्षेषु पक्षिषु मृगेषु विचारयन्तीभिः अश्वत्थवृक्षः
एवं प्रार्थितः —

अश्वत्थद्रुम नः प्रियः किल भवन्मध्ये सदा वर्तते
तस्मै ज्ञापय बल्लवीजनदशां कष्टां अदृष्टप्रियाम् ।
नो चेत् त्वद्हृदि लग्नमाग्निमथवा त्वत्संस्थितिं तेऽभिधां
नो देस्यङ्ग वियोगरोगरहितां त्वं मर्त्यतामाश्रय ॥ (७/२)

गोपीभिः त्वदभिधां अस्माकं देहि इति याच्ञया
पूर्वोक्तं निर्वचनं सूचितं भवति ।

(१) अमरः २-८-४३

अस्ति - अस्तीति असधातोः लटि रूपम्। जरासन्धपुत्र्याः कंसपत्न्याः अपि नामैतत्। तस्याः नामसार्थक्यमेवं सञ्जातम् -

कंसे बलैः सह मृते सति याऽवशिष्टा
वंशं स्वभातुरपि तादृशमास्तिनाम्नी।
कृत्वोचितं विदधतीव निजाभिधानं
पित्रे न्यवेदयदथाच्युतकृत्यमार्ता ॥ (१३।२८)

पत्युः पितुश्च वंशनाशानन्तरं अवशिष्टा इति अस्तीति सार्थकंनाम।

आत्मयोनिः - आत्मभूरिति विरिञ्चिनाम।[1] आत्मा विष्णुः योनिः कारणं यस्य स इति व्युत्पत्त्या विष्णुजातस्यास्य नाम भवति।

आत्माभिधः स्वयमिति प्रथितो ह्यवाच्यस्तातोऽस्य यन्मुररिपुस्तदमुं मुनीन्द्राः।
ख्यात्या स्वयंभुवमजं विदुरात्मयोनिं चेतस्यतच्छ्रुतितति सति वेदगर्भम् ॥ (१६।३)

श्रीहरिः आत्मा, स्वयं, अ- शब्दैर्गीयते। तत्पुत्रः विरिञ्चि अत एव आत्मयोनिः स्वयम्भूः अजः इति शब्दितोऽस्ति। विष्णुप्रतिपादकवेदानां तस्मिन् सदा विद्यमानत्वात् विरिञ्चिः वेदगर्भः इत्यपि कथ्यते।

इन्द्रः - इन्दति परमैश्वर्यवान् भवतीति इन्द्रः।[2] रुक्मिणी-स्वयंवरे तस्य परमैश्वर्यं एवं वर्णितम् -

कल्पद्रुमः करिवरः कविवर्यवाजी नित्यं वशेऽस्य किल देवि सभा सदैवीम्।
मध्ये महासनगतः परिपात्यजस्रमिन्द्रोऽयमिन्द्रपदयोग्यमहाविभूतिः ॥ (१६।२५)

इन्द्रपदस्य प्रवृत्तिनिमित्तं कल्पद्रुमाद्यैश्वर्यं विद्यते इति इन्द्रोऽयम्।

---

(१) अमरः १.१.१६ (२) इदि परमैश्वर्ये इति धातुः

कान्तः — कान्तो नाम धवः। (मेदिनी ७४/९) रु. वि. काव्ये कान्तशब्दः एवं निरुक्तः —

कान्त स एव यः स्थैर्यशौर्यसौन्दर्यसागरः।

सुखस्यान्तकरं कान्तमपरं तर्कयामहे॥ (६/६०)

स्थैर्याद्यभावे कस्य = सुखस्य अन्तः नाशः यस्मात् सः इति व्युत्पत्त्या सौख्यनाशकः भवति।

कृष्णः — श्रीकृष्णस्य नामकरणोत्सववर्णने एतन्नाम बहुधा निरुक्तं वर्तते। कृष्णपक्षः यथा चन्द्रमसं क्षीणकलं करोति तथा अयं वैरिनारीमुखचन्द्रस्य कान्तिहारित्वात् कृष्णसंज्ञा युक्ता इति उपमया शब्दनिर्वचनं कृतम् —

सपत्नपत्नीवदनोडुराजं क्रमेण यः क्षीणकलं करोति।

सितेतरपक्ष इवर्क्षनाथं गुणोचिता तस्य हि कृष्णसंज्ञा॥ (३/२१)

कृष आकर्षणे इति धातोः, कर्षणात् कृष्णः। सर्वेषां मनसां आकर्षकत्वात् कृष्णशब्दः युक्तः। यथा-

यतः स्वसन्दर्शनतो नराणां वराङ्गनानां सुरचारणानाम्।

मनांसि सर्वाण्यपकर्षतीशः ततोऽपि कृष्णं प्रवदन्ति सन्तः॥ (३/२२)

अथवा कृष्यते इति कृषिः भूमिः तस्यां णः सुखरूपः, भूमेः णः सुखं यस्मात् इति व्युत्पत्त्या, भूमावपि सुखित्वात् भूमेः सुखदायकत्वाच्च कृष्ण इति नाम युक्तम्। अथवा विष्णोः कृष्णकेशात्मकत्वादपि कृष्णपदवाच्योऽयं हरिर्भवति। तथाहि —

Rarest Archiver

यतः स पृथ्वीतलसंस्थितोऽपि सुखी, धारिण्याः सुखदायकश्च ।
ततोऽपि कृष्णं प्रवदन्ति कृष्णं समुल्लसत्केशववेशरूपम् ॥ (३/२३)

पुनरपि उपमया कृष्णपदयाथार्थ्यमेवं समर्थितम् -

यतश्च दैतेयकदम्बकक्ष-चयस्य विध्वंसविधौ मुरारिः ।
वनाग्निमन्वेति लयाग्निकल्पं ततोऽपि गायन्ति हि कृष्णमेनम् ॥ (३/२४)

अग्नेरपि कृष्णशब्दाभिधेयत्वात्[1] तत्सादृश्येन निर्वचनमिदम् ।

कुवलयापीडः - कुवलयापीडाख्यः कंसस्य बलिष्ठः हस्ती आसीत् ।
कु-वलयस्य[2] भूमिमण्डलस्य पीडा अस्माज्जाता इति सार्थकं नाम -

पादप्रहारविवशः किल वारणोऽसौ
कुर्वन् पपात भुवि नाम गुणानुकूलम् ।
तस्याङ्घ्रिसङ्घिसहजाङ्कुशरम्यरेखा -
शङ्कीव कम्पितमहीधरभूप्रदेशः ॥ (११/३७)

गोकुलम् - गवां कुलैः सङ्कुलत्वात् गोष्ठस्य गोकुलपदं वाचकम् ।

ततो यशोदां स्वकुलस्य पुण्यलसद्यशोदां हि करिष्यमाणः ।
स गोकुलं गोकुलगोपपुञ्जविभूषितं प्राविशदब्जनेत्रः ॥ (२/१)

अत्र स्वकुलस्य यशो ददातीति यशोदा इति तच्छब्दोऽपि
अनुगुणतया व्याख्यातोऽस्ति ।

गोविन्दः - गाः शब्दान् विन्दते प्राप्नोति पालयतीति
गोविन्दः । 'सकलगोकुलपालक' (१७/१०)

(1) व्यासार्जुनाग्निहरिकोकिलकाकशूद्रतामिस्रपक्षकलिनील गुणेषु कृष्णः - भास्करः

(2) गोत्रा कुः पृथिवी पृथ्वी । अमरः (२-१-३)

जरासन्धः - जराख्यया उपमात्रा संहितः इति बार्हद्रथस्य मगधाधिपतेः नामैतत्। जरसा वृद्धत्वेन संहितः ग्रस्तः इति रु.वि.काव्ये निरुक्तिः कृताऽस्ति। 'जरासंहितप्रायं मागधं (१४।१६) (१)

तिग्मभानुः - सूर्यः। तिग्माः तीक्ष्णाः भानवः यस्य सः इति उष्णकरत्वं सूर्यस्य लभ्यते। एतदभिप्रायेण अयं शब्दः सूर्यवर्णने प्रसक्तोऽस्ति। (२।२५)

दर्पकः - मन्मथनामैतत् (अमरः १.१.२५)। दर्पयतीति दर्पकः। अखिलदर्पक-दर्पकसायके (४।३१) मारं दर्पकरं प्रतर्क्य (१७।४६)

द्वारवती - कृष्णनिर्मितनगर्याः नाम्नः निर्वचनमपि सुन्दरतया कृतं भाति रु.वि.काव्ये। द्वारं अस्या अस्तीति द्वारवती। लौकिकालौकिक सौख्यस्य श्रीकृष्णाख्यं द्वारं प्राप्यासौ नगरी द्वारवती बभूव -

इहाखिलैश्वर्यसुभोगवृद्धेः परत्र निःश्रेयससौख्यसिद्धेः।
महःपरं द्वारमवाप्य पृथ्व्यां असौ पुरी द्वारवती बभूव॥ (१७।२६)

अथवा स्फटिकनिर्मितद्वारवत्वात् अस्या नगर्याः कवाटे पिहितेऽपि विवृतवद्भासमानत्वात् इमां द्वारवतीं वदन्ति।

यतोऽमितोऽच्छस्फटिकावदातलसत्कवाटान्तरितेऽपि सेयम्।
पुरी नृणां द्वारवतीव भाति ततोऽपि तां द्वारवतीं वदन्ति॥ (१७।२७)

परपुष्टः - कोकिलः। परैः पुष्टः इति परपुष्टः। इदं निर्वचनं एवं सूचितम्। 'परपुष्टः स विस्पष्टं पोष्टुर्वै विप्रलम्भकः'। (७।४०)

---

(१) अन्यत्र च- क्रमाज्जरासंहितगात्रसीमा। रु.वि. १७।

Rarest Archiver

पद्मासनः- विरिञ्चिवाचकोऽयम्। विष्णुनाभिसमुत्थं कमलं अस्य आसनमिति पद्मासनः।(अमरः १-१-१७) रु॰वि काव्ये च अयं शब्दः प्रकारान्तरेण निरुक्तः। क्षीरपयोब्धितीरे ब्रह्मा पद्मासने स्थित्वा भगवत्स्तुतिं चकारेति तदा प्रभृति अयं पद्मासनशब्दितो बभूव इति ।

यदा स पद्मासनसंस्थितोऽलं जजाप विद्यामितरैरनेद्याम्।
तदा प्रभृत्येव जगत्सु नूनं बभूव पद्मासनशब्दितोऽसौ ॥(१।१७)

पीयूषरश्मिः - चन्द्रनामैतत् (अमरः १-३-१४) पीयूषयुताः रश्मयः यस्य सः इति व्युत्पत्त्या अमृतकिरणता चन्द्रमसो वर्तते। चन्द्रमसः पीयूषरश्मिपदाभिधेयता गोपाङ्गनाभिः विप्रलम्भावस्थायां एवं आक्षिप्ता -

हरिरिव पदमात्राद्यथधर्मा स नूनं
वहति गरमगौरं ह्रासभागेष चन्द्रः॥(७।२१)

पीयूषपदस्यापि मध्ये अगौरं गरं वर्तते। अत्रैव अनिष्टं हरतीति हरिः इति हरिपदस्यापि शब्दप्रवृत्तिनिमित्त-अनाश्रयत्वकथनेन सोऽपि उपालब्धः।

पुत्रः - पुतः नरकात् त्रायते इति पुत्रः। हरेः देवकीपुत्रत्वं अनया निर्वचनप्रणाल्या साधितम् -

य एष पुत्संज्ञितनारकस्थान् जनान् स्वनामस्मरणेन पाति।
स हरिगः सन् वसुदेवपत्न्याः कथं न पुत्रः शतपत्रनेत्रः॥ (१।८७)

Rarest Archiver

पृथ्वी – भूमिनामैतत् (अमरः २-१-३) प्रथते विस्तारमाप्नोतीति पृथ्वी।
रुक्मिणीस्वयंवरे शेषस्वरूपकथने इदं निर्वचनं सूचितम् –
सिद्धार्थखण्डमिव कुण्डलिराट् सपृथ्वीं पृथ्वीमसौ किल बिभर्ति फणातपत्रो॥(१६।२०)
प्रद्युम्नः – कृष्णपुत्रोऽयं प्रद्युम्नः। प्रकृष्टं द्युम्नं द्रविणं यस्य
इति व्युत्पत्त्या द्रविणोपेतः प्रद्युम्नः।
तारुण्यलावण्यसुवीर्यधैर्यकारुण्यमुख्यैर्द्रविणैः प्रकृष्टः।
प्रद्युम्ननामार्थमसौ कुमारः प्रद्युम्नमुख्यांशयुतः पिपर्ति॥(१९।२९)
तारुण्यादिप्रकृष्टद्रव्योपेतत्वात् प्रद्युम्ननामकविष्णोः मुख्यांश-
युक्तत्वाच्च प्रद्युम्ननाम अन्वर्थम्।
नारायणः(1) – नाराः आपः अयनं यस्य सः नारायणः। इदं निर्वचनं एवं सूचितम् –
हे पद्मिनि प्रियमुदीरय पीवरांसं नारायणः स तु तवास्त्युदरे निगूढः।(७।१४)
सरसि निगूढत्वेन जलाश्रयत्वं – नारायणत्वं – उक्तं भवति।
रुचिर केशव शम्बरधाम ते लसासि मारमणोऽसि समाकृते।
सकलगोकुलपालक दुष्कृतिं परिहराखिलवास नः॥(१७।१०)
अत्र शम्बरधाम इति नारायणपदं निरुक्तम्। मारमणोऽसि
इति माधवपदं निरुक्तम्। गोकुलपालक इति गोविन्दपदं, अखिल-
वास इति च विष्णुपदमपि(2) निरुक्तं भवति।

---

(१) आपो नारा इति प्रोक्ताः आपो वै नरसूनवः।
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः॥ मनुस्मृतिः १।१०
(२) वेवेष्टि इति विष्णुः

नन्दकः - श्रीकृष्णस्य खड्गोऽयम् । नन्दयतीति नन्दकः ।
द्विषामसह्योऽपि निजप्रहर्षकरोऽस्य खड्गः किल नन्दकाख्यः ॥ (१७।३९)
बलभद्रः - श्रीकृष्णोऽस्यानुजः । - भलभद्रः इति अस्य नामधेयं
बलकार्यदर्शनेन सार्थकमभूदिति वर्णयति कविः -
मुनिकृताग्रजनाम गुणोचितं विरचयन्निव सानुगधेनुकम् ।
हलधरेण हतं समकारयत् सुखतो रणतोषितनाकिना ॥ (७।२७)
बली - श्रीविष्णुमुकुटापहारी दैत्यः । गरुडवर्णने स्वयंवरे अस्यनाम
बलं अस्यास्तीति बलीति निरुक्तम् 'प्रादान्नियुध्य बलिना बलिना समं यः' (१८।२१)
भूभृत् - भुवं बिभर्ति इति भूभृत् पर्वतः । कूर्मादिरूपेण भूधारित्वात्
हरेरेव 'भूभृत्' शब्दः वाचक इति कविर्वक्ति -
मयीश्वरे भूभृति जागरूके स्वयं च भूभृत्किल बुद्धिशून्यः ।
स इत्यमर्षादिव भूधरेन्द्रं करेण भूमेरुदबीभिदत्तम् ॥ (८।५८)
गोवर्धनोद्धारवर्णनमेतत् ।
माधवः - श्रीकृष्णस्यैव नाम । मायाः (इन्दिरायाः) धवः माधवः (१।७)
अजन्मनस्तस्य मधोः कुलेऽजातत्वेऽपि माधवत्वमेवं घटते -
अजन्मनस्तस्य हि जातकर्म विधाय विप्रा विदधुर्विधिज्ञाः ।
मधोः कुलेऽजातमपि स्वभक्तमधुश्रिया माधवमादिदेवम् ॥ (२।२७)
मधुनः भक्तमाक्षिकस्य सम्बन्धी माधवः इतीयं व्युत्पत्तिः सूचिता ।
माधवी - लताविशेषः माधवीशब्दवाच्यः । माधवस्येयं माधवी इति
रु. वि. काव्ये प्रोक्तम् । 'नाम्नापि यत्रास्ति हि माधवीत्वम्' (७।२३)

Rarest Archiver

मित्रः - सूर्योऽयं मित्र(सुहृत्)साम्येन मित्रशब्दवाच्यः उक्तः।
'मित्रेऽम्बुजातनिकरस्य नितान्तमित्रे' (६।३१)
मुष्टिकः - बलरामेण युद्धे प्रवृत्तः कंसपोषितः मल्लः अयम्।
तन्नाम्नः अपार्थता एवमभिहिता -

न मे मुष्टिप्रहारस्य लक्ष्योऽयमिति लक्षयन्।
रामस्तं तलघातेन जघानापार्थनामकम् ॥(११।४९)

मुष्टिः के शिरसि यस्येति व्युत्पत्त्या मुष्टिकत्वं भवति। किन्तु बलभद्रस्य मुष्ट्यलक्ष्यत्वात् तच्छिरसि हस्ततलघातं कृत्वा तं जघान।
मूलमाधवम् - इदं वनं यत्र हि श्रीकृष्णः रुक्मिण्या पाणिमग्रहीत्।
इन्दिरायाः माधवसङ्गस्य मूलत्वादस्य मूलमाधवं इति सार्थकं नाम -
यदिन्दिरायास्तदभूद्धि मूलं प्रियाङ्गसंश्लेषमहोत्सवश्रियः।
ततस्तदार्याः प्रवदन्ति नूनं स्थलं स्थलज्ञा भुवि मूलमाधवम् ॥(१५।२८)
रुक्मी - रुक्मिण्याः भ्राताऽयम्। रुक्मम् अस्यास्ति रुक्मी इति
'रुक्मी स रुक्मीव यदा विरोधं चक्रे' (१५।९) व्युत्पत्तिः सूचिताऽस्ति।
रङ्गभूमिः - युद्धभूमिः - रणरङ्गस्य रङ्गवल्लीयुक्तस्थलत्वेनापि रङ्गस्थलस्थं निरुक्तं वर्तते।

विस्तीर्णैर्वरहारचामरसितच्छत्रादिवित्तैः सिता
नीला स्रस्तकचासिनीलमणिभिः सा रङ्गभूमिर्मृधे।
रक्ता रक्तचयेन हैमकवचाकल्पैश्च पीताऽऽत्मनो
नामा सूक्ष्मसरिदोघमग्नकुणपा चक्रेऽनुकूलं तदा ॥(११।५९)

अत्र रङ्गभूमेः क्वचित् सिततया क्वचिन्नीलतया क्वचिद्रक्ततयाऽपरत्र

च पीततया नानारङ्गविशिष्टभूमित्वमुक्तम् ।

रत्नाकरः – समुद्रनाम । रत्नानामाकर इति निर्वचनम् । पुरीरत्नं द्वारका समुद्रेऽस्तीति रत्नाकरशब्दाभिधेयताऽभूत्समुद्रस्येति कवेर्मनीषा –

इदं पुरीरत्नमवाप्य नूनं बभूव रत्नाकरशब्दितोऽब्धिः ॥ (१७।३१)

राजधानी – राजानो धीयन्तेऽस्यामिति राजधानी । मधुरानगर्याः राजधान्याः उत्कर्षोऽयम् –

राजधानी जयति सा भोजवृष्ण्यन्धकाश्रिता ।

राजराजपदत्राता राजा यत्र रमापतिः ॥ (१२/३८)

राजा – प्रजारञ्जनाद्राजा । श्रीकृष्णेन शत्रवः राजानः प्रकारान्तरेण – रक्तरञ्जितगात्रत्वेन – राजानः कृताः ।

सार्थाभिधानकृतशोणितशोणगात्रान् (१४/१७)

अथवा राजशब्दवाच्य-चन्द्रसाम्येनापि राज्ञः राजत्वं भवति इत्यपि निर्वचनं कृतं । तद्यथा

दिने दिनेशप्रख्यो यो रात्रौ रात्रीशसन्निभः ।

कापथेभ्यो प्रजा रुन्धे स राजा स विशाम्पिनः ॥ (१२।५२)

रात्रौ चन्द्रवत् प्रजारक्षकत्वात् राजा भवति । दिवा च सूर्यवत् रक्षणात् (तद्वाचकशब्दः इनः) इनः-स्वामी च ।

रुग्मवती – रुग्म अस्या अस्तीति रुग्मवती । प्रद्युम्नपत्न्याः नाम ।

असूत तं याऽमलहेमकल्पमसौ स्वनामोचितमेव बभ्रे । (१९/३०)

कनकसदृशानिरुद्धाख्यसुतवत्त्वेन तस्या नामान्वर्थमभवत् ।

Rarest Archiver

वज्रः - अनिरुद्धपुत्रस्येदं नामधेयं उपमया समर्थितम् -

वज्रसंज्ञमजीजनद्वैरिनगौघवज्रम् (१९।३२)

वायुभक्षः - वायुं भक्षयतीति व्युत्पत्त्या शेषवाचकोऽयं शब्दः। क्षीरपयोब्धितीरे आहारं त्यक्त्वा केवलं वायुभक्षणेन तपःकरणात् वायुभक्षपदाभिधेयोऽभूत् शेषः। (तदैव शेषोऽजनि वायुभक्षः। (१।१९)

वासुदेवः - वसुदेवस्य अपत्यं पुमान् वासुदेवः। अजन्मनः तस्य पुत्रत्वं न भवेदिति एवं सूचितम् -

पुत्रत्वादिह वासुदेवपदवी यद्यस्य शौरेस्तदा

नः पुत्रत्वकृतास्तु सेति वसवो देवाश्च हृष्टा ध्रुवम्। (१।३७)

वसवश्च देवाश्च वसुदेवाः, तेषामयमिति वासुदेव इति अपि निर्वचनसम्भवात् वसुदेवपुत्रत्वं निराकृतं भवति।

विश्वम्भरः - विश्वस्य भरणात् विश्वम्भरः। श्रीकृष्णः, मातुः स्वजठरे विश्वं प्रदर्श्य विश्वम्भरनाम दधार।

प्रदर्श्य विश्वं जठरे स्वशक्त्या बहूनि नामानि बभार बालः। (३।५)

विकुण्ठः - न विद्यते कुण्ठः नाशः यस्य। वैकुण्ठलोकस्य नाशरहिततया विकुण्ठपदवाच्यता, भगवद्दर्शनमपि अकुण्ठितमित्यपि -

व्रजेम कुत्रोपासितं विकुण्ठं, न चेत्त्वदीक्षोत्सवभङ्गहीनम्। (८।८)

गोपीनां वचनमेतत् - कृष्णदर्शनाभावे वृन्दावने, प्रातः वैकुण्ठं व्रजामः इति।

विघ्नेश्वरः - विघ्नानामीश्वरो हि विघ्नेश्वरो भवति। विघ्नहर्ता, विघ्नदाता च ईश्वरः भवति। श्रीकृष्णबलभद्रौ मथुरायां

Rarest Archiver

रङ्गस्थले कुवलयापीडस्य एकैकदन्तं धृत्वा द्विषतां लोकद्वये सुखप्रत्यूहौ इव विविशतुः।

लोकद्वयसुखव्यूहप्रत्यूहौ द्विषतामिव।
एकैकदन्तावश्रान्तौ रङ्गं विविशतुर्विभू॥(११।३१)

वृन्दावनम्-वृन्दायाः वनं इति तन्निर्वचनम्। वृन्दस्य समूहस्य अवनं रक्षणं यस्मादित्यपि निर्वचनं काव्येऽस्मिन् प्रदर्शितम्-

फलैः प्रसूनैः पयसा तृणेन विधाय गोगोपनिकाय रक्षाम्।
वनं स्वनामानुगुणं बभाज हरौ प्रसन्ने किमिहास्त्यसाध्यम्॥(४।२४)

गोवृन्दस्य गोपालकवृन्दस्य च अवनात् वृन्दावनमभूत्। एतादृशमेव निर्वचनं पुनरपि सप्तमेसर्गे नवमे श्लोके तथा एकोनविंशतमे श्लोके उपलभ्यते।

व्रजम्- गोष्ठस्य पर्यायपदमिदम्। व्रजस्य आर्जितसर्वार्थव्रजनात् हेतोः व्रजत्वमुक्तम्-

व्रजमार्जितसर्वार्थव्रजं निर्विविशेऽच्युतः॥(५।२)

शतक्रतुः-शतं क्रतवः यस्य सः इन्द्रः शतक्रतुपदाभिधेयः। क्षीरपयोब्धितीरे यदा इन्द्रः हरिं स्तुत्वा शतक्रतुफलं प्राप तदैव शतक्रतुपदं तस्य जातम्।(१।१८)

शिशुपालः-शिशूनां पालः इति रुविकाव्ये एतन्नाम निरुक्तं वर्तते। 'चक्रे शिशूनां प्रभुम्' (१४।१६)

श्रीधरः-श्रियं धरतीति श्रीधरः हरिः। श्रियमुदाय[1] मुदाऽजेयसेऽवनौ(१०।११)

---

(१) उत्कृष्टः आयः लाभः यस्य सः उदायः। तस्य सम्बुद्धिः।

सन्दोहः - सन्दोहे मध्यदेहकः (हलकोश:)। कृष्णरुक्मिण्योः मध्यं वीक्ष्य कवयोऽपि अस्ति वा न वा इति सन्देहभाजो भवन्ति। एवं सन्देहसन्दोहविषयत्वान्मध्यस्य सन्दोहसंज्ञा सञ्जाता। (१८/२७)

स्वान्तम् - अखण्डवृत्त्या इदं पदं चित्तवाचकम्। यत् कृष्णस्य अङ्घ्रिकमले चञ्चरीकति तत् स्वान्तम्। अन्यत् स्वस्यान्तकारी नाशकारी भवतीति अक्रूरः श्रीकृष्णं वक्ति -

स्वान्तं तदेव यत्तेऽङ्घ्रिकमले चञ्चरीकति
स्वान्तकारीतरन्मन्ये भ्रमद्भुजगसन्निभम्॥ (१०/८२)

एवं नैकेषां पदानां चमत्कारिनिर्वचनप्रदानेन कविराजः श्रीवादिराजः रु० वि० काव्ये स्वकीयमेव वैशिष्ट्यं प्रदर्शितवान्।

व्याकरणम्

विशिष्टपदानां प्रयोगेण कवेर्व्याकरणज्ञता अभिव्यक्ताऽस्ति। एकस्मिन् स्थले उपसर्गाणां प्रसक्तिस्तु एवं वर्तते - उपसर्गेण धात्वर्थः बलादन्यत्र नीयते इति न्यायः अत्र सूचितोऽस्ति। मथुरां गच्छन्तं श्रीकृष्णं प्रति तद्विरह-भयनिर्विण्णाः गोपाङ्गनाः आक्षेपगर्भमिदं वचनमाहुः -

जिगमिषसि मुरारे राजधानीं यदीतः
श्रुतिततिजित याहि श्रीः शुभा तत्र तेऽस्तु।
सुखद तदुपसर्गं सौम्य सन्धेहि शीघ्रं
घटय घटक नो चेत् नस्तवैवोपसर्गम्॥ (१०/४१)

अत्र याहीति पदे सुखदं तं 'आ' इति उपसर्गं सन्धेहि इति सूचितम् । तेन च उपसर्गयोजनेन यातेः आगमनार्थत्वं निरूपितम् । कृष्णादिपदानां निर्वचनप्रदानेऽपि कवेरस्य वैय्याकरणमर्यादाभिज्ञत्वं प्रकाशितमस्ति ।(1) कृदन्तप्रयोग प्रावीण्यं तत्र तत्र-चमत्कारावहं दृश्यते ।(2) एकत्र बहूनां क्रियापदानां प्रयोगवैचित्र्यमपि उपलभ्यते ।(3) रु. वि. काव्यस्य श्रीमद्भागवतपुराणस्य आकरग्रन्थत्वात् क्रियापदानां लिट्रूप- प्रयोगाः पौष्कल्येन दृग्गोचरा भवन्ति ।(4)

कानिचिदत्र विशिष्टाः प्रयोगा उदाह्रियन्ते —

तद्धितप्रयोगाः – कैमुत्य (२।५८) आस्माकं (१।५) औत्थानिकम् (२।६१) अपरथा (५।४४) उभयथा (११।४७) श्रैष्ठ्यं (१३।४८) । यर्हि इति अव्यय प्रयोगः (२।४३)

समासाः – मध्येसमुद्रं (११।३४) अतिकार्यः (८।११) अधिमार्गम् (१/६०) अधिजलम् (९।३७)

---

(1) रु. वि. ३।२२, २३, १।४७ इत्यादयः

(2) रु.वि. ५।३६, ३७, ६।४७, ९।४६, १०।१४ इत्यादयः

(3) ननाम नारायणमादिपूरुषं ननर्त नन्दोत्सव जातसम्भ्रमः ।
ननाद नानादुरितौघमर्दनं ननन्द नन्दस्य तपःफलोदयम् ॥ १०।२४
अपि च – रु.वि. ११।४, १५।५, १८।४७ १९।८६

(4) १।११, १८, २१, २।६३, ६४ ३।१८, ३३, ३६, ११।४, ७, १४, १५।२ इत्यादयः

Rarest Archiver

अलुक्समासः क्षेमङ्करः (५/३२)

क्विप् - चञ्चरीकति (१०/८२)

यङ्लुक् - नर्नर्ति (४/६२) नर्नर्तु (९/१६) नरीनर्तु (११/३५)

क्यच् - समायते (८/१०) जीवायितः (१२/३६)

सन्नन्ताः - जिगमिषसि (१०/४१) जिघृक्षति (३/४५)

यियासति (१०/३६) दिदृक्षति (८/१६) दिधक्षुः (११/२)

णिजन्ताः - श्रावयति (१३/२१) त्याजयन् (११/७)

च्विरूपम् - शिथिलीचकार (११/३४)

परस्मैपदिनः चुर्बिधातोः आत्मनेपदप्रयोगः - ६/४८ ८/४० ८/५५.

षष्ठे सर्गे एकोनविंशश्लोके मन्वतामिति आर्षप्रयोगो दृश्यते ।

<u>ज्योतिषम्</u>

श्रीकृष्णरुक्मिणीविवाहवर्णनावसरे ज्योतिःशास्त्रस्य प्रक्रियाः चमत्कारितया प्रदर्शिताः सन्ति । विवाहाङ्गानां राश्यादिकूटानां विचारः एवं सूचितः -

विविच्य सर्वाङ्गविचारकाले तयोः समन्तात् घटना किलासीत् ।
सुपीनदेवीस्तनमध्यदेशे सुदुर्लभा सा परमच्युतस्य ॥ (१५/३१)

रुक्मिणीकृष्णयोः विषये नवग्रहेषु पञ्चानां शुभग्रहाणां सदा उच्चस्थानस्थितत्वात् अन्येषां नीचस्थाने वर्तमानत्वात् तयोः नित्यमेव मुहूर्तोदयः भवति, अतः तयोः विषये ज्योतिष्पथज्ञैः किमर्थं मुहूर्तः चिन्त्यते इति कविरसौ

Rarest Archiver

श्रीवादिराजतीर्थः रुक्मिणीकृष्णयोः सर्वाङ्गसौन्दर्यवर्णन-
व्याजेन आक्षेपं करोति । तथाहि —

यद्वक्त्रे विधुमामनन्ति सुबुधं मुग्धस्मिते हस्तयोः
उच्चद्योमणिं गुरुं कटितटे मध्यं च काव्यास्पदम् ।
यत्पादस्पृशि मङ्गलं पदतले केतुं गतौ मन्दगं
यद्रोचिश्चकितं तमः, तदनयोः नित्यं मुहूर्तोदयः ॥(७५।४७)

रुक्मिणीश्रीकृष्णयोः चन्द्रोपममुखतया तयोः मुखयोः चन्द्रं वदन्ति सन्तः । तयोः मनोहरमन्दहासे शोभनं बुधं आमनन्ति । तन्मन्दहासविषयः पुमान् ज्ञानी भवतीत्यर्थः । तयोः हस्तयोः रक्तत्वात् सूर्यं तत्र आमनन्ति । कटितटे गुरुं वदन्ति तस्य पृथुत्वात् । तयोर्मध्यं च काव्यास्पदं - काव्ये वर्णनीयमास्ते ; काव्याख्यशुक्रग्रहास्पदं तद् वदन्ति । एवं पञ्चानामपि एतेषां ग्रहाणां सूर्य-चन्द्र-बुध-गुरु-शुक्राणां उच्चस्थानेषु स्थितिः उक्ता । तयोः पादार्चनं कुर्वति पुरुषे मङ्गलं भवति । तयोः पादतले च केतुं वदन्ति । तयोर्गमने मन्दगमनत्वात् शनैश्चरं आमनन्ति । तयोः रोचिषा च तमः चकितं भवति । (तमःसंज्ञितराहुग्रहं सूचितम्) एवं ग्रहान्तराणां नीचस्थानस्थितेः वर्णनं कृतम् । अतः सकलशुभलक्षणगणसम्पन्नयोः अनयोः रुक्मिणीकृष्णयोः

Rarest Archiver

मुहूर्तविचारणं किमर्थमिति सूचितम्। (1)

रवि-सोम-गुरुग्रहाणां उल्लेखः त्रयोदशे सर्गे गोपिकानां वचनेषु लभ्यते। श्रीकृष्णसन्देशवाहकतया मथुरातः गोकुलं प्रति आगतं बृहस्पत्यवतारं उद्धवं आलोक्य गोपाङ्गनाः कथयन्ति भृङ्गमपि लक्षीकृत्य श्लेषोक्त्या - विधुरविविधयोषितापमापादयेः किम् (13/30) इति विधुराणां विविधानां योषितां किं कारणं तापमापादयेः इति भृङ्गपक्षे अर्थः। उद्धवं प्रति - विधु-रवि-विध इति तस्य गुरुग्रहत्वापेक्षया तासां वचनम्।

—x—

(1) रुक्मिणीकृष्णयोरवयववर्णनव्याजेन पञ्चानां शुभग्रहाणां मुखाद्युच्चस्थानस्थितत्वं चतुर्णामशुभग्रहाणां पादाद्यधमस्थानस्थितिं च वर्णयन् शुभानां पञ्चग्रहाणां उच्चस्थानस्थितत्वे अशुभानां नीचस्थानस्थितत्वे सुमुहूर्तत्वस्य ज्योतिःशास्त्रप्रसिद्धत्वात् सर्वापि तिथिः अनयोः अनुकूला इत्याह। —— तद्व्याख्या

Rarest Archiver

दशमोऽध्यायः दर्शनानि

रु.वि.काव्ये वेदवेदाङ्ग,वेदान्तवैदुष्यवत् विविधदर्शन-वैदुष्यमपि उपलभ्यते। विशेषतोऽत्र न्यायवैशेषिकप्रक्रियाणां अद्वैतप्रक्रियाणां च उल्लेखो दृश्यते। युक्तिमल्लिकादिषु ग्रन्थेषु चार्वाकजैनबौद्धतार्किकाद्वैतादिमतानां विमर्शनकृदयं महाकविः श्रीवादिराजः रु.वि.महाकाव्ये कासाञ्चिदेव प्रक्रियाणां उल्लेखं विदधाति।

तत्त्वज्ञानात् मोक्षः इति तार्किकाणामपि सम्मतम्।(1) ज्ञानं विना च निःश्रेयसं न भवति तन्मतानुसारमपि। अयमभिप्रायः रु.वि.काव्ये एवं दर्शितोऽस्ति —

अद्वैतिनस्तार्किकमानिनो वा राद्धान्तमध्येऽपरवादिनां वा।
ज्ञानं विना यन्नहि बन्धमोक्षः तेनेदमात्मीयवचोविरुद्धम्॥(२।४८)

पूतनासंहारावसरे अस्य प्रसक्तिरस्ति। पूतनादेहे जीवद्वय-समावेशात् 'यातुधान्यपि सा स्वर्गमवाप जननीगतिं'(१०।६।३८)इति भागवतोक्ता सङ्गतिः पूतनादेहस्थस्य सज्जीवस्यैव न तु मुकुन्द-द्वेषिणः असज्जीवस्य इति साधितमस्ति। प्रमाणप्रमेयादीनां ज्ञानं विना तार्किकराद्धान्ते बन्धात् मोक्षः निःश्रेयसाधिगमः नास्ति। अतः भगवतः ज्ञानं विना - भक्तिं विना - केवलं द्वेषेण मोक्षः भवतीति यदि तार्किकः वक्ति तर्हि तस्य स्ववचनविरोधो घटते।

(1)प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभास-च्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः —गौ.सू. १।१।१

नैय्यायिकैः दिगाकाशयोः भेदः अङ्गीक्रियते। 'तत्र द्रव्याणि पृथिव्यप्तेजवाय्वाकाशकालदिगात्ममनांसि नवैव "(त.सं.) इति द्रव्येषु आकाशस्य दिशश्च पृथक् निरूपणं वर्तते। 'शब्दगुणकमाकाशम्' इति आकाशलक्षणम्। प्राच्यादिव्यवहार-हेतुर्दिक्। तत्र आकाशं शब्दाख्यकार्यमेव जनयति। दिक् तु कालवत् कार्यमात्रे निमित्तकारणं भवति।(त.सं.दी) आकाशं भूतद्रव्यम्। दिक् नैवम्। शब्द एव आकाशस्य गुणः। दिशस्तु विशिष्टगुणाधिकरणत्वं नास्ति – इत्यादिभिः कारणैः तार्किकैः दिगाकाशयोः भेदः अङ्गीक्रियते। वेदान्तिनां नये च, अहङ्कारतत्वात् पञ्चभूतानामेवोत्पत्तिरिति आकाशातिरिक्ता दिक् नाङ्गीक्रियते। माध्वसिद्धान्ते च आकाशं द्विविधं उच्यते। अव्याकृताकाशं भूताकाशं चेति। अव्याकृताकाशं नित्यं, भूताकाशं तु जन्यम्।(1) साक्षिसिद्धस्य गगनस्य भागा एव दिशः न द्रव्यान्तरमिति निरूपितम्।(2) इदं प्रमेयं रु.वि. काव्ये एवमुक्तम् –

दिग्भिन्नाम्बरधिक्क्रियार्थमभवद् दिग्वस्त्रतां दीपयन्॥(3|28)

शिशुरूपिणः श्रीकृष्णस्य वर्णनमिदम्। श्रीकृष्णः दिगम्बरः

---

(1) भूतमप्यसितं दिव्यदृष्टिगोचरमेव तु।
उत्पद्यते,ऽव्याकृतं तु गगनं साक्षिगोचरम्॥ अनुव्याख्यानम् २-२-१.

(2) साक्षिसिद्धमेव गगनं तद्भागा एव दिशः न द्रव्यान्तरम्॥ न्यायसुधा(1-4-6)

– मध्वसिद्धान्तसारे उद्धृतम्. पृ. ३२

आसीत्। दिक् एव तस्य अम्बरमासीत्। दिग्व्यतिरिक्तं अम्बरं तेन नैव धृतम्। आकाशवाचकं अम्बरं (वस्त्रं) अनङ्गीकृत्य दिगम्बर एव सन् स श्रीकृष्णः दिगतिरिक्तं अम्बरमेव धिक्चकार। [1]

अम्बरस्य साक्षिसिद्धत्वं माध्वाभिप्रेतम्। तार्किकैः आकाशं अनुमानगम्यमिति कथ्यते। [2] कविश्रीवादिराजस्तु अतीन्द्रियस्य साक्षिवेद्यस्य आकाशस्य तार्किकानां युक्तिभिः अकलितत्वमेवाह। चीरहरणावसरे गोपीकृष्णसंवादोऽयम्—

देहीशाम्बरमस्मदीयं, अबला दत्तं क्व तद्वर्तते
मध्ये वः प्रतिभाति, तर्हि न कथं सन्दृश्यतेऽस्मद्दृशा।
मुग्धास्तार्किकमौलियुक्त्यकलितं तन्नैव वः शक्यते
द्रष्टुं चञ्चललोचनैरिति वदन् कृष्णः स पुष्णातु माम्॥(७।४८)

अत्र गोपीभिः अम्बरशब्दस्य वस्त्रार्थकत्वमभिप्रेत्य उक्तम्। कृष्णस्तु अम्बरशब्दस्य आकाशार्थकत्वमङ्गीकृत्य, गोपीनां च मध्यस्य अतिसूक्ष्मत्वात् आकाशत्वाभिप्रायेण, मद्दत्तं अम्बरं भवतीनां मध्ये प्रतिभाति, तन्न दृग्गोचरं भवतीत्याह।

---

(१) दिगेवाम्बरमिति समानाधिकरणे समासे दिशामम्बरात्मकत्वप्राप्त्याम्बरशब्दस्य वस्त्राकाशोभयवाचकत्वेन च अम्बरव्यतिरिक्तदिशां निराकरणस्य सूचितत्वात्-तत्पदव्याख्या

(२) यद्यपि आकाशः अतीन्द्रियः तथापि विलक्षणशब्दात्मक कार्यान्यथानुपपत्त्या सः स्वीकरणीयः (प्र.प्र.) –न्यायकोशः पृ. ११४

Rarest Archiver

निग्रहस्थानानि - षोडशपदार्थानां तत्त्वज्ञानात निःश्रेयसाधिगमः तार्किकाभिमतः। तत्षोडशके च निग्रहस्थानाख्यः पदार्थः अन्यतमः (गौ.सू.१।१।१) पराजयनिमित्तं निग्रहस्थानमिति तल्लक्षणम्। तद् द्वाविंशतिप्रकारम्। (१) प्रतिज्ञाहानि (२) प्रतिज्ञान्तर (३) प्रतिज्ञाविरोध (४) प्रतिज्ञासंन्यास (५) हेत्वन्तर (६) अर्थान्तर (७) निरर्थक (८) अविज्ञातार्थ (९) अपार्थक (१०) अप्राप्तकाल (११) न्यून (१२) अधिक (१३) पुनरुक्त (१४) अननुभाषण (१५) अज्ञान (१६) अप्रतिभा (१७) विक्षेप (१८) मतानुज्ञा (१९) पर्यनुयोज्योपेक्षण (२०) निरनुयोज्यानुयोग (२१) अपसिद्धान्त (२२) हेत्वाभासा इति।[1] मध्वमतरीत्या च षडेव निग्रहस्थानानि। अन्यानि नैय्यायिकोक्तानि एतेष्वेव षट्सु अन्तर्भवन्ति। प्रमाणलक्षणे उपपत्तिदोषनिरूपणावसरे उपपत्तिदोषौ विरोधासङ्गती, न्यूनाधिके वाचनिकौ संवादानुक्तिसुताः निग्रहाः इति षण्णामेव निग्रहस्थानानां व्यवस्थापनं कृतमस्ति।[2] अयं विषयः रु.वि.काव्ये एवं प्रसक्तोऽस्ति —

---

(१) गौ.सू. ५।२।१.

(२) मध्वाचार्यकृत प्रमाणलक्षणम् पृ. ७२

न केवलं उपपत्तिदोषाणां विरोधादीभिः सङ्ग्रहः किंनाम नैय्यायिक निरूपिताशेषनिग्रहस्थानानां वक्तृदोषाभ्यां संवादानुक्तिभ्यां युतेषु अन्तर्भावः। ततश्च विरोधासङ्गती, न्यूनाधिके संवादानुक्ती इति षडेव निग्रहस्थानानि — जयतीर्थविरचित प्रमाणपद्धतिः पृ. २५३

Rarest Archiver

यः सन्धिमुख्यामलनीतिकालमशान्यविज्ञाय रणं विधत्ते ।
षण्णिग्रहाणां समयानभिज्ञवादीव संसत्सु स यात्यकीर्तिम् ॥ (१२।४६)

सन्धिमुख्यान् षड्गुणान् अविज्ञाय यः राजा रणं विधत्ते नूनं सः षण्णिग्रहस्थानानां अनभिज्ञः वादीव अकीर्तिं यातीति अत्र राजनीतिवर्णने निरूपितम् ।

जरासन्धेन सह युद्धवर्णने च

संवादं किल केऽपि बभ्रुरपरेऽनुक्तिं शरैस्ताडिता
निर्यान्तः कटकान्निरुन्धति निजे क्रुद्धा विरोधं परे ।
ध्वस्ताः केचिदसङ्गतिं निजजनैः सर्वे जयैर्न्यूनतां
आधिक्यं हतिभिः पराजितमभूत् इत्थं तदद्वैतिवत् ॥ (१४।१०)

अत्र षण्णामपि निग्रहस्थानानां शब्दतः निरूपणं वर्तते । जरासन्धभटाः अद्वैतिसाम्येन श्रीकृष्णभटाश्च तत्त्ववादिसाम्येन वर्णिताः। अद्वैतिनो यथा संवादानुक्ति विरोधासङ्गतिन्यूनाधिक्याख्यैः निग्रहस्थानैः निगृहीता भवन्ति तथा जरासन्धभटाः संवादादीन् प्राप्तवन्तः । तथा हि —

(१) विप्रतिपन्नप्रमेयाङ्गीकारः संवादः । — प्र० प०, पृ० २५३
परबोधनार्थस्य अवश्यं वक्तव्यस्यावचनमनुक्तिः। तत्रैव
योग्यताभावः विरोधः आकाङ्क्षाविरहः असङ्गतिः, अवश्यवक्तव्यस्य एकदेशमात्रवचनं न्यूनं, अनाकाङ्क्षितस्यैवान्येन कृतकार्यस्य वचनं आधिक्यम् — तत्रैव पृ० २४०

Rarest Archiver

केचन जरासन्धभटाः वैरिविषये समीचीनवचनं उक्त्वा संवादं बभुः। केचनान्ये शरैस्ताडितत्वात् भिन्नहृदयाः सन्तः वक्तुं असमर्था भूत्वा अनुक्तिं प्राप्ताः। अपरे केचन जरासन्धपक्षीयाः सैन्यात् निर्गच्छन्तः, बहिर्गमने निरोधं कुर्वति स्वजने क्रुद्धाः विरोधं बभुः। सञ्चूर्णिताङ्गाः केचिद्भटाः, तेषां बन्धुभिः अस्थिमात्रमपि न लब्धमिति, बन्धुभिः असङ्गतिं (असम्बन्धं) प्राप्ताः। सर्वे शत्रवः जयैः न्यूनतां राहित्यमेव बभुः। अपि च हृतिभिः ते अरयः आधिक्यं ययुः। एवं जरासन्ध-सैन्यं पराजितमभूत्।

अनुमानम् - अनुमितिकरणं अनुमानम् (त॰सं॰)। तच्चानुमानं द्विविधं, स्वार्थानुमानं परार्थानुमानं चेति। स्वयं धूमादग्निं अनुमाय परप्रतिपत्त्यर्थं पञ्चावयववाक्यं प्रयुङ्क्ते, तत्परार्थानुमानम्। एवं तार्किकाणां मते अनुमानस्य पञ्चावयवनियमः वर्तते।(१)

अनुमानस्य पञ्चावयववत्त्वं एवं सूचितमस्ति रु॰वि॰काव्ये -

भस्मीभूतमिवारचय्य गिरिशो यं बाह्यदृष्ट्या पुनः
चित्तान्तःस्थितमर्पयद् गिरिसुतागर्भे ह्यनेकाननम्।
तं पञ्चावयवेषुमङ्गरुचिरं सृष्ट्वाग्र्यतर्कोपमं
छन्दोबाह्यकुतर्ककल्पमजयत् तेनैकलव्यं विभुः॥(७४।६)

---

(१) प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनानि पञ्चावयवाः
— गौ॰सू॰ १।१।२२

जरासन्धयुद्धे श्रीकृष्णः कामं प्रद्युम्नत्वेन तत्क्षणे उत्पाद्य तेन स्वतनयेन प्रद्युम्नेन जरासन्धपक्षीयं एकलव्यं अजयदिति अत्र वर्णयति कविः। कामः शिवस्य तृतीयचक्षुषा भस्मीभूत इवाभूत्। स एव च कामः शिवमनसि स्थितः षण्मुखरूपेण गिरिजागर्भे निहितः शिवेन। स एव कामः अद्य प्रद्युम्नरूपेण जनितः एकलव्यमजयत्।

अत्र कामः विष्णुसर्वोत्तमत्वप्रतिपादकेन सदनुमानेनोपमितः। तच्च विष्णुसर्वोत्तमत्वं शिवेन पूर्वं बाह्यदृष्ट्या आपाततः भस्मीभूतमिव - नाशितमिव - अभूत्। शिवः विष्णवाज्ञया एव पूर्वं विष्णुसर्वोत्तमत्वं पाशुपतागमेन निराकृतवान्।(१) तच्च विष्णुसर्वोत्तमत्वं शिवमनसि दृढमासीदेव। तत्तत्त्वं शिवः गिरिजायै गौप्येन उपदिदेश।(२) तेन विष्णुसर्वोत्तमत्वप्रतिपादकेन सदनुमानेन विष्णुसर्वोत्तमत्वनिराकरणपराः कुतर्काः निरस्ताः।

एवं अग्र्यतर्कोपमेन प्रद्युम्नेन कुतर्ककल्पः एकलव्यः पराजितः।

---

(१) एष मोहं सृजाम्याशु यो जनान्मोहयिष्यति।
त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय॥
अतथ्यानि वितथ्यानि दर्शयस्व महाभुज।
प्रकाशं कुरु चात्मानं अप्रकाशं च मां कुरु॥
- इति शिवं प्रति विष्णोरुक्तिः वाराहे - ब्र.सू. माध्वभाष्ये (१.१.१) उद्धृता।

(२) इदं भद्रे त्वया गोप्यं पाठ्यं स्वार्थैकसिद्धये
— व्याख्योद्धृतं पुराणवचनम्

Rarest Archive

अत्र कामस्य पञ्चावयवेषुत्वमुक्तम्। लताद्यवयवरूपबाणवान् कामः। अनुमानपक्षे च प्रतिज्ञादयः पञ्चावयवाः ग्राह्याः।

षण्मुखः अनेकाननः। अनुमानमपि अनेकाननं - अन्वय, व्यतिरेकादिरूपबहुमुखम्।(1) अत्र तर्कशब्देनानुमानं गृह्यते। अथवा अनिष्टापादनरूपः तर्कः उपादेयो भवति। तर्कपक्षे च आत्माश्रय- अन्योन्याश्रय-चक्रक- अनवस्था- केवलानिष्टापादनरूपाणि मुखानि भवन्ति। पञ्चावयवेषु इत्यत्र व्याप्ति-प्रतितर्काप्रतिहति - विपर्ययापर्यवसान-आनिष्ट- अननुकूलत्वं इत्येतानि ग्राह्याणि। यद्यपि मध्वसिद्धान्तानुसारेण अनुमानस्यावयव- नियमः नास्ति।(2) अथापि तार्किकानुसारेणानुमानस्य पञ्चाङ्गत्वमभिहितम्। मध्वसिद्धान्ते तर्कोऽपि अनुमानान्तर्गत एव।(3)

अत्र एकलव्यस्य निषादत्वात् असुरत्वाच्च छन्दोबाह्य- कुतर्ककल्पत्वं उक्तम्। वेदाद्यनुकूलतर्कस्यैव प्रामाण्यात् प्रत्यक्षागम साहाय्यरहितस्य अनुमानस्य प्रामाण्यं नाङ्गीक्रियते।(4)

(1) तर्कसङ्ग्रह. पृ. ४०.

(2) श्रोत्राकाङ्क्षानुसारेणैवावयवकल्पना युक्ता नतु तन्नियतिः।

— प्रमाणलक्षणटीका . पृ. ७१

(3) सोऽयं तर्कः अनुमान एवान्तर्भूतः अतो न प्रमाणान्तरत्वभङ्गः तत्रैव पृ. ५४

(4) श्रुतिसाहाय्यरहितं अनुमानं न कुत्रचित्।

निश्चयात्साधयेदर्थं प्रमाणान्तरमेव च। ब्र. सू. माध्वभाष्ये (१।१।३) उद्धृतं कौर्मवाक्यम्
अन्यच्च न्यायशास्त्रविषयः (१४।९) जात्युत्तरम्.

Rarest Archiver

मीमांसकप्रक्रिया - कर्मप्रधानाः मीमांसकाः ईश्वरं नाङ्गीकुर्वन्ति ।

इदं तु रु॰वि॰ काव्ये एवं सूचितमस्ति —

ततातताततीततत्त्वततितातोऽतते तु तत ।

तत्तातौतातितेती तेऽतातातीते ततोऽत्ति नाम ॥(७।६२)

गोपीभिः कृतं श्रीकृष्णप्रार्थनं विप्रलम्भावस्थायामिदम् —

पदच्छेदः - ततातताततीततत्त्वततितातः । अतते । तु । तत ।

तत्तातौतातितेती । ते । अतात । अतीते । ततः । अत्ति । नाम ।

गोप्यः कथयन्ति - हे अतात जनकरहितश्रीकृष्ण, भवान्

ततं व्याप्तं अततं अव्याप्तं अतीतं अतिशयेन त्वां इतं

मुक्तं — ततातताततीतानि च तानि तत्त्वानि ततातताततीततत्त्वानि

तेषां ततिः तस्याः तातः सृष्टिकर्ता अस्ति । एवं ततातताततीत-

तत्त्वततितातः श्रीकृष्णः । तां च मुक्तामुक्त ततिं भवान्

अतते । व्याप्नोति । ततः स्थित्यनन्तरं तां तत्त्वततिं भवान्

अत्ति । एवं भवान् जगतः सृष्टिस्थितिलयकारणं भवति ।

अतः ते=तव तत्ता - जगत्त्वाराभ्यं ताततितानां ईतिः

मीमांसकोक्तनिरीश्वरत्वरूपबाधा च अतीते अतिक्रान्ते स्तः ।

तौताततितानां ईतिः तौताततितेतिः, तत्ता च तौताततितेतिश्च

तत्तातौतातितेती ते प्रसिद्धे स्तः । अत्र तौताततितानां मीमांसकानां

इतिः बाधा इति मीमांसकानां ईश्वरानङ्गीकर्तृत्वं सूचितं भवति ।

अद्वैतदर्शनम् - अद्वैतदर्शनस्य प्रक्रियाः पौनःपुन्येन दृश्यन्ते रु॰वि॰काव्ये । अद्वैतादिप्रक्रियानिराकरणायैव रचितग्रन्थान्तरः अयं महाकविः अत्र तत्प्रक्रियाणां निराकरणं काव्योचिततया उत्प्रेक्षा-उपमादिभिः आतनोति । क्वचिच्च अद्वैतप्रमेयानि स्पष्टमपि निराकुरुतेऽत्र रु॰वि॰काव्ये ।

इदं तावत् शिशोः श्रीकृष्णस्य वर्णनम् -

वैगुण्यं विविधोदयैः विमृशतां वित्तैः जगद्बाध्यतां
वैरूप्यं निजतेजसा निरुपमैरङ्गैर्निराकारताम् ।
नीचैस्त्वं च निरस्य निर्मधियां नित्यार्चया विठ्ठलो
दिग्भिन्नाम्बरधिक्क्रियार्थमभवद् दिग्वस्त्रतां दीपयन् ॥(२।८)

अनन्तकल्याणगुणगणपरिपूर्णः श्रीकृष्णः एव परब्रह्म मध्वमतानुसारेण ।(1)

अद्वैतमतानुसारेण ब्रह्म निर्गुणम् । समस्तगुणरहितमेव ब्रह्म । नित्यशुद्धबुद्धमुक्तस्वभावम् ।(शां॰भा॰ १-१-२)

श्रीकृष्णः शिशुः नानाविधसौन्दर्यशौर्यादिभिः स्वीयैः गुणैः स्वस्य अद्वैत्युक्तं वैगुण्यं निराचकार। परब्रह्मणः स्वस्य सौन्दर्यादियुक्तत्वात् नैर्गुण्यं निराकृतं भवति ।

---

(१) कृष्णो मुक्तैरिज्यते वीतमोहैः [(भारतवाक्यम्) ब्र॰सू॰ माध्वभाष्ये (३-३-१७-२७) उद्धृतम्] इति प्रमाणानुसारं मुक्तैरपि श्रीकृष्णस्य पूज्यत्वात् स एव परब्रह्म ।

Rarest Archiver

अद्वैतमतानुसारेण जगदिदं मिथ्या । ब्रह्मसाक्षात्कारे च नास्ति नासीत् न भविष्यति इत्याकारकज्ञानविषयं भवति। प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वं मिथ्यात्वं इति द्वितीयमिथ्यात्वनिर्वचनं अद्वैतसिद्धौ । इदं च जगन्मिथ्यात्वं श्रीकृष्णेन निरस्तम्। परब्रह्मणि स्वस्मिन्नेव विजृम्भमाणे सति विद्यमानस्य वर्धमानस्य वित्तादिद्रव्यस्य परिदृश्यमानत्वात् । ब्रह्मणः निराकारत्वमपि अद्वैत्यभिप्रेतं, तदपि स्वीयैः निरुपमैः अङ्गैः निराचकार श्रीकृष्णः। 'जीवो ब्रह्मैव नापरः' इति अद्वैत डिण्डिमः। निर्मलबुद्धिभिः नारदादिभिः नित्यं क्रियमाणया अर्चया सोऽपि निराकृतः। पूज्यपूजकानां भेदावश्यंभावात् । एवमत्राद्वैतमतस्य ब्रह्मनिर्गुणत्वं, निराकारत्वं, जगन्मिथ्यात्वं जीवैक्यं इत्येताः प्रक्रियाः श्रीकृष्णेन निराकृतत्वेनोत्प्रेक्षितानि। जीवैक्यं चाष्टमे सर्गे गोपीनां विप्रलम्भवर्णने तासां ज्ञानित्वचित्रणे एवं प्रसक्तमस्ति निराकरणीयतया -

विधिशर्वपूर्वसुमनःसुमनःसरसीनिवास जगताऽजगता ।
त्वदभिन्नता तुहिनतो हि नतो दहनोऽपरोऽसदृश तादृशता ॥(८/२८)

अत्र जीवपरमात्मनोः अल्पज्ञत्वसर्वज्ञत्वरूपविरुद्धधर्माधिकरणत्वेन अभेदः निराकृतः - दहनतुहिनयोरिव । विरुद्धधर्माधिकरणत्वप्रदर्शनाय च ब्रह्मरुद्रादिभिः अजस्य हरेः ध्येयत्वमुक्तम्। ध्यातृत्वध्येयत्वान्यथानुपपत्त्या भेदसिद्धिरत्राभिहिता।

Rarest Archiver

जगन्मिथ्यात्वनिराकरणं च पुनरष्टमे सर्गे एवं प्रसक्तम् –

अनृतं जगत्कलयतेऽलय ते यदि कोऽपि मानसहितम् स हितम्।
रुचिरं कथं निजनये जनयेत् न हि रज्ज्वहेः श्रुतिरभूतिः अभूत्॥(८/३१)

प्रमाणैः जगन्मिथ्यात्वं यदि साध्यते तर्हि जगदन्तःपातिनां प्रमाणानामपि मिथ्यात्वं भवति। मिथ्यात्वे च प्रमाणानां, शशविषाणवत् साधकत्वमेव न भवति। अयं च विषयः एकादशेऽध्याये प्रपञ्चितोऽस्ति अस्मिन् प्रबन्धे।

जरासन्धेन सह युद्धवर्णने च जगत्सत्यत्वमेवमुक्तम् –

प्राणायोगपलायनप्रपतनाघातार्तिवित्तव्यय-
स्वेदास्यौदयवक्त्रनैल्यभयदुष्कीर्त्यादिविश्वं युधि।
सत्यं शत्रुचयेषु चक्रुरखिलं यद्ब्रह्मसाक्षात्कृतेः
लब्धं तद्विपरीतमात्मसु ततः सिद्धं मुरारेर्भटाः।

अत्र जरासन्धपक्षीयेषु दुःखं सत्यमभूत्, मुरारिपक्षे च सुखं सत्यं सिद्धं अभूत् — श्रीकृष्णाख्यपरब्रह्मसाक्षात्कारेऽपि अनुभूयमानत्वात्।

तत्त्वमसीति वाक्यात् अखण्डार्थावबोधो भवतीति अद्वैतस्य महातत्त्वम्। जहदजहल्लक्षणया इदं वाक्यं विरुद्धपरोक्षापरोक्षत्व रूपविरुद्धांशं परित्यज्य अविरुद्धं अखण्डचैतन्यमात्रं लक्षयति – यथा सोऽयं देवदत्त इति वाक्यं विरुद्धं तत्कालैतत्कालविशिष्टत्वांशं परित्यज्य केवलं अविरुद्धदेवदत्तांशं लक्षयति[१]। इदं प्रमेयं रु.विका.ये एवं अभिव्यक्तं युद्धवर्णने —

---

(१) वेदान्तसारः - पृष्ठं १४२

छत्रं ध्वजं-चामरचर्मवर्महस्त्यश्वपत्यादि समस्तवित्तम् ।
कृत्वा सखण्डं युधि कृष्णभृत्याश्चक्रुस्त्वखण्डार्थमविद्यमानम् ॥(१४/१)

छत्रादिपदार्थानां सखण्डत्वकरणेन अखण्डपदार्थमेव ।विद्यमानं चक्रुः हरिभटाः जरासन्धपक्षे ।

अद्वैतमते अज्ञानं सदसद्भ्यामनिर्वचनीयम् । त्रिगुणात्मकं तत् ज्ञानविरोधि, भावरूपं यत्किञ्चिदिति अङ्गीक्रियते । (वेदान्तसारः पृ.२८) युद्धवर्णने तदपि एवं निरूपितं रु.वि.काव्ये —

सङ्ग्रामकौशल्यचिदुज्झितानां भङ्गं समालिङ्ग्य सुमूर्च्छितानाम् ।
सिद्धामविद्यां विदधुर्विपक्षे विज्ञाप्यभावाकृतिमेव युद्धे ॥(१४/२)

मूर्छां प्रपन्नानां जरासन्धभटानां श्रीकृष्णमाहात्म्यज्ञानस्य अभावः एव अभूत् ।

सत् असद् सदसद्विलक्षणमिति पदार्थविभागेन जगतः सदसद्-विलक्षणत्वमङ्गीक्रियतेऽद्वैतमते । तदुत्रैवं प्रसक्तम् —

पलायनं ये विदधुर्नृपान् तान् विधाय यत्कोटिषु कृष्णभृत्याः ।
अन्यानसत्कोटिषु सन्निवेश्य शून्यं प्रचक्रुः सदसद्विभिन्नम् ॥(१४/३)

युद्धाङ्गणात् पलायिताः सत्कोटिप्रविष्टाः जीवन्ति स्म । युद्धाङ्गणे स्थिताश्च मृताः असत्कोटिप्रविष्टाः । एतदन्यप्रकार एव नाभूत् इति सदसद्-विभिन्नं शून्यमेवाभूत् ।

एवं रु.वि.काव्ये अद्वैतादिप्रक्रियाः[1] काव्योचिततया उपात्ताः ।

---

(१) अन्ये च अद्वैतप्रमेयोल्लेखिश्लोकाः ८/२०,३२, १४/४,५,८,११,३५,३६ .

Rarest Archiver

एकादशोऽध्यायः   मध्वसिद्धान्तप्रतिपादनम्

इदं तावत् पूर्वमेवोक्तं यत् महाकविरयं श्रीवादिराजतीर्थः श्रीमन्मध्वाचार्यप्रतिष्ठापितेषु उडुपीयाष्टमठेषु अन्यतमस्य सोदामठस्य अधिपतिरासीदिति । मध्वसिद्धान्तस्य प्रतिष्ठापनं प्रसारश्च श्रीवादिराजतीर्थेन लोकविलक्षणया प्रणाल्या कृतौ । रु॰ वि॰ काव्ये मध्वसिद्धान्तप्रमेयाणि तत्र तत्र सङ्कोपितानि वर्तन्ते । स्वकृतेषु युक्तिमल्लिका-न्यायरत्नावली--श्रुतितत्त्वप्रकाशिकादिषु ग्रन्थेषु शास्त्रार्थविचारार्थं प्रवृत्तेषु श्रीवादिराजतीर्थः तत्त्ववाद-तत्त्वानि सप्रमाणं संस्थापितवानस्ति । काव्येऽस्मिन् तानि तत्त्वानि मनोहारिण्या पद्धत्या निरूपितानि वर्तन्ते । परन्तु शास्त्रार्थप्रतिपादनेन काव्यधाटी न क्वचित् कुण्ठिताऽस्ति । तत्त्वशास्त्रविषयवर्णनेन च नीरसताऽपि नानुभूयते काव्यास्वादनकोमलधिषणानाम् ।

परमहंसं तं श्रीमध्वाचार्यं हंसत्वेन मङ्गलाचरणावसरे (१) वर्णयति श्रीवादिराजः । श्रीमदानन्दतीर्थीयराद्धान्ते निरतिशया श्रद्धा तत्र तत्र प्रकटिताऽस्ति (२) पूतनादिषु जीवद्वयावेशं समर्थ्य उद्रिक्तभक्तिः आनन्दतीर्थीयं मतं एवं स्तौति —

आनन्दतीर्थमतमुज्झितदोषजातं
स्वानन्ददायि शिथिलीकृतमत्तमायि ।
मानौघशोभि मम दुर्जनपुञ्जतोऽभीः
येनेदृशी मतिरभूत् कवितोल्लसद्भूः ॥(२/६०)

---

(१) १/५   (२) ५/३६-३९

Rarest Archiver

अत्र हि आन्दतीर्थीयं मतं दोषदूरतया, अधिकारिणां मोक्षानन्दप्रदातृतया, मायावादनिरसने च समर्थतया, प्रमाणपुञ्जोपबृंहिततया वर्णितं वर्तते। एतादृशमतावलम्बनेनैव स्वस्य कवितोल्लासकरबुद्धिमत्वं सोत्साहं प्रकटयति कविरत्र। शरत्काले मरुद्वर्णने च आनन्दतीर्थस्योत्कर्षः एवं अभिव्यक्तोऽस्ति—

पद्मासेव्यगुणौघविस्तृतिकरः स्पष्टीभवच्छारदा-
नन्दः कम्पितभोगिराजशिरसा मान्यागमः सन्ततम्।
सन्मार्गाश्रितपङ्कशोषणकरः सत्पान्थघर्मापहो
नित्यं विष्णुपदाश्रयः परिलसत्पुण्याम्बुपूतोऽसकृत्॥
रामायोगिजनस्य भीमचरितः सद्वंशजातं मुहुः
प्रेमालम्बनशब्दहृद्यवदनं कुर्वन् स्वकीयागमैः।
सुक्षेमं सुमनश्च यस्य विदधत्सुव्याप्तमूर्तिः क्षितौ
सच्छास्त्रो सुखतीर्थवन्मरुदभून्मूर्धाभिषिक्तस्तदा॥(५/३७,३८)

श्लिष्टविशेषणैरस्मिन् श्लोकद्वन्द्वे शरत्कालीनमरुतः श्रीसुखतीर्थस्य च मूर्धाभिषिक्तत्वं प्रतिपादितम्। पद्मया आसेव्यानां विष्णोर्गुणानां विस्तरणेन, शारदानन्दस्पष्टीकरणे देवैरपि शिरसामान्य शास्त्रविरचनेन सतां सन्मार्गप्रदर्शनेन नित्यं विष्ण्वैकाश्रयणेन—इत्यादिभिरनितरसाधारण महाकार्यसाधनात् स्वगुरोरानन्दतीर्थस्य उत्कर्षः प्रतिपादितः। जरासन्धेनसार्धं युद्धवर्णने जरासन्धभटाः मायावादित्वेन श्रीकृष्णभटाश्च तत्त्ववादित्वेन च वर्णिताः सन्ति। तद्युद्धं च तत्त्ववादिमायावादिनोः वादत्वेन वर्णितमस्ति। श्रीकृष्णस्य बाणः मध्वाचार्यसदृशतया

Rarest Archiver

चित्रितोऽस्ति।(1) कृष्णस्य रथः मध्वस्य मनोरथेन उपमितोऽस्ति।(2)
श्रीकृष्णस्य कौमोदकी गदा वादप्रवृत्तस्य मध्वाचार्यस्य वचः
समतया निरूपिता। तस्य च शङ्खः समस्तागममानकर्तुः
गुरोः तस्य कण्ठसदृशतया वर्णितः।(3) श्रीकृष्णस्य सुदर्शनचक्रं
मध्वस्य-दर्शनेनोपमितः।(4) श्रीकृष्णस्य निषङ्गद्वयं च मध्वाचार्य
विरचितेन ब्रह्मसूत्रभाष्य-अनुव्याख्यानाख्य ग्रन्थद्वयेन तुलितं वर्तते।(5)

---

(1) कृष्णाङ्गसङ्गपुज्ज्वलशार्ङ्गजन्मा सत्पक्षपातेन गृहीतवेगः।
एकोऽपि नानावदनैः समन्तात् युध्यन्नसौ मध्व इवास्ति बाणः॥१३/५३
५३-६२ श्लोकेषु बाणवर्णनं मध्ववर्णनं च श्लेषोपमाद्याश्रयेण कृतम्।

(2) रु.वि. १३/४५

(3) कौमोदकी वादविनिविष्टमध्ववाचः समा प्रादुरभूद्धरिण्याम्।
कम्बुर्गुरोर्मञ्जुनिनादकण्ठकान्तिः समस्तागममानकर्तुः॥१३/४६

(4) व्यक्ताभेद्यसहस्रचक्ररुचिरं नित्यं मुरारेः प्रियं
मुक्तिद्वारमहीशमुख्यविबुधैर्गीतं तमिस्रापहम्।
दैत्यध्वंसि सुदर्शनं दिनकरोद्दीप्तं दिगन्ताततं
पृथ्व्यां मध्वसुदर्शनप्रतिकृति प्रादृश्यत प्रोज्ज्वलम्॥१३/४७

(5) कृष्णश्रैष्ठ्यसमर्थनेऽतिचतुरैस्तद्भिन्नलोके मिथो
नित्यं साधयितुं क्षमैर्मतिमताप्यच्छेद्यहृद्यात्मभिः।
विख्यातैः शरसञ्चयैः सुरुचिरं प्राप्तं निषङ्गद्वयं
भास्वन्मानसहस्रभाष्यसदनुव्याख्यानकल्पं तदा॥१३/४८

Rarest Archiver

मध्वमतस्य विष्णुसर्वोत्तमत्वादीनि प्रमेयानि सुप्रसिद्धेऽस्मिन्पद्ये एवं सङ्गृहीतानि वर्तन्ते श्रीव्यासतीर्थैः –

श्रीमन्मध्वमते हरिः परतरः सत्यं जगत्तत्त्वतो
भेदो जीवगणा हरेरनुचरा नीचोच्चभावं गताः ।
मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधनं
ह्यक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः ॥

रु॰वि॰ काव्ये इमानि तत्त्वानि अन्ये केचिद् विशेषविषयाः च स्थले स्थले कथाप्रवाहाविच्छिन्नतया सूचिताः क्वचिच्च स्पष्टतया प्रतिपादिताश्च वर्तन्ते ।

विष्णुः सर्वोत्तमः – एकोनविंशे सर्गे विष्णोः सर्वोत्तमत्वं इत्थं रु॰वि॰ कथासङ्ग्रहेण निरूपितमस्ति –

कस्मान्मुह्यथ मानवा मुरभिदः सर्वोत्तमत्वे पुरा
यः पद्मासनधूर्जटिप्रभृतिभिः कार्यार्थिभिः प्रार्थितः ।
गर्भे गीर्भिरभिष्टुतः फणिफणे नृत्यंश्च यः सेवितः
सद्वेणुं रणयंश्च नम्रतनुभिः यो विस्मितैरीक्षितः ॥(१९।१३)
कृष्णायामपि तैर्नतैः परिवृतं दृष्ट्वा श्वफल्कात्मजः
यं तुष्टाव गुणैरबद्धमितरान्बद्धाननुदीर्य स्फुटम् ।
सेवातुष्टहृदोऽपि देवनिकरादप्राप्तमुक्तिं प्रभुः
यः प्रादात् मुचुकुन्दभूमिपतये तैर्निद्रितायाप्यलम् ॥(१९।१४)

पुराणान्तरकथाभिश्च श्रीहरेः ब्रह्मरुद्राद्युत्तमत्वमग्रिमे श्लोके उक्तम् –

Rarest Archiver

यः कल्पाङ्घ्रिपमाहरन्सुरवरान्व्यद्रावयत्सेश्वरान्
यो भस्मीकृतभस्मदानवपतिः शम्भुं पुरापालयत् ।
योगीन्द्राहृतवैभवो भृगुमुनिर्यच्छ्रैष्ठ्यमस्पष्टयत्
तं भक्त्या भजताजितं मधुजितं कैवल्यकामा जनाः (१३/१५)

अत्र भूभारहरणाय ब्रह्मरुद्रेन्द्रादिभिः प्रार्थितत्वात्, देवकीगर्भे पद्मासनादिभिः देवैः संस्तुतत्वात्, कालियमर्दने च तैः सेवितत्वात् वेणुवादनावसरे विस्मितैर्देवैः वीक्षितत्वात्, यमुनायामक्रूरेण प्राकृतगुणाबद्धतया दृष्टत्वात् अभिष्टुतत्वाच्च, मुचुकुन्दाय मुकुन्देन मुक्तिप्रदानात्, पारिजातहरणे सेश्वराणां सुरवराणां पराजितत्वात्, शम्भोः पालनात्, भृगुमुनिना विष्णुश्रैष्ठ्यप्रदर्शनाच्च हरेः सर्वदेवोत्तमत्वं प्रतिपादितं वर्तते। श्रीकृष्णेन कृता कैलासयात्राऽपि पौत्रालयप्राप्तित्वेन, लोके कृतावतारस्य तस्य लोकविडम्बनपरतया च व्याख्याताऽस्ति।[१] अयं च श्रीहरिः गुणपूर्णः दोषदूरश्च। पायाद्गुणोच्चमणिः (१।१) इति प्रथमश्लोके एव श्रीकृष्णस्य गुणाकरत्वमुक्तम्। अस्य गर्भवासादिदुःखं नास्त्येव। तस्य जनिर्नाम केवलं अभिव्यक्तिः। प्रथमे सर्गे कृष्णावतारवर्णने तस्य मातापितृभ्यां जन्म नास्ति किन्तु चिदानन्दैकशरीरस्य अनन्तशक्तेः हरेः देवकीदेहात् केवलं बहिर्निर्गमनमेव; शुक्लशोणितसम्बन्धेन तस्य उत्पत्तिर्नैव सम्भवतीति एवं साधितम् —

(१) रु॰ वि॰ १३/१६-२४

Rarest Archiver

जानाति माता परं आत्मजातं नूनं पिताऽपि क्वचिदेव लोके।
ताभ्यामनङ्गीकृतकृष्णजन्म को वा पुमान् साधयितुं समर्थः॥(१।५०)
श्रीमद्भागवते, जातं अलौकिकं शङ्खचक्रादि विभूषितं भगवन्तं कृष्णं दृष्ट्वा देवकीवसुदेवौ नायमस्मत्पुत्रः किन्तु परमात्मा एवेति स्तुतिं वितेनतुः।[१] ताभ्यां पितृभ्यामेव कृष्णस्य स्वपुत्रत्वं यदा नाङ्गीक्रियते तदा अन्यैस्तत्पुत्रत्वसाधनं अशक्यमेव भवति।
अन्यदपि इदं गमकं, श्रीकृष्णस्य वसुदेवात् अजातत्वे —
यर्हीह जातो वसुदेववीर्यात् तदा कुतस्तस्य विभूषणानि।
वराम्बरं कौस्तुभरत्नमुद्यत्सुदर्शनं शङ्खगदादिजातम्॥(१।५२)
भागवतोक्तरीत्या[२] श्रीकृष्णः शङ्खचक्रादिविशिष्टेन मूलरूपेण तयोः पित्रोः दृष्टिविषयोऽभूत्। पश्चात् शिशुवेषधारी बभूव। शङ्खचक्रादिमत्त्वं च प्राकृतशिशौ असम्भवमिति श्रीहरेः अप्राकृतशरीरवत्त्वं सेत्स्यति। अस्मिन् खलु विषये दृष्टान्ततया

(१) वसुदेव उवाच - विदितोऽसि भवान् साक्षात् पुरुषः प्रकृतेः परः।
केवलानुभवानन्दस्वरूपः सर्वबुद्धिदृक्॥ भाग॰ १०.३.१३

देवक्युवाच - रूपं यत्तत् प्राहुरव्यक्तमाद्यं ब्रह्म ज्योतिर्निर्गुणं निर्विकारम्।
सत्तामात्रं निर्विशेषं निरीहं स त्वं साक्षाद्विष्णुरध्यात्मदीपः॥ तत्रैव १०.३.२४

(२) तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शङ्खगदाद्युदायुधम्।
श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं पीताम्बरं सान्द्रपयोदसौभगम्॥
महार्हवैदूर्यकिरीटकुण्डलत्विषा परिष्वक्तसहस्रकुन्तलम्।
उद्दामकाञ्च्यङ्गदकङ्कणादिभिर्विरोचमानं वसुदेव ऐक्षत॥ तत्रैव १०.३.९,१०

Rarest Archive

नरसिंहावतारः उदाहृतः। नरसिंहावतारे यथा स्तम्भादेव श्रीहरिः प्रकटोऽभूत् तथा अत्रापि कृष्णः मातापितृभ्यां प्रकटः अभूत् इत्येव ज्ञातव्यमिति महाकविः साधयति –

यदा नृसिंहाकृतिराविरासीत् पदाहतस्तम्भवराद्धि पूर्वम्।
तदा नु का स्त्री सुषुवे मुकुन्दं स कस्य वीर्यादजनिष्ट कायः॥ (१।५४)

एवं श्रीहरेः प्राकृतवत् उत्पत्तिः निराकृता।[1]

एकादशे सर्गे कंस-भयदूतयोः संवादे विष्णोरुत्कर्षः प्रतिपादितः। भयाख्यदूतः कंसं प्रति स्पष्टयति यत् ब्रह्मरुद्रादीनां आश्रयेऽपि भयं जायते एव, श्रीकृष्णाश्रये एव निर्भयता इति——

शम्भुं सम्भज पद्मयोनिमथवा चन्द्रेन्द्रवह्नीन्द्रादिकान्
स्वर्गं गच्छ, तमो व्रज, प्रविश वा पातालं अत्रैव वा।
रक्षां भित्तिसहस्रवारिधिमहाशैलज्वलत्पावकैः
कृत्वा तिष्ठ तथापि कृष्णविमतं त्यक्ष्यामि न त्वामहम्॥ (११।२५)

शम्भुमाश्रितस्य बाणस्य, पद्मयोनिमाश्रितस्य हिरण्यकशिपोः, पातालं प्रविष्टस्य हिरण्याक्षस्य, भूमावेव भित्तिसहस्रं कृत्वा तिष्ठतः नरकासुरस्य च कृष्णेन मृत्युदर्शनात् ततोऽपि हरेरुत्कर्ष इति तत्तत्कथानां विचारणेन ज्ञायते इति साधितम्।

(१) यथा पुरा स्तम्भत आविरासीत् अशुक्लरक्तोऽपि नृसिंहरूपः।
तथैव कृष्णोऽपि तथापि मातापितृक्रमादेव विमोहयत्यजः॥
– श्रीमध्वाचार्यकृत महाभारततात्पर्यनिर्णयः। १२।६३

Rarest Archiver

रुक्मिणीलिखितपत्रे च कृष्णस्य सर्वोत्तमत्वं रुक्मिण्याः साक्षिप्रामाण्येन साधितम् । रुक्मिणी लिलेख —

धिक्कृत्याहमुमेशहंसगमनौ स्वर्गीश्वराग्नी भव-
त्सूक्तासक्तहृदङ्, लोकमखिलं देवौघमान्यान्मुनीन् ।
सच्छास्त्राध्वनि कोविदानपि बुधान् त्वय्येव यत्सस्पृहा
विश्वाधीश्वरतां भवद्भ भवतः तान्नौमि नौमि प्रभो ॥(१४।४२)

अत्र हि लक्ष्म्याः सर्वत्र निःस्पृहतया कृष्णे एव सस्पृहत्वात् विष्णोर्विश्वाधीश्वरता प्रतिपादिता। 'भवत्सूक्तासक्तहृत्' इत्यस्य रुक्मिणीं प्रति नारदोक्तं श्रीकृष्णवचनमित्येकोऽर्थः। अन्यश्च भवत्सूक्तं नाम अम्भृणीसूक्तम्।[1] तदुक्तविष्णुमाहिमानं अनुसृत्य तस्य विश्वाधीश्वरत्वम् ।

षोडशे सर्गे रुक्मिणी-स्वयंवरवर्णने अन्यान् सर्वान् अपि सुरान् त्यक्त्वा रुक्मिण्या कृष्णवरणे हेतुं वदन् कविः तत्तद्देवतास्वरूपं वर्णयित्वा ततोऽपि उत्कृष्टत्वं श्रीकृष्णस्य स्पष्टीकृतम् । गरुडशेषरुद्राणां वर्णनं स्वबुद्धिसरण्या श्रुत्वा रुक्मिणी रमेशमेव चकमे इति इत्थं वर्णितं कविना —

गरुत्मदंसाचलनीलमेघं फणीन्द्रहारोच्चयनीलरत्नम् ।
उमेशहंसप्रियपादपद्मं पतिं सती सा चकमे रमेशम् ॥(१६।३२)

अत्र गरुडशेषरुद्राणां तदनुग्राह्यतया विष्णोरुत्कर्षः। मुकुन्दस्य

---

(1) ऋ.सं (१०।१२५) वादिराजकृताम्भृणीसूक्तव्याख्या परिशिष्टे प्रदत्तास्ति।

Rarest Archiver

ज्ञानानन्दाद्यात्मकत्वेन दोषशून्यत्वेन जगज्जन्मादिकर्तृत्वेन विश्वाधारत्वेन समस्तागमप्रतिपाद्यत्वेन लक्ष्मीपतित्वेन च वर्णितः।(1) अष्टमे च सर्गे गोपीभिः कृतौ कृष्णस्तुतौ तत्सर्वाधिकत्वमभिव्यक्तम् —

कमलासनाच्च भवतोऽभवतो महतीन्दिरा किल तया लतया ।
तरुवद् भवान् परिवृतोऽरिवृतोदयदान सेदमनु ते मनुते ॥(८।२९)

कमलासनात् - चतुर्मुखब्रह्मणः भवतः रुद्रात् अभवतः भवेन रहितात् मुक्तात् (मुक्तेभ्यः) महती सा इन्दिरापि - लता तरुमिव - श्रीकृष्णं आश्रिता इति सर्वोत्तमत्वं अभिहितम् ।

जगत्सत्यत्वम् — मध्वमतानुसारेण परिदृश्यमानं जगत् सत्यमेव । सत्यत्वं नाम अबाध्यत्वम् ।(2) सन् घटः इत्यादि प्रत्यक्षं, विमतं सत्यं प्रमाणदृष्टत्वात् ब्रह्मवत् इत्यादीनि अनुमानानि;(3) विश्वं सत्यं मघवाना (ऋ० २-२४-१२) इत्याद्यागमाश्च

---

(1) अयं मुकुन्दः सखि चित्प्रमोदमयात्ममाङ्गोऽखिलदोषशून्यः ।
अवातरद्धि स्वजनस्य गुप्त्यै गुणाम्बुराशिः किल भूतलेऽस्मिन् ॥१६।२९
जगज्जनिस्थेमलयादिधर्मा भवन्त्यमुष्मात्किल शास्त्रयोनेः ।
अमुष्य साम्यं कतमः सुराणामुपैति यद्रोमसु विश्वकोशाः ॥१६।३०
समस्तवेदाः किल सेतिहासाः पुराणयुक्ताः स्मृतिभिः सहैनम् ।
समानशून्यं प्रभुमामनन्ति प्रमथ्य योऽब्धिं लभते स्म लक्ष्मीम् ॥१६।३१

(2) अबाध्यतायाः साध्यत्वात् - जयतीर्थः वादावली पृष्ठं १८८.

(3) तत्रैव पृष्ठं १८८.

जगत्सत्यत्वे प्रमाणत्वेन उदाह्रियन्ते । रु॰वि॰का॰ये अष्टमे सर्गे त्रयोदशे सर्गे चतुर्दशे सर्गे च गोपीकृतकृष्णप्रार्थनायां युद्धस्य वर्णने च सत्यत्वं जगतः आभिहितम् । जगद्बाध्यत्वं च निराकृतम् । शिशोः श्रीकृष्णस्य वर्णनमिदम् –

वैगुण्यं विविधोदयैः विमृशतां वित्तैर्जगद्बाध्यतां
वैरूप्यं निजतेजसा निरुपमैरङ्गैर्निराकारताम् ।
नीचैस्त्वं च निरस्य निर्मलधियां नित्यार्च्यया विठ्ठलो
दिग्भिन्नाम्बरधिक्कियार्थमभवद् दिग्वस्त्रतां दीपयन् ॥(५।२८)

अत्र प्रथमपादे विमृशतां वित्तैः जगद्बाध्यतां निरस्य इति जगन्मिथ्यात्वनिरसनमुत्प्रेक्षितम् ।[१] परब्रह्मणः स्वस्यैव सन्निधाने व्रजस्थजनानां निष्पन्नद्रव्यैः ब्रह्मसाक्षात्कारे जगतो बाध्यत्वं शिशुना हरिणा निराकृतमिति उत्प्रेक्षा । अष्टमे सर्गे गोप्यः कथयन्ति –

अनृतं जगत्कलयतेऽलयते यदि कोऽपि मानसहितं स हितम् ।
रुचिरं कथं निजनये जनयेत् न हि रज्ज्वहेः क्षतिरभूतिः अभूत् ॥(८।३१)

यदि जगत् अनृतं स्यात्तर्हि तदन्तःपातिनां मिथ्यात्वसाधकानां प्रमाणानामपि मिथ्यात्वात्तैः जगन्मिथ्यात्वं कथं सेत्स्यति । रज्ज्वारोपितात् मिथ्याभूतात् अहेः सकाशात् क्षतिः न कदापि भवति । एवं मिथ्याभूतस्यासाधकत्वात्

---

(१) विमृशतां स्मरतां व्रजस्थजनानां वित्तैः कृष्णसन्निधानेन निष्पन्नद्रव्यैः जगतां बाध्यतां मायावाद्युक्तस्थिमिथ्यात्वमित्यर्थः । निरस्य परब्रह्मसाक्षात्कारेणैव वर्धमानद्रव्यादेर्ब्रह्मज्ञानबाध्यत्वायोगादिति भावः । – तद्व्याख्या ।

मिथ्यात्व साधक प्रमाणानां मिथ्यात्वे, तत्साधकत्वं न सम्भवति। किञ्च रज्ज्वहिं दृष्ट्वा भयकम्पादिकं यत् जायते तत्तु सत्यभूतात् अहिज्ञानादेव भवति। अत्र रज्ज्वहिज्ञानं सत्यम्। रज्ज्वारोपितः अहिस्तु मिथ्याभूत एव। अर्थक्रियाकारित्वं सत्ये रज्ज्वहिज्ञाने एव वर्तते इति सत्यस्यैव साधकत्वम्।

भयहेतुतास्य न च कम्पकता उभयहेतुताऽस्य चित एव परम्।
न हि चिद्गतेऽर्थमहिमा निशि तान् अहिचिद्गतेऽर्थ इह राति हि तान्॥(८।३२)

चिद्गते (चित् ज्ञानं गता यस्मात्सः) सुप्ते पुरुषे सर्पाद्यर्थमहिमा भयकम्पादीन् न राति। अहिचित् 'अयं सर्पः' इति ज्ञानं अर्थे गतेऽपि अर्थस्य मिथ्यात्वेऽपि भयकम्पादीन् ददाति। एवं अर्थक्रियाकारि सर्पज्ञानं सत्यम्। मिथ्याभूतः रज्जुसर्पस्तु नार्थक्रियाकारी भवति।

जरासन्धयुद्धे च हरिभटाः प्राणायोग पलायनादि... जरासन्धस्य पक्षीयेषु सत्यं विधाय तद्विपरीतं वस्तुजातं आत्मपक्षे ब्रह्मणः कृष्णस्य साक्षात्कारेऽपि विद्यमानत्वात् सत्यं चक्रुः —

प्राणायोग-पलायन-प्रपतन-आघात-आर्ति-वित्तव्यय-
स्वेद-अस्रोदय-वक्त्रनैल्य-भय-दुष्कीर्त्यादि विश्वं युधि।
सत्यं शत्रुचयेषु चक्रुरखिलं यद्ब्रह्मसाक्षात्कृतेः
लब्धं तद्विपरीतमात्मसु ततः सिद्धं मुरारेर्भटाः॥(१२।६४)

श्रीकृष्णस्यैव परब्रह्मत्वमत्र स्पष्टमुक्तम्। एवं जगत्सत्य विषय प्रतिपादनं रु० वि० काव्ये स्पष्टतया उपलभ्यते।

Rarest Archive

तत्वतो भेदः - न चाभेदे कश्चिदागमः। सन्ति च भेदे सर्वागमाः।(१)
जीव-जड-ईश्वरेषु पञ्च भेदाः अङ्गीकृताः मध्वसिद्धान्ते। अयं च
भेदः मोक्षेऽपि विद्यते एव।

जीवेश्वरभिदा चैव जीवभेदः परस्परम्।
जडेशयोर्जडानां च जडजीवभिदा तथा॥
पञ्चभेदा इमे नित्याः सर्वावस्थासु सर्वशः।
मुक्तानां च न हीयन्ते तारतम्यं च सर्वदा॥(२)

युद्धवर्णने पञ्चभेदाः एवं चमत्कारेण प्रतिपादिता वर्तन्ते —

शस्त्रास्त्रप्रकरेषु शार्ङ्गधरतो भेदं द्विपाश्वद्विप-
दुर्गेष्वात्तशरासनान्मुरभिदः निर्भिन्नगात्रेषु च।
मृत्योर्लोकमितेषु तं स्वजनतः कायाभिधः खण्डिते
हस्तादौ युधि साधयन स विदधे व्यक्तं भिदां पञ्चकम्॥(७३।६२)

सः श्रीकृष्णमुक्तशरः युद्धे भेदपञ्चकं साधितवान्। तथाहि -
शत्रूणां शस्त्रास्त्रसमूहेषु शार्ङ्गिणः विदारणं साधयन्(३) शत्रूणां
द्विप-अश्व-द्विपदां वर्गेषु मुरभिदः सकाशात् करचरणादीनां
विदारणं साधयन्(४) कृष्णात् निर्भिन्नगात्रेषु द्विपाश्वादिषु च

---

(१) मध्वाचार्यः विष्णुतत्वविनिर्णये
(२) म.भा.ता.नि. १।७०,७१
(३) अनेन जडेश्वरभेदः प्रोक्तः
(४) वध्यघातकयोर्भेदेन जीवेश्वरभेदः प्रदर्शितः।

Rarest Archive

देहवियोगरूपं भेदं साधयन्[1] मृतेषु च तेषु जीवरूपः बान्धवेभ्यः वियोगं साधयन्[2] कायात् खण्डिते हस्तादौ च विदारणं स्पष्टयन्[3] सः शरः पञ्चविधं विदारणं स्पष्टं कृतवान् । एवं युद्धे श्रीकृष्णः शत्रूणां शस्त्रास्त्रं चिच्छेद, द्विपाश्वादिकं जघ्ने, गात्राणि शिरांसि हस्तपादादींश्च व्यदारयत् इति वर्णितं भवति । वक्रोक्त्या मध्वसिद्धान्तोक्त पञ्चभेदानामपि प्रकाशनं निगदितं अत्र ।

गोपीनां वचनेषु च भेदप्रक्रिया इत्थं व्यक्तास्ति —

यदि भेदशून्यमखिलं मखिलङ्घ्यसुरार्दिता सुरसभाऽऽर सभा ।
तव धाम किं मुररिपोऽररिपो स्तुतिरप्युदार-चरिताऽऽ-चरिता ॥(८/३३)

भूभारहरणार्थं सुरसङ्घेन श्रीहरेः प्रार्थितत्वात्, स्तुतिकरणात् च सुरेभ्यः हरेः भेदः उत्तमता चोक्ते, प्रार्थ्यप्रार्थकयोर्भेदावश्यम्भावात् । तत्रैव च विरुद्धधर्माक्रान्तत्वात् जीवेशयोरभेदः नैव घटते इत्यपि विरुद्धधर्मप्रदर्शन पूर्वकं आभिहितम् —

क्वविरुद्धधर्मजलधी जडधीकलिताऽभिधा क्व निज-योनिजयोः । (८/३४)

विरुद्धधर्मैः जलधी इव विद्यमानौ जीवपरमात्मानौ क्व ?
जडधीकलिता आभिधा तयोः निज-योनिजयोः क्व ?
प्रलयेऽपि अप्रशायित्वान्नारायणः निजः उत्पत्तिरहितः । जीवस्तु उत्पत्तिमान् ।

(१) अनेन जीव-जडभेदः अभिहितः । (२) परस्परं जीवभेदः प्रतिपादितः ।
(३) जड-जडभेदः निरूपितो भवति ।

Rarest Archiver

नीचोच्चभावं गताः — (तारतम्यम्) मोक्षेऽपि तरतमभावः न हीयते न क्षीयते च द्वैतसिद्धान्तानुसारम्। जीवाश्च सात्विक-राजस-तामस भेदेन त्रिविधाः।(1) स्वरूपत एव तेषु अयं विभागः। चतुर्दशे सर्गे युद्धवर्णने जरासन्धभटानां प्रवृत्तिः एवं चित्रिता वर्तते —

पादाब्जे स्वमनीनमन् कतिपये मूर्धानमात्मेशितुः
शार्ङ्गोन्मुक्तशरैः विशीर्णतनवः केऽप्यात्मनोऽमीमरन् ।
अन्ये केऽपि हरिं जरासुतमपि त्यक्त्वा ततो दुद्रुवुः
जीवानां त्रितयेन सूचितदशां सन्दर्शयन्तो युधि ॥(१४।२९)

अत्र केचित् कृष्णे नतमस्तकाः उत्तमाः, उभयपक्षं त्यक्त्वा युद्धाङ्गणात् पलायिताः मध्यमाः तत्रैव मृतास्तु अधमा इति जीवत्रैविध्यम्। अयमेवाभिप्रायः पुनरपि रुक्मिव्यपहारानन्तरीये युद्धे प्रदर्शितोऽस्ति।(2) देवतातारतम्यं प्रथमे सर्गे उत्प्रेक्षाव्याजेन इत्थमुक्तम् —

देवेषु धाता प्रभुरस्य लक्ष्मीः तस्याः प्रभुः सोऽहमितीव शंसन्
आज्ञामजस्यैव ददावदृश्यः विज्ञेयमूर्तिः स्फुरमिन्दिरायाः ॥ (१।२४)

विरिञ्चि वैरिञ्चिमुखामरेशानां क्षीरपयोब्धितीरमागतानां तपसा प्रसन्नः हरिः तानाश्वासयन्नादिदेश। देवेषु उत्तमः धाता इति दर्शयितुं तस्यैवादृश्यः सन्, प्रत्यक्षं स्वं दर्शयित्वा इन्दिरायाश्चाज्ञां ददौ।

---

(१) ते च त्रिविधाः। मुक्तियोग्याः, नित्यसंसारिणः तमोयोग्याश्चेति। — मध्वसिद्धान्तसारः जीवप्रकरणं ७८, ७९

(२) अहयीत अहयीकश्चिदनंसीदपरोऽच्युतम्।
नाक्रमीदपरो विद्धो विक्रमार्कोदये हरेः॥१५।५
१७।१२ श्लोकोयं स्वयं वादिराजेन त्रिविधजीवपरतया व्याख्यातः। परिशिष्टे प्रदत्तः।

Rarest Archiver

मुक्तिः – मोक्षो हि सर्वपुरुषार्थोत्तमः। मुक्तिर्हित्वाऽन्यथा रूपं स्वरूपेण व्यवस्थितिः) मोक्षो नाम स्वस्वरूपाविर्भावावस्था। मोक्षानन्दे च चातुर्विध्यं विद्यते। सालोक्यं, सामीप्यं, सारूप्यं सायुज्यमिति। श्रीकृष्णस्य रासक्रीडायां मोक्षप्रकाराः इमे विचित्रतया, गोपीनां मोक्षभोगभाग्यवत्ता च वर्णिताः –

स्वानन्दं प्रकटीचकार सुखदं सायुज्यमालिङ्ग्य ताः
साधर्म्यं स्वकृतानुलेपतिलकैः मोक्षं हृदिस्थावृतेः।
ताभिः सस्मितमीक्षितो यदुपतिः सारूप्यसार्ष्टी दिशन्
रासाख्यं च तथोत्सवं न हि कथा व्यर्था परब्रह्मणः॥(८।४६)

रासक्रीडायां ताभिर्गोपीभिः सस्मितं ईक्षितः श्रीकृष्णः तासां हृदिस्थावृतेः हृदयस्य कुचाच्छादनवस्त्रं मोक्षं अपसरणं प्रकटीचकार।(मोक्षपक्षे हृदयस्थ प्रकृतिबन्धं निरस्तवान्।) स्वविलासजन्यं स्वानन्दं प्रकटीचकार (मोक्षपक्षे स्वरूपसुखं स्पष्टीकृतवान्) ताः गोपीः आलिङ्ग्य सायुज्यं - दृढसंयोगं प्रकटीचकार।(मोक्षपक्षे, सायुज्याख्यं मोक्षं दत्तवान्) गाढालिङ्गनेन स्वकृतगन्धानुलेपनं ताभ्योऽपि दत्वा समानधर्मास्ताश्चकार।(मोक्षपक्षे साधर्म्यं मोक्षं प्रायच्छत्) ताभिः साकं समानरूपत्वं प्राप्तवान् श्रीहरिस्तदा।(सारूप्यं मोक्षं दत्तवानिति सूचनम्) ताभिः क्रीडित्वा सार्ष्टिं अन्योन्यकण्ठालम्बित-पाणितया खेलनं प्रकटीचकार।(सार्ष्टिरूपं मोक्षं दत्तवान्) एवमत्र रासविलासवर्णनेन मोक्षावस्थाश्च संवर्णिताः शोभन्ते।

---

(१). म.सि.सा. पृ. १६०.

Rarest Archiver

अत्र सालोक्यमोक्षः नोपात्तः। सार्ष्टिरूपः मोक्षोऽत्र निरूपितः। स च सायुज्यमोक्षस्यावान्तरप्रभेदः।[1] सामीप्याख्यः मोक्षः अधस्तने पद्ये सूचितोऽस्ति —

साधाराम्बुकदम्बकेन सह सुप्रेमाश्रुधारां हरेः
भ्राजन्मालिकया समं प्रणयसन्मालां, सुनीराजनम्।
नेत्रान्तेन शुचिस्मितामृतरसैः नैवेद्यमावेद्य त-
त्पार्श्वं मन्दमुपाश्रयत्फलमिव व्यालोलहारोज्ज्वला ॥(१६।४४)

रुक्मिणी विवाहवर्णनमेतत्। अत्र स्नान-माला-नीराजन-नैवेद्य-समर्पणेन तत्फलमिव हरेः पार्श्वं उपाश्रयदिति वर्णनेन सामीप्याख्यमोक्षस्य सूचनं विद्यते।

मोक्षप्रदातृत्वं हरेः स्वभावः। स एव मोक्षप्रदः। अयं[2] च विषयः तृतीये सर्गे श्रीकृष्णस्य बाललीलावर्णनावसरे यशोदायै गोपीभिः तत्कृत्यनिवेदनव्याजेन सरसशैल्या एवं निरूपितो वर्तते —

न मुञ्च वत्सान् त्वमिहेत्य बद्धान् इतीरिते पुण्यपदे यशोदे।
स्मितोल्लसद्वक्त्रमदात्सुतस्ते स्वभाव इत्युत्तरमुत्तरज्ञः॥(३।४९)

बद्धान् वत्सान् न मुञ्चेति गोपीभिरुक्ते श्रीहरिः स्मितवक्त्रः सन् अयं मम स्वभावः इति ताभ्यः उत्तरं अदात्

(१) मध्वसिद्धान्तसारः पृ. १६०
(२) मोक्षस्तु विष्णुप्रसादं विना न लभ्यते। वि.त.नि.पृ. ४५१

Rarest Archiver

अमला भक्तिश्च तत्साधनम् - भक्त्या एव मोक्षसिद्धिः नान्यथा ।

माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः ।

स्नेहो भक्तिरिति प्रोक्तः तया मुक्तिर्न चान्यथा ॥[1] इति भक्तिलक्षिता ।

श्रीकृष्णः भक्तानां मुक्तिदाता । "स्वीयानाममृतं प्रयच्छति स मां पायाद् गुणोच्चमणिः" (१।१) इति भक्ताना अमृत-मोक्ष-दातृत्वमभिहितम् । रु॰वि॰काव्ये द्वितीये सर्गे पूतनासंहारानन्तरं भक्त्यैव मुक्तिर्नान्यथा इत्ययं विषयः विशेषतो विस्तारितोऽस्ति (२/४२-६०)

यदि प्रभुर्विद्विषतोऽपि शौरिः प्रसादकृत्तर्हि कुतः सुरारीन् ।

विजित्य भक्ताय तदीयभाग्यं प्रयच्छति स्वैरमिहावतीर्य ॥ (२।४२)

श्रीकृष्णः विद्विषतामपि यदि अनुग्राहकः स्यात्तर्हि रावणादीन् विहत्य तदीयं ऐश्वर्यं विभीषणादिभ्यः किंकारणं प्रादात ?

द्विषां हरिर्यच्छति यर्हि मोक्षं न तर्हि कस्मादपवर्गमार्गः ।

अरिष्टवातासुरवत्सकेशिविनाशकाले विवृतः शुकेन ॥ (२।४३)

भागवते च अरिष्टवातासुरादीनां विनाशकाले मोक्षप्राप्तिर्नैवोक्ता । अतोऽपि द्वेषान्मुक्तिर्नास्तीत्यवगम्यते ।

विष्णुद्वेषिणां च भागवतादिषु दुर्गतिरेवोक्ता —

पतन्त्यधोऽनाहतकृष्णपादाः[2] न चेयमस्यालयमेष्यसि त्वम् ।[3]

स नैऋतं धाम जगाम दैत्यः इतीरिता दुर्गतिरेव तेषाम् ॥ (२।४४)

(१) म॰भा॰ता॰नि॰ १।८६ (२) भाग॰

(३) भाग॰ १०।४३।४

ननु यथा भक्ताः भगवन्तं स्मरन्ति तथा द्वेषिणोऽपि सदा स्मरन्ति ।
उभयत्र स्मरणस्य साधारण्येन द्वेषिणामपि मोक्षोऽस्तु इति चेन्न —
कविरत्र तरक्षुकामधेनुदृष्टान्तेन आक्षेपं परिहरन्प्रत्याक्षिपति —

विद्वेषमूलस्मरणेन तुष्टिरित्यप्यवद्यं न जहाति पक्षः ।
हिंसार्थमालिङ्गपतत्तरक्षोः किं चेष्टया तुष्यति कामधेनुः ॥ (२।४१)

द्वेषमार्गः अतीव सुलभः । किंकारणमयं मार्गः श्रुत्या न दृष्टः,
ब्रह्ममीमांसाशास्त्रनिर्मात्रा च किं न दृष्ट इति पृच्छति कविवर्यः —

ज्ञानान्यमार्गप्रतिषेधकर्त्र्या श्रुत्या च निर्णायकसूत्रकर्त्रा ।
किमेष मार्गः सुलभो न दृष्टः किं वा तपस्याव्रतकर्षिताङ्गैः ॥ (२।४२)

नान्यः पन्था विद्यते अयनाय (तै.आ.३।१२।७) इति श्रुतिः ज्ञानमार्गं
पोषयित्वा तदन्यमार्गं नूनं निषेधयति ।

पूतनादि-देहेषु सज्जीवस्यापि सत्त्वात् सज्जीवाभिप्रायेणैव
भागवते कंस-पूतना-शिशुपालानां विनाशकाले मोक्षोऽभिहितः ।
यथा ब्राह्मणिष्ठकलेवरे द्वौ जीवौ वर्तेते तथा पूतना-कंस-शिशुपालानां
शरीरेषु जीवद्वयसद्भावात् सज्जीवस्यैव मोक्षः अन्यस्य
तु तमः इति मन्तव्यम् । (१)

---

(१) आपोऽब्रुवन्निति सनातनवेदवाक्यात्
किं वक्तृता जडजलस्य तथा शुकोक्तौ ।
कंसादिमोक्षवचनान्यपि युक्तियुक्त-
मानान्तरोदितमनोमधुरार्थभाञ्जि ॥ २।५२.

भक्तिश्च नवधा प्रोक्ता । रु० वि० काव्ये द्वारकावर्णने तादृशानां नवविधानां भक्तानां वर्णनं उपलभ्यते —

तत्कथाश्रवणोत्सवेन कतिचित् सङ्कीर्त्य संस्मृत्य तं
तत्पादाब्जनिषेवया च सुधियः तस्यार्चया केचन ।
सख्येनाप्यपरे प्रणम्य बहुशः केचिच्च दासास्तवे-
त्यात्मानं च निवेद्य मोक्षनिरताः सन्त्यत्र कृष्णार्चकाः ॥ (१७।४७)

अत्र श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥(१) इत्युक्तप्रकारेण नवविध-भक्तिभाजः कृष्णार्चकाः वर्णिताः ।

अक्षादित्रितयं प्रमाणम् - मध्वसिद्धान्ते, प्रत्यक्षं, अनुमानं आगमश्चेति त्रीण्येव प्रमाणानि । 'यथार्थं प्रमाणं' इति प्रमाणसामान्यलक्षणम् । निर्दोषेन्द्रियसन्निकर्षः प्रत्यक्षम् । (प्रमाणपद्धतिः पृ. १२४) निर्दोषोपपत्तिरनुमानम् (प्र. प. १६७) निर्दोषः शब्दः आगमः (प्र. प. ३७४)

रु० वि० काव्ये एतेषां प्रमाणानां तत्र तत्र सूचनं विद्यते । मधुरां यान्तं श्रीकृष्णं प्रति वदन्ति गोपाङ्गनाः —

यियासुं त्वां समालोक्य नः प्राणोऽपि यियासति ।
युवयोरविनाभावमक्षैरीक्षामहेऽधुना ॥ (१०।२६)

आगमप्रसिद्धं हरि-प्राणयोः साहचर्यं अधुना अस्माभिः प्रत्यक्षेण प्रमाणेन दृढीक्रियते - अनुभवगम्यं भवतीत्युक्तम् ।

Rarest Archiver

अनुमानस्य प्रसक्तिः अस्मिन् श्लोके इत्थं वर्तते —

पौराणिकं वाक्यमिवोग्रसेनं अग्रे जरासूनुरसौ जहास ।
जीवेशयोर्भेदमिवात्मयुक्त्या भेदं स चासाधयदस्य चापे ॥ (१३/५९)

पौरिकं वाक्यं दृष्ट्वा श्रुत्वा वा यथा खलु कुवादिनो हसन्ति तथा अग्रे वर्तमानं वृद्धं उग्रसेनं दृष्ट्वा युद्धे जरासन्धः जहास । तज्जरासूनुः, सः उग्रसेनः युक्त्या अनुमानेन अथवा पुराणवाक्यस्य निरवकाशत्वयुक्त्या जीवेशयोर्भेदसाधनमिव, चापे विदारणं असाधयत । अत्र च पुराणादिवाक्यानामपि प्रामाण्यसमर्थनं सूचितं भवति ; पुराणोक्तविषयजातस्य युक्त्या साधनाभिधानात् ।

अखिलाम्नायैकवेद्यो हरिः[१] — श्रीहरिः अखिलैरपि आगमैः मुख्यतया प्रतिपाद्यः । अपि च, आगमैरेव वेद्यः नानुमानादिभिः ।

रु. वि. काव्ये रुक्मिणीस्वयंवरे मुकुन्दः एवं वर्णितो वर्तते —

समस्तवेदाः किल सेतिहासाः पुराणयुक्ताः स्मृतिभिः सहैनम् ।
समानशून्यं प्रभुमामनन्ति प्रमथ्य योऽब्धिं लभते स्म लक्ष्मीम् ॥ (१६।३१)

अत्र समस्तैः सदागमैः समानशून्यत्वेन प्रतिपाद्यत्वमभिहितम् । शास्त्रैकसमधिगम्यत्वं हरेः 'जगज्जनिस्थेमलयादिधर्माः भवन्ति अमुष्मात् किल शास्त्रयोनेः' (१६।३०) इति तत्रैव निरूपितम् ।

---

(१) सदागमैकविज्ञेयं समतीतक्षराक्षरम् ।
नारायणं सदा वन्दे निर्दोषाशेषसद्गुणम् ॥ वि. त. नि. १।१.

शास्त्रैः अभिधया वृत्त्या प्रतिपाद्यत्वं तस्य हरेरेवमुक्तम् -

सुरर्षिसिद्धस्तुतिभिः समन्तात् समुत्थिताभिः समदूषयंस्ते ।
अनन्ययोग्याभिरवाच्यभावं मुकुन्दमुख्यार्थपराभिरस्य ॥ (१४।७)

जरासन्धयुद्धे विजयशालिनः श्रीकृष्णस्य पराक्रमादिगुणवर्णने प्रवृत्तानां सुरर्षिसिद्धानां स्तुतिभिः हरेः अवाच्यत्वं सकलशब्दैर्लक्षणया एव प्रतिपाद्यत्वं निराकृतम् । यतः ताः स्तुतयः मुकुन्दमुख्यार्थपराः एवासन् । अतः सकलशब्दैः परममुख्यवृत्त्या बोध्यः श्रीहरिरेवेति समर्थितं भवति ।

शास्त्रैकसमाधिगम्ये तस्मिन् श्रीहरौ प्रत्यक्षादयो न प्रवर्तन्ते इति चमत्कारेण इत्थं निरूपितम् —

सहस्रनेत्रोऽपि स कृष्णसत्त्वं मनागविज्ञाय दिदेश मेघान् ।
प्रवर्षणार्थं निगमैकवेद्ये किमाक्षिबाहुल्यमुपैति कृत्यम् ॥ (७।५६)

इन्द्रयागं त्याजयित्वा गोवर्धनपूजां कारयित्रे श्रीकृष्णाय क्रुद्धः सहस्राक्षः तस्य बलं अविज्ञाय प्रवर्षणार्थं मेघान् आदिदेश । हन्त निगमैकवेद्ये कृष्णे आक्षिबाहुल्यं न प्रयोजनकारि ।

एवं रु॰वि॰ काव्ये श्रीवादिराजतीर्थकविवर्येण मध्वसिद्धान्तप्रक्रियाः साङ्गोपाङ्गं सङ्गोपिता वर्तन्ते । तत्त्वशास्त्र-विचारप्रस्तावेन च काव्यधाट्याः साहित्यपरिपाट्याश्च न कापि हानिः सञ्जायते इति अयमन्य महान् विशेषः रु॰वि॰काव्यस्य ।

—— x ——

Rarest Archiver

chapter-12

द्वादशोऽध्याय:　　　　धर्मशास्त्रादिविषया:

शास्त्रकाव्येऽस्मिन् रुक्मिणीशविजये धर्मशास्त्रादि-विषया अपि विपुलं उपलभ्यन्ते ।

जातस्य शिशो: नाभिच्छेदनात्प्राक् जातकर्माख्य: संस्कार: कर्तव्य: ।(1) श्रीकृष्णस्य जातकर्मापि विधिज्ञै: विप्रै: कृतम् । अजन्मन: तस्य जातकर्म कृतमिति वैलक्षण्यमस्य –

अजन्मनस्तस्य हि जातकर्म विधाय विप्रा विदधुर्विधिज्ञा: ।
मधो:कुलेऽजातमपि स्वमन्त्रमधुश्रिया माधवमादिदेवम् ॥ (२/२७)

तत: स कृष्ण: कृतजातकर्मा प्रचक्रमेऽम्बास्तनपानकर्म (२/२८) जातकर्मानन्तरं स्तनपानकथनात् जातकर्मसंस्कारस्य स्तन्य-प्राशनात् पूर्वमेव करणीयत्वमुक्तं भवति ।

शिशोश्च चतुर्थे मासे जन्मगृहान्निष्क्रमणं आदित्य-दर्शनार्थं कार्यम् ।(2)

---

(1) प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते ।
मन्त्रवत्प्राशनं चास्य हिरण्यमधुसर्पिषाम् ॥ मनु॰ २।२९

(2) चतुर्थे मासि कर्तव्यं शिशोर्निष्क्रमणं गृहात् ॥ तत्रैव २।३४

रु॰वि॰का॰व्याख्यायां तु – औत्थानिकं नाम द्वादशेऽहनि अर्धमासे वा तृतीये वा शिशोरादित्यदर्शनार्थं गृहाद्बहि: निष्क्रमणम् इत्युक्तम्, द्वादशेऽहनि कर्तव्यं शिशोर्निष्क्रमणं गृहात् । तृतीये ऽर्धमासे वा दर्शनार्थं रवेरपि ॥ इति प्रमाणमुदाहृतं च ।

Rarest Archiver

श्रीकृष्णस्य औत्थानिकं कर्म नन्दः सोत्सवं चकार।

ततः शुभौत्थानिककर्म कर्तुमियेष नन्दः पुरुषोत्तमस्य। (२।६१)

शिशोर्नामकरणं च दशमे वा द्वादशे वा अहनि करणीयम्।

तदसम्भवे प्रशस्ते तिथौ मुहूर्ते वा करणीयं वर्तते।[1]

श्रीकृष्णस्य नामकरणं यादवानां पुरोहितः गर्गः चकार –

अथैत्य गर्गः किल रामकृष्णौ चकार नाम्ना विनतौ सुतौ तौ। (३।१९)

ब्रह्महत्यादीनि महापातकानि भवन्ति। ब्रह्महत्यायाः[2] पातकत्वं

रु॰वि॰काव्ये एवं सूचितम् –

न चेद्भवां विप्रशिखामणीनां हतिश्च पुण्याय भवेद्धि मूढाः।

तदङ्गसंस्पर्शनदर्शनाद्यैः तदीयनामग्रहणादिभिर्वा॥ (२।४६)

द्वेषेण भगवत्स्मरणे सन्तोषः भवतीति अभिप्रायो निराकर्तुमिदमुक्तम्।

गोब्राह्मणहननं च तन्नामग्रहणादिपूर्वकं भवतीति तदपि पुण्याय

भवेदित्यनिष्टापादनम्। अत्र गोहत्यायाः अपि पातकत्वमुक्तम्।[3]

---

(१) नामधेयं दशम्यां तु द्वादश्यां वाऽस्य कारयेत्।

पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते॥ मनु॰ २।३०

(२) ब्रह्महा मद्यपः स्तेनः तथैव गुरुतल्पगः।

एते महापातकिनो यश्च तैः सह संवसेत्॥ याज्ञ॰ प्रायश्चित्त॰ २२७

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।

महान्ति पातकान्याहुः संसर्गश्चापि तैः सह॥ मनु॰ ११/५४

(३) गोवधोऽयाज्यसंयाज्य पारदार्यात्मविक्रियाः। तत्रैव ११/५९

Rarest Archive

रजस्वला न स्पर्शार्हा इत्ययं विषयः (१) रु.वि.काव्ये एवं सूचितः वसन्तवर्णनावसरे —

शक्रोऽभूद्वनदेवताम् ऋतुमतीमप्युज्झितुं नो हरिः।(४।३७)

अत्र ऋतुमतीमपि इति अपिपदेन ऋतुमत्या स्पर्शानर्हत्वं अभिव्यक्तम्। परस्त्रीगमनं उपपातकं भवति खलु (२) (मनु. ११।५९)। तत्सूचनमिदम् —

मधुवशीकृतचित्त इवोष्णभा वरुणपालितदिङ्मृगलोचनाम्।
समधिगम्य दिवः स्वमपीपतत् दुरितवारितवाजिमना इव ॥(८।५१)

सूर्यास्तवर्णनमिदम्। वरुणपालितदिङ्मृगलोचनागमनेन दुरितेन तस्य आकाशात् पतनं उत्प्रेक्षितम्।

चन्द्रोदयवर्णने च -

गते दिशां भर्तरि देशमन्यं दिवाकरे मन्दमुपेत्य चन्द्रः।
तदम्बरं यज्जगृहे करैः स्वैस्ततः कलङ्कीति मम प्रतर्कः॥(६।३९)

अत्र पराङ्गनागमनेन ध्वनितेन चन्द्रमसः कलङ्कित्वं उत्प्रेक्षितम्।

सत्पात्रे दानेन च दातुः दुःखादिकं नश्यति समृद्धिश्च भवतीति (३)

---

(१)(रजस्वला) स्पर्शयोग्या तु त्रिरात्रव्यपगते चतुर्थेऽहनि कृतस्नानैव शुद्धा भवति। मनु.(५।६६) श्लोकस्य मन्वर्थमुक्तावलीव्याख्या।

(२) नहीदृशमनायुष्यं लोके किञ्चन विद्यते।
यादृशं पुरुषस्येह परदारोपसेवनम् ॥ मनु. ४।१३४

(३) विद्यातपःसमृद्धेषु हुतं विप्रमुखाग्निषु।
निस्तारयति दुर्गाच्च महतश्चैव किल्बिषात्। तत्रैव ३।९८

स्मृतिसम्मतम्। अयं विषयः र॰वि॰काव्ये वर्षावर्णने एवं अर्थान्तरन्यासेन निरूपितोऽस्ति –

कादम्बिन्यै वितरति पयोबिन्दुमात्रं पयोधौ
आसीद् वृद्धिः सकलसरितां स्वात्मनश्चेति युक्तम्।
नित्यं विष्णोः पदमधिगतायात्युदाराय दानाद्
अम्बुबिन्दूनामपि शतगुणा वृद्धिरद्धा स्वर्गे ॥ (५।३४)

अत्र नित्यं विष्णोः पदमधिगताय, अत्युदाराय इति च प्रतिगृहीतुः प्राशस्त्यं प्रतिपादितं, वृद्धिरद्धा भवतीति तत्फलमभिहितम्।

स्त्रीणां च परपुरुषसेवनं अधर्मः इति श्रीकृष्ण-गोपीसंवादे एवं प्रतिपादितम्-

धर्मो न वोऽयं श्रुतिसङ्गताक्ष्यः, धर्मो नवोऽयं श्रुतिसङ्गताक्ष।
माऽन्यं भजध्वं रमणं विहाय मान्यं भजामो रमणं विहाय॥(६।६२)

वाचा प्रदत्तस्य अदाने, अदातुः ऋणित्वं भवति। श्रीकृष्णं प्रति विप्रलम्भावस्थायां गोप्यः आहुः –

क-वीश-गौरीश हृत आत्मवृत्तौ ऋणी तदाऽसी यद् इनोऽवने न (८/६)

गोपीनां अवने इनः समर्थः श्रीकृष्णः तद्यदि नाङ्गीकुरुते तर्हि पूर्वं तदुक्तवचनं हृतं भवति (१) तेन च सः ऋणी भवतीति तासां विज्ञापनम्।

---

(१) 'सम्भवन्तु सुरस्त्रियः' इति अवतारात्पूर्वं श्रीकृष्णवचनम्। तदनुसारेण सुरस्त्रियः गोपीत्वेन आगताः।

Rarest Archiver

द्विजैः सन्ध्यावन्दनं अवश्यं करणीयम्। तत्यागे च सः द्विज-कर्मसु बहिष्कार्यो भवति।[1] श्रीकृष्णं मथुरां नयन् अक्रूरः मध्याह्ने सन्ध्यावन्दनार्थं रथादवतीर्य यमुनायां सन्ध्यावन्दनमाचरत् (भक्तो नाम स एव यः करगते कृष्णेऽपि वेदोदितं तत्कर्माचरत् (१०।४९) उपनीतस्य कृष्णाजिनधारणं धर्मशास्त्रविहितम्।[2] तच्च श्रीकृष्णेन कृतमभवत् –

यज्ञोपवीतोज्ज्वलकण्ठदेशः कृष्णाजिनश्रीर्मुनिसङ्घमान्यः।
प्राणप्रणेता धृततर्कमुद्रः ध्यायन् मनुं व्यास इवान्वशिक्षत्॥(१२।२६)

अत्र प्राणायामस्यापि करणीयत्वं सूचितम्।[3]

ब्रह्मचारिणा च अग्निकार्यं करणीयम्।[4] श्रीकृष्णः स्वयं प्रतिदिनं अग्निकार्यं चकार गायत्रीं च जजाप –

दिने दिनेऽग्नौ समिधो जुहाव तथा श्रुतीनां जननीं जजाप।(१२।२७)

(१) पूर्वां सन्ध्यां जपांस्तिष्ठेत् सावित्रीमार्कदर्शनात्।
पश्चिमां तु समासीनः सम्यगृक्षविभावनात्॥ मनु॰ २।१०१
∴ न तिष्ठति तु यः पूर्वां नोपास्ते यश्च पश्चिमाम्।
स शूद्रवद् बहिष्कार्यः सर्वस्माद् द्विजकर्मणः॥ तत्रैव २।१०३

(२) मनु॰ २।४१

(३) मनु॰ ५।७५

(४) कृताग्निकार्यो भुञ्जीत वाग्यतो गुर्वनुज्ञया॥ याज्ञ॰ आ॰ ३१.

कृतोपनयनस्य वेदाध्ययनं विहितमस्ति धर्मशास्त्रे।(1)
गुरुकुलवासश्च करणीयोऽस्ति। श्रीकृष्णः बलरामेण सहितः
गुरुकुलं गत्वा वेदाद्यध्ययनं कृतवान् —
गुरोर्गृहं सर्वविद्याग्रगण्यौ उपेयतुस्तौ समिधः समर्प्य।(१२।२१)
अध्ययनान्ते च गुरोराज्ञानुसारेण गुरुदक्षिणा दातव्या।(2)
श्रीकृष्णः स्वगुरवे सान्दीपनये, मृतं तत्पुत्रमेव यमालयादानीय
दक्षिणां प्रददौ —
गुरुं ततोऽपृच्छदुपायनं दिशन् सुतं ययाचे विमलीकृतान्वयः।(१२।३१)
एवं धर्मशास्त्रीयाः विषयाः रु. वि. काव्ये विशेषतः
उपनयनावसरे, रुक्मिणीकृष्णविवाहावसरे च तत्र तत्र(3)
सम्यक् उपलभ्यन्ते कथाप्रवाहे।

---

(१) कृतोपनयनस्यास्य व्रतादेशनमिष्यते।
ब्रह्मणो ग्रहणं चैव क्रमेण विधिपूर्वकम्॥ मनु. २।१७३
(२) स्नायंस्तु गुरुणाऽऽज्ञप्तः शक्त्या गुर्वर्थमाहरेत्॥ तत्रैव २।२४५
(३) अन्ये च धर्मशास्त्रविषयप्रतिपादकाः श्लोकाः —
५।३५, ५२, ६।२७, १५।६, ८, ४५, ५२, ५३, १६।३५, ३६,
४२, ४५, ४६, ४७ इत्यादयः

Rarest Archiver

राजनीतिः - कवेः श्रीवादिराजस्य राजनीति-वैदुष्यं रु॰वि॰काव्ये द्वादशे सर्गे प्रकटितोऽस्ति। तत्र उग्रसेनस्य राज्ञः सभायां मन्त्र-तन्त्रज्ञानां मन्त्रिणां मन्त्रवर्णनप्रकारेण राजनीतेः मनोज्ञया प्रणाल्या प्रतिपादनं दृश्यते। अत्र मनसो विलक्षणानन्दः राजनीतिज्ञानं च सञ्जायेते अध्येतॄणाम्। नृपस्य कर्तव्यानि, प्रजापालनप्रकारः षड्गुणानामुपयोगः, रणोपस्करणं इत्यादयः विषयाः संक्षिप्तमपि चारुतरं निरूपिताः सन्ति रु॰वि॰ काव्ये।

चाराः खलु राज्ञां चक्षुर्भूताः।(1) चारैः हि परराजवृत्तान्तः अवश्यं विज्ञेयः वर्तते। शत्रुराजतन्त्रं ज्ञात्वा कृतरणसन्नाहेन भवितव्यं राज्ञा -

चारेण यो वेत्ति रिपोर्विचारं सदा रणोपस्करणं युनक्ति।
अगम्यभूमिः परिखादिनान्यैः स एव राजा विजयी न चान्यः॥(12।52)

अत्र परिखादिना दुर्गसंरक्षणं वैरिभिरगम्यत्वं चाभिहिते स्तः। प्रभुशक्त्या च राजा भटादीन् नियमयतु। राजभयात् भटाः, युद्धे प्रवृत्ता, नैव निवर्तेरन्। यस्य भूपतेः भटाः युद्धाङ्गणे जयाङ्गनां वा दिविजाङ्गनां वा लभन्ते स एव राजा विजयी भवति।(2)

---

(1) गावः पश्यन्ति गन्धेन वेदैः पश्यन्ति पण्डिताः।
चारैः पश्यन्ति राजानः चक्षुर्भ्यामितरे जनाः॥

(2) रणे यदाज्ञाशरशङ्कुचित्ता भटाः परावृत्त्य न लक्षयन्ति।
जयाङ्गनां वा दिविजाङ्गनां वा स्पृशन्ति राजा विजयी स एव॥(12।51)

Rarest Archiver

राजा च नूनं अमात्यादिभिः मन्त्रयित्वा वैरिणि उपायेन विभेदं जनयेत् । द्वैधीभावोऽयं अतीवावश्यकोऽस्ति राज्ञां षाड्गुण्येष्वन्यतमः (1) –

स्वसंसदि प्रौढजनेषु मन्त्रिवरेषु नीत्यागमतत्त्ववित्सु ।
विचार्य कुर्याद् द्विषतां उपायैः मिथो विभेदं, सुखभाक् स भूपः ॥(12/43)

अत्र मन्त्रशक्तेः वैशिष्ट्यमुक्तं भवति। द्वैधीभावेन च शत्रुभटाः शत्रोरेव शत्रुतामायान्ति ।(2)

अपि च एतच्छाड्गुण्यप्रयोगस्य एवमपि निरूपणमस्ति –

यः सन्धिमुख्यामलनीतिकालमज्ञान्यविज्ञाय रणं विधत्ते ।
पाणिग्रहाणां समयानभिज्ञवादीव संसत्सु स यात्यकीर्तिम् ॥(12/45)

अत्र सन्धि-विग्रह-यान-आसन-द्वैधीभाव-संश्रयणलक्षणानां षड्गुणानां(3) यथायोग्यं प्रयोगः कर्तव्यः अन्यथा पाणिग्रहस्थान-अनभिज्ञवादीव निगृहीतो भवतीति उपमया अर्थः स्फुटीकृतः। एताभ्यां प्रभुशक्तिमन्त्रशक्तिभ्यां सह उत्साहशक्तिरपि महत्वं भजते । उत्साहाभावे राज्ञा प्रयुक्ता नीतिः व्यर्था भवति । षाड्गुण्यप्रयोगे सोत्साहेन भवितव्यं नृपतिना ।

---

(1) अर्थशास्त्रम् 7/1.

(2) द्वैधीभावं विपक्षे विरचयति बत स्वीय एव स्वशत्रुः । रु०वि० 11/14

(3) सन्धिं च विग्रहं चैव यानमासनमेव च ।
द्वैधीभावं संश्रयं च षड्गुणान् चिन्तयेत्सदा ॥ मनु० 7/160

Rarest Archiver

उत्साहशक्तिवैशिष्ट्यमिदं कविश्रीवादिराजेन शब्दचमत्कारेण एवं निरूपितमस्ति —

उत्साहसङ्गता नीतिः सूते नरवरोचितौ ।
कीर्तिप्रतापौ राजेन्द्र तत्रालस्यं प्रतीपकृत ॥ (१२।४४)

उत्साहशब्दस्य पुल्लिङ्गत्वात नीतिशब्दस्य स्त्रीलिङ्गत्वाच्च तयोः स्त्री-पुरुषसाम्येन एवमुक्तम्। आलस्यशब्दस्य नपुंसकलिङ्गत्वात, तत्सङ्गत-नीतेः नपुंसकसङ्गतस्त्रीवत फलप्रदत्वं न सम्भवति । सामदानभेददण्डाख्योपायानां प्रयोगेष्वपि सदा दत्तावधानेन भाव्यम्। सामाद्युपायानां अवसरज्ञानाभावे च नरपतेः शूरता व्यर्था भवति। मनुस्मृतिः एतेषां उपायानां प्रयोगं व्यस्ततया वा समस्ततया विदधाति ।[१]

सामाद्युपायावसरज्ञानशून्यस्य शूरता ।
आम्नायार्थापरिस्फूर्तेः सामर्थ्यमिव वादिनः ॥ (१२।४५)

दण्डोपायस्य महत्वं एवं सूचितमस्ति —

पान्थान समन्तात दिवसे दिनेशप्रख्यो रजन्यां रजनीशकल्पः ।
यस्तस्करेभ्योऽवति दुष्कराद्यः स एव कीर्त्यैति दिशामुपान्तम् ॥ (१२।५०)

राजा तस्करेभ्यः प्रजाः अहोरात्रं अवतु — दुष्कराद्यः सन् । दुष्करान्तेन च दण्डप्रभावः निरूपितः। आज्ञोल्लङ्घने

---

(१) तान् सर्वानभिसन्दध्यात सामादिभिरुपक्रमैः ।
व्यस्तैश्चैव समस्तैश्च पौरुषेण नयेन च ॥ मनु• ७।१५९

दण्डने सति तस्कराद्याः नितान्तं भीता भवन्ति। दण्डोपायेन परुषेण पुरुषेण जनः बिभेति।[1] (बिभेति सर्वः परुषात् न शान्तात् (कि.वि. २।२४)। अन्य च प्रजापरिपालनमपि[2] राज्ञः कर्तव्यं अभिहितम्। अहनि सूर्यः इव रात्रौ चन्द्र इव राजा तस्कराद्युपद्रवेभ्यः पान्थान् रक्षतु। अयमभिप्रायः प्रकारान्तरेण एवमभिहितः —

दिने दिनेशप्रख्यो यो रात्रौ रात्रीशसन्निभः।

कापथेभ्यो प्रजा रुन्धे स राजा स विशाम्पतिः॥ (१२/५२)

दिने दिनेशप्रख्यतया राजा प्रजाः रक्षति चेत् दिनेशवाचक-इनशब्दाभिधेयः स्वामी भवति। रात्रौ रात्रीशकल्पत्वात् रजनीशवाचकराजशब्दाभिधेयो भवति भूपालः। प्रजापीडनेन च धनमार्जयेच्चेद्राजा सः स्वसुतानेव विक्रीय धनं सम्पादयतीति स्पष्टं निरूपणेन कविः प्रजानां राज्ञः सुतनिर्विशेषत्वं प्रतिपाद्य वात्सल्येन प्रजानां पालनं

(१) दण्डः शास्ति प्रजाः सर्वाः दण्ड एवाभिरक्षति।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः॥ मनु. ७।१८
सर्वो दण्डजितो लोकः दुर्लभो हि शुचिर्नरः।
दण्डस्य हि भयात्सर्वं जगद् भोगाय कल्पते॥ तत्रैव ७।२२

(२) सदानुरक्तप्रकृतिः प्रजापालनतत्परः।
विनीतात्मा हि नृपतिः भूयसीं श्रियमश्नुते॥ कामन्दकीनीतिसारः १।२४

Rarest Archiver

करणीयमिति अभिव्यनक्ति च।[1]

राजा आर्थिभ्यः नूनं अर्थं प्रयच्छेत। लब्धं, रक्षितं, वृद्धं च धनादिकं पात्रेभ्यः दद्यात।[2] यदि राजा पात्रेभ्यः आर्थिभ्यः अर्थं अनादिश्य भूमौ एव निक्षिपति, तर्हि सः राजा स्वयोग्यां मृत्स्नामेव भूमेः प्राप्नोतीति कविर्वक्ति –

आर्थिभ्योऽर्थमनादिश्य यस्तान्निक्षिपति क्षितौ।
मृत्स्नां स्वयोग्यामादाय वित्तं भूम्यै प्रदत्तवान॥(१२/५६)

राजा शिष्टान रक्षेत दुष्टान शिक्षेच्च। स्वराष्ट्रं अतन्द्रितः सन अवेत सपत्नांश्च हन्यात।[3] अयं मनोराभिप्रायः रु.वि. काव्ये एवं प्रतिपादितः –

यत्सैन्यकुन्ता स्वसपत्नचिन्ताँ शार्दूलदन्ता इव साधयन्ति।
स्वराष्ट्रसन्तोषमपि स्वतन्तौ तदीयदंष्ट्रा इव सोऽवनीशः॥(१२/८८)

प्रजाभ्यः राजा अल्पमेव करं गृह्णीयात। एवं न्यायमेव करं यः राजा गृह्णन अ-न्यायं त्यजति तं भूपं अन्य-आयः

(१) प्रजानां पीडनं कृत्वा यो लुब्धो धनमार्जयेत।
विक्रीय स्वसुतानेव स वै सञ्चिनुते वसु॥१२/६०

(२) अलब्धं चैव लिप्सेत लब्धं रक्षेत प्रयत्नतः।
रक्षितं वर्धयेच्चैव वृद्धं पात्रेषु निक्षिपेत॥ मनु. ७/९९

(३) यथोद्धरति निर्दाता कक्षं धान्यं च रक्षति।
तथा रक्षेन्नृपो राष्ट्रं हन्याच्च परिपन्थिनः॥ तत्रैव ७/११०

स्वयमेव प्राप्नोति कोशवृद्धिश्च भवतीति श्लेषेण कविर्वक्ति-

न्यायं सङ्गृह्य नृपतिरन्यायं यस्तु सन्त्यजेत्।

पदे पदे तमन्यायः सन्नम्याभ्यर्थयिष्यते।(१२।५१)

यथा राज्ञा त्यक्तः कश्चित् तमेव राजानं सप्रणामं आश्रयितुं इच्छति तथा राज्ञा त्यक्तश्चेत् अन्यायः, राजानं अभ्यर्थयिष्यते स्वं गृहीतुं स एव अन्य-आयः।

अपि राज्ञा नूनं इन्द्रियजयः सम्पादनीयः। तदभावेन विषयासक्तश्चेत् भूपालः तस्य सुखं नैव भवति। राज्यं च वशे[१] न तिष्ठति, प्रजाः आर्थिनश्च न प्रशंसन्ति।

प्रजा यं न प्रशंसन्ति न स्तुतश्चार्थिभिश्च यः।

विषयासक्तकुमतेः न सुखं तस्य भूपतेः।(१२।६४)

प्रजारञ्जनाद्राजा भवति। अतः प्रजारञ्जकव्यापारेषु दत्तावधानः नृपतिः केवलं विषयासक्तो न भवेत्।

एवं रु०वि० का०ये राज्यशास्त्रवैदुष्यं चमत्कारेणाभिव्यक्तम्।

---

(१) इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम्।
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः॥ मनु० ७।४४

Rarest Archiver

कामशास्त्रम् – रु. वि. काव्ये शृङ्गारः अङ्गी रसः। अत एवात्र प्रायः सर्वेषु सर्गेषु शृङ्गाररसपोषकाः सन्निवेशाः विद्योतन्ते। कामशास्त्रप्रभावश्चात्र सम्यगुपलक्ष्यते विशेषतः सप्तमाष्टमनवमसर्गेषु।

मन्मथवर्णनामिदं श्रीकृष्णवर्णनोपेतम् –

यः कर्णे निजचिह्नमुन्नतशरान् दन्तोष्ठदृग्दोःपदे
स्वाङ्गं मध्यतनौ भ्रुवोर्वरधनुः मौर्वीं लसत्कुन्तले।
माल्ये मार्गणमानने च सुहृदं वाक्येऽर्पयित्वा शुकं
तद्गात्रं रचयाम्बभूव स सुतः तस्य स्मरोऽभूत्किल ॥(१९/२८)

मन्मथः स्वविशेषैः श्रीकृष्णस्य गात्रं रचयाम्बभूव। तत्कृष्णस्य सुतः मन्मथः बभूव प्रद्युम्नत्वेन। कामस्य चिह्नं मकरः। कामः निजचिह्नं श्रीकृष्णस्य कर्णे निहितवान्। तस्य मकरकुण्डलत्वात्। कामस्य शराः मल्लिका–चूत–इन्दीवर–अरविन्द–अशोकात्मकाः। तान् कामः श्रीकृष्णस्य, क्रमेण दन्तोष्ठदृग्दोःपदे अर्पितवान्। श्रीकृष्णस्य दन्तानां मल्लिकाकुड्मलसदृशत्वात् ओष्ठस्य चूतसदृशत्वात् दृशोरिन्दीवरसदृशत्वात्, हस्तयोररविन्दसदृशत्वात् पादयोश्च अशोकसदृशत्वात्। स्मरः अनङ्गः। स्वाङ्गं सः श्रीकृष्णस्य मध्यतनौ अर्पितवान् तन्मध्यस्य अतिसूक्ष्मत्वात्। कामः स्वधनुः श्रीकृष्णस्य भ्रूमण्डले अर्पितवान् तस्य धनुराकारत्वात्। श्रीकृष्णस्य लसत्कुन्तले कामः स्वस्यालिस्वरूपात्मकमौर्वीमर्पयत् तस्यान्योन्यसम्बद्ध भृङ्गाकारत्वात्। श्रीकृष्णस्य वनमालायां कामः स्वमार्गणं

Rarest Archiver

कुसुमाकरं समर्पितवान् । श्रीकृष्णानने च स्वसुहृदं चन्द्रं अर्पितवान् । श्रीकृष्णवाक्ये शुकं चार्पयत्कामः । एवमत्र मकरध्वजत्वं, पञ्चबाणत्वं, अनङ्गत्वं इत्यादीनि मन्मथस्य लक्षणानि वर्णितानि । एवमेव मन्मथवर्णनं रु॰वि॰काव्ये बहुत्रोपलभ्यते । (१) कामशास्त्रीयाः अन्ये विषयाः रु॰वि॰काव्ये एवं सन्ति —

स्त्रीदेहसौन्दर्यम् (२/१२, ३४, ४/३७, ९/३६, १५/५९, १६/६३ ११/६)

स्त्रीणामलङ्काराः (३/१४, ४/२०, ६/१८, ९/१, २, २४

मुखचुम्बनम् (४/४०, ६/३४, ८/५८) अधरचुम्बनम् (५/१८, ८/४१, १८/३६)

गण्डचुम्बनम् (८/४०, ९/१, २०, २९, १८/६०)

आलिङ्गनम् (५/१८, ६/३६, ६४, ७/१२, ८/४६, ५३ ९/३५, ४३, १४/६९)

कुचग्रहणम् (५/३२, ६/२९, ८/३८, ९/४९) प्रियोक्तिः (६/६४)

कामदशाः - प्रबन्धेऽस्मिन् सप्तमेऽध्याये शृङ्गारनिरूपणे विवृताः सन्ति ।

ईक्षणम् - ८/४६, ४८, १०/५६, ६०, १६/३६, ३८, ४४

कण्ठाश्लेषकराग्रपातमधुरव्याहारमन्दस्मितादयः ८/४८

नखक्षतम् (९/२, २९, ५९, ६० १५/४१ दन्तक्षतम् (९/२९, १५/४१, १७/६४, ६९, १९/१) सीत्कारः (९/२७, ४३)

पद्मिनीजातिस्त्री (१४/६५) हस्तिनीजातिस्त्री (९/१४, १८/६)

परस्त्रीवशीकरणोपायः (६/३२) नायकः उपपतिः (६/३५)

अभिसारिका ६/३५, १७/३९

---

(१) रु॰वि॰ ६/४२, ७/५०, ९/३० १७/४४, ४५, ४६

सङ्गीतशास्त्रम् - श्रीवादिराजतीर्थः महान् सङ्गीतज्ञः । कर्णाटक-सङ्गीताभिवृद्धौ सोऽपि महद्वैशिष्ट्यं भजते। रु० वि० काव्ये च सङ्गीतशास्त्रीयाः विषयाः तत्र तत्र उपलभ्यन्ते । सङ्गीतशास्त्रं गन्धर्वाणां इत्युक्तम् । (७/२४, ६/४३)

कालियमर्दने श्रीकृष्णवर्णनमिदम् -

अनीनदत्पद्मभवो मृदङ्गं जगौ हनूमान् जगतामधीशम् ।
अदर्शयत् तालगतीः कपर्दी ननर्त गोपालकबालमौलिः ॥ (४/६८)

सङ्गीतशास्त्रीयविषयाणां उल्लेखाः - वीणावेणुमृदङ्गशृङ्गनिनदैः (४/७१) ततान वीणाध्वनिगानविद्यया (८/५७) गजेन्द्रारिधिमर्दलं (१५/२७) श्रीकृष्णः 'वेणुं क्रमेण रणयन् बहुतानमानगानप्रमौलि-रुदगायदधीश्वरोऽसौ' (६/४६) इति वर्णितोऽस्ति ।

रासलीलायामपि सङ्गीतविषयाः प्रसक्ताः सन्ति ।

मुदावहा भासुरगीतशोभा विभाति वृन्दावनरासलीला (८/६१)

सङ्गीतश्रवणेन मुग्धीभवनं (८/५८) इत्यस्मिन् श्लोके अभिव्यक्तम् । रासोत्सवः पुनरेवं स्तुतः - पादसञ्चरणदर्शिततालः स्वादुगीतवरविभ्रमजालः (९/६). गातृकोकिलरवश्रुतिपूर्तौ (९/१२) इति कोकिलरवेण 'श्रुतेः' पूर्तिः अभिहिता रासोत्सववर्णने ।

कोशः - श्रीवादिराजस्य कोशाभिज्ञत्वं द्व्यर्थाभिधाने विशिष्टशब्दानां प्रयोगैः ज्ञायते । व्योमकेशः (४/२२) सूतः (११/५३) कार्पशीर्ष (१७/६२) सन्दोहः (१५/२७) इत्यादि शब्दप्रयोगेषु च कोशज्ञत्वं स्फुटं दृश्यते ।

Rarest Archiver

सामान्यनीतिः - रु. वि. काव्ये मनोहराणि सुभाषितानि नैकानि समुपलभ्यन्ते। काव्यं व्यवहारविदे इत्युक्तं काव्यप्रयोजनं अनेन महाकाव्येन सुष्ठु सञ्जायते। मानवानां मनःप्रवृत्ति-चित्रणं, समाजोपयोगिनीतिवर्णनं इत्यादिकं अत्र बहुधा दृश्यते। इमानि च सुभाषितानि त्रिकालाबाधिततत्त्वानि प्रतिपादयन्ति।

अत्र कानिचित्सुभाषितानि विव्रियन्ते यानि नीतिं उप-दिशन्ति व्यवहारमार्गं दर्शयन्ति च।

सज्जनप्रशंसा - सद्वंशभवाः सज्जनाः सर्वकार्येषु समर्था अपि सर्वदा विनीता एव भवन्ति। (सद्वंशभवा गुणाढ्या नताः समर्था अपि सर्वसन्धौ। (१८/३७)

सर्वदा क्षमाशीलानां एतेषां सर्वमपि कार्यजातं सुलभ-साध्यमेव भवति। (किंन सुकरं नित्यं क्षमाधारिणः ६/१६)

उत्तमाः जनाः विपत्काले स्वीयान् नैव मुञ्चन्ति (विपत्सु कः स्वीयमुपेक्षतेऽन्यः ६/८)

सज्जनाश्च सदा परोपकारलग्नमनस्काः भवन्ति। अत एव तेषां वैरिणोऽपि अनुकूलकराः भवन्ति। (कामं परोपकृतिलग्न-मनोरथानां क्षेमङ्करत्वमुपयान्ति हि शत्रवोऽपि। ५/३२)

सज्जनाः खलु दुष्टानां नाशमेवापेक्षन्ते। ततोऽप्यधिकं आनन्दकरं नान्यद् वर्तते तेषाम्। (दुष्टस्य विनाशतोऽन्यत्सतां मनस्तृप्ति-करं किमास्ति। ५/२२)

Rarest Archiver

खलस्वभावः - दुष्टाः स्वयं नष्टाः जगतः क्षयकारिणो भवन्ति।
सज्जनानां प्रयाणं निरोद्धुं इमे स्वनासिकाच्छेदमपि सहन्ते।[१]
(स्वनासिकाच्छेदमपीह सोढ्वा खलो निरुन्धे खलु सत्प्रयाणम्(६/८)
खलाश्च अप्रकटिताशयाः भवन्ति।(खलः प्रकृत्या खलु गूढवृत्तिः।६/१२)
दुष्टाः यदि सत्कारं कुर्वन्ति न तत्र विश्वसेन्मतिमान यतो हि
नाशप्रदः एव तत्कृतः सत्कारः भवति। (सत्कृतिं दुष्टैराचरितां
किमत्र मतिमान मृत्युप्रदां विश्वसेत। ११/४२)
एतादृशानां दुष्टानां समीपे कुलेन वा गुणेन वा प्रयोजनं
न किमपि भवति।(कुलेन किं वा गुणौघैः कठिणोपकण्ठे १८/२५)
धनिप्रशंसा - धनवतां दोषोऽपि गुणाय कल्पते स एव च
प्रशंसनीयः लोके।(लक्ष्मीनयनान्तभाजामसन्नदोषोऽपि भवेद्गुणाय।३/२७)
धनिनश्च लोके सदा उत्कर्षं प्राप्नुवन्ति। (अङ्गीकृतः कमलया
उच्चगतिः सदा। १८/९)
लोभः - यथा यथा धनमभिवर्धते तथा तथा मनुष्यस्य
लोभः धनाशाऽपि अभिवृद्धिं गच्छति। (धनस्य लाभाद
अधिको हि लोभः (१६/५२)। एतादृधनलोभभाजां धनं
देवः अनर्हेषु वितीर्यैव क्षीणं करोति। (क्षिणोति नूनं
धनलोभभाजां धनान्यनर्हेत्स्वतिदिश्य देवः।(४/४)
विद्याप्रशंसा - अभ्यस्तां विद्यां न कोऽपि त्यजति। येनकेनापि
प्रकारेण विद्याप्रकाशनं भवत्येव। (कस्त्यक्ष्यति सिद्धविद्याम।२/२९)

किन्तु स्वाभाविकबुद्धिमतामग्रे अतियत्नाभ्यस्ताऽपि विद्या न फलति । (अतियत्नाभ्यस्तविद्याऽनवस्था फलति सहज-तेजोबुद्धिभाजां किमग्रे । ११/४२)
स्त्रियः – नारीणां मृदुभाषणेन मनः मार्दवं भजते । (नारी-मृदुभाषणेन न कस्य चित्तं मृदुतामुपैति । ४/६९) अतः एव ललनासु पुंसां पक्षपातो भवति । (न कस्य योषित्सु हि पक्षपातः । ४/७०) कठोरमनस्काः अपि मर्त्याः स्वकलत्र-सम्बन्धभाजां विषये कोमलमतयः भवन्ति । (क्रूरोऽपि मर्त्यः स्वकलत्रसान्द्रसम्बन्धभाजां न हि तापदायी । २/२५)

पतिव्रतानां स्त्रीणां पतिरेव दैवम् । पतिनिन्दकेभ्यः अन्यः भारः तासां न वर्तते । (लोके पतिनिन्दकेभ्यः पतिव्रतानां अपरः क्व भारः । १/१२) भर्तरि स्निग्धे सति कामिन्यः तत्पक्षपातिन्य एव भवन्ति न मातृगृहगामिन्यः । (स्निग्धे भर्तरि कामिनीजनरुचिः तत्पक्ष एव ध्रुवम् । ७/२५)
मनःस्थितिवर्णनम् – मानवानां मनःप्रवृत्तिरपि साधु वर्णिताऽस्त्यत्र । रोषरुद्धं मनः महतामपि सामर्थ्यं नैव गणयति । (नहि रोष-रुद्धं मनो मिनोत्यप्यमरानुभावम् । ४/७) प्रियेषु पदार्थेषु नूत्नेषु सत्सु मनसः तृप्तिरेव न सञ्जायते । (प्रियेषु नूत्नेषु हि कस्य तृप्तिः । २/२९) विजेतुकामः सन् युद्धाय गतः वीरः जनैर्निवार्यमाणोऽपि न निवर्तते । (न विजेतुकामः

Rarest Archiver

निवार्यमाणोऽपि निवर्तते स्म। १०/४५) असूयायुक्तमनस्काः खलु जनाः परोत्कर्षं दृष्ट्वा प्राणान् त्यजन्ति। (करोदयान् वीक्ष्य परस्य जातान् असून् असूयाभिरतास्त्यजन्ति। (१०/१५) दैवम् – दैवं बलवताऽपि नैव उल्लङ्घ्यो भवति। (विधेः निदेशो महताप्यलङ्घ्यः। ६/२८) किन्तु दैवे प्रसन्ने सति सर्वमपि कार्यं सुलभं सुगमं च भवति। (हरौ प्रसन्ने किमिहास्त्यसाध्यम्। ४/१८)

एवमस्मिन् रु॰ वि॰ काव्ये नानाविधविषयक सुभाषितानि विद्यन्ते। अर्थान्तरन्यास- निदर्शन- प्रतिवस्तूपमा- अन्योक्ति प्रमुखालङ्कारसंशोभितानि तानि सुभाषितानि सर्गानुक्रमेण अत्र सङ्गृह्यन्ते।

प्रथमः सर्गः श्लोकाङ्कः

१. अकौशलेन ग्रथितेति जातिप्रसूनमालां किमु सन्त्यजन्ति। ९
२. बुधाः! विदग्धैः किमुपेक्षणीया पयोब्धिजा चञ्चलताख्यदोषात्। १०
३. लोके पतिनिन्दकेभ्यः पातिव्रतानामपरः क्व भारः। १२
४. सम्प्रेषयन्ति स्म नरैर्नरेन्द्राः शय्यां स्वकीयां पुरतः प्रयाणे। २६
५. तुष्टिर्भुवि कस्य न स्याददृष्टपूर्वस्य निरीक्षणेन। ४४
६. करस्थदेवस्य कुतोऽन्तरायः। ५९

द्वितीयः सर्गः

७. बिभेति सर्वः परुषात् न शान्तात्। २२
८. तद्विष्णुपदानुषक्तकरं कथं नोर्ध्वमुपैति लोकः। २३

९. श्रेयोऽनुजस्यापि न वै सहन्ते। २४
१०. क्रूरोऽपि मर्त्यः स्वकलत्रसान्द्रसम्बन्धभाजां न हितापदायी। २५
११. प्रियेषु नूतनेषु हि कस्य तृप्तिः। २९
१२. कृत्या महति प्रयुक्ता स्वकीयमृत्युत्वमुपैति पृथ्व्याम्। ३८
१३. हिंसार्थमालिङ्ग्यतस्तरक्षोः किं चेष्टया तुष्यति कामधेनुः। ४५
१४. विनाशकाले हि विरुद्धबुद्धिः। ६७

तृतीयः सर्गः

१५. अयोग्यकामस्य कथं न पातः। ५
१६. वातस्य जवोऽधिकोऽपि कथं नु विश्वम्भरमुद्बिभर्ति। ६
१७. शब्देषु बद्धादितेषु प्रियेरितः प्रीतिकरो हि लोके। २०
१८. लक्ष्मीनयनान्तभाजां असत्प्रदोषोऽपि भवेद्गुणाय। २७
१९. वक्ष्यत्यक्ष्यति सिद्धविद्याम्। ३९

चतुर्थः सर्गः

२०. क्षिणोति नूनं धनलोभभाजां धनान्यनहस्त्वतिदिश्य देवः। ४
२१. न हि रोषरुद्धं मनो मिनोत्यप्यमरानुभावम्। ७
२२. हरौ प्रसन्ने किमिहास्त्यसाध्यम्। २४
२३. कृष्णप्रतिपक्षिपक्षः कथं न पातैकफलश्रिलोक्याम्। ३०
२४. नर्नर्ति सुहृदागमने न कः। ६२
२५. निरागसं कं वरयेन्न शौरिः। ६५
२६. निजेषु शिक्षापि हि तस्य विष्णोः परं पराऽनुग्रहहेतुरेव। ६६

Rarest Archiver

२७. नारीमृदुभाषणेन न कस्य चित्तं मृदुतामुपैति । ६९

२८. न कस्य योषित्सु हि पक्षपातः । ७०

२९. भक्ते क्रोधोऽपि देवस्य वरेण तुल्यः । ७१

पञ्चमः सर्गः

३०. स्वनासिकाच्छेदमपीह सोढ्वा खलो निरुन्धे खलु सत्पथानाम् । ८

३१. कृष्णविपक्षमैत्री किमु सौख्यदात्री । १०

३२. खलः प्रकृत्या खलु गूढवृत्तिः । १२

३३. प्रभोः क्रियैकाऽप्युरुकार्यसाधिका । १४

३४. फलार्थिनां किं न विलम्बमस्ति । १६

३५. दुष्टस्य विनाशतोऽन्यत् सतां मनस्तृप्तिकरं किमस्ति । २२

३६. विनाशशून्यस्य हि किं न कार्यम् । २९

३७. नित्यं मुकुन्दचरणार्पितवैभवस्य
मर्त्योपकारनिरतस्य न कः सहायः । ३१

३८. कामं परोपकृतिलग्नमनोरथानां
क्षेमङ्करत्वमुपयान्ति हि शत्रवोऽपि ३२

३९. नित्यं विष्णोः पदमधिगतायात्युदाराय दानात्
आबिन्दूनामपि शतगुणा वृद्धिरद्धा स्वबर्गे । ३४

४०. सर्वसहाजीवनहर्तुरस्य दुर्वारतेजोऽपि किमेति वृद्धिम् । ३५

४१. तन्मुरारिपोरनुगा विरागा यत्नं कदाचिदपि न स्वकृते प्रकुर्युः । ५१

४२. निगमैकवेद्ये किमक्षिबाहुल्यमुपैति कृत्यम् । ५६

४३. जिहीर्षुभिः स्वासमशत्रुशौर्यं तदाश्रयैर्युद्धरणं हि कार्यम् । ५७

षष्ठः सर्गः

४४ विपत्सु कः स्वीयमुपेक्षतेऽन्यः । ८

४५ गोब्राह्मणरक्षकस्य क्व कृष्णदोर्दण्डधृतस्य कम्पः । १०

४६ किं न सुकरं नित्यं क्षमाधारिणः । १६

४७ विधेर्निदेशो महताप्यलङ्घ्यः । २८

४८ शान्तो हि सर्वहृदयङ्गमतामुपैति । ३०

४९ मुद्रयन्ति नष्टाः प्रियाः खलु समृद्धियुजोऽपि वक्त्राम् । ३१

५० आशा हि नूत्नविषया गणयन्ति नैनः । ३५

५१ दिवसकरे हृततस्करप्रचारे नरनयनस्य विदूरवर्त्म याते ।
रजनिकरोऽयमुपेत्य मानवानां भ्रममधरीकुरुते स्म पूर्णबिम्बः ॥ ४१

५२ सद्वंशजातललनासु न कस्य पक्षः । ४८

५३ मधुरनिनदभाजां किं न साध्यं हि लोके । ४९

सप्तमः सर्गः

५४ हरिचरणविदूराः को नु सम्भावयेन्नः
सुकृतमपि तदाशारूपमापादयेत्किम् । ४

५५ तिन्त्रिण्यास्त्व यतः फलान्यपि सदा वक्राणि ते प्राणिनां
सा त्वं ताडनकर्मस्वपकुरुषे किं नारिकेलेन नः ।
मस्ते यः फलमभ्रचुम्बिनि नरालभ्ये त्वचा पाषाणा-
त्यग्राहं दधदध्वनीनमृतिदं शस्त्रेण साध्यं बलात् ॥ २०

५६ यः पक्वं फलसात्मितं भुवि गतैरङ्गोयमावेष्टितं
धत्ते दुर्जरकण्टकैः स पनसः प्राक्काकभोग्यो ध्रुवम् ।

Rarest Archive

चूतोऽयं फलपुष्पतोषितखगः स्वोपान्तगानां नृणां
पक्वानि प्रदिशन् स चापि न मनस्तोषाय नः स्यात्सखि। २१
५७.स्निग्धे भर्तरि कामिनीजनरुचिः तत्पक्ष एव स्थिता। ३५
परपुष्टः स विस्पष्टं पोष्टुर्वै विप्रलम्भकः। ४०
अष्टमः सर्गः
५८. बहुपदे प्रकृतिर्विषमस्थितिः। १९
५९.न चकास्ति साध्वि विनतौ इतना। २३
६०.न हि रज्ज्वहेः क्षतिरभूतिरभूत्। ३१
६१.किं नाम नास्ति मुनिमार्गजुषां हि लोके। ४४
६२.न हि कथा व्यर्था परब्रह्मणः। ४६
६३.को नाम नो नृत्यति सिद्धकृत्यः। ५२
६४.गुर्वर्थलाभे लघ्वर्थसाधनकृतिः न हि दृष्टपूर्वा। ५३
दशमः सर्गः
६५. अपि शिरसि धृतो यत्स्वीय एवान्तकाले
करवशमुपयातः शत्रुतामेति शत्रोः। ८
६६. अरिष्टपुष्टिर्न हि दृष्टपूर्वा। ९
६७.करोदयान्वीक्ष्य परस्य जातानसूनसूयाभिरतास्त्यजन्ति। १५
६८.न विजेतुकामो निवार्यमाणोऽपि निवर्तते स्म। ४५
६९.मुक्तोऽपि नैवोज्झति कृष्णसेवाम्। ७१
७०.श्रेयो विना पुण्यमुपार्जयेत्कः। ७६
७१.शत्रुर्नहि शत्रुरुच्चनिलयस्यान्यस्य शत्रुर्भवेत्। ७८

Rarest Archiver

एकादशः सर्गः

७२. चतुरपुरुषकाङ्क्षा वक्रयोषित्सु नूनम् । ५
७३. चुबुकगतकराणामच्युता क्वास्ति वक्रा । ८
७४. अनुकूलयितुं बालां कर एव हि कारणम् । ९
७५. वक्रहृदो हि पुंसः को वा गुणः कोविदमानयोग्यः । १२
७६. बलान्नम्रीभूते किमिह करुणा शुष्कहृदये । १३
७७. द्वैधीभावं विपक्षे विरचयति बत स्वीय एव स्वशत्रुः । १४
७८. अतियत्नाभ्यस्तविद्यानवस्था फलति सहजतेजो बुद्धिभाजां किमग्रे । ४२
७९. दुष्कृतिं दुष्टैराचरितां किमत्र मतिमान् मृत्युप्रदां विश्वसेत् । ४३
८०. मृदुसरसकवेः पुरः किमीड्या कठिणपदप्रियकाव्यकारशीला । ४४

द्वादशः सर्गः

८१. स्वकुक्षिपूर्तौ न रतिर्हि कस्य निजानुभावस्मरणोत्सवे च । २७
८२. उत्साहसङ्गता नीतिः सूते नरवरोचितौ ।
कीर्तिप्रतापौ राजेन्द्र तत्रालस्यं प्रतीपकृत् ॥ ४४
८३. फलवानेव हि तरुः कण्टकैरुपरुध्यते । ५३
८४. विषयेषूपभुक्तेषु तृतीयांशोऽस्य जीर्यते ।
८५. शिष्टं तु विषसारूप्यात् कष्टाय परिकल्पते ॥ ६८

त्रयोदशः सर्गः

८६ लक्ष्मीशपदैकभक्तास्तदन्यदर्चन्ति नदीव बुद्ध्या । १४

चतुर्दशः सर्गः

८७ असतां पुण्यसरिद्व्यनिष्टस्य हि कारणम् । २५

Rarest Archiver

षोडशः सर्गः

८८. धनस्य लाभादधिको हि लोभः। ५२

८९. नार्या सह सङ्गतानां कुतो विवेकः कुत एव वेला। ५३

९०. रहस्युपाहूय विटान् स्वभर्तृतटे सदाचारपरा हि कामिन। ५४

९१. एकस्यामभिरतिमिच्छतोः क्व मैत्री। ५५

९२. अन्तः कृतान्तोपमवाडवाग्निसन्तप्तगात्रोऽपि मुदेव गर्जन्।
फेनास्मितश्रीर्गगनस्पृगूर्मिर्गाम्भीर्यमावेदयतीव वार्धिः॥ ५६

९३. इन्दुदृष्ट्या न कस्य कामः सरसस्य हि स्यात्। ५९

अष्टादशः सर्गः

९४. अङ्गीकृतः कमलयोच्चगतिः सदा। ९

९५. प्रभुरपि वशमेति प्रेमभारैरुदारैः। १९

९६. कुलेन किं वा गुणौघैः कठिणोपकण्ठे। ३५

९७ वियुक्तनारीपरितापकारी किमिन्दुरानन्दकरो न लोके। ३९

९८. सद्वंशभवाः गुणाढ्याः नताः समर्था अपि सर्वसन्धौ। ४०

९९. मुग्धाबलामोहनकण्ठयोगे मोक्षोऽप्यनाकाङ्क्षित एव नूनम्। ४६

एकोनविंशः सर्गः

१००. मनोज्ञवधूसुधार्द्रबिम्बोष्ठचुम्बिवदनस्य सदाऽऽमयः क्व। २

Chapter-13

त्रयोदशोऽध्यायः पुराणसान्दर्भिकं समीक्षणम्

भगवतः श्रीकृष्णस्य कथा भारतीयानां कथासु अतीव प्रसिद्धा। नैके काव्यकाराः रूपककर्तारः कृष्णकथया नितरां आकृष्टाः यैः खलु संस्कृतसाहित्यं स्वीयप्रबन्धैः समृद्धं कृतम्। श्रीकृष्णस्य कथा हरिवंशे, विष्णुपुराणे श्रीमद्भागवते तथा पुराणान्तरेष्वपि समुपलभ्यते। रु.वि.काव्यस्य तु कथावस्तु श्रीमद्भागवतस्य दशमस्कन्धात् समुद्धृतं वर्तते। श्रीमध्वाचार्यविरचित- महाभारततात्पर्यनिर्णयग्रन्थानुसारं अपि रु.वि. काव्ये श्रीवादिराजतीर्थः कथानकं विस्तारितवान्। श्रीमद्भागवते महापुराणे तावत् श्रीहरेः कृष्णावतारचरितं बाललीलादिभिरुपशोभितं विस्तरेण वर्णितं वर्तते। रु.वि.काव्ये च तच्चरितं उत्प्रेक्षादिभिर्भूषितं सत् सहृदयानानन्दयति। श्रीमद्भागवतोक्तं सम्पूर्णं कथानकं नात्रोपात्तम्। रुक्मिणीविवाहः, तत्पुत्रप्रद्युम्नोत्पत्तिः, तत्पुत्रानिरुद्धजन्म, तत्पुत्रवज्रजननं इत्येतत्पर्यन्तं कथानकं काव्योचिततया वर्णितं वर्तते।

श्रीमद्भागवतानुसारं कथावर्णनेऽपि रु.वि.काव्ये केचिद्विशेषा दृश्यन्ते। यथा —

(१) पूतनावधानन्तरं श्रीकृष्णस्य रक्षाकरणं भागवते प्रोक्तम्।[1] रु.वि.काव्ये तु तथाविधं रक्षाकरणं नैवोपवर्णितम्। तेन च श्रीकृष्णस्य भयचकितत्वाभावः ध्वनितो भवति।

---

(१) यशोदारोहिणीभ्यां ताः समं बालस्य सर्वतः।
रक्षां विदधिरे सम्यक् गोपुच्छभ्रमणादिभिः॥ भाग. १०/६/१९

भागवते 'यातुधान्यपि सा स्वर्गमवाप जननीगतिम् (भाग० १०।६।३८) इति पूतनायाः सद्गतिः उक्ताऽस्ति । रु०वि० काव्ये च एतत् शुकाचार्यवाक्यं महाभारततात्पर्यनिर्णयानुसारं (1) पूतनादेहगतस्य सज्जीवस्य मोक्षः नासज्जीवस्य इत्यर्थवत्तया निरूपितम् । (2)

(२) भागवते धेनुकासुरवधानन्तरं कालियमर्दनं कथितमस्ति । (3) रु०वि० काव्ये च प्रथमं कालियमर्दनं (४/७१-७२) ततो धेनुकासुर वधः प्रोक्तः । (५/२१-२७) (4)

(३) नीलाविवाहः - सप्तवृषभान् हत्वा श्रीकृष्णः नीलां (सत्यां) उवाह । भागवते तद्वर्णनं रुक्मिणीविवाहात्पश्चाद्वर्तते । रु०वि० काव्ये महाभारततात्पर्यनिर्णयानुसारं (5) गोपीभिः साकं रासविलासादपि पूर्वमेव तत्परिग्रहणम् अभिहितम् । (५/२०)

---

(1) सा ताटका चोर्वशीसम्प्रविष्टा कृष्णावध्यानान्निरयं जगाम ।
सा तूर्वशी कृष्णभुक्तस्तनेन पूता स्वर्गं प्रययौ तत्क्षणेन ॥ म०भा०ता०नि० १२।८७

(2) मुकुन्दविद्वेषविषानुषङ्गाद्वियोजिताङ्गी किल पूतनैका ।
पपात, धन्या ललनाग्रगण्या जगाम चान्यामरलोकलोकम् ॥ रु०वि० २।८१

(3) भाग १०।१५ धेनुकासुरवधः, १०।१६ कालियमर्दनम् ।

(4) म०भा०ता०निर्णयानुसारं एवं कथानिरूपणम् । कालियमर्दनं तत्र १३।८२
धेनुकवधः १३।५३

(5) या पूर्वजन्मनि तपः प्रथमैव भार्या भूयासमित्यचरदस्य हि सङ्गमो मे ।
स्यात्कृष्णजन्मनि समस्तवराङ्गनाभ्यः पूर्वं त्विति स्म तदिमां प्रथमं स आप ॥
अग्रे द्विजत्वत उपावहदेष नीलां ..... म०भा०ता०नि० १३।४९,५०

(४) जरासन्धयुद्धे श्रीकृष्णः प्रद्युम्नं तत्रैव उत्पाद्य तेन एकलव्यं पराजितमकारयत् । इयं कथा भागवते नोक्ता । महाभारततात्पर्यनिर्णयोक्तः अयं विशेषः[१] रु॰ वि॰ काव्ये वर्णितोऽस्ति ।[२]

(५) रुक्मिणीविवाहकाले रुक्मिण्या भवानीपूजनं कृतमिति भागवते प्रोक्तम् ।[३] रु॰ वि॰ काव्ये तु भवपूजनं कृतमिति वर्णितम् । यद्यपि भवपत्नीं भवान्वितां (भाग॰ १०/५३/४५) इति भवान्वितायाः भवान्याः पूजनं अभिहितं भागवते । तदनुसारेन इदं भवपूजनं वर्णितं भवेत् ।[४] पश्चाच्च रु॰ वि॰ काव्ये शम्भुदयितापूजनमपि निरूपितमस्ति ।[५] हरिवंशे च रुक्मिण्या इन्द्राणी समभ्यर्चिता इति कथा वर्तते ।[६]

---

(१) म॰ भा॰ ता॰ नि॰ १४/४०

(२) रणे क्षणेनाङ्गजमुज्ज्वलाङ्गैः समं समुत्पाद्य स सर्वशक्तिः ।
भवानुभावागततात्पितृत्वप्रथां श्रितात्मीयगतिर्व्यधित स्म ॥ रु॰वि॰ १४/६

(३) तां वै प्रवयसो बालां विधिज्ञाः विप्रयोषितः ।
भवानीं वन्दयाञ्चक्रुः भवपत्नीं भवान्विताम् ॥ भाग॰ १०/५३/४५

(४) स्वजनकगृहदेवं पौत्रमाराध्य भैष्मी
निजमथ गृहदेवं माधवं द्रष्टुकामा ॥ रु॰वि॰ १४/६४

(५) साहाय्यं क्व चकार शम्भुदयिता तद्वैरिमातुः कथं
देव्याः श्रीपतिविप्रयोगमहरत्तद्विप्रयोगोऽपि वा ॥ १५/२

(६) देवायतने शुभे ॥३३॥ इन्द्राणीमर्चयिष्यन्ती कृतकौतुकमङ्गला ।
दीप्यमानेन वपुषा बलेन महता वृता ॥ हरिवंश: विष्णुपर्व. ५९/३४

Rarest Archiver

(६) रुक्मिण्याः स्वयंवरः - रुक्मिणीस्वयंवरवर्णनं भागवते नास्ति। केवलं "भगवानपि गोविन्दः उपयेमे कुरूद्वह। वैदर्भीं भीष्मकसुतां श्रियो मात्रां स्वयंवरे इति कथितम् (भाग० १०/५२/१६) हरिवंशे तु[1]— रुक्मिजरासन्धादीनां रुक्मिणीस्वयंवरः कर्तुं इष्टः आसीत्। श्रीकृष्णस्य तु राज्ये अनभिषिक्तत्वात् तस्य नृपाणां संसदि प्रवेश एव नैव भवेदिति जरासन्धादिभिः चिन्तितम्। संसदि श्रीकृष्णागमने च तस्य उच्चासनमपि न देयं, तदभावेन सः स्वयमेव निर्गमिष्यतीत्यपि तेषां मनीषा समभवत्। परन्तु श्रीकृष्णः यदा कुण्डिनपुरं आगात् तदा इन्द्रप्रेषितं सिंहासनं लब्धं श्रीकृष्णस्य, अथ च कैशिकः श्रीकृष्णाय स्वस्य साम्राज्यं समर्पयत्। राजेन्द्रपदे च श्रीकृष्णस्य अभिषेकोऽपि सञ्जातः। एवं सति जरासन्धादिभिः स्वयंवरः निवर्तितः एव। (ता०नि० १७/७२)। चैद्येन सह रुक्मिण्याः विवाहं कर्तुं रुक्मिणः इच्छा आसीत्। तदा रुक्मिणीपत्रं विप्रमुखेन प्रेषितं दृष्ट्वा श्रीकृष्णः तां अपजहार कुलदेवतायागार्थं बहिरागतायां रुक्मिण्याम्। रु०वि० काव्ये तु रुक्मिणीपत्रं दृष्ट्वा विदर्भान् आगतः श्रीकृष्णः रुक्मिणीं रथं समारोप्य अपजहारेति वर्णितमस्ति। षोडशे सर्गे कविकल्पित एव स्वयंवरः विस्तरेण वर्णितोऽस्ति रु०वि० काव्ये

---

(१) हरिवंशः, विष्णुपर्व ४९-५० अध्यायौ

Rarest Archiver

(५) रुक्मिणीप्रेषिते पत्रे कृष्णेन द्वारकातः कदाऽऽगन्तव्यं कथं च रुक्मिणी नेया इति स्पष्टमुक्तम्।[१] रु॰वि॰काव्ये तु केवलं भवदुपहृतचित्तां मां नय इत्युक्त्वा रुक्मिणी महतीं औचितीं प्रदर्शितवती।[२]

एवं रु॰वि॰काव्ये भागवतात् आकरात् विशेषा उपलभ्यन्ते। भागवतोक्ताः कथाः क्वचित् रु॰वि॰काव्ये विस्तरेण निरूपिताः। तथाहि- श्रीकृष्णजन्मकाले प्रकृतिवर्णनं भागवते दशमस्कन्धे तृतीयेऽध्याये १-८ श्लोकपर्यन्तं कृतम्। परं रु॰वि॰काव्ये प्रथमे सर्गे ३१-४४ इत्येतेषु श्लोकेषु सः परमशोभनः कालः वर्णितोऽस्ति।
रासक्रीडावर्णनं नवमे सर्गे रु॰वि॰काव्ये कृतं[३] भागवते संक्षिप्य वर्णितस्य सुन्दरं रूपं भवति।
रुक्मिणीपत्रं भागवते सप्तश्लोकात्मकमस्ति।[४] रु॰वि॰काव्ये च चतुर्दशश्लोकात्मकं सत् तत्पत्रं चमत्कारतया विवृणुते।[६]
जरासन्धेन सह युद्धं वर्णितं विस्तरेण तत्त्ववाद-मायावाद-वाक्यार्थरूपेण। (रु॰वि॰ १३/३९ तः आसर्गसमाप्ति, १४/१-३०)

---

(१) परेद्युरस्ति महती कुलदेवयात्रा
यस्यां बहिर्नववधूर्गिरिजामुपेयात्॥ भाग॰ १०/५२/४२

(२) भव-ताप-हरापाङ्ग भवताऽपहृतैव धीः।
चरणाङ्ककृताङ्कां मां च रणाङ्गणतो नय॥ रु॰वि॰ १४/४१

(३) रु॰वि॰ ९/१-१५ (४) भागवतम् १०/३३

(५) भागवतम् १०/५२/३७-४३ (६) रु॰वि॰ १४/३९-५२

Rarest Archive

अष्टादशे सर्गे समग्रतया, एकोनविंशे सर्गे प्रारम्भे कृतं श्रीकृष्णरुक्मिण्योः आपादमौलिपर्यन्तं परमसुन्दरं वर्णनं श्रीवादिराजतीर्थस्य प्रतिभाप्रसूतमेव ।

दशमे सर्गे यमुनाम्बुमध्ये अक्रूरेण दृष्टस्य भगवद्रूपस्य विस्तृतं वर्णनं कवेर्वर्णनानैपुण्यं प्रदर्शयति । (१०/५०-७०) श्रीकृष्णाद् भीतस्य कंसस्य अवस्थानिरूपणम् कविकृतमेव विस्तृतिजालम् ।

एवं रुक्मिणीशविजयमहाकाव्यस्य आकरग्रन्थः श्रीमद्भागवतम् । काव्योचिततया तस्मिन् कथानके कानिचित् विपरिणामानि कृत्वा महाकविश्रीवादिराजः तं कथानकं स्वप्रतिभया अलङ्कृतं विधाय सहृदयहृदयानां अमन्दमानन्दोल्लासं आततान ।

प्रागुक्तप्रकारेण श्रीवादिराजे कविवरे प्रतिभा-पाण्डित्ययोः सामानाधिकरण्यं विद्योतते । नानादर्शनज्ञान-परिपक्वबुद्धिरयं कविवरेण्यः पौराणिकवाङ्मयमपि (1) करतलमिलितामलकीफलवत् जानाति । विविधपुराण-कथानां उल्लेखः रु० वि० काव्ये तत्र तत्र दृश्यते एव । अतः रुक्मिणीशविजमहाकाव्यस्थ पौराणिकपात्राणां निरूपणं इतः परं क्रियते ——

(1). न चेत्पुराणं संविद्यात् नैव स स्याद्विचक्षणः ।

रुक्मिणीशविजय-महाकाव्ये प्रसक्ताः पौराणिकपात्रविशेषाः –

पौराणिकानां ऐतिहासिकानां च पात्राणां देवतादीनां उल्लेखा विचारार्थ अत्र अकाराद्यनुक्रमेण लिख्यन्ते –

अक्रूरः – यदुवंशीयस्य श्वफल्कस्य पुत्रः (१०/२२,४७,४८) अस्य च माता गान्दिनी। (१०/७३) कंसादेशेन च धनुरुत्सवाय श्रीकृष्णबलरामौ मथुरां नेतुं गोकुलं आगतः (१०/२२) मथुरागमनकाले च पथि यमुनायाः ह्रदे श्रीकृष्णस्य दिव्यं रूपमपश्यत। (१०/४७, १९/१४) (१)

अग्निः – अग्निः पञ्चभूतेषु तृतीयः। तेजोभिमानि देवतापि अग्निपदेनाभिधीयते। अग्निद्वारा देवेभ्यः आहुत्यादयः समर्प्यन्ते। (७/४१, १२/२७) अग्निः पुरुषस्य मुखतो जातः (७/२, १६/३९) (२) अश्वत्थवृक्षेषु अग्निर्वर्तते। (७/२) (३) अयं च परमात्मनो भयात् पाकं विधत्ते। (११/२२) (४)

अनिरुद्धः – श्रीकृष्णरुक्मिण्योः पुत्रस्य प्रद्युम्नस्य पुत्रः। (१९/३१). अस्य च माता रुक्मवती – रुक्मिण्याः भ्रातुः रुक्मिणः पुत्री (१९/३०) (५) अयं अनिरुद्धः उषाभिधायां पत्न्यां वज्रसाह्वितं पुत्रं प्राप (१९/३२)

---

(१) भाग. १०/३९ हरि. २/२२ (२) भार. अश्व १११

(३) पद्म १६०. (४) तैत्तिरीय

(५) भार. आदि. २०१.

अर्जुनः - पाण्डवेषु मध्यमो, भीमानुजः (४।१४)। अर्जुनस्य सारथ्यं कृत्वा श्रीकृष्णः तदभ्युदयहेतुरभवत्।(१७।४)

अरिष्टः - बलीवर्दरूपेण श्रीकृष्णं हन्तुं आगतः कंसप्रेषितः दैत्यः।(१०।६) (1) अस्य चारिष्टासुरस्य भगवद्द्वेषित्वात् तन्नाशकाले मोक्षगतिः नीता। शुकेन भागवते इति रु॰वि॰काव्ये स्पष्टीकृतम् (२।४३)

अस्ति - जरासन्धपुत्री, कंसपत्नी। कंसवधानन्तरं जरासन्धाय श्रीकृष्णकृत्यं न्यवेदयत। (2) (१३।३८)

इन्द्रः - स्वर्गाधिपतिः (६।१२, १४।४२, १६।२४) भूभारहरणाय भूमाववतर्तुं विष्णुं प्रार्थयत अयमपि (१।१९)।इन्द्रस्य सहस्रनेत्रत्वं (५।५६) पद्ये सूचितम्। पर्वताः इन्द्रस्य शत्रवः (५।५७, १६।२९) कृष्णेन इन्द्रयागे त्याजिते वृन्दावने वर्षणार्थं इन्द्रः मेघान् आज्ञापयामास (५।५७, ६।१) इन्द्रोऽयं शचीपतिः (६।१९, १५।१०) स्वकृतापराधेन इन्द्रः पश्चात्तापं प्राप्य गोवर्धनधरं प्रणतवान् (६।२१) श्रीकृष्णस्य कंसेन सह युद्धे इन्द्रः श्रीकृष्णसेवार्थं रथं प्राहिणोत।(११।५२, ५४)। कल्पद्रुमः, ऐरावतः, उच्चैःश्रवो नाम अश्वः अस्य सन्तीति सूचितम् (१६।२५) सुधर्माख्या इन्द्रस्य सभा।(१७।३७) (3) पूर्वदिशः अधिपतिरयम् (६।)

(१) भारतम्॰सभा॰ ५३. भाग॰ १०।३६, हरिवंशः २-२१. विष्णु ५।१४

(२) भार॰ सभा॰ १४ (३) भार॰ आदि॰ ३४, ६५

उग्रसेनः - कंसस्य पितृत्वेन प्रसिद्धः। भोजानां राजा (१०/१६, (1)
१२/१) कंसवधानन्तरं श्रीकृष्णः तद्राज्यमस्मै प्रादात। (१२/१) (2)

उद्धवः - श्रीकृष्णस्य मन्त्री स्नेहितश्चायं कंसवधानन्तरं
श्रीकृष्णस्य सन्देशं गोकुलं निनाय। (१२/२) (3)

ऊर्वशी - अप्सरसां अन्यतमा। नारायणस्य ऊरुप्रदेशाज्जाता। (4)
पूतना देहे ऊर्वशी अपि आसीत। श्रीकृष्णं हन्तुं आगता
पूतना सौन्दर्येण ऊर्वशीवासीत (२/३४)

ऋषभः - नारायणावतारो मुनिः। जयन्ती अस्य पत्नी। स्वपुत्रस्य
भरतस्य शास्त्रोपदेष्टा -च (१७/५) (5)

एकलव्यः - हिरण्यधनुषः वनेचरस्य पुत्रः। जरासन्धयुद्धे
श्रीकृष्णः प्रद्युम्नं तदैव उत्पाद्य तेन एकलव्यं अजयत। (१४/६) (6)

कपिलः - विष्णववतारो महर्षिः। अस्य पिता कर्दमः,
अस्य च आश्रमः सिद्धपुरी। (१७/२) (7)

कलिः - कलियुगस्याभिमानी राक्षसः कश्चित। (8) भगवद्भक्तैः
जेयत्वेनोक्तः (१२/२) रु॰वि॰काव्ये।

कामः - अयं मन्मथः श्रीकृष्णपुत्रः रतिपतिः (४/४५, ६/५१, १७/४५ (9)
इत्यादिषु) शिवेन दग्धत्वात कामः तद्रिपुः (७/५०, १४/६) (10)

(१) भार. स. २३ (२) भार. सभा. ५३ (३) भार. आदि. २०१, २२९

(४) दे. भा. ४६ (५) दे. भा. ४/१०/१५ (६) प्र. भा. ता. नि. १४/५०

(७) भार. वन. १०६, १०७. (८) भार. वन. १५१, १३१. (९) भार. आ. ६७. (१०) वा. रामायण. बाल. २३

Rarest Archiver

कार्तवीर्यार्जुनः - चन्द्रवंशस्य कृतवीर्यराजस्य पुत्रः। दत्तात्रेयोपासनया अजेयः, युद्धे सहस्रबाहुशाली (१७/४, २०) परशुरामेण युद्धे हतः (१७/२०)(१)

(काल)यवनः - यादवानां पुरोहितस्य गर्गस्य पुत्रः। कालयवनं दिधक्षुः श्रीकृष्णः मथुरातः मुचुकुन्दगुहां पलायितवान्। निद्राभङ्गेन कोपोद्रिक्तस्य मुचुकुन्दस्य नयनाग्निना अयं यवनः दग्धोऽभवत् (१४/३२-३७)(२)

कालिन्दी - यमुना नदी। सूर्यस्य पुत्री।(३) (१/६३, ४/५५, १४/५९) यमस्वसा (१/६४, ७/२४, ३५). अक्रूरः यमुनायाः ह्रदे श्रीकृष्णस्य दिव्यं रूपमपश्यत्। (१०/४७)

कालिन्दी - श्रीकृष्णाष्टमहिषीष्वन्यतमा (१९/१२)(४)

कुब्जा - कंसस्य दासी। तद्दत्तगन्धं स्वीकृत्य श्रीकृष्णः कुब्जां सुन्दरीं व्यतनोत्। (११/५, १०)(५)

केशवादिभगवद्रूपाणि - श्रीहरेः केशवादि-चतुर्विंशतिरूपेषु द्वादशानां केशव-नारायण-माधव-गोविन्द-विष्णु-मधुसूदन-त्रिविक्रम-वामन-श्रीधर-हृषीकेश-पद्मनाभ-दामोदराणामुल्लेखः र.वि.काव्ये कृतोऽस्ति (१७/१०-१२)(६)

---

(१) भार. सभा. ८, १८, भार. शान्ति. ४८ (२) भार. शान्ति. २४८. हरिवंश १,

(३) भार. सभा. ९ (४) भाग. १०/५८

(५) भाग. १०/४२ (६) भार. अनु. १४९, अध्य ११४

केशी - कृष्णवधोद्देशेन कंसप्रेषितः अश्वरूपी दैत्यः कृष्णेनैव हतः। (१०।११) ①

कैटभः - दैत्यः कश्चित् विष्णोःकर्णमलाज्जातः, विष्णुना ऊर्वोः निधाय नाशितः। मधुः अस्य भ्राता। मधुकैटभारिः श्रीकृष्णः (१८/२६) ②

कंसः - श्रीकृष्णस्य मातुलः (११।५८) रु.वि.काव्ये प्रतिनायकः। कृष्णः 'जातः कंसवधार्थाय'। भोजानां राजा (११।२४) 'मायामय-जारजातः' (१०।१६) उग्रसेनस्य पुत्रत्वेन लोके प्रसिद्धः, उग्रसेनस्य पत्न्यां दुमिलात् जातः अयं कंसः। ③

गन्धर्वाः - देवगायकाः (१।३४, ६/४३) ④

गर्गः - यादवानां पुरोहितः महर्षिः। ⑤ श्रीकृष्णबलभद्रयोः नामकरणं कृतवान्। (३।१९)

गरुडः - पक्षिराजः (८।६ वीशः) विनतायाः पुत्रः (१।६५) श्रीहरेः वाहनीभूतः। (४/५६, ६३, ७१, १६/२२) विष्णोः मुकुटापहारिणा बलिना वैरोचनेन नियुध्य गरुडः गोमन्तगिरौ वर्तमानाय श्रीकृष्णाय मुकुटं प्रादात्। (१४/२१) ⑥

गुरुः - देवानां गुरुः बृहस्पतिः। (१३।३०, १६।२६) ⑦

---

(१) भाग. १०।३७. भार.सभा.५३. हरि.२/२४ (२) भार.वन.२०६

(३) भार.सभा.१४/२३ हरि.२।२८ (४) भार.आदि ६६

(५) भाग.१०।८ (६) भार.आदि २३., हरि.विष्णुपर्व ४१/३९-४५

(७) भार.आदि ६७.

Rarest Archiver

चन्द्रः - नवग्रहेष्वन्यतमः । [1] वनस्पतीनां नक्षत्राणां चेशः । (१।५८) [2]
श्रीकृष्णः सोमान्वये जातः । (१।३३, २।४४, १०।१) [3] दक्षशापेन चन्द्रः
मासस्यार्धे क्षयवान् बभूव । [4] (७७।४४) क्षीरसमुद्रात् मथ्यमानात्
जातेषु चतुर्दशकेषु अन्यतमोऽस्ति चन्द्रः (१४।४३) [5]

चाणूरः - कंसपोषितः मल्लः । मथुरायां मल्लयुद्धे एनं जघान (११।४१)
एतद्भ्रातरं मुष्टिकं च बलभद्रः जघान (११।४९) [6]

चैद्यः - चेदिराजः शिशुपालः । हिरण्यकशिपोरंशेन जातः ।
जयाख्यः सज्जीवः अस्मिन् आसीत् (२।५६) श्रीकृष्णेनायं
जरासन्धयुद्धे निर्जितोऽभवत् । (७४।१६) [7]

जाम्बवती - श्रीकृष्णस्याष्टमहिषीषु अन्यतमा । (९९।१२) [8]

जयविजयौ - श्रीविष्णोः द्वारपालकौ । शापवशाद् भूमौ
अवतेरतुः शिशुपालदन्तवक्त्रत्वेन । श्रीकृष्णेन शिशुपाल-
दन्तवक्त्रौ हतौ । (१।२८, २।५६) [9]

जरासन्धः - मगधदेशाधिपतिः । बृहद्रथस्य पुत्रः । कंसस्य
श्वशुरः । [10] बृहद्रथपत्न्योः जातस्य अस्य देहभागयोः जरा-
नाम्न्या राक्षस्या संहितत्वात् जरासन्ध इति नाम अभवत् ।
श्रीकृष्णेन सह बहुवारं युद्धं कृत्वा पराजितोऽभवत् ।

---

(१) भाग ४।१ (३) भाग ३।१२ (२) मत्स्य २३
(४) लिङ्ग ५८, ५९ (५) विष्णु १।९ (६) भाग १०।४४ (७) भाग १०।७४
(८) विष्णु ४।१३ (९) भाग ३।१६ (१०) भार० आदि २०१

Rarest Archiver

बलभद्रः जरासन्धं युद्धे गृहीतमपि श्रीकृष्णवाण्या तं मुमोच (१४/१६)[१]

ताटका - श्रीरामेण संहृता राक्षसी।[२] सैव पूतनारूपेण आगता श्रीकृष्णावतारे श्रीकृष्णेन संहृता (२/४०)[३]

तिलोत्तमा - अप्सरस्सु अन्यतमा।[४] देवनर्तकी। श्रीकृष्णावतारे सति तिलोत्तमाद्याः नर्तक्यः ननृतुः। (७/३४)

दशावताराः श्रीविष्णोः दश अवताराः रु. वि. काव्ये निरूपिताः सन्ति। मत्स्य-कूर्म-वराह-नारसिंह-वामन-परशुराम-राम-कृष्ण-बुद्ध-कल्किरूपाः दशावताराः अत्र अङ्गीकृता वर्तन्ते।

मत्स्यावतारः - विधेर्मुखात् अपहृतान् वेदान् आनेतुं श्रीहरिः मत्स्यावतारोऽभवत्। तत्र वैवस्वतमनुना स्तुतोऽस्ति। (१७/१५)[५]

कूर्मावतारः - क्षीराब्धिमन्थनावसरे विष्णुः कूर्मरूपेणागत्य मन्दरपर्वतं स्वपृष्ठे धृत्वा देवासुराणां अमृतमन्थने कारणमभवत्। (१७/१६)[६]

वराहावतारः - श्रीहरिः वराहरूपेण धरापहारिणं हिरण्याक्षं सञ्जघान। (१७/१७)[७]

---

(१) भाग. १०/१/३१,३२ (२) रामा-बाल. २४,२५

(३) म.भा.ता.नि. १२/८७ (४) भार. आदि. ६६

(५) भार. वन. १९० (६) विष्णु ७/९, भाग. ८/७

(७) भाग. ३/१३

नृसिंहावतारः - हिरण्यकशिपुसंहाराय नरसिंहावतारः (१७/१८) (११/३८) दैत्यपदाहतस्तम्भादाविर्बभूव (१/५४) (१)

वामनावतारः - बलेः दानं स्वीकृत्य इन्द्रस्य साम्राज्यं ररक्ष वामनः । अयमेव त्रिविक्रमः । (१६/२४) वामनः इन्द्रानुजश्च (१७/१९) (२)

परशुरामावतारः । - दशावतारेषु षष्ठः । जमदग्न्याख्यद्विजाज्जातः । युधि कार्तवीर्यार्जुनं सहस्रबाहुं जघान । भुवि एकविंशतिवारं क्षत्रियाणां वंशं आच्छिनत् । (१७/२०) (३)

रामावतारः - श्रीविष्णुः अस्मिन्नवतारे सूर्यवंशे दशरथात्मजत्वेन समभवत् । भूमिसुतां सीतां उवाह । दशमुखं रावणं जघान (१७/२१, १५/८) श्रीरामस्य चरणस्पर्शेन शिलाभूता अहल्या उद्धारमाप (७/१) सुग्रीव-सहायेन, रावणेन नीतां सीतां प्राप । (१५/८) श्रीरामस्य सैन्यं कपिमयम् । तेन च सेतुं बबन्ध दक्षिणाब्धौ (४/२६, १५/८) (४)

कृष्णावतारः - काव्यस्यास्य नायकः श्रीकृष्णः एव ।

बुद्धावतारः - दशावतारेषु नवमोऽयम् । त्रिपुरस्थदैत्यानां वञ्चकः । (१७/२३) (५)

कल्क्यवतारः - कल्की विष्णुयशोनामक ब्राह्मणात् प्रादुर्भूतः । म्लेच्छान् हत्वा सद्धर्मं प्रवर्तयति; कलिनिग्रहं करोति । (१७/२४) (६)

---

(१) हरि. ३/४२ भाग. ७/८ (२) मत्स्य ४७

(३) भाग ९/१५ (४) रामा. किष्कि. ४, ८ . युद्ध. १०९, ११०.

(५) भाग १/३ (६) भाग १२/२

दुर्योधनः - रु.वि.काव्ये साक्षादस्य नामग्रहणाभावेऽपि तत्कथा प्रसक्तास्ति । श्रीकृष्णः 'अहं एकाकी आयुधं न गृह्णामीति मधुरया वाचा दुर्योधनं वञ्चितवान (मधुरया जितदानव सङ्गिरा १७/८) (१)

देवकी - श्रीकृष्णस्य जन्मदात्री माता । वसुदेवस्य पत्नी। (१।२५,३२) शङ्खचक्रादिधारिणं हरिं दृष्ट्वा भक्त्या अस्तौत (१।४१) (२)

धन्वन्तरिः - मथ्यमानात्क्षीरसमुद्राज्जातः आयुर्वेदप्रवर्तकः । क्षीरसमुद्राज्जातत्वात श्रियः सोदरत्वेन वर्णितः (सहजश्रियं १७/७) (३)

धेनुकः - दैत्यः कश्चित, वृन्दावनस्य समीपे तालवनं समाक्रम्य स्थितः रासभरूपेण । तालफलेप्सूनां गोपानां इच्छानुसारं श्रीकृष्णः एनं हलधरणेन हतं समकारयत (५/२१-२५) (४)

नन्दः - गोकुलस्थानां गोपानां अधिपः। वसुदेवस्य सुहृत। अतः वसुदेवः जातं श्रीकृष्णं नन्दगृहं निनाय। (१/५७,२१७,१०/१८) श्रीकृष्णस्य बाललीलाः नन्दगृहे एव बभूवुः (१८/१२) यशोदा नन्दस्य पत्नी। (५)

नलकूबरमणिग्रीवौ - कुबेरस्य पुत्रौ । नारदशापवशात अर्जुनवृक्षतां प्राप्तौ । उलूखले बद्धस्य श्रीकृष्णस्य स्पर्शेन एतौ शापमुक्तौ अभूताम । (६)

---

(१) भार. उद्योग ७ (२) भाग. १०/३/२४

(३) भार-आदि. १८. भाग ८/८ (४) भार. स. ५२. भाग. १०/१५. हरि २/१३.

(५) भाग. १०/८ (६) भार. वन. २८१. भाग. १०/१०.

Rarest Archiver

<u>नरकः</u> - विष्णोर्वराहावतारे स्वेदबिन्दौ भुवि पतिते भूमेर्जातः अयमसुरः। अत एव भौमासुर इत्यप्यस्य नाम। प्राग्ज्योतिष-पुरे वसन्तं एनं श्रीकृष्णः जघान, तेन बद्धाश्च कन्या उवाह। (नरकमथन ७।५१, १९।१२)(1)

<u>नवग्रहदेवताः</u> — रविः, विधुः, मङ्गलः, बुधः, गुरुः, शुक्रः, शनिः, राहुः केतुः इत्येते नवग्रहदेवताः रु. वि. काव्ये नाम्ना उल्लिखिताः (१५।४७)(2)

<u>नारदः</u> - देवर्षिः। ब्रह्मपुत्रः। कंसं प्रति तस्य उग्रसेनाजातत्वं उक्तवान्। श्रीकृष्णस्य देवोत्तमत्वमपि तं प्रति जगाद (१०।१६-२२)(3)

<u>नारायणः</u> - श्रीमहाविष्णोर्मूलरूपम्। शेषशायी (१४।८५, १७।१)। आदिपुरुषः, पुराणपुरुषः (१४।५९) अप्राकृतशरीरः (१४।८६)। लक्ष्मीरस्य जाया (१४।५२) जगद्रक्षणाय नानावतारान् जग्राह। (१६।२९) जगतः जन्मादयः अस्माद् भवन्ति।(१६।३०)(4)

नारायण इति मुनिरूपमपि विष्णोर्वर्तते। यमधर्मात् मूर्तिनाम्न्यां पत्न्यां जातः।(यमजनिं भज तापसविग्रहम् १७।३) शतशृङ्गपर्वतशिखरे नराख्यः ऋषिः अमुं नारायणं सेवते स्म (१७।३)(5)

नीला - श्रीकृष्णस्याष्टमहिषीष्वेका। सर्वाभ्यो गोपीभ्योऽपि <u>प्रागेव कुम्भकपुत्रीं इमां नीलां, सप्तवृषभान् हत्वा उवाह श्रीकृष्णः।</u>(५।२०)(6)

---

(१) भार. सभा. ९।१४।५९ (२) लिङ्ग. ५७, ५८

(३) हरि. २।२८ (४) भार. अनु. १८६

(५) भार. वन. १४७ (६) म. भा. ता. नि. १३।४७-५०

Rarest Archiver

पाण्डवाः - चन्द्रवंशस्य पाण्डुराजस्य पुत्राः युधिष्ठिर-भीमसेन-अर्जुन-नकुल-सहदेवाः। श्रीकृष्णभक्तानां तेषां राज्यं तदनुग्रहेणासादितम्। (वश-निकाय-गतागमसाधक १७/८) अर्जुनसारथ्यं श्रीकृष्णेन कृतम्। (नर-तुरङ्गम-हर्षकराकृते १७/८). यमसौहृदकृत (१७/२२) ① ②

पार्वती - पर्वतस्य (हिमालयस्य) पुत्री. शम्भोर्दयिता (१५/२, ३/५) विरक्तमपि शिवं तपसा गौरी वशयाम्बभूव (१६/१९) षण्मुखः अस्याः सुतः (१४/६) रुद्राणीत्यपि ख्याता (१९/३६) ③
रुक्मिणी विवाहात्पूर्वं भवानीं पूजयामास (१५/२) ④

पूतना - कंसस्य धात्री (२/३७) रम्यं रूपमवाप्य श्रीकृष्णाय विषयुक्तं स्तन्यं पाययामास। (२/३३, ३४) श्रीकृष्णेन हताऽभवत् (२/३७, ४०). ⑤ पूतनायां तारका उर्वशी-चौरी द्वौ जीवावास्ताम्। तयोरुर्वशी सद्गतिं प्राप्ता, मुकुन्दविद्वेषेण चान्या तारका अधोलोकं गता (२/४१) ⑥

पौण्ड्रकवासुदेवः - पुण्ड्रवंशीयवसुदेवस्य पुत्रः। श्रीकृष्णः अहमेव इति विघोषयन्तं तं तं शुकः भागवते गर्हितवानास्ति। ⑦ (१४/३६) श्रीकृष्ण इव, पौण्ड्रकः कृत्रिमशङ्खचक्रादि धृतवानासीत्। , स्वात्मानं दर्शयितुं

---

(१) भार. आदि. ६३, ६४, भार. उद्यो ७ (२) भार. उद्योग ७
(३) हरि १।१८, लिङ्ग पूर्व. १०२ (४) भाग १०/५३
(५) हरि. २/६. विष्णु ५/५. भाग. १०/६ (६) म. भा. ता. नि. १२/८७
(७) भाग ११/६५ हरि. भविष्य ९१, १०१

Rarest Archiver

प्रद्युम्नः - श्रीकृष्णात् रुक्मिण्यां जातः पुत्रः (१९/२७,१८/२५)
मन्मथावतारः (१९/२८) अयं च रुक्मिपुत्र्यां रुग्मवत्यां अनिरुद्ध-
नामानं पुत्रं प्राप। (१९/३०,३१)[1] जरासन्धयुद्धे च श्रीकृष्णः
तत्क्षणं प्रद्युम्नमुत्पाद्य तेन एकलव्यं पराजितमकरोत् (७४/६)[2]
बकः - कंसपरिपोषितेषु दैत्येष्वन्यतमः। एकदा बकरूपेणागत्य
गावः चारयन्तं श्रीकृष्णं प्रजग्रास, पुनश्च चच्छर्द। कृष्णस्तं
तुण्डौ विभिद्य जघान (४/३१-३५)[3]
बलरामः - (बलभद्रः) श्रीकृष्णस्य अग्रजः (१/६१, ४/५६)
वसुदेवात् देवकीगर्भं प्रविश्य ततः मायया रोहिणीगर्भे निहितः
रोहिण्याः जातः। (१/२५, ११/४१)[4] बलः (२/३६,४/१०,५/२४)
बलभद्रः (१/२७) रामः (११/४१) सङ्कर्षणः (११/४३) हली (५/२८)
हलधरः (५/२७, मुसली (७४/१३) इत्यादिशब्दैरपि व्यवह्रियते।
बलरामोऽयं शेषावतारः। (१/२६, ४/५६) श्रीविष्णुरस्मिन् शुक्लकेशरूपेण
सन्निहितः। (१/२७) गोकुले बलभद्रः धेनुकं प्रलम्बं च जघान।[5]
(५/२७,२८) बलरामः मथुरायां मुष्टिकं मल्लं जघान (११/४१) कंस-
वधानन्तरं रामकृष्णौ अध्ययनाय सान्दीपिनेराश्रमः जग्मतुः (१२/२९)।[6]

(१) भाग १०/५५ विष्णु ५/२७, हरि २/१०४, १०७
(२) म.भा.ता.नि. १४/४० (३) भाग १०/१२
(४) भाग ९/२४ (५) भाग १०/१५,१८ विष्णु ५/९
(६) भाग १०/४५

बलिः - प्रह्लादस्य पौत्रः, विरोचनस्य पुत्रः। नर्मदातीरे अश्वमेधे
प्रवृत्ते बलौ, ब्रह्मादिभिः प्रार्थितः हरिः वामनरूपेणावततार।
बलेः त्रिपादभूमियाच्ञाव्याजेन तत्साम्राज्यमपहृत्य इन्द्रस्य पदं
ररक्ष। अत एव बलिः इन्द्रशत्रुः (५।५५)[1]। वामनः बलिं
विजितवान (बलिपराजयकृत्, (७०।१९)

बाणः - बलिचक्रवर्तिपुत्रः। अस्य च सहस्रबाहवो ह्यासन्।
अस्य पुत्री उषा। तां कृष्णपौत्रः अनिरुद्धः अपहृत्य उवाह।
बाणेन कारागारे क्षिप्तमनिरुद्धं ज्ञात्वा श्रीकृष्णः बाणासुरं युद्धे
जिगाय। इयं कथा 'युधि सहस्रकरोर्जितबाणहृत (७०।२०) इति सूचिता। [2]

भरतः - ऋषभरूपिपरमात्मनः जयन्त्यां पत्न्यां जातः पुत्रः। ऋषभः
स्वपुत्रं एनं शास्त्रे विशारदमकरोत् ।(७०/५) [3]

भस्मासुरः - असुरोऽयं शिववरेण उद्धतः। यस्य शिरसि
भस्मासुरः हस्तं क्षिपति स भस्म भवतु इति शिवप्रदत्तः वरः। शिवमेव
हन्तुं अयं भस्मासुरः प्रवृत्तः। तदा मोहिनीरूपः विष्णुः तं भस्मासुरं
स्वस्यैव शिरसि हस्तं निक्षेप्तुं नाट्यच्छलेन प्रचोदितवान्। एवं
भस्मासुरः भस्म अभूत्। (यो भस्मीकृतभस्मदानवपतिः
शम्भुं पुराऽपालयत् ७९।७५) [4]

---

(१) भार. ८।१७ (२) भार. आदि. ६६. भाग. १०/६३. हरि. २।११८ विष्णु ५।३३

(३) विष्णु २।३ भाग १।१७ (४) Puranic Encyclopaedia by Vettam Mani page 127

Rarest Archive

भीमसेनः (भीमः) वायुदेवानुग्रहतः कुन्त्यां जातः द्वितीयः पाण्डवः।
श्रीकृष्णभक्तः (स्वभक्तभीमानुज...४।१४) अत श्रीकृष्णः 'विमलभीम-
रथीप्सितदायकः' (१७।९)[1] युद्धे जरासन्धं जघान भीमसेनः[2]।
इयं कथा 'करणापालनशील'[3] (१९।१२) इति सूचिताऽस्ति।
भीष्मकः - रुक्मिण्याः जनकः (१४।४८)[4]
भूमिः - दुष्टानां राज्ञां भारेणाक्रान्ता ~~सती~~ भूमिः गोरूपधरा सती
हरिं शरणं गता (१।११,१३) श्रीहरिः भूभारोद्धारणाय कृष्णत्वेन
अवातरत। (कु-भरसंहरणोग्ररणाग्रणी १७।२०)[5]
भृगुः - पुरा जाह्नवीतीरे यज्ञमग्नेषु मुनिषु सत्सु यज्ञफलं
कस्मै अर्पितव्यमिति शङ्कायां सर्वोत्तमदेवतानिर्णयाय मुनयः
भृगुमुनिं प्रेषितवन्तः। स च ब्रह्मरुद्रविष्णुलोकान् गत्वा
विष्णुरेव सर्वोत्तमः इति निश्चयं स्पष्टीकृतवान्।[6]
(योगीन्द्राहृतवैभवो भृगुमुनिः यच्छ्रैष्ठ्यमस्पष्टयत १९।१५)
मधुः - दैत्यः। मधुसूदनः (११।१७ इत्यादिषु) श्रीहरिः।
मधुमदक्षय (१७।११)[7]
माया - श्रीविष्णोराज्ञया देवक्याः सप्तमं गर्भं (बलभद्रं) रोहिण्यां स्थापयामास[8]
(१।२३, २५, २६)

(१) भार· आदि· १२९ (२) भार· सभा· २६
(३) कार्थं वाय्वर्थं रणं जरासन्धयुद्धं ... पालयतीति तथोक्तः कृष्णः (४) भाग १०/५२
(५) भाग १०/१ (६) भविष्योत्तर, द्वितीयाध्यायः
(७) मार्क· ७८ (८) भाग १०।२

Rarest Archiver

मित्रविन्दा - श्रीकृष्णस्याष्टमहिषीषु एका । वसुदेवस्य भागिन्याः राजाधिदेव्याः पुत्री । (स्वां मित्रविन्दां तथा ११।१२)[1]

मुख्यप्राणः - प्राणदेवः । इन्द्रियाभिमानि देवेभ्यः प्राण एव बलवान । (प्राणगणाधिनाथः १६।१२)[2] अयमेव वायुदेव इति कथ्यते । वायुः हनुमानभवत । भीमरूपः स एवाभवत । मध्वावतारोऽप्यस्यैव वर्तते । (१६।१६)[3]

मुचुकुन्दः - सूर्यवंशस्य मान्धातृराजस्य पुत्रः । मुचुकुन्देन यवनः नाशितः श्रीकृष्णेन ।(१४।३५)[4] मुचुकुन्दाय मुकुन्दः मुक्तिं ददौ ।(१३।१४)[5]

मुरः - नरकासुरपक्षीयः कश्चित् राक्षसः । श्रीकृष्णेन हतः ।[6] अत एव श्रीहरिः 'मुरारिः' (७।५१ इत्यादिषु)

मुष्टिकः - बलभद्रेण हतः कंसस्य मल्लः (११।६१)

यमः - सूर्यपुत्रः । धर्माधर्मे दण्डदाता । अत एव दण्डपाणिः । (४।६, ८।२६) यमुना अस्य भागिनी (७।२५)[6]

यशोदा - नन्दस्य पत्नी, गोकुले श्रीकृष्णं पोषितवती माता (२।१)[6]

युधिष्ठिरः - पाण्डवेषु प्रथमः । कुन्त्यां पाण्डुपत्न्यां यमवरेणजातः । श्रीकृष्णः अस्य अनुग्राहकः । (१९।१७)

---

(१) भाग १०।५९ (२) भार. अनु. १९१. रामा. उत्त. ३५,३६

(३). म.भा.ता.नि. ३२।१६२ (४) भाग १०।५१

(५) भाग १०।५१।६४ (६) भाग १०।५१ हरि २।६३. विष्णु. ५।२९

रावणः - सीतापहारी लङ्काधिपतिः यं श्रीरामो युद्धे जघान (१५।४)[1]
रुक्मिणी - काव्यस्यास्य नायिका । श्रीकृष्णपत्नी । लक्ष्मीस्वरूपिणी । भीष्मकस्य पुत्री ।[2] रुक्मिणी 'अजा' इति वर्णिता (अजया प्रेषितं पत्रं १४।३८)
रुक्मी - रुक्मिण्याः भ्राता । श्रीकृष्णेन रुक्मिण्यपहरणे सति तेन युद्धे प्रवृत्ते एनं मुण्डितं चक्रे चक्री ।[3] (१४।१०)
रोहिणी - वसुदेवस्य पत्नी । बलरामस्य जननी (११।४१)[4]
लक्ष्मणा - अष्टमहिषीष्वन्यतमा । (सल्लक्षणां लक्ष्मणाम् १९।१२)[5]
लक्ष्मीः - श्रीविष्णुपत्नी (१६।३१, ३।३७) पयोब्धिजा (१।१०) समुद्रः अस्याः पिता (१५।२१) अत एव सिन्धुपुत्रीति लक्ष्मीनाम । (७।२६) (१८।४६) ।[6] प्रलयकाले दुर्गारूपिणी सती श्रुतिभिः हरिं स्तौति ।[7] (४।५९) पद्मालयेयम् (७।१८) लक्ष्मीरेव रुक्मिणीत्वेन अवततार ।[8]
वज्रः - श्रीकृष्णस्य पौत्रस्यानिरुद्धस्य पुत्रः (१९।३२)[9]
वत्सः - वत्सरूपिणं दैत्यमेनं श्रीकृष्णो जघान । (४।२)[10]

---

(१) रामा· उत्त· ११, अर· ४६. युद्ध· ११०· (२) भाग. १०/५२/२२
(३) भाग १०/५४/२५ (४) भाग ९/२४
(५) भाग· १०/५८. भार· स· ५७ (६) विष्णु १, ९
(७) दे·भा· ७।२८ (८) विष्णु १, ९
(९) भाग १।१५ (१०) भाग· १०।११

वरुणः - पश्चिमदिशः आधिपतिः ।(४।१९)[1] जलाधिपत्यमपि अस्य वर्तते ।(६।२२)[2] अकाले जलं प्रविष्टे नन्दे सलिलेश्वरस्य भृत्येन तल्लोकं नीते सति, श्रीकृष्णः तत्र गत्वा नन्देन साकं पुनराजगाम गोकुलम् ।(६।२३)[3]

वसवः - धर्मप्रजापतेः दक्षपुत्र्यां वसुनाम्न्यां जाता अष्टवसवः। श्रीकृष्णावतारे तेऽपि सन्तुष्टा अभूवन् (१।३७)[4]

वसुदेवः — श्रीकृष्णस्य पिता । शङ्खचक्रादिधारिणं श्रीकृष्णं दृष्ट्वा स्तोत्रमकरोत् (१।४५) मधुरातः श्रीकृष्णं गोकुलं निनाय (२।७)। स एव दुर्गां च गोकुलात् मधुरामानिनाय (२।६)[5]

वातासुरः (तृणावर्तः) - कृष्णवधाय कंसप्रेषितः वायुरूपो दैत्यः। श्रीकृष्णं सः वातरूपी दैत्यः आकाशं नीतवान् । श्रीकृष्णेन गलग्रहणे दृढं कृते प्राणान् तत्याज (३।१-७)[6]

विरिञ्चिः - चतुर्मुखः अयं आत्मभूः वेदगर्भः इत्यपि कथ्यते (१६।३)। विष्णोर्नाभिकमलादुद्भूतः ।(१६।२) ब्रह्मा विष्णोर्नाभिकमले तपस्तेपे। (१६।४)। जगत्सृजति (१६।११) भूभाववतर्तुं हरिं प्रार्थयितुं विरिञ्चिः गत्वा तत्र क्षीरपयोब्धितीरे पुंसूक्तेन स्तोत्रं ततान ।(१।१६) श्रीकृष्णस्य कालियमर्दनकाले

---

(१) भार. स. ९.१० (२) भार. शल्य. ४८

(३) भाग १०/२८ (४) भार. आदि ६७

(५) भाग १०/३, (६) भाग. १०/७

ब्रह्मा मृदङ्गं अनीनदत् ।(४।६८) रासक्रीडायां सत्यां ब्रह्मादयः देवाः आकाशे स्थित्वा दृष्ट्वा तुतुषुः (९/३१) ब्रह्मणः वाहनं हंसः (१४/४२, १७/५२) ①

वृष्णयः – यादवविशेषाः। यादवसामान्या अपि आख्यायन्ते।②
राजधानी जयति सा भोज-वृष्ण्यन्धकाश्रिता १२।३८)
वृष्णिप्रमोदोऽभ्यगात् (रथः) १३।४५

वेदव्यासः – पराशरमुनिपुत्रः श्रीनारायणावतारः ब्रह्मसूत्र, भागवत महाभारतादि निर्माता (२।५७, १२।२६, १७।१३, २२) ऋषिः। धर्मसंस्थापकः (विमलधर्मशुभास्थितिकृत् ।क्षितौ १७।२२) ③

शकटः – गोकुले श्रीकृष्णजिघांसया आगतः कंसपक्षीयः दैत्यः। बालकस्य श्रीकृष्णस्य पादघातेन शकटरूपोऽयं ममार (२।६३-८४) ④

शङ्खचूडः – कुबेरस्य दासः कश्चित्। अयं दितिजः रात्रौ वृन्दावने प्रविष्टः श्रीकृष्णेन हतः यस्य च शिरोमणिः बलरामाय दत्तः (१०।४) ⑤

शङ्खदैत्यः (पञ्चजनः) – गुरवे सान्दीपनये गुरुदक्षिणारूपेण तत्पुत्रं मृतं आनेतुं गतः श्रीकृष्णः समुद्रे पञ्चजनाख्यं दैत्यं संहृत्य पाञ्चजन्यशङ्खमवाप (१२।३२) ⑥

शिशुमारः – दोषाख्यप्रजेश्वरात् शर्वरीनाम्न्यां पत्न्यां श्रीहरिः

---

(१) भार. आदि. १. भाग ३।८ (२) भाग ९।२४

(३) भार. आदि. ११५ (४) भार सभा. ५२. हरि. २।६ विष्णु ५।६

(५) भाग १०।३४ (६) भाग १०।४५

Rarest Archiver

शिंशुमाररूपेणावतीर्णः, तत्पुच्छमवलम्ब्य ज्योतिश्चक्रं वर्तते आकाशे । (१७।६)[1]

शिवः – शिवः विरिञ्चस्य पुत्रतया वर्णितः (७।१८, १९।२२) गिरीशः दिगम्बरः (४।४२) इत्यादिनामभिरभिधीयते।(७।१८) कपर्दीत्यपि निगद्यते (४।६८) भुजङ्गाः खलु अस्याभरणानि। (४।४२) चन्द्रकला शिवेन शिरसि धृता (४।४२)[2] विष्णुपादतीर्थं गङ्गा शिरसा धृता (शम्भुर्यच्चरणाम्बुमौलिः १६।१९, ४१)[3] शिवः विषपानेन नीलकण्ठः (४।४३)[4] कन्दर्पदर्पापहः (७।५०, १७।५३) अयमर्धनारीश्वरः।[5] रुद्रः मनोऽभिमानिदेवता (१०।७१)[6] शिवोऽयं त्रिपुरहरः (९।३१, १४।४३, १६।७१)[7] गिरीशोऽयं गिरिजायै विष्णोः सर्वोत्तमत्वं उपदिदेश (१४।६)[8] शर्वः सुपर्वरिपुगर्वविभेददक्षत्वेन वर्णितः (१६।१९) सुविरक्तधीरयं शर्वः (१६।४०) कृष्णः कैलासयात्रां चकार (१९।१६) शिवपूजायां केतकी निषिद्धा। (१६।४२)[9] शिवः चतुर्मुखब्रह्मणः फालादुत्पन्नः (तदीयफालान्तरजन्मभूमिः १९।२२)[10] षण्मुखः अस्य सुतः (१४।६)

---

(१) भाग ५।२३ विष्णु २।९ (२) भार॰ अनु २०७

(३) भाग॰ ९।९ (४) भार॰ आदि १८

(५) शिव॰ केदार॰ (६) उमा वै वाक् समुद्दिष्टा मनो रुद्र उदाहृतः – स्कान्दे ब्रह्मसूत्र माध्वभाष्ये ४।२।१ इत्यत्र उदाहृतम्।

(७) भाग ५।१० (८) भार॰ अनु॰ २०८, पद्म॰ उत्तर॰ २८१/२०-२३

(९) लिङ्ग॰ ७।१९, स्कन्द माहे॰ ६ (१०) भार॰ शान्ति ३६०

Rarest Archiver

शुकः (शुकाचार्यः) श्रीमद्भागवतं सप्ताहे परीक्षिद्राजाय कथितवान् महायोगी कृष्णद्वैपायनसूनुः (२।५०, ९।२४) (१)

शेषः - सर्पराजः (४।५६) श्रीहरेः शय्या (१।२६, भोगीन्द्रभोगास्पद १७।५२) बलभद्रोऽस्यावतारः (७।२९) नित्यं अंशविशेषेण पातालस्थः अयं भूभारं वहति ।(१६।२०) (२)

समुद्रः - लक्ष्म्याः पिता अत एव लक्ष्मीः सिन्धुपुत्री (७।२६) समुद्रः सरित्पतिः (१६।५३) इति वर्णितोऽस्ति । समुद्रस्य मध्ये वडवाग्निर्वर्तते ।(१६।५६)

सत्या (सत्यभामा) श्रीकृष्णाष्टमहिषीष्वन्यतमा (१९।१२) (३)

सरस्वती - वाणी शारदा इत्यपि गदिता । रु० वि० काव्ये मङ्गलाचरणे वाणीमुखं श्रेयसे इति आशासितम् । इदं च काव्यं शारदानन्ददमिति काव्यान्ते अभिहितम ।(१९।४०)

सान्दीपिनिः - श्रीकृष्णबलभद्रयोः गुरुः (१२।२९) यस्मै श्रीकृष्णः यमलोकं गतं तत्पुत्रं आनय्य गुरुदक्षिणां प्रादात (१२।३७) (४)

सीता - रामस्य पत्नी अवनिजा (१७।४, १६।३५)

सुग्रीवः - श्रीरामः अस्य कपिराजस्य सैन्यबलेन लङ्कां गत्वा रावणं हत्वा सीतां प्राप (सुग्रीवोद्धृतसैन्यभागविलवान् १७।४) (५)

---

(१) भार० सभा० ५. भाग १।१९ (२) भार० आदि० ३५, ३६
(३) भाग १०।५६ (४) विष्णु ५।२१. भाग १०।७४
(५) रामा० किष्कि० ४०, ४३

सिद्धाः - देवयोनिविशेषाः। पवित्रात्मनः ऋषयः (१।४३, ५।१६) सङ्गीताभिज्ञदेवयोनिविशेषत्वेनापि वर्णिताः (सिद्धान् सन्तापयन् सुरान् विनिमयन् वेणुं पुपोषाच्युतः ६।८८, ८।५७)

सूर्यः - दिनमणिः द्युमणिः (६।२८) अयं विवस्वान् वैवस्वतमनोः पिता। सूर्यवंशप्रवर्तकः।(६।२५) यमुनानदी अस्य पुत्री। (४।५५) छाया अस्य पत्नी (२।२५)[1] सायं सूर्यः आग्निं गृह्णन् करैः अस्तं गच्छति (५।४१)

हयग्रीवः - श्रीविष्णोः नामान्तरम्[2] कवेरस्य श्रीवादिराजस्य उपास्यः देवः। शङ्खचक्र पुस्तक अक्षमालाधरं श्रीहयग्रीवं मङ्गलाचरणे प्रणमति कविः (१।२) इदं च महाकाव्यं तत्कृपासमुद्रसमुद्भूतमित्यप्युक्तम् (अश्वग्रीवदयापयोब्धि-फलितम् ११।३८)

हेरम्बः - विघ्नेश्वरः। एकदन्तधारी। हेरम्बस्य तुलस्या पूजनं नास्ति।(१६।८२)[3]

---

(१) मत्स्य ११, शिव उमा १. (२) दे. भा. १।५

(३) न तुलस्या विनायकमिति व्याख्योद्धृतस्मृतिः।

Chapter-14

चतुर्दशोऽध्यायः उपसंहारः

समस्तेनानेन विमर्शनेन श्रीवादिराजतीर्थमहाकवेः रुक्मिणीशविजयमहाकाव्यनिर्माणवैशिष्ट्यं स्पष्टीकृतं भवति। रुक्मिणीशविजयकाव्यं च श्रीवादिराजतीर्थः इव संस्कृत-साहित्ये महद्वैलक्षण्यं भजते। श्रीवादिराजतीर्थः महापाण्डित्य मण्डितोऽपि विनयभूषितः।(1) रु.वि.काव्यं च नानाशास्त्र-विषयाढ्यमपि सरलं सरसं च। यतिभिर्विरचितानि काव्यानि विरलानि। यतिवरेण्येन विरचितमिदं रु.वि. महाकाव्यम्। अत एवास्य काव्यस्य आधुनिकेषु विमर्शकेषु प्रचारः न सञ्जातः इति भाति। श्रीवादिराजतीर्थः न केवलं वादकोविदः, प्रौढशास्त्रीयप्रबन्धप्रणेता, महातपस्वी अपितु प्रतिभाभासुरमहाकविरप्यासीत्। कविपण्डितोऽयं शास्त्रेऽपि काव्यशैलीं प्रयुक्तवान् काव्ये च शास्त्रार्थं निहितवान्। काव्ये शास्त्रार्थपोषणेन च काव्यमार्गस्य न काचिदपि हानिः वर्तते 'वादिराजमार्गे'।

भक्तिभावप्रतिपादकेषु काव्येषु अस्य रुक्मिणीशविजयस्य प्राधान्यं वर्तते। सरसमिदं महाकाव्यं भक्तिभावभरितं प्रतिभाति। सुलभशैल्यापि श्रीकृष्णभक्तिं तन्माहात्म्यं विस्तारयितुं रु.वि.काव्यं

---

(1) अपण्डितेनापि मयार्जितेयं मुकुन्दलीला कविकण्ठमाला।
अकौशलेन ग्रथितेति जातिप्रसूनमालां किमु सन्त्यजन्ति॥ रु.वि. 1/9

विरचितमस्ति । काव्यास्वादनकोमलमनीषिणामपि मानुषाणां भगवन्माहात्म्यं बोद्धुं आनुकूल्यमाकलितमस्ति अनेन महाकाव्येन ।

ऐतिहासिकतया कविरयं विद्वत्कवीनां माघभारविप्रमुखानां अनन्तरं समागतोऽपि संस्कृतसाहित्ये, तेषां कठिणतरां प्रणालीं अननुसृत्य सुभगया वैदर्भी शैल्या काव्यमातनोत् । मध्वसिद्धान्तप्रमेयाणि काव्येऽस्मिन् सङ्गोपितानि । किन्तु तदेकप्रतिपादनाय काव्यमिदं न प्रवृत्तमिति प्रतिभाति । काव्यमार्गस्य पोषणमपि कवेरपेक्षितं वर्तते । सन्यासिवरोऽयं वादिराजकविराजः काव्येऽस्मिन् केवलं तत्त्वोपदेशकः न भवति किन्तु नानारसपोषणेन वाचकानां मनांसि आनन्दयति । रु.वि.काव्येऽस्मिन् वर्णनेषु, अलङ्कारप्रयोगेषु च नव्याः कल्पनाविलासाः भव्या प्रतिभाप्रभावाः दिव्याश्च रसभावाः विलसन्ति । कविः स्वयं काव्यान्त्ये काव्यमिदं विद्वद्भिर्विभाव्यमिति स्पष्टयति (1) एवं रुक्मिणीशविजयमहाकाव्ये पाण्डित्यस्य प्रतिभायाः भक्तिभावस्य च मनोज्ञं सामानाधिकरण्यं समुपलभ्यते ।

---

(1) यस्मिन् मङ्गलदेवताऽखिलजगन्माता रमा नायिका
पद्मापद्मभवादिसेव्यचरणः तद्वल्लभो नायकः ।
अश्वग्रीवदयापयोब्धिफलितं प्राग्योक्तिरत्नोज्ज्वलं
तद्दासानुगवादिराजरचितं काव्यं विभाव्यं बुधैः ॥ १९/३८

Rarest Archiver

श्रीवादिराजविरचितं रुक्मिणीशविजयस्थश्लोकद्वयस्य व्याख्यानम्।
अम्भृणीसूक्तस्य (ऋ. १०।१२५) व्याख्यानमप्येतदन्तर्गतं वर्तते।
(उडुपि श्रीमद्वादिराजीयग्रन्थप्रकाशनसमित्या प्रकाशितेयमुपन्यासरत्नमाला) १९७४

॥ श्रीः ॥

॥ श्रीहयवदनाय नमः ॥

॥ श्रीमद्वाविसमीरवादिराजगुरुभ्यो नमः ॥

उपन्यासरत्नमाला ।

श्रीशं प्रणम्य व्यासं तं वाणीशं च गुरून्गुरुम् ।
करोम्युपन्यासरत्नमालां श्रीवल्लभप्रियाम् ॥

श्रीरुक्मिणीशविजयस्थकृष्णस्तुतिरूपगोपीवाक्यात्मकश्लोकद्वयस्य द्वावुपन्यासौ,
प्रमाणपद्धत्युपयुक्तास्सप्तोपन्यासाः, मायावादखण्डनोपयोग्येकः
एवं दशोपन्यासाः दशप्रमतिप्रीत्यर्थं बालानां बुद्धिवैशद्याय च संगृह्यन्ते* ।

★

प्रथमोपन्यासः ।

कमलासनाच्च भवतोऽभवतो महतीन्दिरा किल तया त्वया ।
तरुवद्भवान्परिहृतोऽरिहृतोदयदाव सेदमनु ते मनुते ॥ (रु. वि. ८-२९)

जडाजडमुक्तामुक्तसकलप्रपञ्चात्सविस्तरं श्रियो महत्त्वं निरूप्य तस्याश्च पतित्वेन हरेर्निरवधिकमहत्त्वं प्रतिपादयितुमिदं पद्यं प्रवृत्तम् । भवतः त्वत्तः, भवतः जायमानात् भवान् न भवतीत्यभवान् तस्मात्, अभवतः भवव्यतिरिक्तात्, कमलासनात् ब्रह्मणः, कमलासनाद्भवतः जायमानात् । अभवतः भवव्यतिरिक्तात् भवतः शिवात् ।✻ब्रह्मशिवाख्यतदन्तर्यामिभगवद्रूपद्वयव्यवच्छेदायोभयत्राप्यभवत इति विशेषणम् । अनेन ब्रह्मा स्वान्तर्यामिब्रह्मरूपाद्भिन्नः तत्पुत्रत्वात्, शिवः स्वान्तर्यामिशिवरूपाद्भिन्नः तत्पौत्रत्वादित्यनुमानद्वयं ब्रह्मशिवयो-

---

* एवं श्रीमद्वाविसमीरगुरुवरेण्यैरेव स्वकृतोपन्यासरत्नमालायां दशोपन्यासानां प्रतिज्ञातत्वेऽप्यस्माकं त्रयाणामेवोपलम्भेन त्रय एव मुद्राप्यन्ते. इतरोपन्यासाः यैरुपलब्धास्ते तान् सम्प्रेष्यानुगृह्णीयुः. श्रीगुरुवरानुग्रहपात्रीभवेयुरिति चाशास्ते इयं समितिः.

✻ ब्रह्मणि ब्रह्मरूपो सौ शिवरूपी शिवे स्थितः॥ इति वचनात्।

स्वकस्वस्वान्तर्यामिरूपाद्भिन्नत्वे प्रमाणं सूचितम् । 'तत्सृष्ट्वा तदेवानुप्राविश'दिति श्रुतेः (तै.उ. २–१४)। 'शम्भोः पितामहो ब्रह्मपिता शक्राद्यधीश्वरः' (पा.पु.वा.स) इति स्मृतेः। स्वस्वस्रष्टृमूलरूपस्यैवोभयत्रापि प्रवेशान्नासिद्धो हेतुः । **कमलायाः लक्ष्म्या आसनात्** पत्या सह शयने शय्यारूपाच्छेषात् । 'भू प्राप्ता'विति धातोः **भवतः** गच्छतः **भवतः** तव षष्ठ्यर्थभूतवाहकभावेन विद्यमानाद्गरुडात्। कानां जलानां मलेन फेनेन अस्यति निरस्यति शत्रुमिति **कमलासनः** इन्द्रः तस्मात् "अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयत्"(ऋ. ५–१–१६) इति श्रुतेः । **भवतः** त्वत्तो, **भवतो** जायमानात् कामात् **कमलासनात्** 'पद्मासनं पद्मकर'मिति श्रुत्या पद्मविष्टर-सूर्यात्। कमलम् अस्यति मुद्रणप्रापणेन निरस्यतीति, **कमलासनात्** चन्द्रात् । **भवतो भवतः** शिवाद्भवतः जायमानाद्विनायकात् षण्मुखाच्च **कमलासनात् ब्रह्मणः**, **भवतः** जायमानान्मरीचेः **भवतो** जायमानात्कश्यपात्, **भवतः** तव, मनोऽनुकूलतया विद्यमानात् देवनागादिसमूहात् **भवतः** तव, **अभवतः** अननुकूलात् दैत्यादिदुर्जीवसमूहाच्च उक्तव्युत्पत्त्या **कमलासनात्** सूर्यात्, **भवतो** जायमानात् **कमलासनात्** चन्द्राच्च **भवतः** जायमानात्, उभयवंशजातचक्र-वर्तिसमूहादित्यर्थः । **कमलासनाद्भवतः** जायमानाद्वसिष्ठनारदादिऋषिसमूहात् **कमलासनात् ब्रह्मणः** उक्तव्युत्पत्त्या, **कमलासनात्** सूर्याच्च **भवतः** जायमानान्मनुसमूहात् तस्माद्भवतो जायमानान्मानवसमूहाच्च **भवतः** शिवात्, **भवतः** जायमानात्पिशाचसमूहाच्च **भवतः** त्वत्तः, **कमलासनाच्च भवतो भवतः** प्रतिकल्पं जायमानान्महदहङ्कारादेः पातालरसातलादेश्च जड-प्रपञ्चात् **कमलासनात् ब्रह्मणः**, भवतश्च, **अभवतः** अजायमानात् **अपौरुषेय-वेदादेः कमलासनात्** कमलासनान्निमित्तात्, तदर्थमित्यर्थः । **भवतः** मूलरूपाद्व्या-सादिरूपाच्च **भवतः** जायमानात्पञ्चरात्रभारतपुराणब्रह्मसूत्रादिपौरुषेयग्रन्थसमूहात् । **कमलायाः** सम्पदः **असनात्** निरसनात्, वैराग्यादित्यर्थः **कशब्दवाच्यशि-रसो** मलभूतकेशानाम् **असनात्** निरसनात् सन्न्यासाश्रमग्रहणादिति **यावत् । मुक्तियोग्यजीवेषु यथायोग्यं** वैराग्यसम्पत्तेरनन्तरमिति भावः । **भवतः** त्वत्तः, **त्वदा-ज्ञयेत्यर्थः** । **भवतः** भूमौ जायमानात् **कमलासनात्** उक्तविधया **विरक्ताद्भक्तिरूपिणो**

भाविब्रह्मणो मध्वाद् भवतः जायमानस्य तत्कृतभाष्यादिग्रन्थस्य भवतः अनुभवितृगणादित्यर्थः "कानीन्द्रियाणी"ति श्रुतेः कमलासनात् कशब्दवाच्यमनोमलभूतमिथ्याज्ञाननिरसनान्मननादित्यर्थः । ल्यब्लोपनिमित्तपञ्चमीमपेक्ष्य कमलासनात् कमलासनं, भवतः भवं भवतः शिवात् भवतः भवन्तं जायमानं, षण्मुखविनायकादिकं परदेवतात्वेनानङ्गीकृत्य च गुरुत्वेनाङ्गीकृत्य च भवतं एव भवतः परदेवतात्वेनानुभवात् कमलासनात् कमलाया विष्टरस्थानीयवक्षस्स्थला-न्नारायणात् प्रसिद्धकमलासनाच्च गुरोः भवतः जायमानात् भवतस्तव भवतः भवात् भक्तेर्भावनाख्यध्यानात् प्राप्त्यर्थधातोर्ज्ञानार्थत्वात्; भवतः अपरोक्षज्ञानाच्च भवतो जायमानात्, कमलासनात् कशब्दवाच्यमोक्षसुखस्य मलरूपदुःखोदर्कसांसारिकसुखनिरसनादनन्तरं भवतः तव भवतः सायुज्यसामीप्यादिसम्बन्धवत्तया जायमानाद्यथायोग्यं चतुर्विधमुक्तेः पात्रीभूतादिति भावः । अभवतः न विद्यते भवः संसारो यस्येति व्युत्पत्त्या मुक्तात् प्रागुक्तव्युत्पत्त्यैव कमलासनादिशब्दवाच्यान्मुक्तब्रह्मादिसज्जीवादिसमूहादिति यावत् । एवं चान्तर्बहिर्वर्तिप्रपञ्चप्रतीतत्वाद्भूतपूर्वत्रैविक्रमपदत्रयोपममिदं पदत्रयमिति ज्ञातव्यम् ।

इन्दिरा लक्ष्मीः, महती किल विष्णुव्यतिरिक्तचेतनाचेतनात्मकसकलप्रपञ्चादभ्यधिकेत्यर्थः । हे अरिष्टोद्यदाव कृष्ण इतरावध्यकंसादिवधेनापि भगवतस्सर्वोत्तमत्वादिसूचनायेदं विशेषणम् । लतया तरुवत् तया लक्ष्म्या भवान् परिवृतः परितः सर्वतो वृतः अवतारादिष्वपि सेवालोलुपा सा त्वां न मुञ्चतीत्यर्थः । गुणत्रयादुपरि व्याप्ताव्याकृतमहाकायस्य हरेः श्रीरेव कटकमुकुटाद्याकारेण सर्वाङ्गमावृत्य तिष्ठतीति सूचयितुं परिवृत इत्युक्तम् । तरुदृष्टान्तेन 'यस्यांघ्रिरेणुं जुषतोऽनभीप्सो'रिति स्मृत्युक्तं भगवतो नैरपेक्ष्यं सूच्यते ।

एवं च सकलजगदुत्तमलक्ष्मीतत्त्वादप्युत्तमत्वाद्भगवानेव निरवधिकसर्वोत्तम इति गोपीनां हृदयम् । किलेत्यनेनास्मिन्नर्थेऽम्भ्रणीसूक्तवर्गद्वयं, "मयापि बाल्ये स्वपितुः प्रजा दृष्ट्वा बुभुक्षिताः । दुःखादशक्ताः सम्प्राप्य श्रियमाराध्य वै वृताः ॥ तया संवर्धिताभ्यश्च प्रजाभ्यो भवदादयः । विलसन्तीशशक्राद्याः ससुहृन्मित्रबान्धवाः ॥ त्वया विना क्व देवत्वं क्वैश्वर्यं क्व परिग्रहः । सर्वे भवन्ति जीवन्तो

यातनास्विह संस्थिताः ॥ तामृते नैव धर्मोऽर्थः काममोक्षौ विदूरतः । क्षुधितानां दुर्भगानां कुतो योगसमाधयः ॥ सा च संसारसारैका सर्वलोकैकनायकी । यस्या कमला यस्य त्यक्त्वा त्वामपि शङ्कर ॥ अनौद्धत्येन शौचेन रूपेणाऽऽर्जवसम्पदा । सर्वातिशायिवीर्येण सम्पूर्णस्य महात्मनः ॥ कस्तेन समतामेति देवदेवेन विष्णुना । यस्यांशांशावतारेण विना सद्यो विलीयते ॥ जगदेतत्तथाप्याहुर्दोषानस्य विमोहिताः । नास्य जन्म जरा मृत्युर्नाप्राप्यं स्वार्थ एव वा ॥" (पद्मपुराणे)

इति वासुदेवसहस्रनाम्नि पार्वतीवचनरूपस्मृतिं च सूचयति । तत्राम्भृणीसूक्तस्य लक्ष्मीसूक्तत्वे निरुक्तमेव प्रमाणयन्तो यथाशक्ति सूक्तार्थं वदामः । 'अम्भृणीवागात्मानं तुष्टावे'ति निरुक्तात् अं परमात्मानं स्वहृदि स्वामिमन्यमानवेदप्रतिपाद्यत्वेन च बिभर्ति । 'वेदगर्भो विभुर्विष्णुः श्रीमांस्त्रैलोक्यभूषण' इति विष्णुनामसु पाठात् अं बिभर्ति नयति चेति विग्रहः । नयति वेदाध्येतृसज्जनमनस्सु चेति अम्भृणीशब्दवाच्या वाग्वेदाभिमानिनी लक्ष्मीरात्मानं तुष्टाव । 'अ इति ब्रह्मे'ति श्रुतेः । 'भृञ् भरणे, णीञ् प्रापणे' इति धातोश्च नापूर्वोऽयमर्थः । रूढ्या अम्भृणीशब्दवाच्यदेवतायाः क्वाप्यप्रसिद्धेः । उक्तयोगाश्रयणेन श्रीरेवात्र प्रतिपाद्या नतु सरस्वती । अम्भृणीशब्दविरोधात् । सरस्वत्यादेः ब्रह्मलयेऽपि विद्यमानवेदाभिमानित्वायोगात् । तं ब्रह्माणं कृणोमि । अस्य जगतः पितरं स्रष्टारं चतुर्मुखं, मूर्धन् मूर्ध्नि, सर्वलोकोपरिस्थितसत्यलोकपरिपालनाय । तादर्थ्ये सप्तमी । सुवे=योनिद्वारा सृजामि अप्स्वन्तः=समुद्रोदकमध्ये । मम योनिः=भरणादौ हेतुभूतो भर्ता नारायणस्तिष्ठति इत्यादिवक्ष्यमाणसूक्तस्थबह्वर्थानां लक्ष्म्या अन्यत्रायोगाच्च ।

अहं रुद्रेभिः=एकादशरुद्रैः वेदोक्तसकलरुद्रपरिग्रहाय छान्दसः प्रयोगः । वसुभिः=अष्टवसुभिः सहचरामीत्येकान्वयः । अत्र बहुमूर्तेस्स्वस्याः प्रत्येकं मूर्तावपि सहसञ्चारसूचनाय द्विरहं पदप्रयोगः । आदित्यैर्विश्वेदेवैश्च सह चरामि । मम सञ्चारसमये एते सर्वे ममानुचरा इति भावः । मित्रावरुणा=मित्रावरुणौ उभा=उभाविन्द्राग्नी उभा=उभौ अश्विना=अश्विनौ च बिभर्मि ॥ १ ॥ आहनसं=आ समन्तात् हन्यत इति आहनाः आ समन्ताद्धन्यमानसोमलताभिमानिनमि-

Rarest Archiver

त्यर्थः । सोमं=चन्द्रं त्वष्टारं=विश्वकर्माणं त्वष्टृनामकसूर्यं वा पूषणमुत=पूषणं च भगं भगनामकं च एतावपि सूर्यौ । विष्टिगृहीतानां पूर्वऋच्युक्तरुद्रादीनां न मया सह संचरणम् । किंतु धनदानादिना पोषितानामेवेति सूचनाय, बिभर्मीत्युत्तरर्च्यपि प्रागादित्यशब्दोक्तपूषादीनामेव सर्वोपलक्षकतया पुनर्वचनम् । अतैवोक्तेन्द्रादीनां च पाल्यत्वादेव लक्ष्म्यनुचरत्वं ज्ञेयम् । भरणं च नाधाराधेयभावेन, किंतु द्रव्यदानेन चेत्याह अहमिति । सुप्राव्ये=सुष्ठु प्रकर्षेण राजादिभ्योऽप्यतिशयेनावरपि स्थित्वेत्यर्थः अव्ये=रक्षणयोग्ये इति लोकत्रयसंग्राहकम् । प्रमामनुपमृद्यैव ददामीति सूचनाय लोक इत्यनुक्त्वा अव्य इत्युक्तम् । सुन्वते=सोमसवनं कुर्वते हविष्मते= यज्ञयोग्यबहुधनवते यजमानाय=ब्रह्मेन्द्रादिरूपयजमानाय द्रविणं दधामि "तृतीयोऽतिशय" इति महाव्याकरणवचनादतिशयेन ददामि । दत्तं च 'डुधाञ् धारणपोषणयो' रिति धातोः, दधामि धारयामि चोरादिभय निवार्य रक्षामि वृद्ध्यादिना पोषयामि च ॥ २ ॥ राष्ट्रादेव द्रव्यसम्पत्तिः किं त्वयेत्याशङ्कां वारयितुमाह अहं राष्ट्रीति । अहं राष्ट्री=भूरूपेण राष्ट्राभिमानिनी वसूनां=धनधान्यरत्नादीनां संगमनी=सम्यक्प्रापयन्ती यज्ञियानां वसूनां प्रथमा=आदिभूता चिकितुषी=कर्त्री पुण्यहेतुत्वात् यज्ञयोग्यवसूनामितरद्रव्येभ्योऽप्यादित एव कर्त्रीत्यर्थः । धनादिदानं च न त्रिविधजीवानामेकप्रकारेण किन्तु तत्तद्योग्यतामर्यादयेत्याह तामिति । साऽहं पुरुत्रा=पुरूणि ब्रह्मादिजगन्ति पालयन्ती, तां मा=मां, देवा भूरिस्थात्रां=भूरीणि द्रव्याणि स्थात्रीं स्थापयन्तीं, स्थिरीकुर्वाणां भूरि=बहुविधद्रव्यं आ=तेषां तेषां योग्यतामर्यादया वेशयन्तीं=तत्तद्गृहे प्रवेशयन्तीम् उत्तमानां गृहे चिरकालस्थायि, अधमानामल्पकालस्थायि, मिश्राणामुभयविधं च वेशयन्तीमित्यर्थः व्यदधुः=कृतवन्तः । "ऋते भवत्पादपरायणं न मां विदन्त्यहं त्वद्धृदया यतोऽजित" (भा. ५. १८-२२) इति भागवतोक्तस्वाभिप्राय स्फोरयितुं आ इत्युपसर्गः ॥ ३ ॥ अत एव यो विरुद्धतया पश्यति मदुक्ततत्त्वाद्वैपरीत्येन पश्यति, यः प्राणिति=जीवनमात्रं कृत्वा तिष्ठति यः ईं=इत्थं उक्तं=मदुक्तं सकलं तत्त्वं शृणोति=शिष्यत्वेन शृणोति वाक्यखण्डत्रयस्य जीवत्रयपरत्वसूचनाय त्रिशोऽपि यच्छब्दग्रहणम् । स सर्वोऽपि मया अन्नमत्ति अयोग्यदत्तान्नस्य बहुकालासम्बन्धसूचनाय विसन्धीकरणम् ।

तस्यैवावादानुवादत्वात्तदेव स्पष्टयति मां अमन्तवः=अवमन्तारः, मां भगवदैश्वर्ये चाव-
मन्तारो ये ते उप=समीपे क्षियन्ति=क्षयं प्राप्नुवन्ति अहं श्रद्धिवं=श्रद्धावद्भिः प्राप्यं
वचनं 'वा गतिगन्धनयो'रिति धातोः ते=तव, वदामि । तन् त्वं श्रुधि=शृणु
तटस्था अपि शृणुत ॥ ४ ॥ देवेभिः=देवैः मानुषेभिः=उत्तममानुषैश्च जुष्टं=
इदं वचनं अहमेव स्वयं वदामि, नतु गीतापाठवदन्यवचनानुवादरूपमिदं येन
वक्ष्यमाणमहिमा मम न सिद्ध्येदिति भावः । यं यमुग्रं रुद्रपदयोग्यं जीवम् उग्रं=
रुद्रं, कर्तुं कामये तं तमिति वीप्साबलात्तु यं यमिति लभ्यते कृणोमीति विधायक
पदमहिम्ना कर्तुमिति लभ्यते । कामनाकरणयोरेकविषयत्वादुग्रमित्यपि लभ्यते ।
तं तमुग्रं रुद्रं कृणोमि । 'उग्रः कपर्दी श्रीकण्ठ' इत्यभिधानात् । यं यं ब्रह्माणं
ऋषिं सुमेधसं च कर्तुं कामये, तं तं ब्रह्माणमृषिं सुमेधसं च कृणोमीति योजना
द्रष्टव्या । अतिसमर्थरुद्रब्रह्मादीनामप्युत्पादने स्थापने चाहमेव समर्थेति किमो
भावः । स्वभर्तृसमतया प्रसिद्धरुद्रब्रह्मादीनां स्वतोऽप्यधःकरणात् स्वभर्तृभक्तैरत्या-
दरणीयमिदमिति सूचनाय प्रागस्य प्रशंसा । अत एव न तुच्छार्थस्य प्रवेशः । रुद्रादि-
सकलसुरसेव्यत्वप्रतिपादकपूर्ववाक्यान्यप्रस्तूयातिप्रशंसापूर्वकमुक्तेऽस्मिन्वाक्ये ततो-
ऽप्यतिशयितार्थस्यैव वक्तव्यतया उग्रो रुद्र एव, ब्रह्मा चतुर्मुख एव, ऋषिः सर्वज्ञः
सुमेधाः अपरोक्षज्ञानी परममुक्तो वा । अत एव सुमेधामिति शोभनमेधात्वोक्तिः ।
एवं च हरीतरसकलजगत्प्रवर्तकतयोक्तायाः स्वस्याः वक्ष्यमाणयोनिरपि हर्यात्म्य-
परदेवतैव ॥ ५ ॥ अहं प्रलयकाले ब्रह्मद्विषे=ब्रह्मणः पञ्चमशिरच्छेत्रे, 'शृ हिं-
साया'मिति धातोः शरवे=जगत्संहर्त्रे । रुद्राय हन्तवे=हन्तुमेव । तुमर्थे 'से सेन-
से ऽसेन्क्से कसेनध्यै ऽध्यैन्कध्यै कध्यैन् शध्यै शध्यैन् तवै तवेङ् तवेन' इत्यनेन सूत्रेण
तुमर्थे तवेन् प्रत्ययः । स्वकृतरुद्रहननानन्तरं कल्पान्तरे शेषपदप्राप्तावपि रुद्रपदस्य
सर्वथा त्यागाद्धन्तुमेवेत्युक्तम् । महारुद्रस्यैव परिग्रहाय ब्रह्मद्विषे शरवे इति विशे-
षणद्वयमुक्तम् । अतः प्रागुक्तरुद्रो महारुद्र एवेति ज्ञातव्यम् । ब्रह्मवधाज्जगद्धपाप्य
मत्पत्युर्नारायणस्यैवालेपो न रुद्रस्येति सूचनाय विशेषणद्वयम् । एवं च महतां
द्रोहिणो हिंसा सर्वथा कार्येति सूचनाय वा हन्तुमेवेत्युक्तम् । धनुः आत-
नोमि=आकर्णमाकर्षयामि, अहं जनाय समदं=सन्तोषेण सहितं कैवल्यमपि

Rarest Archiver

कृणोमि, द्यावापृथिवी = द्यावापृथिव्यौ, आ = सम्यक्, विवेश = अभिमानितया प्रविष्टाऽस्मि ॥ ६ ॥ अस्य पितरं = ब्रह्माणं, मूर्धन् = मूर्ध्नि अस्य जगतो मूर्ध्नि सत्यलोके, जगतो मूर्ध्नि धर्तुं योग्यं सर्वाग्रेसरमिति वाऽर्थः । अहं सुवे । समुद्रे अन्तः अप्सु मध्ये मम योनिरस्ति । स्वपतेर्वामतः उक्तसमस्तमहिमवत्या अपि मम सकलचेष्टाकारणभूतः कश्चन पुरुषोत्तमोऽस्ति । अहमेव निरवधिकसर्वोत्तमा न भवामीत्यर्थः । अभिमान्यभिमन्यमानयोः समुद्रजलयोरुभयोरप्याधारत्वोक्त्या सर्वान्तर्यामी हरिरेव योनिरिति श्रियो हृदयम् । प्राग्वरुणस्य स्वपोष्यत्वोक्त्या च न तस्यात्र प्रवेशः । प्रलये स्वपतिना सह स्थितायाः स्वस्याः उत्पत्तेरेवासम्भवाच्च नान्यो योनिः । उतास्यामृचि वक्ष्यमाणसर्वाधारत्वादेरन्यत्रासम्भवाच्च साक्षात्स्वस्या अपि नियामको हरिरेव योनिः । हरेरेव स्वोक्तश्रुत्युक्तयोनित्वे हेत्वन्तरं चाह तत इति । विश्वा = विश्वानि मदादीनि, भुवना = भुवनानि, ततः = मम योनिभूतान्नारायणात् वितिष्ठे = विशेषेण तिष्ठे तस्थे तस्थिर इत्यर्थः । विशेषेण धृतान्यासन्निति यावत् । करतलनिमिलितामलकवल्लीलया धृतमिति सूचनार्थैकवचनान्तक्रियापदप्रयोगः । स्वातन्त्र्येण धारणं तस्यैवेति सूचनाय व्युपसर्गः । अनु इत्यनेन स्वोक्तार्थस्य "एको दाधारे"ति श्रुत्यनुसारितां सूचयति । ननु त्वयापि सकलधारणं क्रियते खल्वित्यत आह, अहं च अमूं पृथिवीं, द्यामुत = द्यां च वर्ष्मणा = देहेन उप = समीपे, स्पृशामि = भगवतैव धृते जगति निमित्तमात्रतया अहमपि स्पृष्ट्वा तिष्ठामि । धारकस्तु स एव । पूर्वोक्तः सर्वोऽपि मे महिमा स्वातन्त्र्येण मदन्तर्यामिणस्तस्यैवेति भावः ॥ ७ ॥ तत्कृपया मयि 'अन्नं हि प्राण' इति श्रुतेरन्नवस्त्रहिरण्यादिपदवाच्यायाः स्वस्याः प्राणाद्याधारत्वस्य स्पष्टमुक्तत्वात्प्राणपदप्रयोगादेव प्राणिनां प्राणाधीनत्वस्यैव सूचितत्वान्मम पुत्रस्य मुख्यप्राणस्यायं महिमा नान्यस्येत्याह । विश्वा भुवनानि कर्तुं धर्तुं हर्तुं चारभमाणा अहमेव वात इव मुख्यप्राण इव प्रवामि भगवद्दत्तयशसा जगत्प्रकर्षेण सुरभीकरोमि । 'वा गतिगन्धनयो'रिति धातुः । विष्णोः ब्रह्माद्युत्तमलक्ष्मीतत्वादप्युत्तमत्वेन निरवधिकसर्वोत्तमत्वम् । लक्ष्म्यादीनां चाल्पमहिमत्वेन तद्भृत्यतां च स्फोरयन्ती उपसंहरति पर इति । एना = अस्याः पृथिव्याः पृथिव्यभिमानिभूरूपादित्यर्थः । दिवा = दिवः द्युलोकाभिमानि-

Rarest Archiver

श्रीरूपादित्यर्थः । 'सुपां सुपो भवन्ती'ति वचनात्तृतीया पञ्चम्यर्थे । [illegible] लक्ष्मीरूपपत्न्याः सर्वोत्तमत्वे पतिः सर्वोत्तम इति भगवदुत्तमत्वज्ञापने [illegible] "ततो बितिष्ठ" इत्यादिना उपदेष्टृतया च करणत्वमपि ज्ञापयितुं तृतीया । स परमात्मा परः = उत्तमः । अहं तु महिना = महिम्ना एतावती बभूव = इयत्तापरिमाणवती बभूव । मदादयः सर्वेऽपि परिच्छिन्नज्ञानसुखादिगुणवन्तः भगवांस्तु निरवधिक-सकलगुणपरिपूर्ण इति वर्गद्वयाभिप्रायः । स्मृतेरर्थस्तु स्पष्ट एव ।

कृष्णस्य सर्वोत्तमत्वे लक्ष्मीमपि साक्षित्वेन प्रमाणयन्तीत्याहुः । सा इन्दिरा इद जगत् ते = तव सकाशात्, अनु = अनन्तरं नीचमित्यर्थः मनुते = जानाति । इदं च "त्वं न्यस्तदण्डमुनिभिर्गदितानुभाव आत्माऽस्मदश्च जगतामिति मे वृतोऽसि । हित्वा भवद्भ्रुवदुदीरितकालगन्धध्वस्ताशिषोऽब्जभवनाकपतीन्कुतोऽन्यान् (भा. द. ७५-४३) नूनं तपो यत्र न मन्युनिग्रहो ज्ञानं क्वचित्तच्च न सङ्गवर्जितम् । कश्चिन्महांस्तस्य न कामनिर्जयः स ईश्वरः किं परतोव्यपाश्रयः (भा. स्कं ८ अध्या८ श्लो.१९)धर्मः क्वचित्तत्र न भूतसौहृदं त्यागः क्वचित्तच्च न मुक्तिकारणम् । वीर्यं न पुंसोऽस्त्यजवेगनिष्कृतं न हि द्वितीयो गुणसङ्गवर्जितः ॥ २० ॥ क्वचि-च्चिरायुर्न हि शीलमङ्गलं क्वचित्तदप्यस्ति न वेद्यमायुषः । यतोऽभयं कुत्र च सोऽ-प्यमङ्गलः सुमङ्गलः कश्चन कांक्षते हि मां ॥ २१ ॥ एवं विमृश्याव्यभिचारिसद्गुणं पदं निजैकाश्रयिसद्गुणाश्रयम् । वव्रे वरं सर्वगुणैरपेक्षितं रमा मुकुन्दं निरपेक्ष-मीप्सितम् ॥ २२ ॥" इति भागवतवचनादुक्तसूक्ताच्चावगम्यते । जगतामात्मदः = आत्मानं त्रिविधजगत्स्वभावं अन्ते ददातीति तथोक्तः । अत एव "तनुभृत्स्वभाव सम्भूतय" इत्याहुः । आत्मा = परमात्मा 'स्वभावे परमात्मनि' इति वचनात् । त्वं भवतः = त्वत्तः, भवत् = जायमानं, उदीरितं = उदीरणं यस्य स तथोक्तः । तस्य कालस्य गन्धेन परनामनिमेषकाख्यलेशेन ध्वस्ता आशिषः अखिलैहिकसम्पदो येषां तान् अब्जो ब्रह्मा 'अद्भ्यः सम्भूतो हिरण्यगर्भ' इति वचनात्, भवः = शिवः नाक-पतिः = इन्द्रः बहुवचनबलादेवमेवार्थो वक्तव्यः । हित्वा मे मया वृतोऽसि । अन्यान्हित्वा वृतोऽसीति । कुतः किं वक्तव्यमिति पूर्वश्लोकार्थः । अनेन स्वस्याः स्वैश्वर्यस्य भगवतो भगवदैश्वर्यस्य च महाप्रलयेऽपि नाशाभावं सूचयति ।

Rarest Archiver

यत्र तपनं, यत्र दहनं, वसिष्ठविश्वामित्रादौ। तप सन्तापे, तप आलोचने, इति धात्वौरौष्ण्यरूपध्यानरूपं तपो नूनमस्ति मन्युनिग्रहो न। प्रलयकाले दहनतपनयोर्जगद्दाहकत्ववत् ऋषीणां शापादिदानेन च मन्युफलदर्शनादिति भावः। कश्चिद्=बृहस्पतिशुक्रादौ ज्ञानं=विद्याऽस्ति तज्ज्ञानं सङ्गेन=घनासक्त्या वर्जितं न। देवदानवपौरोहित्याश्रयणात्। कश्चित्=ब्रह्मा महान्=सकलजीवेभ्यः श्रेष्ठः। तस्य कामनिर्बन्धो न "वाचं दुहितरं तन्वीं स्वयम्भूर्हरतीं मनः। अकामां चकमे क्षत्तः सकाम इति नः श्रुतम्"॥ (भा. तृ. १२–२८) इति भागवते अविहितस्वदुहितृकामदर्शनादिति भावः। व्यपगतोऽन्य आश्रयो यस्य सोऽयं व्यपाश्रयः। "रुद्रं समाश्रिता देवा रुद्रो ब्रह्माणमाश्रितः। ब्रह्मा मामाश्रितो नित्यं नाहं कञ्चिदुपाश्रितः" इति वचनात् इन्द्राद्याश्रयरुद्रादिवत् अयं आश्रय एव स्वयं पुनराश्रयान्तरसापेक्षो न भवतीति यावत्। परतः=परमपुरुषात् एतादृशो व्यपाश्रयो यस्य रुद्रस्य स परतो व्यपाश्रयः। स्वतन्त्रनारायणमाश्रित्य तद्बलेनैव स्ववैरिणं भस्मासुरं नाशयन् स्वात्मानं रक्षश्चेति यावत्। स रुद्र ईश्वरः किमु=ईश्वरशब्दवाच्यसर्वेश्वरत्ववान् किमु, नैव। भगवन्नामधारकतयैवायमीश्वरो नतु भगवानिव परममुख्यया वृत्त्या तच्छब्दवाच्य इति भावः। "मुमुचुः पुष्पवर्षाणि हते पापे वृकासुरे। देवर्षिपितृगन्धर्वा मोचितः सङ्कटाच्छिवः ॥ ३८ ॥ य एवमव्याकृतशक्त्युदन्वतः परस्य साक्षात्परमात्मनो हरेः। गिरीशमोक्षं कथयेच्छृणोति वा विमुच्यते संसृतिभिस्तथाऽरिभिः" ॥ ४१ ॥ (भा. द. ९.२) इति भागवतवचनात्सिद्धोऽयमर्थः। कश्चित्=यमेऽपि धर्मोऽस्ति, धर्मराजत्वात्। भूतसौहृदं न। कश्चित्=मनुबल्यादौ त्यागः=स्वाधिकारसमाप्तौ मनूनामीश्वरभयादैश्वर्यत्यागः। बलेश्च वामनभयादन्यायार्जितत्रैलोक्यत्यागः। अत एव न मुक्तिकारणम्। अजः=कालः तस्य वेगेन निष्कृतं=अपरिहृतं, वीर्यं=सामर्थ्यं पुंसः=पुंमात्रस्य न। द्वितीयः=भगवतोऽन्यः, गुणसङ्गवर्जितः=गुणत्रयनिमित्तककामक्रोधलोभमोहादिदोषसङ्गवर्जितो नहि। इमौ दोषौ सकलचेतनसाधारणौ। कश्चित्=जगन्मारकमृत्युदेवे चिरायुरस्ति कल्पावसानपर्यन्तं सर्वमारकत्वेनावशेषितत्वात्। शीलमङ्गलं=परोपकार दयालुत्वादिशीलं, दम्पत्योर्वैधव्यवैधुर्याद्यमङ्गलहेतुत्वान्मङ्गलं च नहि। कश्चित्=कामादौ तच्छीलं मङ्गलमस्ति पुत्रपौत्रादि-

वृद्धिहेतुत्वात् । आयुषः वेद्यं जातकादिना वेदनयोग्यं स्वरूपं न । इतरदेवेषु जीव-
त्स्वेवास्य शिवेन भस्मीकृतत्वात् । यतः=यत्र कुत्रचिच्चन्द्रादौ अभयं=सर्वभयापि-
हरणमस्ति, आह्लादहेतुत्वात् । सोऽप्यमङ्गलः=स्वोक्तबृहस्पतिदारधर्षणात्मकामङ्गल-
कश्चन=इन्द्रः सुमङ्गलो भवति । शतक्रतुत्वेन विधूतसकलपापत्वात् "इन्द्रो वृत्रं
हत्वा महानभवत्" इति हि श्रुतिः । सोऽपि मां कांक्षते, ऐश्वर्याभिवृद्धयर्थम् । ब्रह्मा-
दीनां सर्वेषां स्वसन्तानत्वात्, विष्णुभक्तत्वाच्च तेषु वात्सल्यवती तत्तद्दोषोद्घाटनतया
विशिष्य न तन्नाम जग्राह इति ज्ञातव्यम् । एवमुक्तप्रकारेण रमा सर्वान्देवान्विमृश्य
एकैकगुणवत्त्वेऽपि गुणान्तररहितान् इतरसाधारणगुणवतश्च विचार्य अव्यभिचारि-
सद्गुणं प्रमेयत्वस्येव विवक्षितस्थलादन्यत्रापि वृत्तिरेको व्यभिचारः । ज्ञानवत्त्वं
नित्यत्वं विनेव गुणान्तरं विहाय गुणान्तरस्याप्यवस्थितिरपरो व्यभिचारः ।
तदुभयव्यभिचाररहिता इतरसाधारण्येनावर्तमानाः सकलशुभगुणैः सहैव वर्तमानाश्च
सद्गुणा यस्य तं, अव्यभिचारिसद्गुणम् । एवमुक्तप्रकारेण भगवद्व्यतिरिक्तं क्वापि लोके
क्वाप्यविद्यमानं विमृश्य निजैकाश्रयिसद्गुणाश्रयं निजैकाश्रयिणः=इतरसाधारण्यं
विना केवलं स्वस्मिन्नेव विद्यमानाः सद्गुणाः सर्वेश्वरत्वसर्वकर्तृत्वस्वतन्त्रत्वानिरवधि-
कसर्वज्ञत्वपूर्वा गुणाः तेषामाश्रयम् । ते च एकेनापि शुभगुणेन व्यभिचारवन्तो न
किन्तु सर्वगुणैरपेक्षितम् । भगवद्गुणानां चेतनत्वात् भगवानेवास्माकमाश्रयो
भवेत्, न त्वन्य इत्यपेक्षितम् । पदं=पद्यत इतिव्युत्पत्त्या उक्तद्विविधगुणवत्त्वात्
वेदप्रतिपाद्यं मुकुन्दमेव अव्यभिचारिसद्गुणं=उक्तव्यभिचारद्वयरहितसद्गुणवन्तं
विमृश्य=निश्चित्य, निरपेक्षं=स्वस्मिन्नप्यपेक्षारहितं ईप्सितं=सर्वैरप्यपेक्षितं तमेव
वरं वव्रे इति योजना । तत्र "त्वं न्यस्तदण्डमुनिभि"रित्येकं पद्यं भगवत्स्वयंवरकाले
रुक्मिणीवाक्यम् । "नूनं तप" इत्यादिपद्यानि स्वयंवरस्थलक्ष्मीवाक्यानि । तत्र पूर्वं
स्वनाशस्वैश्वर्यनाशाख्यदोषद्वयेन स्वनीचत्वस्य रुक्मिणीरूपश्रियैव कथनात् ।
उत्तरपद्येषु तु ब्रह्मादिसकलदेवानामपि विविच्य कामक्रोधादिदोषग्रस्तत्वेन भगवत्प्र-
काशात्, नीचत्वस्य मूलरूपश्रियैव कथनाच्च "यद्धि मनसा ध्यायति तद्वाचा वदती"
ति प्रमितत्वात् सा इदं जगत् ते अनुमनुत इति गोपीभिरुक्तं युक्तमिति सिद्धम् ॥

इति श्रीमद्भाविसमीरश्रीवादिराजपूज्यचरणविरचितः प्रथमोपन्यासस्समाप्तः ॥

Rarest Archiver

॥ श्रीः ॥

॥ श्रीहयवदनाय नमः ॥

॥ श्रीमद्वादिसमीरवादिराजगुरुभ्यो नमः ॥

उपन्यासरत्नमाला ।

फलोपन्यासः ।

करणपालनशील नते स्थितिं जलजनाभवदन्तिकमाश्रिताः ।
विदुरमी वरदामधरोदरप्रियजुषो यजुषोऽग्निबलानिव ॥ (रु.वि.१७-१२)

इति रुक्मिणीशविजयस्थं पद्यम् । अनेन हि पद्येन त्रिविधजीवानां स्वभावत्रयं तदुचितफलत्रयं चोक्तम् । तथाहि । करणपालनशील=सृष्टिरक्षण स्वभाव, हे जलजनाभ=कृष्ण! वरदामधरोदरप्रियजुषः=प्राक्मात्रा वरेण दाम्ना बद्धोदरस्य तव प्रियजुषः प्रियमेव कुर्वाणाः, जलाः=जडाः, जनाः=मूर्खजनाः दुर्जना येभ्यस्ते जडीकृतदुर्जना इत्यर्थः । अमी=द्वारकास्थिताः परमवैष्णवाः नते=नम्रे रमाब्रह्मादिचेतनजने अधिकरणे, स्थितिं=नियामकतयाऽवस्थानं ष्ठा गतिनिवृत्ता-विति धातोराधाराधेयभावेन हृद्यवस्थानं मुक्तावपि न निवर्तत इति सूचयितुं "वितन्वताऽजस्य सतीं स्थितिं हृदि" इति स्पष्टभागवतवाक्यमुक्तार्थे प्रमाणीकर्तुं च स्थितिमित्युक्तम् । वदन्ति=स्वशिष्यान्प्रत्युपदिशन्ति, विदुश्च=मुक्तौ संसारे च रमाब्रह्मादिसर्वचेतनानां भगवान् नियामकतया सर्वदा सर्वोत्तम एवाधाराधेयतया तेषां हृदि स्थित एव नतु कदाप्येतैरेकीभूतश्चेति जानन्ति उपदिशन्ति च । कथमिव, यजुषः=यजुर्वेदात् अग्निबलानिव=यज्ञानिवं यजुर्वेदस्य यज्ञतन्त्रत्वा-दिति सज्जीवानां स्वभावः कथितः । भवतः=वैकुण्ठादिलोकत्रयस्थितस्य तव अन्तिकं समीपं, आश्रिताः=सम्यक् श्रिताः सायुज्यं च सूचयितुमाङ्ग्युप सर्गः । अस्तिभवत्योस्सर्वत्रान्वयात् भविष्यन्तीति तेषां फलं चोक्तमित्येकां योजना ॥ १ ॥

भवः=शिवः, दन्ती=विनायकः, को=ब्रह्मा सूर्यश्च, मा=शक्तिरूपा लक्ष्मीः भवदन्तिकमाः, ता एव आ सम्यक् परदेवतात्वेन श्रिताः शैव-गाणपत्य

Rarest Archiver

ब्राह्म सौर-शाक्तादिदुर्मतावलम्बिनः त ऐहिकसम्पदा अधरोदरप्रियजुषः=उदराद-धरस्य शिश्नस्य उदरस्य च प्रियं कुर्वाणाः, जलजनाः=मूर्खजनाः मिथ्याज्ञानिनः, अयजुषः=यजुर्वेदरहिताः, अग्निबलानिव=यज्ञानिव ते=तव, वरदां स्थितिं=सर्वोत्तमत्वं, न विदुरित्यधमजीवस्वभावो दर्शितः। भवन्=सर्वदा वर्तमानः अन्तो=नाशः शस्त्राघातपातेन हिंसेत्यर्थः। सोऽस्य वर्तत इति भवदन्ति, तच्च तत्कं=शिरश्च भवदन्तिकं जात्येकवचनं, अन्धे तमसि पाते सति नानाशस्त्राघातैस्सदा ताड्यमानानि स्वस्वरूपभूतशिरांसीत्यर्थः। आ सम्यक् आ अनन्तकालपर्यन्तंच श्रिता भविष्यन्तीत्यधमजीवानां फलं चोक्तमिति द्वितीया योजना ॥ २ ॥

अधरोदरप्रियजुषः=शिश्नोदरपरायणाः, जलजनाः=कदाचिज्जला मिथ्याज्ञानिनः कदाचिज्जानन्तीति जनाः तत्वज्ञानिनश्च सन्तः कदाचिद्वैष्णवसमागमे सति भवतोऽन्तिकमाश्रितास्त्वामेव सेवमाना इति यावत्। कदाचिन्मिथ्याज्ञानिनां समागमे शैवसमागमे भवं=गाणपत्यसमागमे दन्तिनं=ब्राह्मसौरसमागमे कं=शाक्तसमागमे मां चाऽऽश्रिता इति कृत्वा ते वरदां स्थितिं=अवस्थां यजुषोऽग्निबलानिव विदुः कदाचिज्जानन्ति अ *यजुषोऽग्निबलानिव विदुः कदाचिन्न जानन्तीत्यर्थः। ज्ञानस्यैव कादाचित्कत्वात् विषयभोग एव तेषां भूयानिति ज्ञापनायाधरोदरप्रियजुष इति प्राग्विशेषणमुक्तम्। अनेन मध्यमजीवानां स्वभावो वर्णितः। उदरप्रियं सुखं तस्मादधरमधमं दुःखं, "सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुख"मिति वचनात् सुखादधस्ताद्विद्यमानं जुषन्त इति ते तथोक्ताः। ज्ञानानुसारेण लिङ्गभङ्गे जातेऽपि स्वस्वरूपभूतसुखदुःखे क्रमेण भुञ्जाना इत्यर्थः। एतदेव स्वस्वरूपसुखं भवदन्तिकमाश्रिता इति। भवन्=जायमानः अन्तो=ऽवसानमस्तीति भवदन्ति तच्च तत्कं सुखं—भवदन्तिकं स्वानुभवसमये व्यक्त्यात्मना स्थितं दुःखानुभवसमये ईशेच्छया शक्त्यात्मना स्थितं चेत्यर्थः। आ समन्तात् सर्वत्रेत्यर्थः। "त्रिदिवनिरयभूलोकपरानि"त्युक्तेः। लिङ्गभङ्गानन्तरमपि स्वर्गस्थितावनित्यकेवलसुखानुभवि-

---

*इदं भिन्नं पदं नञर्थकं विदुरित्यनेन सम्बध्यते। अतो न जानन्तीति मूलस्थ एवायमर्थः। तत्र विदुः अ विदुरित्यनयोरर्थयोर्विरोधपरिहाराय कदाचिदिति पूरितं ग्रन्थकारेणेति सहृदयैराकलनीयम् ॥

Rarest Archiver

तृस्वर्गिवत् स्वरूपभूतसुखमेवानुभवन्तो नरकस्थितिदशायामनित्यदुःखमात्रानुभवितृ-नारकिवत् स्वरूपभूतदुःखमेवाश्नन्तो भूस्थितिदशायामनित्यसुखदुःखभोक्तृभूस्थमनुष्यादिवत् कदाचित्स्वरूपसुखं कदाचित्स्वरूपदुःखं चानुभवन्त इति मध्यमजीवानां फलं स्थानं चोक्तं भवतीति तृतीया योजना ॥ ३ ॥

समुदायाभिप्रायस्तु केवलं सर्वोत्तमविष्णुभक्तास्स्वरूपभूतनित्यसुखमात्रानुभविन ऊर्ध्वलोकस्थाश्चेति त्रेधाऽप्युत्तमजीवा उत्तमाः । अधमजीवास्तु विष्णोरधमजीवानुवर्तिनः स्वरूपभूतदुःखमात्रानुभविनः सर्वतोऽप्यवाचीने तमस्येव स्थिता इति त्रेधाप्यधमजीवा अधमाः । मध्यमजीवास्तु कदाचित्सर्वोत्तमं विष्णुं कदाचित्ततोऽधमान् रमादींश्च परदेवतात्वेन सेवमानाः स्वरूपभूतसुखदुःखाख्यमध्यमफलानुभविनःस्वर्गनरकभूलोकाख्यमध्यमस्थानस्थिताश्चेति त्रेधापि मध्यमजीवा मध्यमा इति विवेचनीयम् । नच वाच्यं पदचमत्कारलब्धोऽप्ययं त्रिविधोऽर्थः प्रमाणाभावात्कथमादरणीय इति । यौक्तिकेन युक्तिसिद्धेऽर्थे पृथक्प्रमाणानपेक्षणात् । तथाहि—अस्ति तावन्मुक्ताश्चेतनाः नित्यसुखमात्रानुभवरूपा इति परस्यापि मतम् । चेतनस्वरूपभूतनित्यसुखानुभवात्मिका मुक्तिश्च 'विद्यैव तु निर्धारणा'दिति ब्रह्मसूत्रेण यथेच्छसम्भवदन्वयमेवकारं पुरस्कृत्याऽऽगतां 'कर्मणैव हि संसिद्धिमास्थिता जनकादय' इति स्मृतिमपेक्ष्य स्वोक्तविद्याख्यसाधनं निर्धारयतस्सूत्रकृतोऽभिप्रेतया अयोगव्यवच्छेदान्ययोगव्यवच्छेदात्यन्तायोगव्यवच्छेदाख्यार्थत्रयसाधारणमेवकारं विहाय 'नान्यः पन्था अयनाय विद्यत' इति साक्षात्तदर्थभूतस्यापेक्षितान्ययोगव्यवच्छेदमेव स्पष्टं स्वीकृतवत्या अत एव निरवकाशया "तमेवं विद्वानि"ति श्रुत्या च तं='श्रीश्च ते लक्ष्मीश्च पत्न्या'विति सूक्तान्ते स्पष्टदृष्टलिङ्ग पुरुषनामक नारायणं एवं='उतामृतत्वस्येशानः' । 'अतो ज्यायांश्च पूरुषः'–इत्यादिनाऽस्मिन्नेव सूक्ते स्पष्टमुक्तसर्वोत्तमत्वादिप्रकारेण विद्वानमृतो भवतीति विष्णुसर्वोत्तमत्वज्ञानाख्यतत्वज्ञानसाध्येत्यपि सिद्धम् । एवं च सर्वतोऽप्यूर्ध्वगतिरूपमुक्तेस्साक्षाद्विरुद्धे सर्वतोऽप्यधोगतिरूपेऽन्धेतमसि पतिता जीवाः मुक्तिविरुद्धनित्यदुःखमात्रानुभवात्मकाः बलाद्वक्तव्याः । सा च तेषां गतिः मुक्तिसाधनत्वेनोक्तविष्णुसर्वोत्तमत्वज्ञानरूपतत्वज्ञानात् विपरीतशिवसर्वोत्तमत्वज्ञानादिरूपमिथ्याज्ञानसाध्या च तद्वदेव बला-

Rarest Archives

द्वाच्या । नच तादृशी गतिरेव नास्तीति वाच्यम् । 'ऊर्ध्वं गच्छन्ति सत्वस्था मध्ये तिष्ठन्ति राजसाः । जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः' इति गीतायां—सत्वस्था इत्यादित्रिविधजीवस्वभावानां च स्पष्टमुक्तेः । नच तामसानामेव कदाचित्सात्त्विकत्वसंभवादनियतेयं गतिरिति वाच्यं । "त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा । सात्त्विकी राजसी चैव तामसी चेति तां शृणु" इति तत्रैव गतित्रयस्यापि भगवतैवोत्तममध्यमाधमाख्यत्रिविधजीवस्वभावसंभूतत्वकथनेन कदाप्यन्यथाकर्तुमशक्यत्वात् । नहि स्वाभाविकस्यापि कदाचिदभावः सम्भवति । तथाच 'मध्ये तिष्ठन्ति राजसा' इत्युक्तमध्यमजीवाश्च मुक्तितमोयोग्योत्तमाधमजीववत् कदाचिदुत्तमत्वस्य कदाचिदधमत्वस्य च मध्यमत्वेन स्वरूपभूतसुखदुःखानुभवात्मकाः न्यायसाम्यादेवानिच्छतापि वाच्याः । अत एव सा गतिः कादाचित्कोत्कोभयविधसाधनसाध्या च सिद्धेति स्वोक्तार्थो यौक्तिक इति मन्यामहे ॥

सत्कर्मसाध्यायामत एव 'नास्त्यकृतः कृतेने'ति सन्मुक्तेः कर्मासाध्यनित्यपुरुषार्थमोक्षविलक्षणत्वेनानित्यायां स्वर्गाख्योर्ध्वगतावनित्यकेवलसुखेन सुखितावच्च द्विलक्षदुष्कर्मसाध्यायामत एवानित्यायां नरकाख्याधोगतावनित्यकेवलदुःखेन दुःखितावत्सत्कर्मदुष्कर्मसाध्यायामत एवानित्यायां भूम्याख्यमध्यमगतावनित्याभ्यां सुखदुःखाभ्यां सुखितादुःखितावच्च तत्वज्ञानसाध्यायामत एव नित्यायां 'सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिते'त्यादिश्रुत्या 'आद्यस्स्थिरचराणां यो वेदगर्भः सहर्षिभि'रित्यादिस्मृत्या च तत्वज्ञानिश्रेष्ठसुरादिप्राप्यत्वेनोक्तायां स्वर्गादप्यूर्ध्वगत्यां मुक्तावतोऽप्याधिक्यावश्यंभावेन नित्यादुःखनित्यसुखरूपतां कथं न युक्तिरुत्तेजयेत् । 'अन्धं तमः प्रविशन्ति येऽविद्यामुपासत इति श्रुत्या 'अविद्यां' विद्यापदोदिततत्वज्ञानविरुद्धविद्यां मिथ्याज्ञानमिति यावत् । उपासते= सेवंते तत्रैवादरं कुर्वन्तीत्यर्थः । तेऽन्धं तमः प्रविशन्तीति मिथ्याज्ञानसाध्यतया स्पष्टमुक्तायाम् अस्ति तावत्त्वन्मतेऽपि मते मिथ्याज्ञानं त्वदभिलषिततत्वज्ञानविरुद्धज्ञानस्य मिथ्याज्ञानत्वावश्यंभावात् । नच तन्निष्फलं भवितुमर्हति तत्वज्ञानस्य तत्त्वापातेनानिर्मोक्षप्रसङ्गात् सामग्रीवैयर्थ्यायोगाच्च । नापि नरकमात्रफलम् । तत्वज्ञानस्यापि स्वर्गमात्रफलत्वापातादिति युक्तया च मिथ्याज्ञानसाध्यत्वयोग्यायामत एव नित्यायाम्

'असुर्या नाम ते लोका अन्धेन तमसाऽऽवृता' इत्यादिश्रुत्या मिथ्याज्ञानिश्रेष्ठासुरादिप्राप्यत्वेनोक्तायामत एव नरकादप्यधमत्वयोग्यायां 'संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनादि'ति सूत्रे "एतेऽशुभकृतः संयमने प्रपतन्ति तत्र ह ये परद्विषो गुरुद्विषः श्रुतिद्विषस्तदवमन्तारः शठा मूर्खा इति ते वै ततोऽवरुह्य तमसि प्रपतन्ति नैवैत उत्तिष्ठन्तेऽपि कर्हिचिद्धृत्र वा एतदित्याहुरथ येऽन्ये ब्रह्मद्विषः स्तेनास्सुरापा इति ते वै तदनुभूयेमं लोकमनुव्रजन्ती"ति सूत्रसूचितश्रुतौ च स्पष्टं पुनः संयमिन्यामेव यातनाभोक्तृजीवेभ्य इतरेषां विस्तीर्णयातनानां जीवानां मध्ये केवलमिथ्याज्ञानात्परमनरकादधमत्वेनोक्तायां तमोरूपदुर्गतौ ततोऽप्याधिक्यावश्यंभावेन तत्र पतितानामसुर्या इति श्रौतपदसूचितासुरादीनां नित्यासुखनित्यदुःखरूपतां कथं न युक्तिरुत्तेजयेत् । इतरेषां केवलमिथ्याज्ञानितां चेत्यर्थः । उभयविधज्ञानसाध्यायामत एव नित्यायाम्—उत्तमाधमगत्योर्मध्यभागस्थितगीतोक्तमध्यमगतौ च स्थितानामुत्तमाधमजीवाभ्यां वैसादृश्याय कर्मसाध्यस्वर्गादिरूपजीवफलतो वैसादृश्याय च नित्यसुखदुःखस्वरूपतां कथं न युक्तिरुत्तेजयेत् । सदसन्मिश्ररूपकर्मणामवैचित्र्यर्थाय तत्फलत्रैविध्यस्याऽऽवश्यकत्वे सदसन्मिश्ररूपज्ञानानामपि त्रैविध्यं कुतो नापतेत् । न ह्युपेक्षाविषयत्वेन प्रसिद्धतृणादिकमपि पशूनामर्थे सृजन् भगवान् किमप्यफलं निर्मिमीते । अतस्तत्वविदग्रेसरो मध्वगुरुर्न युक्तिविधुरं कदाप्यवदत् । किंच, देवादयस्सज्जना नियमेन पुण्यशीला हर्येकपरायणाश्चेदानीं दृश्यन्ते । कदाचित् किञ्चित्तेष्वपि दृश्यमानमवश्यं स्फटिके लौहित्यमिव तदाविष्टासुरैरेव कृतमिति तत्पापपरम्परामूलमेव न स्वाभाविकम् । स्फटिकलौहित्यं स्फटिकावयवलौहित्यपरम्परामूलमतो न कुचोद्यावकाशः । दैत्यादयो दुर्जनाश्च नियमेन पापशीलास्शिवादिभजकाश्चेदानीं दृश्यन्ते । मनुष्याश्च प्रायः पुण्यपापाख्योभयस्वभावास्तत्र तत्र समने सति तां तां देवतामेव सेवमाना इदानीं कर्मणः सर्वोत्पत्तिमन्निमित्तकारणत्वात् पापेन पुण्याजननात् , पुण्येन पापाजननाच्च इदानीं पुण्यशीला इदानीं क्रियमाणस्वपुण्यजननाय पूर्वजन्मनि पुण्यशीलाः ततस्ततः पूर्वमप्येवमित्यनादौ काले च पुण्यकरणस्वभावत एव कथं न स्वभावत एवोत्तमाः । अनयैव दिशा अधमाः कथं न स्वभावत एवाधमाः। मध्यमाश्च कथं न स्वभावत एव मध्यमाः। मनुष्येष्वपि

Rarest Archiver

पुण्यैकरता हरिपरायणाः केचिदिदानीं दृश्यन्ते। तं उत्तमकोटौ प्रविशन्ति। पापैकरतास्तूक्तयुक्त्या घोरतमाधमकोटौ प्रविशन्ति। देवादिष्वेवाभिनिवेशवन्तश्च मध्यमकोटाविव्यपि विवेको द्रष्टव्यः। एवं च जीवत्रयस्योत्तमत्वादिविरुद्धत्रिविधस्वभावस्य चैकविधफलायोगात्स्वभावत्रयोचितं फलत्रयं च कथं न युक्तेः प्रभावः सम्भावयेत्। अत एव मध्यमजीवानां न लिङ्गदेहभङ्गोऽस्तीति मन्दाशङ्कापि न युक्तिमहा। उत्तमाधमसामग्रीव मध्यमस्यापि सामग्री कृतलिङ्गदेहभङ्गात् स्वाभाविके तत्स्वरूपसुखदुःखे अनुभावयेदेव सामग्र्याः कार्याजकत्वनियमस्य सर्ववादिभिरङ्गीकृतत्वात्। अन्यथा कृतहानिप्रसङ्गात्। कथं चान्यथाऽनित्याभ्यां सुखदुःखाभ्यां तेषां नित्यसंसारित्वं? । नहि प्रवाहतोऽनित्या घटाद्या नित्या इत्युच्यन्ते। एवं च "तनुभृत्स्वभावसम्भूतये" "सुखदुःखमध्यसम्प्राप्तये" "नित्यं सुखोपलब्धिः" नित्यं दुःखोपलब्धिः" "नित्यं सुखदुःखोपलब्धिः" "शुभास्तत्र हरिं ययुः" "असुरास्तु तमो घोरं यदि तत्रैव मध्यमाः। मध्यमां गतिमेवापुरि"त्याद्याः प्राचां वाचोऽपि समाहिताः। *"अन्यथाऽनुपपत्तिश्चास्य समाधानमि"त्युपलक्षणं। भूतचतुष्टयस्य तन्मात्राचतुष्टयस्य च मुखतोऽनुक्त्योपेक्षितत्वेन च भगवदधीनत्वेनावरत्वमित्यपि ज्ञेयं। "नासदासीन्नो सदासी"दित्यनेन "नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्। किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम्। न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेत" इति श्रुतिखण्डत्रय गृह्यते ॥ "मूर्तं सदिति सम्प्रोक्तममूर्तमसदुच्यते" इति स्मृतेस्सत्पदेन पृथिव्यप्तेजोरूपं भूतत्रयं—असत्पदेन वाय्वाकाशभूतद्वयं च ग्राह्यमिति भावेनाह "पञ्चभूतानि नासु"रिति। रजः पदं सत्त्वतमसोरुपलक्षणमिति भावेनाह "गुणत्रय"मिति। देहलीदीपन्यायेनोभयसंग्रहार्थं श्रुतौ मध्यपतितं रज एव गृहीतमिति ज्ञेयम्। पर इति वदता "पॄ पालनपूरणयो"रिति धातोः कर्तर्यसुन्प्रत्यये कृते सति पर इति सकारान्तं परमिति सूचितम्। "न मृत्युरासीदि"ति श्रुतिखण्डस्यार्थमाह "मृत्यु"रित्यादिना। प्रकृष्टं केतः केतनं चिन्ह

---

*अत्रोक्तार्थस्थैर्याय जीवानामीश्वराधीनत्वादि दर्शयितुं स्वकृततत्त्वप्रकाशिकाटिप्पणगुर्वर्थदीपिकायां अध्या २ पाद १. अधि. ६. ७. स्थ वाक्यान्ये वालोद्धरति ग्रन्थकार इत्युत्तरग्रन्थसङ्गतिस्सहृदयैराकलनीयेति ॥

मसाधारणधर्म इति भावेनाह "दिवारात्र्योश्च प्रभाव" इति। "किमावरीव" इति श्रुतिखण्डस्यार्थं "माहैतदभावादि"त्यादिना। एतदभावात् पृथिव्यादिभोगसाधनवस्त्वभावात् कुह कुत्र किं कस्य शर्मन् सुखार्थं आवरीवः आवर्तदित्यर्थष्टीकाकारस्याभिमतः। "आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किंचनाऽऽस" इति श्रुतिखण्डार्थं कथयति "निवातमि"त्यादिना। अवातमित्यस्यार्थो "निवातमि"ति। स्वधयेत्यस्यार्थकथनं"स्वसामर्थ्ये"नेति। धीयते धार्यते अनया सर्वं जगदिति व्युत्पत्त्या स्वधापदेन स्वसामर्थ्यमुच्यते इति भावः। आनीदित्यस्यार्थकथन"मचेष्टते"ति। "अन चेष्टाया"मिति धातोः लुङि रूपमिदम्। "तस्मादन्यत्पर आसे"त्यत्र पर उत्तममित्यर्थः। अन्यत्वार्थकथने प्रागुक्तान्यपदेन पौनरुक्त्यापत्तेः। "विकृतरूपविनाशे" त्यस्य विकृतरूपस्य स्थूलरूपस्य विनाश इत्यर्थः। आदिपदेनानुपकारित्वं गृह्यते। तमोऽभिमानित्वात् "तमु ग्लान" इति धातोः दुर्गारूपेण जगत्संहर्तृत्वाच्च श्रीरूपं सलिलं तमः पदेनोच्यते। प्रकृष्टं केतः केतनं निकेतनं स्थानं यस्येति व्युत्पत्तिमाश्रित्याह "अपरिमितमि"ति। प्रकृत्याख्यं श्रीरूपप्रकृत्याख्यमित्यर्थः। गूळ्हं गूढमित्यस्यार्थकथनं "गूहितमि"ति। "प्रपञ्चस्य ब्रह्मानन्यत्वे प्रमाणाभावादि"त्युपलक्षणम्। एवं सत्यादिपदोल्लङ्घने कारणाभावादल्पाक्षरत्वाच्च वाचादिशब्देभ्य इत्येव सूत्रप्रवृत्तिप्रसङ्ग इत्यपि द्रष्टव्यम्। "प्रमाणविरुद्धं चे"त्युपलक्षणम्। ब्रह्मात्मकपदेनैकत्व बाधः। अन्यत्वामेव इति विरम्यव्यापारप्रसङ्गश्च। "लोकसिद्धत्वादि"त्यस्य एकाकिराजापेक्षया स्वाधीनचतुरङ्गसैन्यसहितस्य राज्ञो महिमदर्शनादिति भावः। "शरीरेन्द्रियप्राणादिरि"ति वदता सूत्रगतादिपदेन शरीरेन्द्रियादिकं गृह्यत इति सूचितम् ॥२॥१॥६॥

"अन्यथाऽनुमितौ च ज्ञशक्तिवियोगादि"ति वक्ष्यमाणसूत्रस्यायमभिसन्धिः। अन्यथाऽनुमितौ प्रकृत्युपसर्जनपुरुषानुमितौ क्रियमाणायां च जानातीति ज्ञो जीवः। तस्य शक्तिवियोगात् शरीरप्रवेश एव स्वतः शक्त्यभावात्। भावे चान्यत्रापि स्वत एव प्रवृत्तिसंभवात् शरीरप्रवेशवैयर्थ्यमित्युभयथापि जीवकर्तृत्वं न घटते इति॥ "पुनराशङ्कोदयादि"ति वदता "यथा प्राणादि"रिति सूत्रे प्राक् भगवतोऽनुप्रवेशः कथितः। स मास्तु। जीवानुप्रविष्टमेव शरीरं प्रवर्ततामिति पुनराशङ्कोदय इति सूचितम्। "विधेने च ते जीव"इत्यत्र बहुकालं हिताकरणमहितकरणं चेत्यस्य

Rarest Archiver

सुखेन जीवामीति यद्धितं तस्याकरणं मध्य एव मरणात् । भुञ्जानस्य तद्दन्ता स्वजिह्वादंशनादिकं यदहितं तस्य करणं चेत्यर्थः । "इङ्गयत्यङ्गमङ्गानी"त्यत्र कृत्रिम प्रतिमाया एकैकावयवचलनमात्रे अपेक्षिते तदङ्गमेवेङ्गयति । नर्तनविशेषादौ सर्वाङ्गचालने अपेक्षिते अङ्गानीङ्गयतीति सम्बन्धः । "अन्नं रसादिरूपेणे"त्यत्र गोभिर्भुक्त तृणादिरूपमन्नं तदुदरे तिष्ठति । तस्यान्नस्य रसं" "व्यानः सर्वशरीरग"इति वचनात् नाडीस्थितो व्यानः ऊधोभारे आनयति । एवं नारीभिर्भुक्तमन्नं तदुदरे तिष्ठति । तस्य च रसं उर्ध्वनाडीद्वारा तासां स्तनद्वये प्रवेशयति । गवां नारीणां चान्तरस्थातत्सम्भव-तत्कर्तृत्वमिति भावः । "कार्योपसंहारकर्तृत्वानुपपत्तेरि"त्युपलक्षणं । कृषीवलानां योद्धृणां राज्ञां वणिजां च मध्ये कार्यविच्छेददर्शनादित्यपि द्रष्टव्यं । "तस्या अनुपलब्धिबाधितत्वादि"त्यत्र तस्या ईश्वरसाधकश्रुतेरनुपलब्धिः क्वापि केनापि च-ईश्वरस्यानुपलम्भस्तद्बाधितत्वादित्यर्थः । न तु श्रुतेरेवानुपलम्भः । "तत्र प्रतिपादितमि"त्यत्राभिमान्यधिकरणे इति शेषः । "अविचारितरमणीयाऽविद्ये"त्यत्राविचारिते सति रमणीया, विचारिते सति अन्ततोऽघटितबहुप्रमेयघटितेत्यर्थः । सेश्वरवादेऽपि निरवयवत्वशब्दव्याकोपस्य कः परिहार इत्यतोऽपीदमुदितम् । "यद्वि युक्त्वे"ति ईश्वरस्याघटितघटकत्वशक्तेरीशशब्देनैव सूचितत्वात् । अनीशस्य तु जीवस्येश्वरविषयकज्ञानमात्रात् स्वविनाशे प्राप्ते स्वात्मानमेव रक्षितुमप्यसमर्थस्य जीवस्य तदसम्भवादिति भावः । "योऽसौ विरुद्ध"इत्यत्राणुत्वमहत्त्वे यौगपद्येन कथ्यमाने यः परमात्मा लोकदृष्ट्या विरुद्धः, विरोधवान् "अणोरणीयान्महतो महीयान्" इत्यादिप्रमाणैर-विरुद्धः । लोकदृष्ट्या मनुः मननयोग्यः "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" "नाहं विदाम्यहममी मुनयः सुरेशा" इत्यादिप्रमाणैरमनुः, आन्तं मननायोग्यः, लोकदृष्ट्या वाक् वक्तुं योग्यः, "सन्त्यश्रुता अपि नैवात्र शङ्का" । "यतो वाचो निवर्तन्त" इत्यादिप्रमाणैरवाक् आन्तं वक्तुमयोग्यः । लोकदृष्ट्या इन्द्रः "अर्ब आघच्"इन्द्रवान् । कृष्णरामाद्यवतारेषु विश्वामित्रनारदादीनामभिवादनदर्शनात् । "मत्तः परतरं नान्यत्" "न दैवं केशवात्परं" इत्यादिप्रमाणैरनिन्द्रः न विद्यते इन्द्रो यस्येति विग्रहः । लोकदृष्ट्या प्रवृत्तिः प्रवर्तकत्वात् "नाहं किञ्चिदुपाश्रित"इत्यादिप्रमाणैरप्रवृत्तिरिति योजना । "नहि शब्दैकसमधिगम्ये"त्यनेन यथा शब्दो वक्ति तथैव सोऽङ्गीकार्यः । ननु लोकदृष्ट्या विरोधः शङ्कनीय इति सूचितं । "सर्वपिता चे"

त्यत्र सर्वविषयिण्यः सर्वदा विद्यमानाश्च सर्वाः शक्तयस्ताभिः शक्तिभिरुपेतेत्यर्थः। "श्रुत्यनुसारेण स्त्रीलिङ्गप्रयोग" इत्यत्र "आत्मा ही"ति प्रागात्मनः प्रस्तुतत्वात् । अत्रापि सर्वोपित इत्येव वक्तव्यं। स्त्रीलिङ्गपदप्रयोगस्तु "सर्वोपिते"ति श्रुत्यनुसारात् "अपस्पृधेथां त्रेधा सहस्रं वितदैरयेथामि"ति श्रुतिः स्पष्टं जीवानां त्रैविध्यमाह । हे इन्द्राविष्णू उभा उभौ युवां जिग्यथुः सर्वानसुरान् जितवन्तावभूतां। न पराजयेथे कदापि पराजयं नाप्नुथः। एनोरेनयोर्युवयोर्मध्ये कतरश्च कश्चन न पराजिग्ये पराजयं नाप। हे विष्णो इन्द्रश्च त्वं चेत्युभौ अपस्पृधेथां दैत्यैस्सह स्पर्धामकुर्वाथाम् इति यत्तत् तेन दैत्यैः सह स्पर्धाकरणेन स्पर्धां कृत्वा तद्बलेनेत्यर्थः । सहस्रमनन्तानंतजीवान् विशेषेण विविधतया विरुद्धतया चेति त्रेधा ऐरयेथां प्रेरयेथां प्रेरणामकुर्वाथाम् । उत्तमजीवेषु ब्रह्मादिषु हरिसर्वोत्तमत्वबुद्धिं सुतरामैरयेथाम् । अधमेषु पुनः पुनः विरोधमेव ऐरयेथाम् । मध्यमजीवेषु दैत्यवधादिसमये हरेस्सर्वोत्तमत्वबुद्धिं वधात्प्राक् तेषां शिवदत्तसंपद्दर्शने सति जरासन्धादियुद्धेषु कदाचिल्लीलया युवयोः पलायने च सति वरदातॄणां शिवादीनां सर्वोत्तमत्वबुद्धिं चेति त्रेधा ऐरयेथाम् । यद्वा शिवादीनां वरादन्यैरवध्यदैत्यैः सह युवयोः तत्कृतजगदुपद्रवदर्शनेन प्रथमं सहिष्णुत्वरूपस्पर्धैवाजायत । ननु तदैव तद्वधोऽपि कृत इति यत्तस्मात् तैरेवोपद्रुतानां तेषां वरदायकानां ब्रह्मशिवादीनामवध्यतद्वधे समर्थयोः सर्वोत्तमयोर्युवयोः पृथिव्यादौ अवतारे सति सहावतारादौ च विशेषेण बुद्धिमैरयेथाम् । दैत्यादीनां तु अवतीर्णे स्वस्मिन् स्वभक्तेषु पाण्डवादिषु च पुनः पुनर्विरोधकरणाय मतिमैरयेथाम् । मध्यमजीवानां तु प्राक् दैत्यानां प्राबल्ये साधूनां पराजये च सति तैस्सह सख्येन वरदायकशिवादीनामुत्कर्षे बुद्धिं पुनस्तैरेवोपद्रुतानां तत्र प्रार्थने सति तेष्वपकर्षबुद्धिं युष्मदुत्कर्षे बुद्धिं चेति विविधमैरयेथामिति श्लोकोक्तः सर्वोऽप्यर्थः कथं न श्लोक्यः इति सर्वमवदातम् । तस्माद्विरुद्धे गती परिशिष्टे अनुकूलां स्वयोग्यगतिं मुक्तिं प्रेप्सुना च हरेस्तत्त्वनिर्णायकेषूक्तदशोपन्यासेषु श्रद्धावता भाव्यम् । अतः पूर्णमतिना यतिना निरूपित एव शास्त्रार्थ इति स्थितम् । इति फलोपन्यासः ।

वादिराजेन रचिता मालेयं विमला सदा ।
सदये हृदये धार्या हरिणा भववैरिणा ॥

इति श्रीमत्कविकुलतिलकश्रीमद्वादिराजपूज्यचरणविरचिता उपन्यासरत्नमाला समाप्ता

द्वितीयोऽध्याय: गद्यरुक्मिणीशविजय:

।। श्रीः ।।

रुक्मिणीशविजयस्य मङ्गलाचरणश्लोकाः

श्रीवेदान्तमहाचलं हि परित सयोज्य सूत्राहिप
सद्वातागमपोषितात्महृदयें तत्पूर्वपक्षासुरैः ।
सिद्धान्तोक्तिसुरेश्वरैश्च मथितो य कृष्णदुग्धाम्बुधि.
स्वीयानाममृत प्रयच्छति स मा पायाद् गुणोद्यन्मणि. ।। १ ।।

सच्छास्त्रोदितवर्त्मना पदमिद ध्यायन् मदङ्काङ्कितो
मन्मन्त्र जप शास्त्रसम्पदमथो दास्यामि भाग्यै सह ।
तत्तत्त्वान्यपि बोधयामि तदनु प्राप्यो मदङ्घ्रिर्भवेद्
इत्याघोषयतीव य करचयैस्त वाजिवक्त्र भजे ।। २ ।।

श्रये हयमुख श्राव्यकाव्यमार्गसमाप्तये ।
सरागयोगिपूगोक्तस्तोत्रतोत्रवश मह. ।। ३ ।।

सिञ्जन्नूपुरशोभिपादकमलां मन्दस्मितोद्यन्मुखी
कञ्जाक्षी कुचभारभीरुविलसन्मध्यां क्वणत्कङ्कणाम् ।
शम्भ्वाद्यै परिसेविता सुवसना जाम्बूनदालङ्कृता
अम्बां तां प्रणतोऽस्मि कृष्णरमणी लम्बालकां रुक्मिणीम् ।।४।।

सत्सङ्घमानससरोवरमध्यवर्ती
कृष्णाङ्घ्रिचारुकमलार्पितचित्तवृत्ति ।
शास्त्रातिमञ्जुपदरञ्जितरम्यसंसद्
आस्माकहृत्सरसिजेऽस्तु स मध्वहस: ।। ५ ।।

ताटङ्कद्वयशोभिकर्णयुगलं भ्राजद्दयावीक्षण
पूर्णेन्दुद्युतिविद्रुमाधररुचा व्यामिश्रमन्दस्मितम् ।
ईषत्कुञ्चितकुन्तल सतिलक नासोल्लसन्मौक्तिक
भूयात्कूर्मसदृक्षगण्डयुगल वाणीमुख श्रेयसे ।। ६ ।।

Rarest Archiver

कवेः हार्दम्

श्रीनाथस्य कीर्त्यम्बुजसेव्यगन्ध[1] सगृह्य विहर्तु स मुख्यवायुरेव ईष्टे। अह तदीयागमविस्तृत[2] त सेव्यगन्ध वाणीमुख वासयितु वृणोमि। हयास्यनासापुटजात-वात-विघात-धूताघ-पलालजात मुनीश-व गीशसुत वादिराज. हरे सुरम्या कथा शसति। अपण्डितेनापि मया आर्जिता इय मुकुन्दस्य लीला कविजनाना कण्ठमाला भवतु। अकौशलेन मालाकारेण ग्रथिता इति जातिप्रसूनमाला सन्त्यजन्ति किमु? हे बुधा. प्रमादेन आगता दोषा अत्र भवेयु। तथापि इमां कवित्वश्रिय आद्रियध्वम्।[3] पयोब्धिजा लक्ष्मी. चञ्चलताख्यदोषाद् विदग्धै उपेक्षणीया किम्?

---

१) गन्ध परिमल एकदेशश्च

२) तदीयागमेन वायो आगमेन विस्तृतम्,
वाय्ववतारश्रीमध्वशास्त्रेण विस्तृतम्

३) एको हि दोषो गुणसन्निपाते निमज्जतीन्दो किरणेष्विवाङ्क इति न्यायात् स्वल्पदोष नादरणीय ।

गद्यरुक्मिणीशविजयः

पुरा इयं धात्री असंख्यपापभाजां दितेः सुतानां वशमागता। तेषां असह्येन भारेण व्यथिता वसुन्धरा तद्दुःखपरिहरणार्थं विरिञ्चं शरणं जगाम। मुकुन्दविद्वेषिणां दैत्यानां भरेण सर्वसहा अपि सा खिन्ना बभूव। पतिव्रतानां नारीणां पतिनिन्दकेभ्यः अपरः भारः क्वास्ति? मुकुन्दं शरणं व्रजन्ती सा धरा, तं गवां ब्राह्मणानां च ध्रुवं अनिमित्तबन्धुं निशम्य गोरूपधरा बभूव।[1]

विरिञ्चवैरिञ्चादयः अमरेशाः धरायाः कार्यस्य कृते हरिं गृणन्तः, भुवि स्वपारतन्त्र्यं दर्शयन्तः, हृदये तमेव श्रीहरिं स्मरन्तः च स्वस्वपुरात् निर्गतवन्तः। श्रुतिभिः वर्ण्यवेषा सा सुराणामावली स्वदेहकान्त्या नष्टतमिस्रजाले नभस्तले यतीन्द्रैरपि तपश्चरणादियत्नगम्या पतदूर्मिमाला क्षीरपयोब्धिवेलां ययौ।

ततः विरिञ्चः क्षीरपयोब्धितीरे दृढेन मनसा इन्द्रियाणि नियम्य, प्राणायामपुरस्सरं निबद्धाञ्जलिपुटः सन् परमात्मनः विष्णोः पूजनं प्रचक्रमे। यदा सः चतुर्मुखः पद्मासने संस्थितः सन्, "सहस्रनेत्राननपाणिपाद[2] भवान् सहस्रकार्येषु समर्थः" इति विज्ञापयितुमिव पुरुषसूक्तमन्त्रं जजाप। तत्कालमारभ्यैव असौ ब्रह्मा जगत्सु 'पद्मासना'भिधेयः बभूव। तदा विरिञ्चपुत्रः शिवः विष्णोरन्यानि अम्बरादिवस्तूनि हेयानि त्यक्त्वा कामरहितान्तःकरणः सन् गिरा मुरारिं स्तुवन् 'गिरीशः' (गिरि ईशः), 'अनङ्गजित्,' 'दिगम्बरः' इत्यादिनामभाग् बभूव। नूनं तदैव महाशेषः आहारं परित्यज्य वायुसेवनेनैव भगवन्तं ध्यातवान्। अत एव सः 'वायुभक्षः' अभूत्। देवेन्द्रोऽपि हरिं ध्यात्वा शताश्वमेधफलं प्राप्य इव 'शतक्रतु'शब्दितोऽभूत्। सर्वेऽपि देवाः हरिपूजायां

---

1) गोब्राह्मणहिताय च इति स्मृतेः।

2) सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् इति पुरुषसूक्तप्रारम्भः।

निद्राजाड्यमपहाय जागरूकत्वात् 'अस्वप्न'नामानो बभूवु। तदा विश्वम्भरा पिपासाशनायादिक सहमाना अचलेन मनसा विष्णु स्मरन्ती सती, 'सर्वंसहा,' 'अचला' च सञ्जाता।

देवानां ध्यानाख्य कल्पवृक्ष तेषा चित्तेषु अङ्कुरित.। शोभन–भक्तिलतया सुश्लिष्ट। ध्यानजन्यानन्दबाष्पै. सिक्त। हर्षोत्पन्न-पुलकाख्यमूलै व्याप्त.। समाध्यवस्थायां सञ्जातदेहकान्तिविशेषेण पल्लवित.। ईषन्मीलितनेत्राख्यमुकुलै. भूषित। नानाशाखाभि (ऋगादिभि.) उन्नत., परिपाकावस्था गत श्रीरमणाख्यपक्षिण. सप्राप्त.। तद्ध्यानेन प्रसन्न. करुणावरुणालयः हरिः चतुर्मुखमुखान् सुरान् समाश्वास्य धरां गतक्लेशभरां विधाय स्वकीया मायां (लक्ष्मी) इत्थमवोचत् – देवेषु धाता उत्तम.। तस्मादुत्तमा लक्ष्मी.। तस्याः प्रभुः अह इति शसन्निव हरि. अजस्य, अदृश्य. सन् किन्तु इन्दिराया. विज्ञेयमूर्ति. सन् आज्ञा ददौ – "त्वं भूमिमेत्य वसुदेवस्य पत्न्याः देवक्याः उदरस्थ गर्भं स्वशक्त्या रोहिण्या उदरे निधेहि।" हरिणा इत्युक्ता सा रमा तथाऽकरोत्। श्रीहरिः स्वावतारात्पूर्वं शेष मानुषेषु अवताराय आज्ञापयामास। आज्ञप्तः स शेष रोहिण्या उदरोदयाद्रे बलभद्रत्वेन प्रादुर्बभूव। तद्युक्त एव। नरेन्द्रा प्रयाणे उपस्थिते सति स्वकीयां शय्यां[1] पुरत सम्प्रेषयन्ति किल। श्रीश तस्मिन् बलभद्रे शुक्लकेशरूपेण अवतारसमाप्तिपर्यन्त सन्निहित. सन् स्वयमेव स्वाग्रजत्व नूनं धत्ते। सुखात्मा श्रीहरि. बलभद्रमातु. रोहिण्या नित्य स्वमातृत्वसुख विधत्ते।

विष्णु स्वकवाटपालौ जयविजयाख्यौ बलात्कारेण प्रगृह्य यौ निशाचरौ शिशुपालदन्तवक्त्ररूपेण भूतलमेत्य दृप्तौ अभूताम् तौ नृतस्करौ राक्षसौ विनिहत्य निजौ जयविजयौ निनीषन्निव भूमि प्राप्तोऽभूत्। "निर्मलस्य मम गर्भवास. नास्ति" इति बुधान् बोधयन्निव फणीश्वर देवकीगर्भवासिन विधाय पश्चात्त विकृष्य स्वय देवक्युदरे सन्निहितोऽभूत्। दुःखहेतुभूतस्थाने गर्भेऽपि अपरिमित-

1) शेष श्रीहरे शय्या।

स्वरूपानन्दैकदेह त विष्णुमभ्येत्य स्वेषा जायमानगर्भनिवासजन्यदु खस्य निर्भङ्गसिद्धचर्थमिव पद्मासनमुख्यदेवा श्रीहरि अस्तुवन् ।

श्रीकृष्ण श्रावण-कृष्ण-अष्टम्यां [कृष्णाष्टम्यां] जयन्त्यां निशीथे देववयुदरोदयाद्रेः शशीव प्रादुरभूत् । अष्टदिक्षु रात्रिचरान् जिगीषोः श्रीकृष्णस्य कृष्णपक्षस्य अष्टमीतिथेः रात्रौ अवतार. गुणोचित एव । अष्टमीचन्द्रस्य यदर्धचन्द्रत्व तदपि युक्तमेव । श्रीकृष्णस्य सोमकुलोत्पन्नत्वात् 'कृष्णः सोमान्वये जात' इति प्रथया चन्द्रमस. यशोलक्षण–प्रियप्राप्तिरभूत् । किन्तु स्वातिशयकान्तियुक्तमुकुन्दवक्त्रेन्दुदर्शनेन पराजयलक्षणाप्रियस्य च अवाप्तिरभवत् । हर्षशोकयोः शरीरोपचयापचयहेतुत्वात् चन्द्रमस. शरीरार्धस्योपचयः शरीरार्धस्यापचयं च सञ्जातः। देवकीगर्भभव सन् उत्तरत्र यशोदायाः सुत इति उदारा प्रथा करिष्यमाण. स कृष्णः देवकीयशोदातिरिक्तां अन्यां जननी अनुगृह्णन् इव रोहिण्युदयप्रसिद्धि[1] ततान । श्रीकृष्णावतारेण हृष्टान्तरा गन्धर्वा. त जगुः । तिलोत्तमाद्याश्च सुरनर्तक्य ननृतु । श्रीकृष्णजन्मकाले एतत्कृतगीतनर्तनादिकं स्वगीतनाटचेन विजेष्यमाण कृष्णं बाल्ये एव आत्मसात्कर्तुमिवाभूत् । सर्वा दिश श्रीकृष्णः अस्मान् स्वीययशोभिः परिपूरयिष्यतीति प्रहृष्टा सञ्जाताः । भूमिस्तु "स्वाङ्घ्रितलश्रिया श्रीहरि. मा रञ्जयति" इति प्रसन्ना आसीत् । तदा सुराश्च नाकलोकस्थाः भुवि पारिजातवृक्ष सत्यभामार्थं आनेष्यत अस्य श्रीकृष्णस्य चित्तं, तत्पुष्पाणि प्रदर्श्य पुरैव सम्यगुद्बुद्ध विधातुमिव, हृदि त स्मरन्तः वचसा स्तुवन्तश्च पुष्पाणि ववृषु. । यदि अय कृष्ण वसुदेवादुत्पत्त्यभावेऽपि 'वसुदेवस्य अय' इति व्युत्पत्त्या 'वासुदेव'पदाभिधेयः तर्हि, वसवश्च ते देवाश्च वसुदेवा , तेषा अयं इति व्युत्पत्त्या अस्मत्पुत्रोऽपि किं न स्यादिति वसव देवाश्च ध्रुव हृष्टा. । यदि अस्य कृष्णस्य उत्पत्त्यभावेऽपि आनकदुन्दुभे. (वसुदेवस्य) प्रियपुत्रत्व भवेत् तर्हि 'आनकाश्च दुन्दुभयश्च आनकदुन्दुभय' इति व्युत्पत्त्या अस्माकं शिशु.

1) रोहिणीनक्षत्रे स्वस्य उदयप्रसिद्धि

किं न स्यादिति भुवि कृष्णस्य स्वय प्रादुर्भावे सति व्योम्नि आनकानां दुन्दुभीनां च घोष समभूत्। शरीरकान्त्या स्वजैत्र कृष्ण निरीक्ष्य जलद दूरतो गत्वा जल(ड)राशितीरे जगर्ज। शक्त्या रहितस्य पुस. जडान्तिकेष्वेव हि गर्जितानि। कृष्ण जलविहारसमये कामिनीभिः सह मां प्रविश्य आकण्ठमवगाह्य मुखपद्मपुञ्जै मामलङ्करिष्यतीति शसन्निव सर. तदा कृष्णजन्मकाले रात्रावपि सारसनिवहै प्रसन्नमभूत्। विभुत्वधर्मेण पुरा अद्वितीयत्वेन विद्योतमान कृष्णमद्य स्वापेक्षया अल्पप्रदेशवर्तिन शिशुस्वरूप विलोक्य नभ प्रहर्षात् तारहारै विभूषित-स्वाङ्गमिव अदृश्यत। शिशुरूपिण परमात्मान वशीकर्तु भार न भविष्यति इतीव बुध्या शुद्धान्त करणा तपोज्ञानादिवृद्धा अद्धा तुतुषु। "कृष्णदर्शनेन कृतार्थाः इमे मामुपेक्षिष्यन्ते" इति इव अग्निहोत्रिणाम् अग्नि स्वयमेव प्राज्वलत्। "हरिरय असुराणा प्राणान् हरिष्यन् मामसुरेभ्य वियुक्त करिष्यति" इति हर्षेण त अर्चयन्निव गन्धवाहः प्रसूनगन्धयुक्त. श्रीकृष्णगृह स्पृशन् मन्द ववौ। हरौ प्रादुर्भूते भक्त्या अर्पितपुष्पवर्षै गीर्भि स्तुवद्भि सुरसिद्धसङ्घे विघ्नभीत्या[1] दूरे विधूता इव अम्बरान्तात् मेघा ययु। किं बहुना, अजन्मनः तस्य कृष्णस्य जन्मकाले चराचरमिद तुष्टमभूत्किल। तथा हि अदृष्टपूर्वस्य निरीक्षणेन तुष्टि. कस्य न स्यात्?

स्वनिरीक्षणेनैव स्थावरजङ्गमानां शरीरिणां विमुक्तिदोऽस्मीति विख्यापयितुमिव कृष्ण., दृष्ट सन् पित्रो देवकीवसुदेवयोः निगडस्य बन्ध जहार। पितरौ तौ देवकीवसुदेवौ कृष्णपितृत्वप्रथया पापात्[2] नरकभयं स्यादिति गुणाढ्य ईड्य ईश त कृष्ण "त्व ज्ञानात्मक, प्रकृतेर्विदूरः अस्य जगत तात." इति अस्तुताम्।

य श्रीहरि स्वनामस्मरणेन पुत्सज्ञितात् नरकात् जनान् पाति सः दृष्टिविषयो भूत्वा वसुदेवपत्नी नरकाद् रक्षति। अत. स शतपत्रनेत्रः

1) स्ववृष्टपुष्पाणा मेघव्यवधाने कृष्णसमीपगमनविघातलक्षणविघ्नभीत्या

2) पापात् नरक स्यात् पापिष्ठात् कसात् मरणभय स्यादिति वा

तस्या: कथं न पुत्र [3]। अपि च यदीय रूप य: प्रकटीकरोति स: तस्य पिता इति खलु वेदवाद:।[4] श्रीकृष्णस्य च रूप वसुदेव प्रकटीचकार। तत: तस्य पितृत्वमपि भवतु। न तेन काचित् हानिः। श्रीकृष्ण: 'हे देवकि पुराऽह एतेनैव शरीरेण त्वद्दृष्टिगोऽभवम्। अधुनापि तेनैव' इत्युक्त्वा स्वस्य जनि न मेने।[5] माता सा देवकी त अभिवन् कृष्ण "विश्व यदि"त्यादिना[6] सस्तुवन्ती स्वत कृष्णस्य जनि न मेने किल। प्राज्ञः असौ पिता च विनत सन् [7] 'विदितोसी'त्यादिभि, श्लोकै त गृणन् स्वतोऽपि जनि न मेने। लोके खलु माता स्वात्मजात जानात्येव। पिता अपि स्वापत्य जानाति। परन्तु श्रीकृष्णस्य जन्म ताभ्यामेव पितृभ्या अनङ्गीकृतम्। तदा तत् को वा पुमान् साधयितु समर्थ ? प्रथम तावत् कृष्ण शङ्खचक्रधारी एव दृष्ट। तदनु देवकीवसुदेव: कृता स्तुतिमवधार्य शिशुवेषधारी बभूव। इत्थभूत कृष्ण तत्पूर्ववर्तिन वा त पुराणाकृति अप्रमेय का वा मृगाक्षी असूत ? श्रीहरि: यदि वसुदेवाज्जात तर्हि तस्य पीताम्बर कौस्तुभरत्न उद्यत्सुदर्शन शङ्खगदादिकस्माज्जातम् ? पिशाचा अपि शक्तियुता देहिना देहेषु गतागत लभन्ते। तदा अनन्तशक्ते श्रीहरे देहाद् बहिर्निर्गम एव कुतो न स्यात् ? यदा पूर्व हि पदाहतस्तम्भवरात् नृसिहाकृति: आविरासीत् तदा त मुकुन्द का स्त्री सुषुवे ? स काय: कस्य वीर्यादजनिष्ट ?

---

3) पुत नरकात् त्रायते इति पुत्र

4) कवियं पुत्र स इमा चिकेत यस्ता विजानात्स पितुष्पितासत्।

5) तदा वा परितुष्टोऽह अमुना वपुषाऽनघ प्रादुरास वरदराट् युवयो कामदित्सया। तृतीयेऽस्मिन् भवेहवैतेनैव वपुषा तथा।
जातो भूयस्तयोरेव सत्य मे व्याहृत सति। भागवतम

6) विश्व यदेतत् स्वतनौ निशान्ते यथावकाश पुरुष पुरो भवान्।
विभर्ति सोऽयं मम गर्भगोऽभूदहो नृलोकस्य विडम्बन तत् ॥
—भागवतम्

7) विदितोऽसि भवान साक्षात् पुरुष प्रकृते पर।
केवलानुभवानन्दस्वरूप सर्वबुद्धिदृक्।

तथैव हरिणोपदिष्टा सा माया अपि नन्दस्य कलत्ररत्ने यशोदायाँ 'हरि शिशु.' इत्यादिविमोहराशे भूलभूता इव प्रादुर्भूता । "यदि मम वास' अत्रैव मथुराया स्यात् तर्हि कस सुहृदा पूतनाशकटादीनां वधजन्य दु.खेन रहित एव यमस्य अतिथि भवति इत्यालोच्य श्रीकृष्ण. तत. व्रज प्रति अगमत् ।[1] न हि स्वसश्रितानां अभयस्य कर्ता स. हरि. कस भयेन व्रज अव्रजत् किन्तु निशीथेऽपि यमुना तीर्त्वा स्ववल्लभा नन्द-कलत्रजातां मनोरमा रमां वीक्षितुमेन स वेगादगात् । (अहो विचित्र प्रेमिजनचरित्रम् ।)

तद. गोकुलगमनसमये गृहाणि कवाटमुद्घाट्य अस्मै वर्त्म ददु । बहि अभ्रसस्थ वनस्पतौशश्चन्द्रमा एव स्वान्वयेश श्रीश द्रष्टु औत्सुक्येन कवाटानि उद्बिभेद इति मम बुद्धि. । अद्भुतबालमेन करे निधाय निशीथे बहिर्निस्सरत. वसुदेवस्य तद्गृहद्वारगण अन्तराय नाभूत् । करस्थदेवस्य कुतोऽन्तराय । मेघ. पश्चात् गोकुले (गोवर्धनोद्धाराव सरे) महावृष्ट्या अगण्य-गो-गोपान् नाशयिष्यति । तत्पाप पूर्वमेव परिहर्तुमिव जलद. अधिमार्गं तस्मिन् कृष्णे ईषद् ववर्ष । देवश्रेष्ठस्य श्रीकृष्णस्य अग्रजत्व यद् बभार तस्य अधस्य प्रशमेच्छया इव फणिपति. श्रीकृष्णस्य उपरि छत्रायमाण. त सिषेवे । विरिञ्चवैरिञ्चमुखा. अमरेशा: तदा गोकुलगमनावसरे पुरुषोत्तमस्य श्रीकृष्णस्य पुरा यं कञ्चित्प्रत्यपि अप्रण तस्य अधुना लोकविडम्बकस्य 'त्वया गुरुभ्य. नमस्कारादि एवं कर्तव्य' इति नमस्कृति प्रबोधयन्त इव भक्त्या नेमु । पुरा रामावतारे प्रतिबन्ध-कर्तु स्वभर्तु: वार्धे एतत्कृत बन्धन स्मृत्वा भीता इव यमुना श्रीकृष्णस्य मार्गं ददौ । सा यमस्वसा वसुदेव प्रति "भवप्रवाह अपि तव एवमेव सुलभतार्यो भविष्यति इत्युदीरयन्तीव प्रवाह दूरे आधाय करस्थकृष्णाय

1) शिशुजननश्रवणेन कस अत्र आगत्य यदा शिशु मा हन्तुमिच्छति तदा तस्य वधः 'तदैव कर्तव्यो भवति । किन्तु सुहृद्वधक्लेशविदूर एव स मृत्यु गच्छति तन्न स्यात् । अह गोकुल गमिष्यामि तत्र पूतनाशकटदीन् अयं दुर्मति मम हिंसार्थ निश्चत प्रेषयिष्यति । तान् सर्वानपि हत्वा तन्मरणप्रयुक्त दु खभाजन कृत्वा कसं मृत्यु गमिष्यामि इत्यालोच्य ।

वसुदेवाय पद्महृद्या दिदेश । विभूषणेषु प्रतिबिम्बिताभिः प्रहृष्टपाणिद्वये रोमाख्यपत्रवान् कृष्णवाहः सः वसुदेवः विनताङ्गजात गरुत्मानिव वेगतोऽगात् । तदा गोकुलगमनकाले मेघगर्जनाख्यदुन्दुभिध्वनिरासीत् । परिपठद्वन्धवाख्यबन्दिनां घोषः समभूत् । वसुदेवस्य हस्तः ध्वजचिन्हितः पुष्पकश्रीहारी अवर्तत । देवैः मुक्ताः आकाशगता मालाः चामराणीव अराजन्त । अहीश्वरः छत्रायितः शुशुभे । शक्राद्यैः परिवारितः स श्रीकृष्णः राजाधिराजप्रभः ययौ ।

रोम्णां हर्षणकारिणि श्रवणतः पापौघविध्वंसिनि
प्रेम्णा चिन्तयतां विचित्रविमलश्लाघ्यार्थसन्दायिनि ।
सञ्जाते भुवि रुक्मिणीशविजये सद्वादिराजोदिते
सञ्जात सुरमण्डलीषु महितः सर्गोऽयमाद्यो मुदाम् ॥

द्वितीयःसर्गः

ततः यशोदा स्वकुलस्य यशोदां[1] करिष्यमाण श्रीकृष्ण गो-कुल गोपुञ्जविभूषित गोकुल प्राविशत् । तदा नन्दगोपस्य गृहवीथिका अमरवृष्टपुष्पै युक्ता, अम्बुदानां मध्यंत. अथ प्रविष्टचन्द्रमहसा पताकावतीव, नववारिभि सिक्ता छत्रायमाणफणीन्द्रस्य कण्ठोदररत्नानां कान्त्या विचित्रिता आसीत् । सा नन्दगोपस्य स्थली फणिपस्य फणावलिभिः तोरणवतीव, उपरि विराजमानदेवविमानैः वितानयुक्तेव, उरगराजमौले पतद्भिः पयोबिन्दुभिः अक्षतावतीव निशीथेऽपि विभूषिता आसीत् । तत्र नन्दात्मया उदिता माया लक्ष्मी विमुक्ताधिपति स्वपति शिशुस्वरूपमालोक्य लज्जिता इव स्वय गृहीतार्भकरम्यरूपा सती दोषान्तर एव (रात्रावेव) ततो गन्तु इयेष । हरेः प्रिया सा अद्य तद्भ-

1) यश ददातीति यशोदा

Rarest Archive

गिनोत्व उपेयुषी तत्र न स्थिरासीत् । किन्तु मनोज्ञमूर्त्यन्तरत तस्य (हरे.) विशालवक्ष स्थलमेत्य तृप्ता । नन्दगृह गत्वा वसुदेव स्वसुत विरिञ्चपूर्वामरमुख्यतात श्रीकृष्ण यशोदाशयने निधाय तत्सेवार्हफलमिव शिशुस्वरूपां कमस्य मृत्युमिव कमला स्वहस्ते बिभ्रत् कसस्य गृहमभ्यागमत् । सा दुर्गा प्रभातकाले स्वशयनसमीपमागत खल कस 'तव हन्ता अन्यत्र वर्धमान वर्तते' इति प्रबोध्य देवक्या: शयने संस्थिता तस्या: हरेर्वियोगत: उदितां चित्तचिन्ता बिभेद ।

सूर्योदय:

पूजक: प्रातरुत्थाय स्नात्वा पीठे उपविश्य करेण पुष्पाणि प्रतिगृह्य भगवन्त पूजयति । तथा सूर्योऽपि सिञ्जत्पक्षिगणात् कृष्णावतार निशम्य इव त पूजयितुमिवोदित पूर्वसमुद्रे स्नात्वा करै:पद्मानि उन्मील्य सान्द्रतिमिराणि उन्मूल्य च अचलसत्पीठाधिरूढ रागावृत (भक्तिमान्) गोकुलद्वारेषु स्वीयकर न् प्राहिणोत् । प्रात:काले सहस्ररश्मि: स विष्णु पदार्चनाय[1] मेरुसस्थै: अमरै समुद्रात्पीत उद्धृत सहस्रपत्रमिव विभाति । दिवि द्युरत्नेऽभ्युदिते भुवि अम्बुजानि प्रसेदु:, भुवि यदुवशरत्नेऽभ्युदिते दिवि सुराननाब्जानि प्रसेदु. । उष्णरश्मे. उदयेन पक्षिगणानां ध्वनि. तरुव्रजे समभूत् । दुष्टोष्णलसन्मरीचे कृष्णस्य उदयेन मागधबन्दिसूतानां ध्वनि. व्रजेऽभूत् । तदा सूर्योदये कृष्णोदये च सञ्जाते शनैश्चरन्त्य राजहस्य बृहन्नितम्बस्तनभारभीरुतनुस्फुरत्मध्ययुता: गोप्यश्च अदृश्यन्त । स्वकान्त कृष्ण अधुनैव बाल्ये वशे विधातुमिव ता गोप्य मनोहरकोमलाङ्ग्य व्यालोलहारसरै. कुण्डलै. कुन्तलै उद्यच्चैलान्तै: नूपुरै च मण्डिता: पथि विरेजु. । इत्य देवक्या: गृहे गोपिकानां गतागत सोत्साहमभूत् । सहस्ररश्मि सहस्रश. गोगण (किरणसमूह) विष्णुपदे[2] समर्पयामास । नन्दश्च तदा विप्रकुलाय दत्तान् गोगणान् (धेनुसमूहान्) विष्णुपदे (मुरारे: पदे) समर्पयामास । धेनुवत्सादीन् चारयिष्यमाणस्य कृष्णस्य

---

1) विष्णुपदस्य आकाशस्य अर्चनाय प्रकाशनाय श्रीविष्णुपादस्य पूजनाय च ।

2) आकाशे

गाव. सहस्रश साधयिष्यन् इव नन्द गोधनानि द्विजेभ्य प्रददौ । "अयं नन्दगोप जगदीश्वरस्य कृष्णस्य कथ जनको भवेत्" इति हसत. ब्राह्मणान् ऋषीन् देवान् बन्दिजनान् सुहृदश्च स्वानुकूलान् कर्तुमिव सुतुष्टमना स नन्दगोप तेभ्य वित्तानि अदान् । सूर्योदये सति ध्वज-प्रभे ऊर्ध्वमुखैं मयूखैं., तोरणसम्मितैश्च अधोमुखैर्मयूखै द्यौ विभूषिताऽभूत् । कृष्णोदये च व्रजभूरपि चित्रध्वजै. स्फुरत्तोरणैश्च विभूषिता बभूव । विभु श्रीकृष्ण बाललीलया इमानि प्रवेक्ष्यतीति तत्स्वागताय इव गोपा. व्रजमन्दिराणि लसत्पताकध्वजै कुम्भै तोरणैश्च अञ्जसा विभासितानि वितेनुः । कृष्ण. सदयावलोकै. इमान् गोवत्सादीन् कृतार्थान् करिष्यतीति हृदा गोवत्सवृषादीनपि गोपा सहरिद्रतैलैः अलम्प्रचक्रु 'त्वमपि अत्र शिशुभावमुपेत्य हे ईश अस्माभि इत्थ विहर' इति कृष्णाय वदन्निव व्रजस्थ स्निग्ध शिशुवर्ग दध्ना, घृतेन, पयसा नवनीतैश्च विजहार । तदा प्रातःकाले जनः उष्णभानौ अभ्युदिते सति चकितः सन् धर्मकार्येषु आसक्तोऽभूत् । रात्रौ प्रशान्ते चन्द्रमसि अभ्युदिते भोगान् अभुङ्क्त । तथा हि, बिभेति सर्वः परुषात् न शान्तात् । उन्मुखै दीप्तिवृन्दै. नभ स्पृशन् असौ भास्वान् क्रमेण ऊर्ध्वं इयाय । तथाहि विष्णुपदानुषक्तकर[1] लोकः कथ नोर्ध्वमुपैति । सहोदरस्य सोमस्य[2] अन्वये जात कृष्ण वीक्ष्य असूययेव सूर्यः मध्याह्ने राग परित्यज्य तीक्ष्णः बभूव । अहो अनुजस्य अपि श्रेयः केचित् न सहन्ते । तथापि छाया-श्रितानां[3] जनाना स तिग्मभानु न तापदायी । क्रूरोऽपि मर्त्य स्वकलत्र सान्द्रसम्बन्धभाजा जनाना न खलु तापदायी भवति ।

गोरूपधरां धरित्री पालयिष्यन् श्रीहरि यत आविरासीत् तत स्वकीयै अनुकूलै अमरै सह स गोपालकवशजोऽभूत् । जातकर्मादि वैदिकविधिज्ञा विप्रा अजन्मन तस्य श्रीकृष्णस्य जातकर्म[4] विधाय

1) आकाश श्रीकृष्णपादश्च
2) सूर्याचन्द्रमसो सहोदरत्व कविसमयसिद्धम् ।
3) छाया-अनातप सूर्यजाया च ।
4) जननानन्तर शिशो आयुर्वर्चोयशोबलसिध्यर्थं क्रियमाण कर्म ।

मधो[1] कुले अजात अपि त स्वमन्त्रमधुश्रिया माधव[2] चक्रु । तत कृतजातकर्मा कृष्ण सुवीक्षणेनैव मुहुः सृत मातु. स्तन्य पय मुधा स्यात् इति चिन्तयेव तत् पपौ । अजनिः एषः श्रीकृष्ण. पुरा जनन्याः स्तनपान जातसुखानभिज्ञ अतृप्तकल्प सन् स्तनक्षीर पपौ । नूतनेषु प्रियेषु कस्य हि तृप्ति ? नन्दवल्लभ.. यशोदाया. हृदि महत् पुण्य स्थिरीकर्तु प्रदेशार्थितया एव शौरि. तस्या उरोजदुग्ध पपौ । न चेत्सुतृप्तस्य कु ास्तदिच्छा । विभु. कृष्ण यशोदायाः अङ्कगत सन् अन्य स्तन प्रगृह्य स्वीयदृष्ट्या दुग्धदानफल अमृत तदैव दिशन् इव अम्बानन ईक्षमाण उरोजदुग्धमपिबत् । पूर्णस्यापि तस्य कृष्णस्य अपूर्णता मत्वा स क्षीरस्यतीति च कृत्वा तं प्रभु क्षीर पाययति स्म सा गोपी गो-पीन-मन्दिरा ।

ततः कदाचित् कंसस्य आदेशेन गोकुलस्थान् सर्वान् शिशून् नाशयितु पूतनाख्या राक्षसी स्वमायया रम्य रूप अवाप्य गोकुलं आययौ । परिस्फुरद्भि नूपुरै कङ्कणैश्च उज्वला लसन्नितम्बार्पितरत्नमेखला दृगन्तेन सस्तम्भितमानिमण्डला विलोलकुण्डला सा पूतना उर्वशीवासीत् । सा अम्बुजाक्ष कृष्ण अङ्कम् आरोप्य मुदा विषानुषक्त कुच अपाययत् । पूतनाया उच्चस्तनकुम्भचुम्बिमुखारविन्दः स श्रीहरि. तस्या.कुचयो बहिरेव वर्तमानं विष तत्कुचमुखवर्त्मना तस्या अन्तरङ्गे सुपूरयन्निव आबभासे । श्रीकृष्ण नारायणावतार । स च रमाया अधरोष्ठजामृत पीतवान् । पीतामृतत्वात् तस्य बलानुजस्य बालस्य पूतनाया स्तन्य विषयुक्तमपि त्रासकर नाभूत् । पीतामृतस्य मरणभय नास्त्येव खलु । मरिष्यत तम. प्रवेक्ष्यत पुनश्च भुवि आगमनरहितस्य भोजपते कसस्य धात्र्या तस्या पूतनाया कृत्य नास्तीति कृत्वा इव कृष्ण तां कसधात्री अवधीत् ।

1) मधुनामकयादवस्य कुले

2) मधो गोत्रापत्य पुमान् माधव इति व्युत्पत्त्यसम्भवेऽपि मधुन सम्बन्धी, माया धव इति माधव ।

Rarest Archiver

महात्मनः मारयितु प्रयुक्ता कृत्या प्रयोक्तृन् एव दुष्टान् मारयिष्यति । तथा दुष्टा सा पूतना श्रीकृष्ण मारयितु विषयुक्त पयः प्रादात् । तेन कृष्णस्य हानिर्न काचित् अपि तु मृता सैव पूतना । सा पूतना शिशवे कृष्णाय विषस्तन्य अपाययत् । तथापि स धैर्यवानेवासीत् । तद् दृष्ट्वा सा पातालस्थान् विषधरान् 'युष्माभि किमर्थं तीक्ष्ण गरल न दत्त' इति विभीषयन्ती अध पपात । अन्यथा श्रीकृष्णस्य विषपानं पूतनाया मरण इति एतत् नैव घटते । यदा सा पूतना मृता पपात-तदा तस्या हस्तचरणा शैलशृङ्गायिता आसन् विस्तारितात् तस्या आननात् दीर्घे दंष्ट्रे अदृश्येताम् । तस्या उदर शुष्कतटाकसदृश बभूव । घोररूपा कर्कशरवा सा ताटकेव अभूत् ।

पूतनाया. शरीरे द्वौ जीवौ आस्ताम् । एकस्ताटकारूपः अधमजीवः अपर ऊर्वश्याख्य उत्तमजीव. । मुकुन्दविद्वेषाख्यस्य विषस्य अनुषङ्गात् ताटका अधः पपात । ललनाग्रगण्या धन्या अन्या ऊर्वशी अमरलोकलोक जगाम । भक्त्या एव भगवान् प्रसीदति । द्वेषत मुक्ति. नैव भवति । प्रभु श्रीहरिः विद्विषतोऽपि यदि प्रसादकृत् स्यात् तर्हि इह भूमौ स्वैरमवतीर्य सुरारीन् रावणादीन् विजित्य तदीय भाग्य भक्तेभ्य विभीषणादिभ्य कुत प्रयच्छति । यदि हरि द्विषामपि मोक्ष प्रयच्छति तर्हि अरिष्ट. तृणावर्त वत्स इत्येतेषा केशी विनाशकाले तेषा अपवर्ग मार्ग. शुकाचार्येण भागवते कस्मान्न विवृत । 'अनादृतकृष्णपदा अध पतन्ति' 'न चेत्त्व यमस्यालयमेष्यसि स दैत्य. नैर्ऋत धाम चगाम इति तेषा विष्णुद्वेषिणा दुर्गतिरेवेरिता । विद्वेषमूलेन स्मरणेन हरेः तुष्टिर्भवति इत्यय पक्षोऽपि अवद्य न जहाति । कामधेनु हिंसार्थमालिङ्गयतः तरक्षोः चेष्टया तुष्यति किम् ? हे मूढाः ! द्वेषमूलेन स्मरणेन यदि पुण्यादिक स्यात् तर्हि गवा, विप्रशिखामणीना च हृतिः तदङ्गाना सस्पर्शन दर्शनाद्यैर्वा तदीयनामग्रहणादिभिर्वा पुण्याय भवेत् । अपिच, क्वचित् हरे. द्वेष दुरन्त वर्णयद्भि क्वचित् तमोनिदान अन्यत्र च ईशाप्तिविघ्न वर्णयाद्भि. आर्यैः शुकचार्यादिभिः द्वेषेणापि मोक्षो भवेदित्येतत् मत विप्रतिषिद्धम् । अद्वैतिन तार्किकस्य वा अपरवादिना राद्धान्ते वा ज्ञान विना

बन्धात् मोक्ष. नास्ति । तस्मात् ज्ञान विना द्वेषान्मोक्ष इतीदं आत्मीय वचोविरुद्ध भवति । किंच ज्ञानान्यमार्गाणा प्रतिषेधकर्त्र्या श्रुत्या, निर्णायकसूत्रकर्ता च सुलभः एष मार्ग न दृष्ट किम् ? अथवा तपस्याव्रतैः कर्षिताङ्गै मुनिभि न दृष्ट. किम् ? अवैष्णवानां यतनैरपि मोक्ष नास्ति । तामसवृत्तय. ते अध पतन्ति । एतेषा वचसां समानार्थकस्य भारतोक्तिव्रातस्य अमत तत् विष्णुद्वेषिणामपि मोक्ष इत्येतत् शुकाचार्यस्य नाभिमतम् । मुकुन्दस्य निन्दां सकृत् निशम्य मन्द पतेत् । अच्युत त निन्दन् पतेदिति किं वक्तव्य इति हि आलपत शुकस्य द्वेषत मुक्ति. इति हृद्य किम् ?

'आपोऽब्रुवन्' इति सनातनवेदवाक्यात् जडजलस्य वक्तृता भवति किम् ? तथा कसपूतनादीना मोक्षोऽभवत् इति शुकाचार्यस्य वचनान्यपि युक्तियुक्तेषु मानान्तरेषु उदितमनोमधुरार्थभाञ्जि । ग्रहेण आविष्टे कलेवरे कृताभिमानौ द्वौ चेतनौ यथा स्त. तथा कसादीनां शरीरसस्थौ शुभाशुभौ द्वौ सुखदुःखभाजौ जीवौ वर्तेते । श्रीहरि द्विषन्तं दितिज एक विहाय हरे प्रियस्य असुरशब्दवाच्यता कथ स्यात् । क्वचित् द्विषन्तोऽपि अर्जुन–इन्द्रपुरोगमा दैत्यतया निरुक्ता किम् ? एषा शिशुपालादीना स्वनिष्ठ कमपि दुष्ट दैत्य विहाय सनकादीना उग्रशापात् न असुरत्वम् । यत पुरा विश्वामित्रणाभिशप्ते अपि कल्माषपादाख्ये नृपे तदेतदसुरत्व किङ्कराख्यस्य दैत्यस्य योगादभूत् । तवाभिप्रायेऽपि चैद्ये जयनामक. सज्जीव· तथा दन्तवक्त्रे विजयाभिधान सज्जीव· वर्तते। तथाच निरन्तर द्वेषफलस्य मूलभूतः दैत्योऽपि युक्तिबलेन सिध्येत् । यदि चैद्ये दितिजस्य कस्यचित् आवेश न चेत् तर्हि जयरूपस्य तस्य वैरात् मोक्ष इति नास्ति । किन्तु वैकुण्ठद्वारपालस्य तस्य परिचर्यया एव मोक्ष. सञ्जात. शिशुपाले सेवातिविधुरः दैत्योऽस्तिचेत् तर्हि तद्बलादेव एकस्मिन् शरीरे जीवयुग्म सिद्ध्यति । करुणाम्बुराशि श्रीकृष्ण विद्वेषिजीवकृतसङ्गमपि स्वभक्त व्यमोचयत् । तद्रहितान् भक्तजनान् मोचयतीति किमुवक्तव्यम् इति अनेन प्रकारेण 'यातुधान्यपि सा स्वर्गमवापजननीगति' इत्यादिषु कैमुत्य

ऊह्यत । भगवन्तम् द्विषतां द्वेषाभिवृद्धि विधातु व्यास. इद प्रमेय स्पष्टं नोचे । स्पष्टकथने द्वेष न कोऽपि कुर्यान् । तथा सति भक्तजनैरगम्यं तम. क आप्नुयात् ?

स्वानन्ददायि शिथिलीकृतमत्तमायि मानौघशोभि उज्झितदोषजात आनन्दतीर्थमत– तेन मम दुर्जनपुञ्जत अभी. कवितोल्लसद्भू ईदृशी मति. अभूत् ।

शकटासुरवधः

तत पूतनावधानन्तर नन्दगोप शिशुभ्य द्वादशेऽहनि करणीयं गृहाद्बहि सूर्यदर्शनरूप उपनिष्क्रमणाख्य सस्कार कृष्णस्य कर्तु इयेष । तत्तु निष्क्रमणकर्म गृहाद्बहिरपि दैत्यान् जिघासु श्रीकृष्ण स्वाचरणानुरूपमेव अमस्त । तदा प्रभृति उद्धताना दैत्याना विघातस्य दीक्षा कृष्णस्य बध्नन् इव स पिता नन्दगोप निज बन्धुवर्ग समाहूय सुत श्रीपति अभ्यषिञ्चत् । तस्मिन् निष्क्रमणोत्सवे समागत सुहृत्सञ्चय गन्धमाल्यादिना अर्चयन्ती सती मुदिता यशोदा सुत श्रीकृष्ण यदा न सस्मार तदा कपटी शकटासुर तं निहन्तुकाम अभिससार । मरिष्यमाण कंसः समस्तं स्वकीय धनधान्यादिभाग्य साधनभूतेन अनेन शकटेन, रवेन सह नेष्यतीति भिया इव मुरारि पूर्वमेव त शकट सुकोमलेन पादेन बभञ्ज । तत श्रीकृष्णपादाभिघातानन्तर स दैत्य शकट. कपट अपहाय पुनः स्वरूपधारी सन् अविर्बभूव । श्रीकृष्णपादाभिघाते मायामपहाय स्वरूप धारितव तस्य उचितमेव । सकलमायानिवर्तकस्य विष्णो पदसम्बन्धसमये सा माया कथं वा जीवितुमुत्सहेत । स. शकट कृष्णपादाभिहताखिलाङ्ग निर्गतासुर्बभूव किल । स्वजात्ययोग्यस्य रथाङ्गस्य धारणेन[1] स. शकट. ममार इति मन्येऽहम् । दैत्यानां विनाशकाले विरुद्धबुद्धिर्भवति । अत एव एकवार विष्णुपदेन आहतोऽसौ दैत्य पुनः ऊर्ध्वगमने विष्णुपदस्य (आकाशस्य) सङ्गभयेन अधः पपात ।

1) असुरजात्ययोग्यचक्रधारित्वात् ।

रोम्णां हर्षणकारिणि श्रवणत पापौघध्वंसिनि
प्रेम्णा चिन्तयता विचित्रविमलश्लाध्यार्थसन्दायिनि ।
सञ्जाते भुवि रुक्मिणीशविजये सद्वादिराजोदिते
सञ्जात सुरमण्डलीषु महित सर्गो द्वितीयो मुदाम् ।

तृतीयः सर्गः

तृणावर्तवध. –अथ शकटासुरवधानन्तर अपर. असुरसमूहस्य असुरिव वातशरीरधारी उद्धत तृणावर्त श्रीकृष्ण जिघासु आजगाम । स कृष्ण प्रगृह्य स्वनाशस्य योग्यस्थलकाङ्क्षयेव[1] गगन जगाम। स दैत्य यशोदासुत आकाशेऽगूहयत् । यथा कुवादी दुस्तर्कैं गवां आवासे वसता सतां[2] अमल चक्षु[3] मुष्णन् मिथ्याज्ञान विस्तारयन् तत्सज्जनाना वाक्यश्रवणमपि असह्यै रवै निवारयन् आगमान्तललनागर्भं उपनिषदभिप्रेत प्रमेय गूहयति तथा अयमपि दैत्य वातासुर सूक्ष्मरेणुभि गवा आवासे वसतां सता[4] अमल चक्षु मुष्णन् धूलिभि तमो विस्तारयन् नद्व्रजस्थजनानां वाक्यश्रवण कठोरकुटिलध्वानैः वारयन् श्रीकृष्ण आकाशे आच्छादयत् । स कृष्ण. खलस्य तस्य उद्गमन दूरात्पतितस्य तत्तृणावर्तस्य शरीर गिरीन्द्रसदृशया आत्ममूर्त्या सञ्चूर्णयितु धियेवाङ्गीचकार । कृष्ण स्वकीये हृदि संस्थाप्य वातशरीरधारी स तृणावर्त. व्योम्नि परिभ्रमन् भ्रान्तचित्त गर निपीय[5] सरोवरबुध्या अभ्र प्रविशन्निव आसीत् । मुरद्विषं मूर्ध्नि धृत्वाऽपि विष्णुपद प्रवेष्टु तत्वरया गतोऽपि असौ अमरारि:

---

1) स्वस्य वायुरूपत्वात् वायो आकाशे लयस्य श्रुतौ कथितत्वात् ।
2) सच्छास्त्रवर्तिना सज्जनाना
3) चक्षु ज्ञानम्
4) गोकुलस्थजनाना
5) कृष्णस्य कृष्णवर्णत्वात् तृणावर्तमृतिहेतुत्वाच्च गरसाम्यम् ।

Rarest Archiver

अधस्तात् पपात । तदुक्तम् । अयोग्यकामस्य कथ न पात[1] । स वातरूपी दितिजः मुकुन्दभरासहिष्णु भूमौ निपपात । यद्यपि वातस्य जवः अधिक तथापि कुक्षिस्थाखिललोक विश्वम्भर परमात्मान कथ उद्विभर्ति ? प्रभो श्रीकृष्णस्य ओजसा सम्यग्गलग्रहणेन उद्भ्रान्तचक्षु स दैत्यः पूर्वोक्तस्य चक्षुषा चौर्यस्य फल[2] जगाम । रज समूहेन यत्तम विस्तारित तत्फल विष्वक्सम्भ्रमणेन विभ्रान्तमूर्धा सन् प्राप्तवान् । साधूनां हृदयस्य आतिदानफलित क्लेश स प्रपन्न । यन् कृष्णमातु यशोदाया. स्तनेन पातकर स खल वातासुरः अधुना पाषाणपृष्ठेऽपतत् ।

यशोदाकृतकृष्णलालनम् – यशोदया श्रीकृष्णार्थ एका दोला निर्मापिता । तस्याश्च दाम हेमनिर्मितम् । तत्र च वितानात् मौक्तिकमाला शिशो. सन्तोषाय लम्बमाना आसन् । एतादृशी दोला बाल हरि अधिरोप्य सालोक्यसौख्यमलभीष्ट हृदा यशोदा । दोलायाः विलासेन चलितै अलकैः बालस्य तस्य फाल विलसित अवर्तत । शुचिस्मितामृतरसेन आस्य विशोभित बभूव । क्वणद्भि कनकनूपुरै तस्य पादौ सुन्दरावास्ताम् । तमेन श्याम सुत समीक्ष्य समय शम्मय तेने सा यशोदा । अङ्गुलिदलैः श्रीकृष्णस्य गण्डं लघुचालयन्ती, तेन सञ्जातमन्दस्मितस्य तस्यानन परिरम्भयन्ती, सान्द्रस्तनस्नुतपय. त किल पाययन्ती सा नन्दस्य राज्ञो अहर्नयन्ती अभवत् ।

मर्त्यै.अमर्त्यै. दितिजैरपि अभेद्य ब्रह्माण्डभाण्ड श्रीकृष्णस्य नख ग्रा देव भिन्नम् ।[3] तादृश स्वाङ्गुष्ठपुष्टसुभगाङ्गुलि स. शिशुप्रकृति. शयानः संङ्गृह्य चुम्बति स्म[4] ।

कृष्णयशोदासवादः–

यशोदा– निद्रामाश्रय ।

---

1) असुरस्य विष्णुपदप्राप्तिकामना अयोग्या ।

2) शर्कराप्रक्षेपेण चक्षुरपहारपरिपाक

3) वामनावतारे आकाशस्थ पद ब्रह्माण्डमच्छेदयत् ।

4) देवासुरैरसाध्यकार्यकरणात् तन्मानयन्निव ।

Rarest Archiver

कृष्ण – कि तदाश्रयफलम् ?

यशोदा– भुक्त व्रजेज्जीर्णताम् ।

कृष्ण – निद्रा का अम्ब ?

यशोदा– निमीलिताक्षयुगल प्राज्ञ[1] यदालिङ्गति ।, अस्त्वेव त्विति श्रीकृष्ण मुद्रितात्मनयन स्वागमेव समालिङ्ग्य तदनु मातः मया भुक्त सर्वं जीर्णम् । अथ पुन क्षीरादिक दिश इति जननी पृच्छन् कृष्ण भक्तान् अवतात् ।

कृष्ण – मात , गायसि कि सदा[2] जलनिधौ शेषाङ्गसशायिनम् ।

यशोदा– तात; असौ निद्रया परिव्रत दद्यात् तवापीति ताम् ।

कृष्ण – एव असौ निद्रावृतश्चेत् त्वदीयमखिल गदित तत्कर्णदेश कथ याति ?

इत्यनेन प्रकारेण स्वस्य परमात्मन विनिद्रत्वमत प्रतिपादयन् यशोदासुत पायात् ।

दोलान्दोलनेन लोलाङ्ग्य नीलोच्चलत्कुन्तला दोलाया इतस्तत सञ्चालनेन स्रस्तदुकूलहारवलया मौलिस्खलन्मल्लिका क्वणदङ्घ्रि-भूषणगणा ईषच्चलत्कुण्डला मृगदृश ता बाला गोप्य लोलत्कङ्कण भूषितपाणिपद्मेन वृतया दोलया सह बाल श्रीकृष्ण व्यालोल कृत्वा प्रिय स्वसमीप निन्यु । ये जना विठ्ठलसेवका शुभधिय तेषा श्रीकृष्ण लभ्य इति ज्ञापयितुमिव त रज्ज्वाकर्षणकाले आन्दोलनकर्त्र्या गोपिकाया समीप प्रापयन्ती, ये वा विठ्ठलसेवका न भवन्ति तेषा स दूरग इति शिक्षयितु एन श्रीकृष्ण रज्ज्वाकर्षणत्यागसमये दूर कुर्वन्ती सन्मणि मण्डिता स्वानन्दमूर्ते शिशो श्रीकृष्णस्य सा दोला विजयते । स्तनोत्थ-दुग्धेन एव कृष्ण सुतृप्त निरूपयन्त्या मातुर्यशोदाया अस्मात् स्वल्पात् स्तन्यात् उदारदेहस्य मम न तृप्ति इति शिक्षयन्निव स हरिः स्वमुखे जगन्ति प्रदर्शयामास । श्रीकृष्ण स्ववदनद्वारा स्वोदरथ समस्त प्रपञ्चं

1) प्राज्ञनामक हृदिस्थित परमात्मनम् ।

2) दोलान्दोलनसमये नियमेन

प्रदर्शयामास । सगृहा सनाथा यशोदामपि तत्र लोकयित्वा जनन्यां स्थितां पुत्रमति[1] अखण्डयत्, विश्वपितृत्वबुद्धि च तस्यां अयोजयन् । "पित्रादय. मम नामकरण न कुर्वन्ति" इति नून कोपेन स बाल कृष्ण पूतनादीन् विनिहत्य जठरे स्वशक्त्या विश्व मातु प्रदर्श्य बहूनि नामानि बभार ।[2]

श्रीकृष्णस्य नामकरणम्

अथ यादवाना पुरोहित गर्गाचार्य नन्दगोपस्य गृह आगत्य विनतौ तौ सुतौ नाम्ना राम-कृष्णौ चकार । 'श्रीकृष्णस्य गुरु गर्गाचार्य इति तद्गुरुत्वकीर्त्या चकित· तत्पापपरिहारार्थ भगवत: नाम राम कृष्ण इति जजापेति मन्येऽहम् । श्रीहरि केशवनारायणादि अनेकनामधेयवान् । अथापि कृष्णसज्ञा गर्गदत्ता अवाप्य तुष्ट, किलाभूत् । तथाहि शब्देषु बहूदितेषु प्रियेरित प्रीतिकरो हि लोके ।

" यथा कृष्णपक्ष चन्द्रमस क्षीणकल करोति तथा अयमपि सपत्नपत्नीवदनोडुराज क्रमेण शत्रून् हत्वा विगतकान्ति तनोति । अत. परमात्मन: कृष्णसज्ञा गुणोचिता । यतोऽसौ ईश:स्वसन्दर्शनत नराणां वराङ्गनानां सुराणां चारणाना च सर्वाणि मनासि अपकर्षति । ततोऽपि त सन्तः 'कृष्ण' प्रवदन्ति ।[3] विष्णो: कृष्णकेशात्मकत्वाच्च 'कृष्ण:' इति तस्य नाम युक्तम् । "कृषि: भूमि: तस्यामपि ण. सुखरूप कृषे. भूमे: ण. सुखरूप, कृषे भूमे· ण. सुख यस्मात्स" इति वा व्युत्पत्त्या पृथ्वीतलसंस्थितोऽपि सुखी, धरण्या: सुखदायकश्च[4] इति हेतोरपि त कृष्णं प्रवदन्ति । दैतेयकदम्बाख्यकक्षचयस्य विध्वसविधौ अय मुरारि: यत: वनाग्निमन्वेति लयाग्निकल्प ततोऽपि एन कृष्ण गायन्ति ।[1]

---

1) 'कृष्ण मम पुत्र' इति बुद्धिम् ।

2) पूतनाहननात् पूतनाघातक शकटवधात् 'शकटासुरभञ्जक', तृणावर्तहत्यया तृणावर्तनषूदन: जठरे विश्वप्रदर्शनात् विश्वम्भर इत्यादि बहूनि नामानि बभार ।

3) कृष् आकर्षणे इति धातो ।

4) भूभारहरणेन सुखद: ।

व्रजाङ्गनानां स्मरतां मुनीनां अभेद्यहृद्यप्रणयःश्यदाम्ना निबद्ध-मृद्वङ्घ्रिसरोजयुग्म श्रीकृष्ण. दोर्भ्यां शुभजानुयुग्भ्यां चचार[2]। य श्रीहरि. अनेकलोकानुदरे विधाय लयाम्बुमध्ये शेते स्म स. अधुना शिशुरूप कृशोदर सदशयितु सलज्ज. उदर अध.कृत्वा जानुचरो बभूव । जानु-चर. अङ्घ्रियुग स्वचरणस्मरण कुर्वतां मुनीन्द्राणां मनसा साक कर्षन् व्रजस्त्रीदृशा[3] जम्बालेन च नीलनीलसुतनु लोलालक श्रीमुखः कृष्णः यशोदां 'अम्ब अम्ब' इत्युदीर्य अङ्काधिरूढ सन् स्तन पिबति स्म, किं वाऽतप्यत सा तपोऽस्य जननी यस्येदमीदृक् फलम् ।

श्रीकृष्ण अन्यै· कथ्यमान स्वनिर्गुणत्व नानाविधवीर्यसौन्दर्यादि-गुणोदयै निरस्तवान् । व्रजस्थजनानां कृष्णसन्निधानेन निष्पन्नद्रव्यै जगद्-बाध्यता निराकरोत् । निजतेजसा वैरूप्य अच्छिनत् । निरुपमैरङ्गैर्निरा कारता निराकृतवान् । निर्मलधियां ब्रह्मनारदादीनां नित्यार्चया पर-ब्रह्मण स्वस्य नीचैक्य निरस्तवान् । दिग्भ्य. भिन्नं अम्बरं (गगन) अस्तीति यत्तार्किकमत तद्धिक्रियार्थं दिग्वस्त्रतां दीपयन् गोकुले विठ्ठल. शुशुभे ।

गोपीगृहाङ्गणतले रणदङ्घ्रिवेषः गोवत्सकै सह चरन् रजसा अनुषक्त देहाभिमानरहितै दिवि सस्तुवद्भि दयितासमेतै देवै दृश्य-विभव, शार्दूलरम्यनख[4] रञ्जितकण्ठदेश सासूयानां दानवाना वन्नाय-मानाना नाशने हुताशः हार-स्फुरत्कङ्कण-नूपुरश्री हासप्रकाशितदिशा-पटल नव्यस्खलद्वचननन्दितसर्वलोक सुव्यक्तकुन्तलतति सुभगाग्रगण्यः

---

1) व्यासार्जुनाग्निहरिकोकिलकाकशूद्रतामिस्रपक्षकल्निनीलगुणेषु कृष्ण –भास्कर ।

2) बद्धचरणो हि जानुभ्या हस्ताभ्या च गच्छति खलु ।

3) स्त्रीणामपाङ्गस्य नीलत्वात् तत्सम्बन्धेन नीलतनुत्व हरे ।

4) बालस्य दृष्टिदोषपरिहारार्थ कण्ठे शार्दूलनखरा निक्षिप्ता ।

दिग्वस्त्रदर्शितकटि दिननाथदीप्ति हृदयङ्गम स शिशु. कृष्ण. सदा मे हृद्गोऽस्तु ।

अथो "नारीणा गोपीनामपि मोक्षद , अनुष्ठिततपसा विशुद्धात्मना अस्माक तु मोक्ष किमिति नो दद्या." इति पृच्छता योगिना कोपवशगतानां 'मया पूर्वं तासा क्षीर मुष्ट अस्त तासा क्षीरसमुद्र दास्यामि ।' इति उत्तर दत्वा तेषा कोप विधुन्वन्निव गोपस्त्रीनिकरस्य स्व दुग्धजलधि दातुकाम हरि तद्गेहस्थितदुग्धमण्डल मुष्णन् व्रजे चचार । हरौ पयो मुष्णति कापि गोपी तुष्टा । किन्तु मर्काय ददति सति अमर्ष दधार । तथाहि । अनन्ययोग्य कृष्णभुक्तशेष हरन्त उद्वीक्ष्य कथ न मन्यु । एकेन करेण ध्वनिनिरोधाय घण्टां प्रगृह्य अपरेण च करेण पय पात्र प्रगृह्य अन्येन करेण पय पिबन्त पुनरन्येन च मित्राणि तर्पयन्त हरि निशाम्य कापि सुविस्मिता गोपी तूष्णी बभूव ।[1] अन्या गोपाङ्गना करस्थभास्वन्नवनीत मुकुन्द विभीषयन्ती स्वमौलिमालाच्युतपुष्पपुञ्जै ईशितु: तस्य पादानि[2] अर्चयन्तीव तमन्वगमत् । धीर: कृष्ण. दधिचौर्ये क्रियमाणे कस्याञ्चित् अधिक्षिपत्या तस्या. पुण्येन साकं दधीनि चुचोर । श्रीकृष्णे पय· पिबति सति 'कृष्णार्पणमस्तु' इति आनतायां अगण्यपुण्याख्यधनानि प्रदाय दानी स· अचूचुरत् । पृथ्व्या विनिन्दिताऽपि तस्करता यशोदातनयस्य भूत्यै अभूत् ।[3] एतत् युक्तमेव । लक्ष्मीनयनान्तभाजां असह्य दोषोऽपि गुणाय भवेत् ।[4] गोपबाल: कृष्ण: स्वकीयचौर्यं नितरां गृणद्भ्य[5] विमुक्ति ददौ किल । चौर्याख्य स्वममलिपतां जनानां फलदानेन वाग्बन्ध प्रचक्रे इति अह प्रतर्के । य: हरि बाल दिवानिश स्वभक्तपुञ्जार्जितपापवृन्द हरति स्म स: गृहे गृहे दुग्ध अमुष्णात् । तथाहि कस्त्यक्ष्यति सिद्धविद्याम् ।

गोपीकृष्णसवाद:

गोपी– हस्त: किं नवनीतभाजनमुखे न्यस्त· त्वया श्रीपते ?

---

1) करचतुष्टयेन कार्यचतुष्टय कुर्वन्त दृष्ट्वा विस्मिता बभूव ।

2) पादचिन्हनि 3) कृष्णचौर्यस्मरणेन अन्येषा पापनिवृत्तिर्भवति ।

4) कृष्णस्य लक्ष्मीपतित्वात् । 5) कृष्ण नवनीतचोर इति वदद्भ्य.

कृष्ण – तन्वि, मृगाक्षि ! कोमलहृद. अस्य नवनीतस्य दृप्तप्रस्तरसमितातिकठिनावस्थान्तराया तव गृहे स्थिति. न युक्ता । तत् मृदुनि मम चित्ते प्रीत्या स्थापयितु मया हस्त. नवनीतपात्रे न्यस्तः" इत्युक्त्वा हसन् असौ श्रीकृष्ण. पातु ।

गोपाङ्गना– "यस्य श्रीचरणाम्बुजेन शकट सञ्चूर्णिताङ्गोऽभवत् तस्य तवाङ्गे मृदुता न युक्तियुक्ता"

कृष्णः– "बाल्ये शिशु मां वक्षसि अधिरोप्य सनर्तयन्त्या तव स्थूलोरोजसमागमेन तत्काठिण्य पादयो सञ्जातम्[1] इति वदन् शिशु स अस्माक प्रौढि दद्यात् ।

गोपी– "अङ्ग, कृष्ण कितव भवन्त अद्य बध्नामि"

कृष्ण – "प्रिये, साध्य तत किम् ?"

गोपी – "कपटसन्नद्धे त्वयि निबद्धे दुग्धानां परिरक्षणम् ।"

कृष्ण – हे मुग्धे, पद्माक्षि, विरसा त्व मां मुञ्चसि । परन्तु स्निग्ध[2] तद्दुग्ध न मां त्यजेत्– इत्युदीर्य अबलां वशयन् सः मम बुद्धि दद्यात् ।

ततः क्वणन्नूपुरशोभिपादाः विदग्धैरनुमेयमध्याः शुचिस्मिताः कुण्डलशोभिगण्डा व्रजाङ्गनाः तस्य कृष्णस्य चौर्यादिचरितानि मातुः यशोदाया न्यवेदयन् । "हे यशोदे, यदा ते आत्मजः पात्राणि विभिद्य दुग्ध पिबति स्म तदा उत्सर्पितदीय-दन्तदृगन्तकान्ति हृदि तर्कयन्त्या मम मन्यु. न आसीत् ।" "सखि यशोदे, पय प्रमुष्णन् ते अय सुतः भर्त्सनार्थ समागताना गोपीना अस्माक चेत अपहृत्य (चेतसोऽपहृतत्वात् स्तम्भीभूतानामस्माक) कण्ठ अवलम्ब्य स्वप्रयत्नेनासाध्यानि दूरस्थितानि दुग्धपात्राणि स्वैर जिघृक्षति ।" "हे कृष्ण, यदि त्वं ईदृश चौर्यादिकर्म करोषि त्व नन्दस्य सुतः न किन्त्वन्य एव" अस्माभि इतीरते "हे यशोदे हन्त स केवल हसन्[3] न बहूनि अनिष्टानि तनोति ।"

---

1) न तु मम हृदये ।   2) स्नेहयुक्त इति ध्वनि ।

3) अजन्मज कृष्णस्य न नन्दपुत्रत्वम् । अत एव हास ।

कृष्ण "इद, दुग्धादि देवस्य समर्पणार्ह," इतीरितेऽस्माभि "तर्हि अहमेव देव" इत्थ[1] आभाष्य स तदेव भुक्ते ।" हे देवि यशोदे तव पुत्रः न देवभक्त " "हे देवि, अय कृष्ण गृहे गृहे नवनीतदुग्धदधीनि सर्वाणि अप हृत्य भुक्ते । तथापि तव सुत तृप्ति नैति । अस्य कुक्षौ भूतानि[2] वसन्ति किम्?" "त्व इहास्मद्गृहमेत्य बद्धान् वत्सान् न मुञ्च" इतीरिते हे पुण्यपदे यशोदे, ते सुतः स्मितोल्लसद्वक्त्र ममाय स्वभाव इति उत्तरमदात्"[3] "अङ्ग उलूखल इत कस्मात् नयसि ?" कृष्ण – स्निग्ध दुग्धस्य पात्रादधः स्थापयितु । गोपी– "ततश्च कि"– इति प्रोक्ते प्रभुः य "हे मुग्धे अग्रसुजातसुस्मितपय पात्राननस्य तव मध्यस्य उपमां वीक्षयितु इति अगदत्–"हे यशोदे तव सुत दुष्कर्मणां गूहने पटुः ।"[4] "सखि यशोदे तव सुत क्वचित् करेणैव दुग्धभाजनं समीक्षते । क्वचित्पादेनैव पृष्ठत समागता अस्मान् पश्यति । एतादृश तव बालकः विश्वतश्चक्षुरिवास्ति ।[5] त उलूखले यदि बन्धयाम तदा बालः उलूखलमेव नयेत् । गृहस्तम्भवरे निबद्ध. असौ कृष्ण ध्रुवम् गृहाणि पातयितु समर्थ ।" "अस्य विश्वम्भरस्य हि बन्धनाय दामानि सम्पाददयितु क ईश ? यदि कथचिद्बद्ध तर्हि मध्ये विलीना वयमेव हि बद्धा. ।[6] "हे यशोदे, अहो तवाय बालक गृहे गृहे अत्युष्णमपि दुग्धं पिबन् कदापि तापं न लभते । किमस्य वक्त्रे जलराशिरास्ते ?" "तव शिशु दूरस्थित

1) स्वस्यैव देवत्वात् देवभक्तत्व नास्त्येव ।
2) अस्य कुक्षौ ब्रह्मराक्षसादि भूतानि वसन्ति किं इति भाव तत्व तु पञ्चमहाभूतानि तस्य कुक्षौ वसन्त्येव ।
3) बद्धाना मोचन् भगवत्स्वभाव ।
4) उपर्यधोविस्तृतस्य मध्ये कृशस्य उलूखलस्य उपरि हरिद्रादिरञ्जित पय पात्रे निहिते उपरिस्थितमन्दहासोपेतकुङ कुमासक्तमुखस्य तव मध्यस्य उपमा भविष्यतीत्याह ।
5) विश्वतश्चक्षुरुतविश्वतोमुख इति श्रुति ।
6) विश्वम्भरस्य बन्धने तत्रस्था वयमपि बद्धा एव । नित्यमुक्तस्य खलु तस्य नास्ति बन्ध ।

दुग्धभाण्ड विलोक्य उलूखलाद्यै गृहीतु यतते । क्वचित् एधते एव । अहो किमेष गूढाष्टमहाविभूति ?" "हे यशोदे तव विलोलनेत्र पुत्ररत्न प्रति अस्मद्वक्त्रान्न निष्ठुरा वाक्समुदेति । ताडयितु न करः नोदेति । ध्रुव सुतस्ते जगता नियन्ता ।" तव एष बाल. अन्धकारार्पितमपि दध्य मत्र स्वकीयया भास्वन्नयनान्तलक्ष्म्या निरीक्षते । किमेष तव बाल-लोचनयो पुष्पवन्तौ बिभर्ति?" "यशोदे मन्त्रात्मा स कृष्ण पिहित चेत् कवाट आशु विवृत कर्तु समर्थं, नित्यविमुक्तिद स अस्मत्कृतबन्धन वृथा रचयितु समर्थ । कठोरवचसामस्माक विस्मापनं कर्तु अय जगत् वक्त्रे दर्शयितु समर्थ कर्हिचित् बद्धश्चेन् तद्वटपिन [1] पाटयितु समर्थ हे देवि वय कि कुर्म: ?" इति भाविविमुक्तिबीज सुराधिराज श्रीकृष्ण सकीर्त्य व्रजस्त्रिय विलोलनेत्र त अवेक्ष्य अनेकभावा वाच. शनै. अलचक्रु: स्म ।

सदा सदानन्दसुतृप्तवृत्ते मम भवद्गृहस्थै नवनीतमुख्यै: वस्तुभि: एषा मृत् समा इति शसन्निव स्ववश. अखिलेश अय कृष्ण: मृद जघास । मातु. यशोदाया समक्ष गोपीभिरापादितचौर्यकर्मा त्रिलोक्यां महित वासुदेव अत्र मृद्भक्षणे मम चोरत्व न कथयन्ति किल इति ज्ञापयन्निव आक्रोशेनेव-मृत्स्नामादत् । । श्रीकृष्ण मृद समास्वाद्य आस्यदेशे मातु यशोदाया जगन्ति प्रदर्शयामास किल । रसया (भूम्या) [2] सुपात्रे कृष्णे प्रदत्ताऽसौ मृत् सहस्रधा फलितेत्यह मन्ये ।

रोम्णा हर्षणकारिणि श्रवणत पापौघविध्वसिनि
प्रेम्णा चिन्तयता विचित्रविमलश्लाघ्यार्थसन्दायिनि ।
सञ्जाते भुवि रुक्मिणीशविजये सद्वादिर जोदिते
सञ्जात सुरमण्डलीषु महित सर्गस्तृतीयो मुदाम् ।।

---

1) अनेन एष्यद्यमलार्जुनभङ्गादिक सूचितम ।
2) भक्तिरसभरितयेति ध्वनि

चतुर्थः सर्गः

प्रभु श्रीहरि वैराग्यभाग्याना प्रिय । ज्ञानानुमोदी । भक्तैकवश्यश्च । एष एकदा प्रात दधिमथनासक्तां जननी मन्दमुपाजगाम । दधिमथनकाले सव्यदक्षिणत. अङ्गचलनेन केशबन्धस्य श्लथनात् कबर्या. प्रसूनानि उद्गच्छन्ति स्म । सा सद्भि गीतस्य कृष्णस्य यशो गायन्ती आसीत् । दध्नो निर्मथनोद्यत नवनीत कृष्णायार्पयामीति समुदित-प्रेमाश्रुधारा अभवत् । एतादृशी जननी हरिरुपाजगाम । अङ्कोज्झितेन्दु-प्रतिमानन त कृष्ण अङ्क समारोप्य मनोज्ञाङ्गगत पङ्क मुहुर्मृजन्ती सा यशोदा क्षुधार्तशङ्का स्तनक्षीरमपाययत् । तदनु दहनस्य वेगात् उत्स्रवत क्षीरस्य लोभात् सा यशोदा त मधुजित तत्रैवापहाय त परमात्मा इति अजानती पय.सरक्षणार्थ जगाम । हरिरपि स्वसेवां परित्यज्य गतायै यशोदायै हानि प्रदातु पाषाणखण्ड क्षिप्त्वा दधिभाण्ड व्यभजत । स कृष्ण जनन्या अदृष्ट सन् स्वनीत नवनीत बिडालाय ददौ । नूनं देव धनलोभभाजा धनानि अनर्हत्सु अतिदिश्य क्षिणोति । अथो माता त अदृष्ट्वा क्व गत इति विचारभारार्पितमानसा विमर्शलभ्यं त अनुव्रजन्ती, परानुयात्रार्जितपुण्यपात्री यशोदा अगम्यमपि त अस्पृशत् । यस्य नाम स्मरतां जनाना असह्य दण्डपाणिर्यमोऽपि बिभेति तं श्रीकृष्ण विश्वसृजां ब्रह्मादीनामपि प्रभु नन्दराज्ञी किल गृहीतदण्डा सती अभीषयत् । यस्य रोमकूप एव अजाण्डकोट्याश्रय त कृष्ण आत्तकोपा किल नन्दगोपी बद्धुमियेष । अहो रोषरुद्ध मन ,अमरानुभावमपि दु साध्यमिति न हि मिनोति । कृतागस कृष्ण बद्धु माता यशोदा नैव शशाक किल । श्रीकृष्णरम्योदरमध्यसस्थाना विमुक्तानां[1] शक्त्यैव तस्य बन्धो नासीदिति तु मम प्रतर्क । यशोदा कृष्ण बद्धु आगता । किन्तु आनीत दाम किञ्चिदेव ऊन बभूव । इत्थ स्वप्रसुवं मुहु साशां विधातु ईशत्वमपि [2] आत्मगत विधातु तदात्तदाम स्वात्मनि किञ्चिदून दर्शयन्

1) बन्धोज्झिताना

2) कर्तुमकर्तुमन्यथाकर्तुं सामर्थ्यरूपस्य ईशत्वस्याभावे तदात्तसकलदाम्न किञ्चिन्न्यूनीकरणायोगात् ।

बन्ध रुणद्धि स्म । "अयं शिशुरपि विस्मापनशक्तियुक्त कृष्ण. न मे सुत. किन्तु साक्षाद्धरिरेव इति प्रबोधे अङ्कुरिते सति नन्दस्य पुरंध्री बुधैः प्रणयाख्यरज्ज्वा निबद्ध त बलानुज बबन्ध । असाध्यभागस्थितदुग्ध-चौर्ये विशारद त विनिबध्य तस्य चौर्यकार्ये सहायभूतस्य उलूखलस्यापि मध्य सा माता बबन्ध । श्रीकृष्णः कार्यवशात् जनन्या अनाहि । असौ तु उलूखलेन साकमेव प्रतस्थे । किं कर्तु ? स्वकयो नलकूबरमणिग्रीवयो· अनिष्ट उलूखलेन घृष्ट विधाय अभीप्सित दातुमिव । स्वेन असज्जनेषु आचरिता उग्रशिक्षा स्वभक्तपुञ्जेषु च कृता रक्षा नभसि गातु उभौ चिकीर्षन्निव सः द्वौ पादपौ विपाटयामास । स्वभृत्य भीमानुज प्रियं अर्जुन दयया अद्वितीय विधित्सुरिव देव कञ्जायतमञ्जुनेत्र कृष्ण अर्जुनसञ्ज्ञितौ तौ भूरुहौ बभञ्ज । कृष्णस्य अङ्गे स उलूखलरूप. बन्ध आसीत् । तत्प्रतिबन्धपुण्यबलेन सिद्धौ ततः वृक्षशरीरात् उत्थितौ नलकूबरमणिग्रीवौ वृन्दावनवल्लभ त कृष्ण प्रशस्य मनसि त स्मरन्तौ स्वलोकमीयतु ।

स्वस्य सन्निधानाद् नन्दव्रज महापुरीसाम्य प्राप्तम् । अत. वन-प्रिय असौ रमेश मनोज्ञवृन्दावन एव वास चक्रमे । विरोधिन. दैतेयाः तृणावर्तादिय कृष्णेन संहृता. किल । तेन कृष्णबान्धवा नन्दादय· निर्भय गोकुले एव सवस्तु चकमिरे । प्रभुः कृष्ण वृन्दावन जिगमिषु· स्वप्रियाणां तेषा साध्वसाय रोम्ण. अनेकान् वृकान् ससर्ज । "इह गोकुले स्वकीयान् दैत्यान् निहतान् निशम्य दैत्या स्वेषा पराजयहेतुस्थानबुद्ध्या गोकुले मां न प्रतियान्ति"-इत्थ आलोच्य स विभु स्वकीयान् वृन्दावन-मेव गन्तु न्ययुङ्क्त । कृष्णस्यादेशानुसार सर्वेऽपि अरण्यालया गोपा स्वकीयान् भाण्डादिभारान् शकटश्रेण्यामधिरोप्य गोधनै वृद्धै. मुग्धलल-नाभि बालादिभिश्च सयुता. वीणावेणुमृदङ्गशृङ्गानां निनदै सम्पू-रिताशा· सन्त बलराम श्रीरमणाश्रया. शनै· पावन वृन्दावन प्रति ययु । तदा जृम्भच्चम्पकगुम्फितोच्चकबरीभारा चलत्कञ्चुका सिञ्जन्मञ्जुल-भूरिभूषणधरा· गृहेषु क्रिया. समाप्य प्रस्थिता. गोप्यः पथि स्वासां

Rarest Archiver

रासक्रीडाद्यभीष्टाप्त्युचितस्थलीगतिं प्रेक्ष्य प्रहृष्टाः इव रामचरितैः साकं कृष्णस्याद्भुतकर्म कृत्स्नशः जगु.। वृन्दावनगमनसमये गवां खुरैः गोपपदैः अनोभिश्च समुत्था धूली सवितुः करौघं रुरोध। सूर्यः एव तां विष्णोः वैष्णवाना च पवित्रां पादधूलीं स्वमूर्ध्नि वोढुं ध्रुवमुन्निनाय। वृक्षगणाः पुष्पैः, कीरा. मनोज्ञवचनैः, कोकिलाः सुस्वरैः, केकिवरा नृत्तैः, गजाश्च मन्दगतिभिः, शैलाः स्रवन्निर्झरैः, सा वृन्दावनभूः सुच्छायैः. मणिकुट्टिमस्थलचयैः, मृगाश्च ईक्षणैः तदा अच्युतागमनकाले तद्वृन्दावनं तदर्हंभवनं नूनं आतेनिरे।[1] कृष्णः मधुरायां लब्धजन्मा। ततः कतिचिद्दिनानि नन्दव्रजे अभिवृद्धः। अधुना वृन्दावनमुपेत्य एष कृष्णः स्वस्य त्रिधामतां[2] दर्शयतीवाभवत्। फलैः, प्रसूनैः, पयसा तृणेन गोगोपनिकाय रक्षां विधाय वृन्दावनं[3] स्वनामानुगुणं बभाज। हरौ प्रसन्ने किमिहास्त्यसाध्यम्? वृन्दावनप्रवेशानन्तरं स कृष्णः भविष्यद्वत्सदैत्यरणं अनुशिक्षन्निव चारूपलमुत्क्षिपश्च वृन्दावने चचार। प्लवङ्गवेषैः अनुगैः समेतः स देवः सेतुबन्धादिविहारशीलः अरण्ये चरन् स्वकीयं रघुरामरूपं आज्ञापयति स्म।

कदाचित् तस्मिन् वृन्दावने सहानुगैः गोपैः गाः चारयन्तं तं कृष्णं प्रति पशुवेषधारी खलः अभ्यगात् किल। महान्तं कृष्णं प्रति युद्धाय यास्यतः अस्य दैत्यस्य पशुत्वं[4] आजन्मजमेव इति मन्ये। 'सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्' इति लक्षणात् शार्दूलविक्रीडितवृत्तं, प्रथमतः भूदेवताकः मगणः ततः मरुद्देवताकौ सगणौ, सगणयोर्मध्ये सूर्यदेवताकः जगणः तदनु आकाशदेवताकौ तगणौ– इत्येतैः गणैः विराजते।, वत्सासुरसंहारे च लक्ष्मीशः शार्दूलविक्रीडितं अनुकरोति।

---

1) पुष्पोपहार– मधुरवचन–गीत–नृत्य–गति–विलासोदक– सुच्छायाद्युपचारवत्खलु राजभवनं, तत्सर्वं वृन्दावनेऽप्यभवत।

2) अनन्तासन–श्वेतद्वीप–वैकुण्ठाख्य त्रिधामता

3) वृन्दस्य अवनं (रक्षा) यस्मात् तत्

4) स्वपरसामर्थ्यविवेकशून्यत्वलक्षणं

Rarest Archiver

कृष्णः प्रथमतः पदयोः रुचा भूगणं (भूप्रदेशं) अलञ्चकार। पश्चात् वृन्दावनगतं मरुद्गणं च सञ्चरणजनितश्रमपरिहारार्थं वरयन्, ततः अन्तर्वनं पदरुचा भास्वद्गणशोभिकुर्वन्, लेखानां सवयसां च हृदयाकाशं चाश्रयन् स व्याघ्रस्य विक्रीडनं अनुकरोति ।[1] हरिः तं दैत्यं आत्मदोर्भ्यां गृहीत्वा उपरि कपित्थवृक्षस्याग्रे उदक्षिपत् । स वत्सदैत्यः आशु अधः पपात। स्वरक्ष्यवत्सवेषधारिणः ऊर्ध्वगतिप्रेषणं व्रजाधिनाथस्य धर्मः एव । गृहीतमायस्य वत्सासुरस्य अधःपातोऽपि युक्तः एव । स वत्सासुरः वृक्षात् अधः पतन् स्वपार्श्वाभिघातेन लोलद्रुमसञ्चयेभ्यः कपित्थफलानि पातयामास । तथाहि कृष्णप्रतिपक्षिपक्षः कथं न पातैकफलस्त्रिलोक्याम् ?

अयं संसारवृक्षः भर्तृरागः भार्यायां भार्यारागः भर्तरि इति अन्योन्याश्रितरागरूपरज्ज्वा विततः अत एव अभेद्यश्च । एतादृशवृक्षनिबद्धा अब्जजमुखाः सुपर्णाः । तान् प्रतिकल्पं सगृह्य परमात्माऽयं भुङ्क्ते । इत्थं कृष्णः विश्वाद्भुतलुब्धकं तं मीनतनुं[2] श्रुत्वा बकपक्ष्याकारः कश्चिदसुरः भक्षयितुं मीनतनुं तिमिङ्गिलं भक्षयितुं व्यत्यस्तबुद्धिः बकपक्षिरिव आययौ । "हे कृष्ण, मम जिह्वा त्वन्नाम न कथयति" इति व्यात्तं आस्यमादर्शयन् "अहं कृष्णपक्षः[3] न" इति विशदयितुं स्वौ पक्षौ प्रोत्क्षिपन् विष्णुसम्बद्धवृन्दावनभूप्रदेशसम्बन्धभयनेव अङ्घ्रियुग्मं पश्चाद्भागे विधुन्वन्; गगनमपि ईशकेशं मत्वा[4] (नतु विष्णुपदमिति) व्योमाध्वनाऽसौ बकरूपदैत्यः सत्वरं यदुकुलतिलकं प्रति अभ्याययौ। ततः खलोऽसौ हरिं प्रजग्रास। बककुक्षिगतः कृष्णः प्रज्वलन् तस्य कण्ठान्निर्गच्छदुच्छ्वासं रुरोध । पुनः स खलः तदौष्ण्यमसहमानः बहिः चच्छर्द । अथवा पापिनां हृदये नाहं वसामीति दर्शयन्निव तत्खलस्य अघपूर्णात् हृदः कृष्णः निरक्रमीत् । कृष्णः सर्वान् दैत्यान् शकटेन तमः

1) वत्सस्य संहारे शार्दूलविक्रीडितस्यानुकरणं युक्तम्
2) मत्स्यावतारवत्वात ।
3) कृष्णस्यमित्र, कृष्णौ पक्षौ यस्य स ।
4) व्योमकेशो भवो भीमः -कोशः

प्रेषयितु सकल्पयामास । तत्र शकटासुर एव शकट., तस्मिश्च पूततां बालग्रहरूपिणी रज्जुग्रहा सकल्प्य, तस्य शकटस्य वाहान् रासभरूपी खर:, अश्वरूपी केशी; वत्सरूपी वत्सासुर बलीवर्दरूपी वृषभ इत्येतान् मनसा निरूप्य नि:शेषदैत्यासुवत् अनिलरूप दैत्य सयोज्य अधुना अद्भुत बक तच्छिह्न तम प्रेषयन्निव हस्तगबक कृष्ण शोभते स्म । हरि: त पतत्रिण दोर्भ्यां परिगृह्य तुण्ड विभिद्य, भूमौ विनिपात्य यातनारूप मीनभुज विधातु नारकवापिकासु न्ययोजयत् ।

ततः वसन्तमरुता मर्दितघर्मबिन्दु चामीकरचारुवासाः प्रसूनवत् मृद्वध्रितल अम्बुजाक्ष स. कृष्ण. परितः वसन्तश्रिय पश्यन् चचार । कामीं खलु बर्हाक्षी पुष्पायमानमुखा, अलिकुलवत्फुल्लालकां पल्लवप्रान्तस्कन्धभुजां, लतामृदुतनु रक्ताम्बरेण रञ्जितां माद्यत्कोकिलसुस्वनां शुकवच्शाटूक्तियुता, पलाशाधरा सुन्दरी कामिनी ऋतुमतीमपि उज्झितु न शक्नोति । तथा हरिरपि वनदेवतां उज्झितु न शक्तोऽभूत् । कुसुमसञ्चयकम्पनचुञ्चुना, सजलशीकरेण दक्षिणवायुना व्यजन पाणितलेव वनरमा नरमानसमण्डन त कृष्णं अन्वगात् । पिकगणः परिलसतः सहकारस्य नवाङ्कुरे शनकै ध्वनन् स्मररहस्यमन्त्रान् सञ्जपन्निव शुशुभे । कुसुमचुम्बनकृत् मधुरध्वनि षट्पद: बत मधुरवचनेन "अब्जमुखोसरसाधर पिबत । इह मान मा उचित." इति प्रियजनान् शिक्षति । पथिकाङ्गना मरुति वाति सति प्रियस्मरणजन्यशुचा अमु वायु पथि सस्पृशन्[2] मम पति वायुमनुसृत्य गतै. अलिकुलाख्यालिकुलै. अभ्युदितां मम वेदनामवैतु इतीव नयनवारि वायौ युयोज । मधुना

---

1) वनदेवताऽपि वसन्तर्तुना सशोभिता,। तदा मयूरा उत्क्षिप्तपुच्छा नृत्यन्ति स्म:। तत्पुच्छबर्हाणि तस्या नेत्राणीवासन्। विकचितानि पुष्पाणि वनदेवताया मुखान्यभवन् । झङ्कारशोभिताश्च चलद्भृङ्गा तस्या कुन्तलवत् विलसन्ति स्म । पल्लवप्रान्तप्रकाण्डाश्च भुजस्थानीया अवर्तन्त ।लता एव तस्या मृदुतनु । रक्ताम्बरेण (रक्ताकाशेन) रञ्जिता सा वनदेवता । माद्यत्कोकिलाना निनाद तस्या एव सुस्वन शुकाना वचास्येव तस्या प्रीतिवचनानि । पलाशपुष्पाण्येव तस्या अधरम् ।

2) वायो सर्वत्रगमनसम्भवात् ।

Rarest Archiver

नियुक्त भुजङ्गचय[1] योषिता अतनुतेजसि स्तने नूत्नशिव रहसि[2] रचयन्निव नखपदेन्दुकला, वसनच्युति तनुते। मृगमदेन नीलकण्ठतां करयुगाख्यअम्बुजेन अम्बुजवेष्टितमूर्धतां हृदयमन्दिरतां सम्यगदृश्यतां स्वकै चिरतान्तमुखै: रुचिरता च वितनुते। अस्मिन् वसन्तकाले मदन_ वन्हिसख प्रियशीतल: कुसुमगन्धवह: गन्धवाह: उपारतमन्मथसगरै परितप्तमुखै नरै परित: सेव्यते किल। मधुमास. स्वाधीश काम जनयिष्यत:[3] कृष्णस्य हृदय व्यग्र विधास्यन्निव मरुता दाक्षिण्य[4], परागै रागं, पिकै: माधुर्य, शुकचयै प्रियभाषण, भृङ्गैर्गीतानि, सन्मधुना स्नानं, कुसुमैश्चार्चन तरुच्छायया छत्र च प्रकटीकरोति[5]। वसन्तकाले वनितासहाय मर्त्याः लषन्ति इति किं विचित्रम्? यत तदा तरवोऽपि सरागा: सन्त. वाताचलिता तन्वी लता न त्यजन्ति। अधरपाणिपदूर्जितपल्लवो मधुरवेणुरव: कलभाषण वदनगन्धवहश्वसन सकुसुम. अच्युत कुसुमाकर अजयत्[6]।

कृष्णवरानुगमण्डली वृन्दावने क्वचित् विततपल्लवफुल्लवने तरुतटे वसत अस्य कृष्णस्य पदाम्बुज जगत: भुजगत[7] अभयसिद्धये

---

1) मधुना (वसन्तेन) सुहृद मदनस्य विनाशकस्य शिवस्य प्रतिशिव कर्तुं प्रेरित। शिवनिर्माणे तदाभरणत्वेन तत्परिचितभुजङ्गाना सामर्थ्यमस्तीति द्योतनाय विटपदे भुजङ्गचयः इत्युक्तम्।

2) बलवद्विरोधस्य प्रकटतया कर्तुमशक्यत्वात्।

3) कृष्णपुत्र प्रद्युम्न एव काम

4) दक्षिणादिग्भवत्व सरलत्व च

5) अनेन उद्दीपनविभावा लोकनीतयश्च दर्शिता।

6) कृष्ण पल्लवायमानाधरपाणिपद। कोकिलध्वनिवत् वेणुनिनादवान्। पिकवत् मधुरभाषणवान्। मन्दमारुतवत् तन्मुखवायु। शिरसि धृतकुसुमोऽपि स। एव पल्लव-कोकिल-पिकभाषण-मन्दमारुत पुष्प शोभित मासद्वयपर्यन्तमेव वर्तमान वसन्त अच्युत सर्वदा सशोभित अजयत्।

7) कालियसर्पत

उपचचार । सर्वविदां ब्रह्मादीनां वर. सः कृष्ण. घृतशिखण्डेन शिखण्डेन मण्डित सन् करिष्यमाणस्य फणिफणाङ्कणनर्तनस्य कौशलाभ्यसनधीः इव क्वचित् शिखिताण्डवमन्वकरोत् । मुनिमन.सरसीरुहहसराट् सः कृष्ण तदुचितस्य (हसोचितस्य) स्वरस्य शिक्षणधीरिव हंसकम्बकस्य श्रुतिमनसोः अतिमनोरम कूजित अनुननाद ।

उष्णभा. मधुना वशीकृतचित्त इव वरुणपालितदिगाख्यमृगाक्षी समधिगम्य तद्दुरितेन वारितवाजिवेग इव दिवः स्व अपीपतत् । मुदितगोनिकरै परिवारित सखिजनै सह वेणुमुदीरयन् निशामुखे निजगृहं प्रविशन् नरमणि स कृष्ण रमणी. समहर्षयत् । सकुतुकाभि प्रमदाभि प्रतिगृह इतस्तत परिसेवितः स्मितकटाक्षमनो-रमविभ्रम. असौ स्मरजनिः कृष्णः रजनीश इवाबभौ । स यदुपतिः निजै सह निर्मल स्वगृह शनैरेत्य महितया सतां हितया तनुरुचा अलसां निशां बहुदूरपलायितां व्यतनोत्[1] ।

'अद्य हरि करुणया स्वतनयां सरित विषवर्जितां करिष्यति' इति मुदा परवश रवि ईक्षितुमिव रवशोभित गिरि आरुहत् । तदनु स भुजगान्तकवाहन विभु. भोगिकुलाग्रग अग्रज हि विसृज्य तदन्वयसम्भव कालिय नमयितु सभुजगां यमुनां अगमत् ।" "यदि कालियः रसातल-मेति तदा त दमयितु अहमपि तत्र एमि" इतीव सवयसां विस्मयकारक: कृष्ण. कदम्बपादपात् अम्बुनि वयसां वल्लभ गरुड इव अपतत् । तदा स्निग्धा अर्कजा सा यमुना कृष्णालिङ्गनकातरै. करसमै. निवृत्तै ओघै. इव, स्वप्रान्ते स्थित तस्य पदाङ्क उरसा धर्तु धिया इव, सुप्रेमाम्बु-धिमिश्रणादिव जगद्वन्द्यस्य पातादिव मदनाकृति[2] त कृष्ण स्वहृदयेन आश्लिष्य अवर्धत । फणिपति अप कलिलयन्त पुरुषोत्तम दशितु अग्र-हीत् किल। श्रवणोज्झित. स परमया रमया श्रुतिभिः स्तुत तस्य बलं न वेत्ति ।

---

1) प्रात कालो जात इत्यर्थ ।

2) मदनस्य आकृति. यस्मात् सः तम् ।

तदा उत्पाते चकिता गोपा कृष्णसन्दर्शनार्थिनः बलराम पुरोधाय शेषमार्गगता 'मोक्षगन्तार' इव वृन्दावनात् यमुनातट ययुः । "व्रजगोपाला अमुना अध्वना यमुना व्रजाम । पृथि कृष्णस्य पदानि लक्षणै सह लक्ष्यन्ते" इत्थ विमर्शत प्राप्तान् स्वान् दृष्ट्वा स कृष्णः सर्पमूर्ध्नि ननर्त किल । सुहृदागमने क. न नर्नर्ति ?

लोकवन्द्य कृष्ण सरत्नेषु कालियफणाङ्कणेषु गरुत्मत करयोः मुख्यदैव स्वपद तद्दमने,औषध विधित्सन् इव ननर्त किल । कालिय फणीन्द्रस्य विराजिपुच्छं एकेन करेण उन्नीय श्रमेण खिन्न अस्य विष-दूषित वक्त्र ममर्द । कथम् ? अन्तराश्रित अशेष असह्य विष विनतेन आननेन निष्कासयन्निव । स कृष्ण कालियस्य मुख विभिन्दन्नपि तदीय पुच्छ करेण जगृहे । ननु यथापराध दण्डदाता शौरि निरागस कं न वरयेत्[1] ? आर्तबन्धु श्रीहरिः अहिराजमौलि विदारयन्नपि त करेण पस्पर्श । निजेषु शिक्षाऽपि तस्य विष्णो. पर परानुग्रहहेतुरेव । भृत्याः भवाब्जासनमुख्यदेवा नृत्यन्त निजनाथ एन कृष्णमेत्य आर्तसर्पाश्रिता-ज्ञान अपहर्तुमिव गृणन्त विष्वक् तस्थु किल । अनीनदत् पद्मभवो मृदङ्गम् । जगौ हनूमाञ्जगता अधीशम् । अदर्शयत्तालगती कपर्दी । ननर्त गोपालकबालमौलिः ।

ततः अहिपत्नीप्रियमञ्जुवाक्य निशम्य कृष्ण. त कालिय आशु निर्भय चक्रे । तथाहि । नारीमृदुभाषणेन कस्य चित्त मृदता न उपैति । स कृष्ग कालिय-कालिन्द्यो विषाश्रयत्वेन, नीलगुणत्वेन, कृष्ण. कृष्णा इति नाम्ना साम्ये अपि त भुङ्गम निपीड्य भास्वत्तनया जुगोप । न कस्य योषित्सु हि पक्षपात ? स कृष्ण आगस्कृन नागपति पादेन तत्कृताङ्कै तस्य ताक्ष्यर्द्भिय जहार । भक्ते कोघोऽपि देवस्य वरेण तुल्य । असौ कृष्ण. सर्पस्य विमर्दनात् स्व-पक्षपातिन गरुडस्य नून प्रिय प्रसाधितवान् । तथा अन्ते कालियस्य गरुडात् अञ्जसा अभयं विधाय स्वतल्पाय शेषाय च अनल्पां मुद ददौ ।

रोम्णां हर्षणकारिणि श्रवणतः पापौघविध्वंसिनि
प्रेम्णा चिन्तयता विचित्रविमलश्लाघ्यार्थसन्दायिनि ।
सञ्जाते भुवि रुक्मिणीशविजये सद्गादिराजोदिते
सञ्जात सुरमण्डलीषु महित सर्गश्चतुर्थो मुदाम् ॥

पञ्चमः सर्गः

दयालु. ईश. स यामुनाम्भसि अवगाहनोत्थ शरीरशैत्य शमयन्निव वृन्दावने निशि प्रवृद्ध नवकाननाग्नि स्वजनस्य गुप्त्यै पपौ । मुरारेः वनवन्हिपानकृतानुभाव सर्वे स्तुवन्तु न वय स्तुमः । स्वजन्मभूमि[1] शिखिनि प्रविष्टे तेन ईशितुः कः कृतोऽनुभाव । तत. अच्युत. निज-पादाब्जभजनैः स्वजनै. सहितः, आर्जितसर्वार्थव्रज व्रज निविविशे ।

ग्रीष्मर्तुवर्णनम् :

निदाघ निजबलकर[2] अग्नि कृष्णपीत निशम्य कोपात् ज्वलित इव सूर्येण सहित सन्[3] प्रादुरासीत् । अथ गोप. कृष्णोऽपि स्वकार्यं सनाम्ना[4] ऋतुपतिना सह विचिन्त्य निर्निनीषुरिव द्रुत वनान्त प्राप । भास्वत्प्रभासम्भवे तापे तद्वृन्दावनमाधवेन (वसन्तेन) विजिते सति[5] दावे च व्रजमाधवेन दमिते सति ग्रीष्मः कोपेनेव वसन्तपुष्पनिचय शुष्क

---

1) 'मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत' इति श्रुत्या भगवन्मुख अग्ने-रुत्पत्तिस्थानम् ।
2) ग्रीष्मः दावाग्निना लोकान् सन्तापयतीति ग्रीष्मबलकरोऽग्निः ।
3) एकस्मिन् सहाये गते सहायान्तरेण कार्य साधयामीति बुध्या ।
4) माधव इति वसन्तर्तोरपि नाम, एकनाम्नो सदा प्रीतिरिति च प्रसिद्धिः
5) तरुच्छायादिना

Rarest Archiver

विधाय, अनिल सन्तप्त विधाय, मधुपान् चम्पककम्पितान् विधाय, पिकादीन् खगान् मूकान् विधाय तत्क्षणात् जिजृम्भे । सः ग्रीष्म. कृष्णकृते.[1] विरोध कुर्वन् शीत पाथ (जल) अशीतलोष्णां धरणी च भास्वत· बलेन उष्णयन् गन्धवह ऊर्ध्व नयन्, त्रिवृत[2] वपु· अम्मात्रपात्र कुर्वन्, तत्कृष्णस्यावास वा शोषयन् तद्वश विश्व दावाग्निना दहन् वैरीव अदृश्यत ।

सुच्छायै शुकमण्डितै शुभफलै उद्यत्प्रसूनोद्गमै माधवपक्षगै: वृक्षै. निदाघोद्भवे खेदे प्रशमिते सति दैत्य: कोऽपि ब्रह्मणो वरात् वृन्दावने तरुत्वमेत्य ग्रीष्मपक्षपातीव तच्छायावाससुखात् सहस्रगुणित शोक वितेने । स दैत्य तरुत्वमाप्य अपि मुरारे. वृन्दावन समन्तात् हन्त विषै· अदूषयत् । तथाहि । लोके खल स्वनासिकाच्छेदमपि सोढ्वा सतां प्रयाण खलु निरुन्धे । वृन्दावनवासिनां पक्षिमृगादिनानाविध जीवानां वर्गं तरसा विनाश्य असौ वक्षरूपी दैत्य स्वस्य वरप्रदातु. विधातु प्रतीप विदधे[3] । नयीयगन्धेन फलेन पुष्पकुलेन मूलाश्रयणेन लोक. तदैव नाशं किल याति । कृष्णविपक्षमैत्री किमु सौख्यदात्री ? अस्य अतिविषोल्बणत्व कि वाच्यम् ? यस्मात् दर्वीकरवर्गस्य मौलिः सता ग्लानिहर· बलरामोऽपि तत्सङ्गतवायुनैव ग्लानिमवाप । फलै. प्रसनै. विलसत्प्रवालै. विलोलैश्च दलै· शुभायितोऽपि स मध्ये हालाहलमेव बिभर्ति । खल· प्रकृत्या खलु गूढवृत्ति । अतिरम्ये वृन्दावने वसतां पत्रफलाशनाना निरागसा पतत्रिणा सता च य वृक्षरूपी दैत्य. द्रोह व्यधात् त उग्रनामाहंस्य चरित्रवन्त ऊहे । स कृष्ण समाधिकृता ऋषीणा श्रमाख्यवृक्षेण सम त विषवृक्ष समुत्पाट्य तेनैव गोस्वरूपिण: खलांश्च लीलया जघान । प्रभो· क्रियैकापि उरुकार्यसाधिका ।

---

1) 'यतो वा इमानि भूतानि जायन्ते' इतिश्रुत्या जगत कृष्णकृतित्वम् ।

2) तेजोबन्नै व्रतम् ।

3) तत्सृष्टस्य जीववर्गस्य नाशकत्वात् ।

अहो निदाघोत्यभयादिव ईशः गङ्गा बिभर्ति । स रमापतिः जलधौ शेते । चतुर्मुख पङ्कजविष्टरो वर्तते । त निदाघ अन्य कः विषहेत । तदापि सिद्धाः प्रहृष्टरोमावलय सन्त निमीलिताक्षा. चतुरग्निमध्ये स्थित्वा परम पुमास स्मरन्ति । तथाहि । फलार्थिना किं न विषह्यमस्ति ? वायु इत सुशीतल कृष्णपदाब्जयुग्म स्पृशति । ततः उज्ज्वल काननाग्नि समुत्थापयति स्म । अय स्वभाव खलु चञ्चलानाम् । अस्मिन् ग्रीष्मर्तौ गिरिकुञ्जवासा नागरिका प्रियास्तनाख्यान् कुम्भान् परिरभ्य तदीयाधरजा सुधां पिबन्त अहो ताप न विदन्ति न वा पिपासाम् ।[1] कृष्ण. दृष्टिपथ गतेन मुखेन्दुना सुधार्द्रवीक्षामयवृष्टिभिश्च व्रजौकसा काननवासिना च तपनोत्थं ताप जहार ।

सः शौरिः सप्तवृषान् जित्वा कुम्भकसम्भवां स्वीयां नीलां अलभत । स चापि कुम्भकः कुम्भकादिप्राणायामबलात् सप्तधातून् निगृह्य नीलमणिभिर्नीला तत्कृष्णपुरी करेऽलभत । वृषभाणा शृङ्गप्रहारैः द्रवत्कुम्भाभाङ्गयुक्ताः अपरे बहवः अपि नीलां मुखस्य प्रभा अलभन्त ।[2]

अथापरो रासभवेषधारी धेनुकाख्यः दैत्य मुकुन्दयोग्य वन समाक्रम्य जन्तून् जघान । बत, तादृशोऽसौ प्रकृत्या खर इति मम प्रतर्कः क्षुधया अतिलोला गोपबाला अच्युतेन सह तत्खराक्रान्तवन अभिमयु किल । तथाहि । दुष्टस्य विनाशात् अन्यत् सता मनस्तृप्तिकर किमस्ति ? अथ असुरवर्गवर्य युद्धार्थ कृष्ण आससाद । बलाढ्य बलभद्र निजध्वजक्ष्माजस्य समाजेन विराजमान तद्वन धेनुकाक्रान्त ईर्ष्यमाण इव त धेनुक

1) शीतकाले भवेदुष्ण उष्णकाले तु शीतलम् ।
कूपोदक वटच्छाया ताम्बूल तरुणीस्तनम् ।

2) कुम्भको नाम गोपाल. स्वकीयै सप्तवृषभै सयोध्य जयशालिने वराय स्वकन्या नीला दास्यामीति प्रकटीचकार । अत कृष्णस्तान् सप्तवृषान जित्वा कुम्भकस्य पुत्री नीला लब्धवान् । तत्पिता कुभाक नीलमणिभिर्नीला तत्पुरी अलभत । नीलाशया आगता राजान नीला मुखस्य प्रभामलभन्त ।

Rarest Archive

प्रत्यगमत् । असह्यमत्व अस्तमाय खल स धेनुक' निजपार्ष्णिपद्भ्यां त बलभद्र प्रताडयन् तौ पादौ गाढ प्रगृह्य उत्क्षिपत बलभद्रस्य सहायोऽभवत् । स बलराम' सतां विपक्ष त धेनुकासुर उत्क्षिप्य तालमहीरुहाग्रे सम्प्रेषयामास– विष्वक्फलालाम्बनि पादपाग्रे उपल धृत्वा आत्तलील बाल इव । अथ गुरुतमतनु' व्यसु. दैत्य' धेनुक वृक्षात् निपतन् कांश्चित् स्वकीयवृक्षानेव उच्चै पातयामास । ते पतिताः वृक्षा. हरिपदविमुखानां पोषणस्य उचित फल तै. हरिपदविमुखै'सह अल अलभिषतं इत्यस्मदूह । सुरै. ततः श्रीकृष्ण गर्गमुनिना कृत अग्रजस्य बलभद्र इति नामधेय गुणोचत विरचयन्निव अनुगै. सहित धेनुक रणतोषितनाकिना तेन हलधरेण हतं समकारयत् । ग्रीष्मे भास्वति च अपराधकृति सति सक्रुद्ध' हली लीलायाः छलतः प्रलम्बासुर जघान । तत् युक्तं हि । जनयिता मन'प्रियान् स्वान् शिशून् सन्तर्जयन् तप्तोऽपि तत्प्रान्तस्थशिलादि हस्तलगुडैः ताडयेत् ।[1] ततः निदाघ'-स्वपराभव वीक्ष्य उज्ज्वल त दावानल ससर्ज । जगन्निवास हरि त च पपौ । विनाशशून्यस्य हि कि न कार्यम् ?

वर्षर्तुवर्णनम् :

मेघाः सवर्णस्य हरेः सहाय प्रायः विधातु परित' समेत्य स्वशरीरैः भास्वन्त अ च्छाद्य पयसा निदाघमाछाद्य कृष्णसम्बन्धि विश्व पुपुषु । विष्णुपद आश्रित्य अर्थिषु अम्बु यच्छत मेघस्य जल(ड)नायकोऽपि सारथिरभूत् । नित्य मुकुन्दचरणार्पितवैभवस्य मर्त्योपकारनिरतस्य न कः सहाय । लोकस्य शोकहरवारि अलं अभिवर्षत. मेघस्य अमत. वातोऽपि योगकृदभूत् । काम परोपकृतिलग्नमनोरथाना शत्रवोऽपि क्षेमङ्करत्वमुपयान्ति हि । पयोधरेभ्य वृष्टिरासीत् । ते उद्यद्विद्युता, वक्रेण शक्रधनुषा च प्रकाशिता आसन् । व्योमाग्रसीमाश्रयास्ते ऊर्जितगर्जितेन

---

1) ग्रीष्मसूर्ययो. अपराधे सति असुरयो अनयो शिक्षा स्वशिशुसन्तर्जकपितृवत् युक्तम् । अनेन ग्रीष्मसूर्ययो स्वीयत्व द्योत्यते ।

Rarest Archiver

मर्त्यानतिचकिताश्चक्रु । तैश्चकितास्ते युवान तन्निवारणार्थं नेत्रान्त-भ्रुकटीबल कुगलसन्मध्योर्ध्वभागोदित क्वणद्भूषण नारीपीनपयोधर भेजु ।[1] पयोधौ कादम्बिन्यै पयोबिन्दुमात्र वितरति सति सकलसरितां स्वात्मनश्च वृद्धिरासीत् । तद्युक्तम् । नित्य विष्णो. पदमधिगताय अत्युदाराय अब्बिन्दूनामपि दानात् शतगुणा वृद्धिरद्धा स्ववर्गे । मेघागमः असह्यमपि ग्रीष्मस्य सकलं सत्व प्रजह्रे । तत् तथा । सर्वंसहाजीवन हर्तुरस्य ग्रीष्मस्य दुर्वारतेजोऽपि किमेति वृद्धिम् ?

शरद्वर्णनम्,

उज्जृभित शरत्साम्राज्य सच्छास्त्रप्रतिकृति अलक्ष्यत । सच्छास्त्रेण साधूना मनः निर्मल भवति । मुखं च सिकासमैति । पाप खण्ड्यते । हृदयाकाशगत अज्ञान नश्यति । भगवज्ज्ञान च सञ्जायते । ससार-बन्धविच्छेदात् स्वरूपानन्द. आविर्भवति । तथा शरत्काले सरासि निर्मलानि भवन्ति । पद्मानि च विकसन्ति । मार्गेषु पङ्कं सखण्ड्यते । आकाशगत च घनाविधान नश्यति । सूर्योडुपौ स्पष्टौ भवत । तामिस्र नश्यति । भिक्षूणां वणिजां च प्रावृट्कृत बन्धन विच्छिद्यते । बहुगोक्षीर पानेन जनाः मोदन्ते । इत्थ शरत्काल अवर्धत । शरत्काले मरुत् सच्छास्त्रे [2] आनन्दतीर्थवत् मूर्धाभिषिक्त· अभूत् । श्रीमदानन्दतीर्थः पद्मया आसेव्यस्य नारायणस्य ज्ञानानन्दादिगुणौघानां विस्तृतिकर । विचित्रशब्दप्रयोगेण शारदाया· आनन्द अस्पष्टयत् । कम्पितेन भोगि राजस्य शिरसा तस्य आगम. (शास्त्र) सन्तत मान्य । सन्मार्गाश्रि-ताना अन्तःकरणविषय पङ्क मिथ्याज्ञान शोषयति । मोक्षमार्गचराणा तापापह , नित्य विष्णुपदाश्रय परिलसत्पुण्येन पूतश्च । रामस्य अयो-गिना (अभक्ताना) भीमचरित मध्वाचार्य । स्वकीयागमै सद्वशप्रसूत

---

1) राजभयस्य तत्सदृशराजान्तराश्रयणेन परिहारवत् । पयोधरजन्यभयं तत्सदृशपयोधरान्तर समाश्रित्य परिहृतवन्त मर्त्या ।

2) समीचीनब्रह्ममीमासाशास्त्रे ।

मुहुः प्रेमालम्बनशब्दं हृद्यवदन कृतवान् । सुमनश्चयस्य सुक्षेम विहित-वान् । भूमौ सम्यग्विततमूर्तिरभूत् । तथा शरदि वायु पद्मानां आसेव्यनां परिमलादिगुणौघाना विस्तृतिकर । तेन च शारदा (शरदि विद्यमान) नन्द स्पष्टीकृत, भोगिभि, राजभि शरत्कालीनवायो आगम. सन्तत कम्पितशिरसा मान्यते । मार्गस्थितस्य पङ्कस्य शोषणकर. वायु सत्पथिकाना घर्मजन्यखेदापह । नित्य आकाशाश्रय असकृत् परिलस-त्पुण्याम्बुभि पूत., रामा (कान्ता) वियोगिजनस्य भयङ्करसञ्चार अयं मरुत् । स्वागमनै. मुहुः सद्वंशसमूह स्नेहास्पदध्वनिना हृद्यवदन करोति । पुष्पसमूहस्य सुक्षेमं विदधाति । प्रपञ्चे सुव्याप्त. असौ वायु. शरत्काले प्राधान्य भजते ।

हेमन्तवर्णनम् :

वियुक्तनारीमुखपद्मपुञ्जैः सह अम्बुजातं शिथिल वितन्वन् प्रबोधकल्प रवि अल्पकान्ति विधाय हेमन्त. उपाजगाम । उष्णरश्मिः सूर्योऽपि सकृत् हिमार्दिताङ्गः वन्हि स्वकरैर्दधानः अजस्र जलधि विशति स्म । तत तां हिमानी अबलाः कथ सहन्ते ?

कृष्ण पतिं आप्तुकामाः धन्या. गोपकन्याः अय हेमन्त. पतिं वशीकर्तु काल इतीव तस्य असमधाम च वितर्क्य तं प्राप्तु दुर्गापूजारूप व्रत वितेनु । ता गोपकन्या पुमांस अभ्यर्थयितु स्वसमानान्तरङ्गाः वरवर्णिनीश्च अभ्यर्थयितु सलज्जा सत्य श्रीरमणस्य सहोदरी कृतविश्व-सर्गां दुर्गा अपूजयन् । कृष्ण पति कामयन्त्य ता गोप्य व्रतेन लक्ष्मी प्रसन्ना विदधु । अपरथा प्रभुः कृष्ण स्वप्रेयस्या वैरिवधू ता तुष्टा कथं विदध्यात् । अतिकुशलाः गोपकन्या 'प्रणयापराधशमने कर्तव्ये कृष्ण अस्माक नम्रोऽस्तु' इति दुर्गा नेमु., स कृष्ण अस्मत्कबरी कुसुमैरल सन्दधातु इति प्रेम्णा पुष्पाणि अवेदयन् । स अस्माभि साक मज्जन मारचयन् अस्मत्कबरी धूपधूमेन शोषयतु इति धूपमवेदयन् । कृष्णः अस्मान् आलिङ्ग्य स्वतिलकेन स्वगन्धेन च अस्माकं तिलक अनुलेप च

Rarest Archiver

कुर्यादिति तस्यै दुर्गायै तिलक गन्ध च ददु । ता मुकुन्दचर्वितलसत्ताम्बूलसिद्ध्यै ताम्बूल तस्यै ददु । तद्बिम्बोष्ठसुधाप्तये च तस्यै पयो ददुः । स कृष्ण रत्यन्ते गलिताभरणसमूह अस्मत्तनुषु निधाय समलङ्करोतु इति दुर्गाया मृदुतनौ भूषावली सदधु । इति ईप्सितसिद्धये ता दुर्गां अपूजयन् ।

तत दुर्गापूजानन्तर सपत्न्या लक्ष्म्या अर्चने तत्पराणां व्रजबालिकानां पतिकामनया सपत्न्यर्चनस्य विरुद्धत्वात् दुर्गापूजानियम भग्नमाधातुमिव धीरः कृष्ण अम्बुविहारकाले तासामम्बराणि जहार ।

गोपकन्या.- देहि इश ! अम्बर अस्मदीयम्[1]

कृष्ण – अबला दत्तम् ।

गोपिका – क्व तद् वर्तते ?

कृष्ण - मध्ये व प्रतिभाति ।

गोपिकाः- तर्हि न कथ सदृश्यतेऽस्मद्दृशा ।

कृष्ण.–मुग्धा. तार्किकमौलियुक्त्यकलित तत् वं चञ्चल[2] लोचनैः द्रष्टु नैव शक्यते इति वदन् स कृष्ण मां पुष्णातु ।

ततः स मानी कृष्ण जञ्चललोचनान्ता ता क्रमेण अङ्कुरिताङ्गजाता[3] निरीक्ष्य स्वसङ्गयोग्या[4] तर्कयन्निव मुदा तद्वसनानि ददौ ।

---

1) चीरहरणे गोपकन्याकृता प्रार्थनेयम् । अम्बरशब्दस्य वस्त्रार्थ अभिप्रेत्य तासा वचनम् । कृष्णस्य आकाशार्थ अभिप्रेत्य । कृष्णस्य सर्वस्रष्टृत्वात्, गोपिकाना मध्यस्यापि तत्सृष्टत्वात् दत्तमित्युक्तम । तासा मध्यस्य अतिसूक्ष्मत्वेन अदृश्यत्वात् अम्बरत्व (आकाश) व्यवहार ।

2) तार्किकश्रेष्टाना गौतमादीना युक्ताभि अगम्य तत्व्योम । अनुमानागोचरस्यातीन्द्रियस्य साक्षिसिद्धस्य गगनस्य चक्षुषा द्रष्टुमशक्यत्वादेवमुक्ति ।

3) सञ्जाताभिलाषा, अनेनासा कामजननीत्व द्योत्यते

4) काममातु कृष्णपत्नीत्वात् ।

तत कदाचन वृन्दावने सञ्चरणात् अतिश्रान्ता. गोपा अन्नार्थिन· सन्त. द्विजै पूर्णा यज्ञसभा ययु । क्षुत्पीडिताऽपि परमानुगमण्डली सा 'कृष्णाय भोज्य' इति विप्रचय ययाचे । तद्युक्तमेव । मुररिपो अनुचरा स्वार्थे विरागा. यत्न कदाचिदपि न स्वकृते प्रकुर्यु । ते विप्रा गोपैरभ्यर्थिता., स्वीयक्रियाभङ्गभयेन श्रेयस्कृते कृष्णाय अन्न न ददु किल । अस्मदीये मखे स भृत्यै सह अश्नाति इत्थ विदित्वा ते न ददुरिति मम प्रतर्क । स्वपतिभि कृष्णाय अन्न अदत्त दृष्ट्वा विप्राङ्गना· तस्मै सर्पिर्दधिपायसादि समर्प्य मुक्ति करस्था किल ता वितेनु. । पुरुषमौलिभाजा पुस्त्वेन कि प्रयोजनम् ?

स. गतभी विभु कृष्ण गिरीन्द्ररूपधारी सन् अप्रतीत. विप्रपत्न्यर्पितभक्तभुक्त्या समासक्तमना इव[1] स्वकीयै गोपै इन्द्राय दीयमान भोज्य अभुङ्क्त ।[2] शतमन्यो. मन्युविवर्धन कृष्ण तदीययज्ञ त्याजयित्वा अस्मदिष्टार्थप्रद गोवर्धनपर्वत प्रति यजत, इति गोपान् प्रोत्साहितवान् । तथा तै कृते तै सह गोवर्धनगिरि प्रदक्षिणीकृत्य, पर्वतरुपधारी तदर्पित बलि स्वयमुररीचकार[3] । सहस्रनेत्रोऽपि स इन्द्र कृष्णसत्व मनागपि अविज्ञाय मेघान् प्रवर्षणार्थं दिदेश ।, निगमैकवेद्ये कृष्णे अक्षिबाहुल्य कि कृत्यमुपैति ? शतक्रतौ वर्षति वासुदेव· गिरि समुद्धृत्य तूष्णी बभूव । त्रासमशत्रुशौर्य· जिहिर्षुभि· तस्य आद्यवैरिण:[4] उद्धरण कार्य हि । स. कृष्ण· ईश्वरे मयि कूर्मादिरूपेण भूभृति जागरूके सति बुद्धिशून्य. गोवर्धनगिरि च स्वय भूभृत् किल इति अमर्षादिव त भूधरेन्द्र गोवर्धन करेण भूमेः सकाशात् उदबीभिदत् ।

---

1) वैकुण्ठे प्राकृतान्नभोजनस्य कदाप्यलाभेन अपूर्वरसविशेषसल्लग्नचित्त इव

2) इन्द्राय याग त्याजयित्वा तदर्थ कल्पित बलि स्वयं जग्रास ।

3) एतेन कृष्ण सशत्रु बलि अङ्गीचकार, स्वपूजा त्याजयित्वा पर्वत पूजयामास च इति शतमन्यो. मन्युरवर्धत ।

4) पर्वत इन्द्रस्य आद्यवैरी ।

Rarest Archive

रोम्णां हर्षणकारिणि श्रवणतः पापौघविध्वंसिनि
प्रेम्णा चिन्तयतां विचित्रविमलश्लाघ्यार्थसन्दायिनि ।
सञ्जाते भुवि रुक्मिणीशविजये सद्वादिराजोदिते
सञ्जात. सुरमण्डलीषु महितः सर्गो मुदां पञ्चम. ॥

षष्ठः सर्गः

महेन्द्रेण प्रेरितैः मेघालिभिः मुक्तानां पयसां प्रवाहेण आवृतभिन्नभागं मुकुन्दहस्तेन उन्मूल्य उद्धृतमपि त अद्रिराजं गोवर्धनं मनुजाः अनुद्धृत[1] व्यजानन् । गोवर्धनमहीध्र तदा वर्षणकाले, वर्षासु वर्षसहतामधिगम्य, वार्षु तपस्तप्तु कृतस्थानस्य, अन्यजन्मनि शर्म सिसाधयिषोः हृन्मध्यलब्धपरमस्य ऋषेः सादृश्य प्रपेदे ।[2] उद्धृते तस्मिन् गोवर्धनगिरीन्द्रे अन्तः गोपाः करुणाधारासहितविलोचनकान्तियुक्तश्रीकान्ताख्यं मेघं पश्यन्ति स्म । बहिश्च मेघदर्शिभि. वृष्टिभयाभावात्सन्तोषहेतुषु गुहासु गतैः प्राणिभिः सः गिरिः आवृतः आसीत्–इत्थं अन्तः गोपाः बहिश्च प्राणिन. ससन्तोषमवर्तन्त । कलशोपमानैः सुवर्णशृङ्गैः, कृत्रिमसन्निभैश्च मृगादिभिः समन्तात् गुहानां उल्लसद्द्वारगणैश्च वृतः गिरिर्गोवर्धनः विष्णोः गोपुरति इव । समुत्तुङ्गं नग दधानः स कृष्णः भविष्यति मल्लेन्द्रस्य चाणूरस्य जये उपयोगि तदीयविद्या (मल्लविद्या) भ्यसन विधातु अभ्रलग्नं शिलोच्चय बिभ्रदिव बभौ । कृष्णधृतः सुराणां विस्मयकारी विस्तृतस्य पुष्करस्य मध्यंगतः अत एव आर्द्रः सः गोवर्धन-

---

1) वृष्टिबाहुल्यात् अविच्छिन्नप्रवाहैः खण्डद्वयान्तरस्याच्छादनात् अनुद्धृत व्यजानन् ।

2) जलमध्यस्थितत्वात्, स्वान्तर्गतकृष्णत्वाच्च ऋषिसादृश्य पर्वतस्य ।

गिरि: सिन्धो: कबन्धात् उद्धृतस्य भास्वन्मन्दरस्य कान्ति अचूचुरत्। अम्भसां चक्र लसता तेन भूभृता वृष्टिजन्यभयाब्धि स्वपरित: स्थिता-गाधसमुद्रोपमजल वा तितीर्षो व्रजवर्गस्य शमितोपप्लव: प्लव: अनुचक्रे। स गोवर्धन: खगान् द्रुमकोटरेषु, मृगान् स्वगुहागृहेषु, तप्तु समागतान् मुनीन् घनेभ्य अत्युच्छ्रितासु मेखलासु निधाय वृष्टे: सकाशात् जुगोप। अपरच: को वा विपत्सु स्वीयमुपेक्षते? घनवर्षपातेन निपातितै प्रसून कोशै: अङ्कितसर्वगात्र: अद्रि: मुकुन्दहस्ताम्बुजसङ्गसौख्येन प्रहृष्ट-रोमालिरिवास्ते। स भूधर: साशनिना वर्षपातेन समाहतोऽपि अणु अपि नो चकम्पे। तथाहि। गोब्राह्मणरक्षकस्य, कृष्णदोर्दण्डधृतस्य क्व कम्प: ? पय श्रितेन स्वप्रतिबिम्बेन लोल, वृष्टिपातवशात् पतद्भि: प्रसूनै: अञ्चितशृङ्गजाल, स्वकुक्षिमध्यार्पितनन्दबाल त पर्वत जन: अद्भुत-सम्पुटमाशशङ्के। स्वकीये स्फटिकनिर्मिततुङ्गशृङ्गे त्रिविष्ट पस्य अभ्रस्य च प्रतिरूपधारी स: पर्वत: हरे: निदेशात् अपराधिनो: शक्रघनयो: आलयौ तौ (त्रिविष्टप-अभ्रौ) लोकौ ग्रसतीव। स: श्रीपति: यदा पर्यटतां कुञ्जराणां पुञ्जै: शोभित धरं उद्दधार तदा कवय: 'शिशो: करे हस्तिसहस्रमस्ति' इति समस्यां परिपूरयन्ति। स अद्रिराज: गोवर्धन: भासुरे श्रीशस्य कपोले लग्नस्य नखोल्लसत्नकरस्य अग्रे सस्थित: सन् कूर्माश्रितस्य नागराजस्य फणास्थपृथ्वीश्रिय बिभर्ति।[1] उद्गच्छदूष्मा वलिरूपधूमवन्तं, द्रवद्धातुरसै: आर्द्रशृङ्ग, विष्वक्पतद्रत्नचयस्फुलिङ्गं त अद्रि ईशेन कृष्णेन आचरित अग्न्यस्त्र प्रतर्के। गोवर्धनाद्रि त घनं स्वस्य इन्द्रनीलधरणीकान्त्या, तस्य आखण्डलचापं शिखण्डश्रिया, अम्बुनिचयं मुक्ताफलानां रुचा, तस्य तटितं च स्वीयसौवर्णस्थलशोभया, तन्नाद च पञ्चास्यनादेन साधु जिगाय।। किन सुकर नित्य क्षमा-धारिण:। 'हे गोपा: वार्मुचामाटोप अद्यापि अस्ति किम्? निर्गत्य पश्यत' इति कृष्णेनोक्त: कोऽपि गोप तद्विदित्वा माधव वक्ति–

1) एव च कृष्णकपोल कूर्म इव, कर शेषइव, हस्त: भोगइव, नखा रत्नानीव अभूवन्।

"प्रभो यदुपते पयोमुचां धारा नैवास्ति । परन्तु स्वाना प्रेमाश्रु धारा वर्तते। नापि च गर्जितमस्ति मेघाना, स्तुतिकृतां सिद्धेश्वराणां ध्वनिरस्ति। विद्युन्नास्ति । अमरनर्तकीकरचयालङ्काराणां कान्तिरस्ति । वायुर्नास्ति सुरवृष्टपुष्पसहगानां अनल्पालीना पक्षैर्मरुत् वर्धते । यदुपते ! नभः नील नैव । सुलज्जितशचीभर्तु[1] मुखे नीलिमा । आकाशे मेघाः क्वापि नः सन्ति, किन्तु त्वद्दर्शनार्थमागतानां दिविजानां विमानान्येव तत्र अम्बुदाः। अपि च दिशि तामिस्र नास्ति । त्वां मानुष मन्वतां मूर्खाणां चित्तेषु तमोऽस्ति[2] । किञ्च निजजने वेपथुर्नास्ति । किन्तु कृष्णः कोपात् किंकरिष्यतीति भीतस्य इन्द्रस्य गात्रे केवलं वेपथुर्वर्तते ।

. ततो वृष्टिशान्त्यनन्तरं स्वै . गोपै गोपीभि. गोधनैरपि परीत सुरै.नरैश्च स्तूयमानः कृष्णः प्रयतं गोष्ठं प्रतस्थे । गोवर्धनपर्वतं पूर्ववत् संस्थाप्य कृष्णे व्रज गते, नाथस्य तस्य अपराधकृत् सुलज्जितः शक्रः त्रिलोक्या रम्यतमं सदय अच्युत रहसि उपेत्य मूर्ध्ना प्रणम्य स्वकृताघ-शान्त्यै गोविन्दनाम पठन् च सुधया अभ्यषिञ्चत् ।

एकदा एकादश्यां उपोष्य द्वादश्यां पारण सकाल कर्तुकामः नन्द् अकाले एव यमुनां स्नातुमगच्छत् । त सलिलेश्वस्य अनुगः बध्वा वरुणालय निनाय किल । स तु वरुण "स्वनाथस्य कृष्णस्य पितर तं नन्द श्रुत्वा समन्युर्भूत्वा भृत्यच्छलेन बबन्ध" इति मे प्रतर्कः । कृष्णोऽपि वरुणस्य दृढभक्ति वीक्ष्य प्रतुष्ट इव नन्दानयनरूपकृत्यच्छलेन निजदर्शनं दित्सन् एव अम्बुराशिनिलय गत्वा वरुणेन अभ्यर्चितःसन् जनकेन साकं स्वभवन पुनराजगाम ।

सूर्यास्तवर्णनम् :

वातायने गगनाख्ये भाजने कृशानुसङ्गि तप्तं उत्तुङ्गस्फुलिङ्गैः आवृत, माहेन्द्र्याः दिशः शुभकुण्डल रचयितु अमरैः उपायात् सङ्गृह्य

1) पराभवेन सम्यग्लज्जितस्य इन्द्रस्य । शचीभर्तुरित्यनेन स्त्रीसमक्ष जात पराभव अतिलज्जाकर. इति ध्वन्यते ।

2) अज्ञानम् ।

Rarest Archiver

अम्बुनि सन्निवेशितं हेम इव सायङ्काले तेजोराशिः रागाञ्चितः इनः पश्चिमं जलधि जगाम[1] । असौ विवस्वान् करैः गिरीन्द्रान् परितो दधानोऽपि अब्धौ पतितः किल । "सरिता शरीरविशोषक त विवस्वन्त तासां पतिः समुद्र अग्रसीत्" इत्थ मम आभाति । सहजात अपि स्वरागं क्रमेण त्यक्त्वा चक्राब्जमानितकरः प्रततोर्ध्वपादः विष्णुपद आश्रित्य य उग्रतपः अतपत् स रवि. तस्य विष्णोः धाम समुद्रमेव जगाम । अतः सूर्यस्य पातः कुत ? अय भानुः भुवि तपस्विनिवह तप्त ततान । पृथ्व्याश्च जीवनं स्वकरैर्जहारा । अहो । तथा उडुनिकरस्य लक्ष्मी वृथैव जहार । तस्यास्य पातमपि युक्तिसह वदाम. । सः द्युमणि· वज्रपाणे. दिशि लब्धजन्मा गगनस्य मध्ये प्रवृद्धगात्र. विनाश प्रतीच्यामगात् । अहो विधेर्निदेशो महताप्यलङ्घ्यः । रागी सविता हरिदङ्गनानां पयोधरतटे राग समर्प्य अगान्तं (पर्ततान्त) अगात् । कूजद्विहङ्गम-रवैश्च रुदन्त्य इव ताः हरिदङ्गना उरुमूर्च्छामिव तमस्ततिं च भेजुः । अम्भोधिहृदि कृतपद साधु धवलीकृतसमुद्रजलौघ स्वप्रतिरूप सदृश्य सः अर्कः "शान्तो हि सर्वहृदयङ्गमतामुपैति" इति निश्चित्य अन्ते शम समधिगम्य अब्धि विवेश । अम्बुजातनिकुरम्बस्य नितान्तमित्रे मित्रे अस्तं समीयुषि सति शुद्धजलगस्यापि पद्मस्य मुखं मुकुलीबभूव । नष्टाः प्रियाः समृद्धियुजोऽपि स्वीयस्य वक्त्रं मुद्रयन्ति खलु ।

आकण्ठोदकवासि, हृद्गस्य मधुकृतः झङ्काररम्योक्ति, भ्राजत्कण्टक[1] कण्टक[2] द्युति, मुहुः मन्त्रार्थानां सञ्चिन्तया ईषत्कम्पित मूर्धशोभि, हंसौघसशिक्षितं स्वन्त.स्थापितधातृ नलिन मित्रोदयमाकाक्ष्य साधु तपतीव भाति सायङ्काले ।

---

1) यथा आभरणकर्तार धमन्यादिवातसञ्चारयोग्यमूषाया सुवर्ण निधाय अनलसयोगेन तप्त कृष्वाऽयोमयदण्डेन उदधृत्य जले प्रक्षिपन्ति तद्वत ज्योतिश्चक्रचालका माहेन्द्रदिगङ्गनाया· कुण्डल विधातुमिव (प्रात सूर्यस्य कुण्डलाकारेण प्राच्यामुदेष्यमाणत्वात्) सूर्य समुद्रे क्षिप्तवन्त

2) कमलनालकण्टका 3) रोमाञ्चाः

चन्द्रोदयवर्णनम् :

दिशापतौ सूर्ये अपरा दिगायताक्षी उपेत्य रागमुपेयुषि, इन्दुः इन्द्रस्य दिशि रोषरक्त निबद्धनीलभ्रुकुटि तस्याः[1] वक्त्रमिव अदृश्यत । शशी पूर्व नक्षत्राख्यालिभिः इन्द्रदिङ्मृगाक्षी सन्धाय पुन तत्पादे प्रणतिं विधाय, स्वस्य आशान्तरेषु आसक्तितः, जनित तस्या कोपसम तमः नितरां परिहरन्, स्वीयैः करैः ता स्पृशन् तस्या वक्त्राम्भोरुहचुम्बनाय नून शनकैः उद्याति । चन्द्रस्य कोमलकरैः रचिनाङ्गसङ्गा ता दिश सान्द्रं अन्धकार[2] अपि सहसा विहाय अखिलजन्तुषु स्वपत्सु एन (परपुरुषं) चन्द्र ईश वव्र । नूत्नविषयाः आशा[3] हि एनः न गणयन्ति । सरसोऽसाविन्दुः पूर्वाब्धौ अवगाह्य फेननिचयाख्यश्रीखण्डलेपद्युति स्वाङ्काख्येन अलङ्कृतिमूलेन नीलतिलकेन शोभित सन् ताराख्य हारान् तस्यै पूर्वदिगङ्गनायै दिशन् व्योमाख्यां तत्कबरी प्रगृह्य सुकरैः दिक्कामिनी ता आश्लिष्य रागेण ता रञ्जयन् चुचुम्ब । उदितचन्द्र नभ कृष्णस्य वक्षःस्थलमन्वेति । तत्र ऊर्ध्वरश्मिबिशिष्ट नक्षत्राणि हारवद्विराजन्ते शशाङ्कसङ्गचन्द्रः नीलमणिरिव शोभते । वार्वाहावृतसर्वभाग शशाङ्क ईषद् दर्शितकोण नभसोऽग्रेस्थित उदित विधोर्बिम्ब अच्युतमनस्तोषं रम्यवसनच्छन्न, कुङ्कुमशोभि मरुद्दर्शितप्रान्त, मध्यस्य उपरिष्टात् उदयत् श्रीकुचकोशमिव रेजे । दिशां भर्तरि दिवाकरे अन्यदेश गते सति असौ चन्द्र शनैः ताः उपेत्य तासा अम्बर स्वकरै यत् जगृहे तस्मात् सः कलङ्की इति मम प्रतर्कः । पौर्णिमास्या यत् पूर्णं वस्तु रात्रौ उदयति तत् कृष्णस्य कीर्तिनार्या वक्त्रमेव । तच्च कस्तूरी तिलकोपेतम् । प्रविरलकचविन्यस्तानि पुष्पाणि नक्षत्राणि । तदपि देवै स्तोत्र व्याजेन वदनविनिहितम् ।[4] तत् नन्दसूनो कुमार्या कीर्तिनार्या वक्त्र नो चेत् गोपाङ्गनानां हर्षाय, अहितवधूवर्गस्य तापाय च कथ स्यात् ?

---

1) पूर्वदिगङ्गनाया 2) भर्तृविरहजदुःखमिति ध्वनि

3) दिशः, अभिलाषा

4) अनेन चन्द्रकलाना प्रतिदिन क्रियमाणस्य पानस्य गतिरुक्ता ।

हृततस्करप्रचारे दिवसकरे नरनयनस्य विदूरवर्त्म याते सति अथ पूर्णबिम्बः रजनिकर नभोमाङ्गमुपेत्य मानवानां श्रममधरीकुरुते[1] ।

स्मरेण, श्रीकृष्ण आत्मसात्कर्तुमिव ऊर्ध्वं प्रयुक्त मारमौर्व्यां स्थितमल्लिकाख्यबाण इव स चन्द्र व्रजस्त्रीहृदय विजित्य शनै हरेः पद प्राप । गन्धर्वाणा गीतेन आवृतं अपारतारै भूषित अभ्रं चन्द्रेण रञ्जितमुदीक्ष्य मुदा मुकुन्द. मधुपमञ्जुरव प्रसूनसन्दोहै सान्द्र, तरुजालैर्नील वृन्दावन प्रविशत् तं कन्दर्पतात कृष्ण अवलोक्य इन्दु स्वरम्यकिरणै· विपिन पुपूर । मन्दानिलश्च मुदितानां उत्पलानां मान्यगन्धै. पुपूर । तरव सान्द्रप्रसूननिचयै समन्तात् वृन्दावन तत् पुपूरुः । पिकाश्च गीतै. पुपूरुः । "प्रभो कृष्ण त्व इह वृन्दावने चन्द्रिकायां ललनासहितः विहृत्य 'विश्वस्य मोहन चन्द्र.' इति मदीय यशो विस्तारय" इति कृष्ण पार्थयन्निव हिमांशु. वृक्षतलप्रविष्टै. स्वीयै हृद्यकरैः तद्वृन्दावने कृष्णाङ्घ्रि आस्पृशति ।

तदा वृन्दावने कृष्ण. विविधै. तै. चन्द्राद्युद्दीपनविभावै व्याकीर्णकाम इव निजसङ्गयोग्या. व्रजवधूः आकर्षयन् क्रमेण वेणु रणयन् बहुतानमानगानज्ञमौलिः अधीश्वरोऽसौ उत्कृष्टतया अगायत् । अच्युत. स्वहृद्गत जगत् हृद्येव अनुरञ्जयन्, स्निग्धान् सवयस. सहर्षयन्, गोपस्त्रीहृदय कर्षयन् पशून् ऋषिगणाश्च निश्चेष्टयन्, स्वगीतश्रवणाय आकाशे आगता सुरवधू समूर्च्छयन् सङ्गीताभिज्ञान् चारणान् सिद्धान् सन्त्रपयन्, सुरान् विनिमयन् इत्थ विश्व स्वस्य वश स्पष्टयन् वेणु पुपोष । मुरारि शुष्कामपि मुरली अधरामृतेन सरसा विधाय, मृदूवितशून्यामपि ता हृद्यस्वनां विधाय, छिद्र च पिधाय चुचुम्बे । सद्वशजातललनासु न कस्य पक्ष ? "असौ वेणु. अपरवशमपि ईश कृष्णं स्वानुरक्त विधत्त । गोव्याघ्रादिजन्तुषु सहजात अभेद्यमपि विरोध हन्ति । जगत्

1) प्रजापालके वृद्धे राशि गतेऽपि अर्वाचीनस्तत्पुत्रोऽपि प्रजा सुखयतीत्यमर्थ अनेन ध्वन्यते ।

च एतत् वशयति"— इत्थ वेणुः मान्यतामाप । मधुरनिनदभाजां कि न साध्यं हि लोके ?

स जयति यदुनाथ.श्रावितानेकगीतः करधृतवरवेणु कामिनीकामधेनुः सुललितवनमालः सुन्दर पाङ्गलीलः सजलजलदमूर्तिः साधुभिर्गीतकीर्तिः ।।

कृष्णमुखकान्तियुक्ते चन्द्रे जृम्भति तद्वपुर्गन्धे वियोगवन्हिसचिवे मन्दानिले मुहुर्वाति सति कृष्णस्य कोमलालापवत्वेणौ कूजति सति शाणाशिते पञ्चबाणस्य विशिखे ताडिताः ता. गोप्य. मानिन्यः अपि मनोभवपितु. श्रेयोनिधिं सन्निधिं ययु ।

कापि गोपी दोह विहाय कृष्णसुरभि समस्तेप्सित दोग्धु गता । अपरा स्त्री कृष्णस्य बिम्बोष्ठसुधायां अतिलुब्धहृदया भुक्ति विसृज्य कृष्ण प्रति गता । सद्गुणार्णवभृते भर्त्रे स्पृहा बिभ्रती काचित् कान्त विसृज्य श्रीकान्तं गता । काचन अन्या कृष्णविहारयोग्यविभवा कन्या इति प्रदर्शनाय तोक विहाय गता । स्वनयनं अञ्जनरूषित कुर्वन्ती अन्या गोपी तस्य कृष्णस्य ज्ञानाख्येन अञ्जनेनैव तुष्टधीरिव सत्वरा अगात् । इतरा व्रजाङ्गना कृष्णाङ्घ्रिसेवां सदा तन्वन्त्याः मम तत्पादयोर्भूषण मत्पदयोर्भूषणं भवेत् इतिस्वीयां पदोर्भूषा स्वदोष्णि सन्धाय अच्युतसन्निधिं समगमत् । विभु. कृष्णः स्वस्य आनन्दपूर्णतां स्वकीयानां सन्दर्शयन् आनताः अपि, आत्मानं दृष्ट्वा प्रीताः ताः मानिनी. गोपी इति अचीकथत्— "पितृभर्तृजनन्यादे. परिचर्या यतः पुरुषार्थप्रदा अत व्रजमेव व्रजत । भवतीः स्मरता पित्रादीनां हित कुरुत ।" इति

गोपाङ्गना— हे ईश, अङ्ग, तेषां पितृभर्तृजनन्यादीनां यदि हितमेव कार्यं तदा अस्मान् तत्र गन्तु नाज्ञापय । विरहाग्निना दग्धं अस्माकं शरीरं. ता गोष्ठमही प्रेतमही न विधेहि बत । हे ईश कृष्ण पत्यादीना सेवा अपि भवत्प्रसादप्राप्त्यर्थमेवेति सन्त. वदन्ति । अत. विधिना त्वत्पादमूल उपनीता. एता अस्मान् कस्मात् गन्तु मुधा आज्ञापयसि ? हे श्रीनाथ, अस्माक नानायोनिषु सम्भवे सति कियन्त जनाः

मातृतां, मान्यता, पितृतां, भार्तृतां च अगमन् ? तत्र कस्मिन् जन्मनि विद्यमानाना पित्रादीना अर्चन कुर्मः ? अपिच एषु पित्रादिषु कतिवार वैर न कृतम् ? तस्मात् हे विश्वान्तरात्मन् विभो श्रीकृष्ण, नित्यं पितरं पतिं च जननी त्वामेव सेवामहे । सखे, जगता पिता त्व जगदन्तर्गतानां आसा गोपीनां पिता न किम् ? जगत्प्रसूतिः त्व अस्माक माता न किम् ? जगत्पतिः न· पतिः न किम् ? तत् अरिष्टवृष्ट्या अन्यजुष्ट्या अलम् । य. पुमान् स्थैर्यशौर्यसौन्दर्यसागर· स एव कान्त. । अपरं कान्तं[1] सुखस्य अन्तकर तर्कयाम्हे । ईश त्व सारभागमनुभूय शरीरभाजां अवशिष्टं अरस अल्पभोग्य प्रपच्छसि किल । दुःखातिदूरस्य गतपारस्य सुखस्य एकभोक्तु. तस्य तव अखिल वस्तु भोग्य तर्कयामः ।

कृष्ण·– धर्मो न वोऽयं श्रुतिसङ्गताक्ष्यः ।[2]

गोप्यः– धर्मो नवोऽयं श्रुतिसङ्गताक्ष ।

कृष्णः– माऽन्य[3] भजध्व रमण विहाय ।

गोप्यः– मान्य भजामो रमण विहाय ।

कृष्णः–अङ्गना यूयं हिताहिताज्ञाः[4] बत । यतः अधर्मे[5] युष्माकं निश्चला मतिः अस्ति ।

गोप्यः–अच्युत प्रभो यतः अस्माक अधर्मे[6] निश्चला मतिरस्ति हि । ततो वयं हिताहितज्ञा. ।

स कृष्ण. तासां वाग्वैखरी निरीक्ष्य प्रीत इव प्रियोक्तिपरिरम्भण-चुम्बनाद्यैः सुप्त मदन प्रबोध्य कामिविदूरतां स्वा सत्यां विधातुमिव

---

1) क सुख, तस्य अन्त यस्मात्स इति व्युत्पत्या ।

2) श्रुतिभि वेदै सङ्गतानि अक्षीणि यासा तासा सम्बुद्धि ।
श्रुतिभि श्रवणै सगतानि अक्षीणि यासा आकर्णान्तलोचना

4) हितेन हितोपदेष्ट्रा पितामहेन आहिता आज्ञा यासा ता
(हित + अहित + अज्ञाः)

5) अकर्तव्ये

6) अ इति ब्रह्मेति श्रुते अस्य अकारवाच्यस्य परमात्मन· धर्मे वैष्णवधर्मे ।

Rarest Archiver

वल्लवीना अदृश्य ममभूर् । कृष्णे अन्तदधति सति ता गोप्यः सम्भ्रान्ता सञ्जाता । ता पति-अपत्य–भवनेषु विरक्तचित्ता श्रीपुण्डरीकनयनेक्षणकार्यमव्रता त अरण्यकेषु विमृग्य मुग्धाः बहुधा चेरु.– परमात्मज्ञानासक्त अन्यत्र विरक्ता. आरण्यकादिषु ससक्ताः मुनय इव । समसमय उदितविमोहावस्थया क्वापि मुग्धा समुदितघनचिन्तावस्थया क्वापि शान्ता गोप्य योगिपुंगकचिन्त्य त कान्त वशयितुमिव[1] मधुरवचनेषु दक्षा सत्य परोक्ष श्रीकृष्ण जगु ।

रोम्णा हर्षणकारिणि श्रवणत पापौघविध्वसिनि
प्रेम्णा त्विन्तयता विचित्रविमलश्लाघ्यार्थसन्दायिनि ।
सञ्जाते भुवि रुक्मिणीशविजये सद्वादिराजोदिते
सञ्जात सुरमण्डलीषु महित सर्गश्च षष्ठो मुदाम् ॥

सप्तमः सर्गः*

मुग्धा काश्चिद्वदन्ति स्म–हे यदुतिलक, अस्मान् धैर्यमात्रेण[2] हित्वा गतोऽसि । एव न चेत् अयाच्ञाप्राप्त सुन्दरीणा सङ्ग कथ त्यजसि इति । मोहावस्थापन्ना एनादृशी प्रति शान्ता काचित् वक्ति–

---

*अस्मिन् सर्गे कृष्णविरहिताना गोपीना अवस्था वर्ण्यते । कृष्णे तिरोहिते सति तद्विरहेण क्वचिन्मुग्धा क्वचिच्छ्रान्ताः गोप्य वृन्दावने तद्दिदृक्षया वृक्षेषु पक्षिषु मृगेषु च विचारयन्त्य इतस्तत अचरन् ।

1) इवेत्यनेन योगिभिरपि ध्येयस्यास्य वशीकरण दुसहमिति द्योत्यते ।

2) एना किञ्चिदायासयिष्यामीति धार्ष्ट्यमवलम्ब्यैव न तु अस्मत्परित्यागसामर्थ्यसद्भावेन ।

Rarest Archiver

हे तन्वि गोरि, श्रोभून अस्य कृष्णस्य तदिदमस्मत्परित्यागकार्यं उचित-मेव । तस्य चरणकमलधूलि तन्वी विधातु समर्था ।। [1] इति

हे अश्वत्थद्रुम न प्रिय· भवन्मध्ये सदा वर्तते किल [2] । तस्म ज्ञापय बल्लवीजनदशा कष्टा अदृष्टप्रियाम् । [3] नो चेत् अङ्ग, त्वद्हृदि लग्न अग्नि [4] न देहि । अथवा त्वत्तस्थिति तरुत्व देहि । अथवा वियोगरोगरहिता ते अभिधा [5] देहि । त्व मर्त्यता आश्रय । आर्द्रवस्त्र पुमान् तव मूलस्य आसेचनपूर्वक परिसरन् स्वाभीष्ट लभते किल । हे अश्वत्थ, अधुना अस्माभि वने वने कृष्णान्वेषणार्थं समन्तात् चरन्तीभि न केवल नव प्रदक्षिण क्रियते किन्तु त्वज्जातीयाना सर्वेषामपि । क यक्लेशवशात् समुत्थितेन घनस्वेदाम्बुना वयमपि आर्द्राम्बरा । कृष्ण-विरहोत्थै च अस्रौघै न केवल तव मूल-भवद्वेदिकामेव अर्द्रा कुर्म· । एतादृशीः त्वत्सेवातत्परा अस्मान् किमुपेक्षसे ? एका–हे सख्य अयम अश्वत्थ· न प्रिय विप्रियवा न वदति बत । स्वैरमाराधितोऽपि इष्टफल न दिशति । अन्या गोपी–हरिचरणविदूरा को नु सम्भाषयेन्न । तदाज्ञारूपं च सुकृतमपि किवा फल सम्पादयेत् ?

स्वान्तरसस्थित प्रेष्ठ कृष्ण अय न दिशतीति भृश आर्ता समस्ता गोप्य अश्वत्थोपरि कोपात् शापमयोजयन्निव । कथम् । "हे अश्वत्थ, त्वत्फल सता निष्फल स्यात् ते जनि विष्ठातोऽस्तु । तवैय छाया निशि विगेया [6] अस्तु । तव हृदि क्रूर वन्हिरस्तु । त्व सदा न स्पर्शयोग्य. भव इति" । योऽयमश्वत्थ अस्माक वचन न हि शृणोति प्रत्युत्तर वा न वक्ति,

1) रामावतारे शिलीभूताया योषित्करणात् ।
2) मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे । अग्रत शिवरूपाय वृक्षराजाय ते नम ।
3) अदृष्ट प्रिय कृष्ण यस्या सा ताम् ।
4) "वन्हि अश्वरूपेणात्र तिष्ठतीति अश्वत्थ – निरुक्तम् ।
5) श्व न तिष्ठतीति अश्वत्थ
6) दिवा विभीतकच्छाया रात्रौ अश्वत्थसम्भवा । दिवानिशि नरच्छाया हन्ति पुण्यं पुराकृतम् ।

Rarest Archive

असौ मूकः बधिराग्रणोश्च भवतु । योऽस्माक रमण नैव अदर्शयत् स्वान्त स्थितोऽप्यच्युत नैतद्दृष्टिपथ प्रयातु । कि बहुना य द्विजकुलें प्रेत्य न स्वर्गत ब्रह्मराक्षस असौ तत्पार्श्वे वसतात् ।

गोप्य – हे जाति, मालति, अग्रचे तुलसि, अयि मल्लिके यदि अस्माभि कदापि जन्मनि युष्मभ्य कृष्णाङ्घ्रिसङ्ग. अदायि तर्हि तदुपकार स्मृत्वा तस्य योगिजनप्रियस्य कृष्णस्य योगं अस्माक समादिशत"

"पुण्यभूजे वरयतीन्द्रैर्वन्दिते हे तुलसि त्व कृष्णाघ्र्यम्बुजे मिलसि । वयस्या. अस्मान् वरय । अम्ब, त्वामन्तरेण वनजानां वनाज्जातोऽपि गन्ध. मनसिजादे [1] मनसि निर्वृति न निर्मिमीते। हे बत जात्यादि पुष्पलता. चान्द्रप्रमोदकरचारुकराभिराम वृन्द वन वन भवदीय. वासः किल । वृन्दस्य अवने समर्थे वृन्दावने जाताः यूय मन्मथबाणैः युष्माक पुष्पै. व्रजसुन्दरीणा वृन्द हा वृथा दलित कुरुत । हे साध्व्यः भवत्यः नक्रातिभीतगजगीतचरित्रजात[2] नयनोत्सव त कृष्णं नः सन्दिशन्तु । कृष्णप्राप्त्यनंतर वय युष्मान् कृष्णाङ्घ्रियुगले विनिवेश्य पद्मासनादिसुर सञ्चयेभ सत्कृताः कुर्मः । बत जात्यादयः नतजनस्य बन्धुं सान्द्रसौन्दर्यं सिन्धुं उदारहारं यदुकुलावतस कृष्ण यच्छत । तदनु प्रहृष्टाः वय ईष्ट कारिणीः युष्मान् परमपदयुगाब्जे पूरयामः" इति व्यलपन् ।

"कृष्णसम्बन्धिन्य गेयमाला समालम्ब्य कृष्णस्य कृताङ्गसङ्गा[3] एताः जात्यादयः, गाढ अस्माक कृष्णेन परिरम्भणे कृते मध्यस्थिताना स्वासा आयास आशक्य आसु गोपीषु पत्यु कृष्णस्य मार्गं न. वक्ष्यन्ति तस्मात् अन्यत्र गच्छन्तु ' इति च ।

"द्विरेफः अन्यस्या वल्यां अञ्चनात् मुकुलित, मन्दमरुता चलित सरसीरुहस्य आस्य अन्वेति । अनुसरति । हे सता नाथ, सदयानां अग्रेसर

---

1) मनसिजस्य आदि यस्मात्स तस्य हरे

2) अनेन मन्दबुद्धीनामपि अनुग्राहक हरि इति द्योत्यते

3) अनेन सपत्नीत्व ध्वन्यते ।

सांश्रुवश्य कृष्ण विमुखमपि अनुसरन्त द्विरेफ पश्य । किं न परित्यजसि खिन्नहृदस्त्वदर्थे ?" इत्यपृच्छन् ।

"हे पद्मवति सरसि, पीवरांस अस्माकं प्रिय कृष्ण क्व तिष्ठतीति उदीरय । स तु नारायण [1] तवोदरे निगूढ अस्ति । बत हे अम्ब त्वं हि स्वभावेन मधुरा [2] इति प्रार्थ्यसे । कृष्ण न वदसि चेत् अस्माकं शोकतप्तानां दृगम्बुनिकरै कलुषा खलु स्या: । हे पद्मिनि पत्या सम तव जले विमले विहृत्य त्वां कुचौघकुङ्कुमेन रञ्जितां कुर्म । जलक्रीडायां च अस्माक प्रसन्नै: मुखसारसै शोभमानां त्वां स्वमुक्तपुष्पनिकरै परित सुपूर्णां च कुर्म" इत्यवदन् ।

"इय पद्मिनी स्वीयप्रवाहभरेण धिक्कृतलोकवार्ता, भृङ्गावलीभि चुम्बिताखिलसरोरुहकोमलानना अतएव इतरेषा आर्ति अजानती नवाम्बुदतनु निज कृष्ण न न कथयेत्" इति च ।

"भो पद्मानि पयोब्धिसुताकलत्र कृष्ण शसत । स: युष्मद्वनेषु वसतीति वदन्ति सन्त [3] । अपरथा जीवनकृते रचितां अस्माक ललाटलेखा विमार्ष्टुं कुक्षिस्थिताय विधये [4] वा शसत ।" यत् इमानि पद्मानि न सपत्न्या लक्ष्म्या समाननामानि [5] सदा तस्या गृहाणि च । अपि च अस्मान् द्विषत तदीयपुत्रस्य कामस्य अस्त्राणि इमानि पद्मानि । तस्मात् अन्य देश गच्छत ।"

हे चूत, हे नारिकेल, हे पनस, हे आम्ल कृशानां अस्माक कृष्ण-

---

1) नारा आप अयन आश्रय यस्य स ।
2) अपा मधुररसस्य स्वाभाविकत्वात् ।
3) तुलसीकानन यत्र यत्र पद्मवनानि च । वसन्ति वैष्णवा यत्र तत्र सन्निहितो हरि ।
4) कमलासनत्वात् ब्रह्मण ।
5) सपत्नीनामधारणात् तद्दासभूतानि ।

Rarest Archiver

पदवी वदत । यूय हि परान् युष्माक–पुष्पाणि फलानि वल्कलानि मूलानि पत्राणि छाया, समुल्लसितपल्लवकोटराणि इत्यादिभि पुष्णीथ[1] ।

हे तिन्त्रिणि तूष्णी आस्व । तव फलानि अपि सदा वक्राणि । सा त्वं प्राणिनां ताडनकर्मसु उपकुरुषे । अस्माक नारिकेलेन कि प्रयोजनम् ? य. अभ्रचुम्बिनि नरै अलक्ष्ये मस्तके त्वचा पक्षिणाऽप्यग्राह्य छाया श्रितानां अध्वनीनां मृतिद, शस्त्रेणैव बलात्साध्य फल दधत् स: त्व अपि आस्व । सखि यश्चापक्व फलसम्मित भुविगतैरज्ञेय दुर्जरकण्टकैरावेष्टितं फल धत्ते सोऽय पनस: प्राक्काकभोग्य ध्रुवम् । अय चूत फलै पुष्पैश्च तोषितखग स्वोपान्तगानां नृणा पक्वानि फलानि प्रदशति । अयमस्माक मनस्तोषाय न स्यात । यश्च कन्दर्पमन्त्रिणि वसन्ते समीयुषि सति सराग: । कन्दर्पपक्षपातिना पिकगायकानां हर्षहेतु । तद्वन्दिन· शुकचयस्य सखा । तदीयानां बाणौघाना जन्मधरिणी स हि चूत· नस्तोषाय न स्यात् ।

प्रान्ते निगूढवल्लि[2] हे माधवि इह श्रीमानिन्या लक्ष्म्या: मानदं कृष्ण आदिश । नोचेत् त्वदीया स्थिति– माधवीत्व– देहि । तत्र नाम्ना अपि माधवीत्व[3] अस्ति ।

एष: 'अशोक·' अपरेषा वेदनां न जानाति । पदाहतेरेव परोपकर्ता कृष्णवियोगेन शिथिलात्मनां न कार्यकारी न स्यात् । हे सख्य: तस्मात् अपरत्र प्रतियात ।

"सुरससदि गीत, दानुशील हे पारिजात, सिद्धगम्य श्रीनन्दनन्दन कृष्ण उदीरय । आश्रिताना नानाविधानि रत्नानि रासि किल, अस्मभ्य तु अच्युताख्यहरिन्मणिमेव देहि ।" अस्माक कृष्णाघ्रिलाभेन निजावमान [4] चेतसि विशक्य अय पारिजात. निज कृष्ण न न दिशेत् ।

---

1) सर्वस्वेन परपोषकाणा भवता वाङ्मात्रेणास्मत्पोषणे न प्रयास ।

2) अनेन योषिदन्तरसहिष्णुत्व ध्वन्यते ।

3) माधवस्य इमा: माधव्य. ।

4) पारिजातादपि कृष्णाघ्रे सहस्रगुणित फलदातृत्वात् ।

किञ्च असौ अस्मत्सपत्न्य सिन्धुपुत्र्या लक्ष्म्या सहोदरः, सहस्रनेत्रां-हृणेन दृप्तवृत्तिश्च ।

कमनीयमूर्ते कृष्ण ते गीतेन गोष्पति-शर्वपूर्वाः गीर्वाणवर्या अपि नम्रभाव नीता. किल । तस्मादस्मान् स्ववशे विधातु एतावता अदृश्यत्व-दूरगमनादिना कि प्रयोजनम् ?

हे मुरलि, मोहन परमहसानां अभ्युदयप्रद उदयदिन्दुश्रीमुख वीतशोक मुररिपु त शस । न वदसि चेत् हे तरुणि मुरलि अस्मिन् वृन्दावनान्ते दृश्यमान इद तव कुल अस्मद्विरहदहनभासा हन्त निर्दहाम ।

हे वृन्दावन न. कृष्ण-वर्त्म वद । नो चेत् प्रियस्य विप्रयोगात् जनित पुमास[1] त हि दास्याम । अङ्ग तेनाग्निना त्वदीयै लतावृक्षादि रूपै अभ्युदयैः साक गोपललनाख्यभास्वच्चकोरीचये प्रज्ज्वलिते सति पुनस्तव निरर्थक नामधेय को वा कवि. कीर्तयेत् ।

शान्ता– सखि तरुः[2] अय अज्ञः नैव जानाति कृष्णम् ।

मुग्धा– किमिति न जानाति ?

शान्ता– विधिनिदेशात् ज्ञानशून्यो हि वृक्ष ।

मुग्धा– यदुतिलकवियोगात् अस्तु मे ज्ञानहानि , गतविरहभयस्य ज्ञानहानि. कुतोऽस्य ?

मुग्धा– सखि कथय स कोऽयम् ?

शान्ता– तन्वि, पीयूषरश्मि ।

मुग्धा– दिशति कथ उदग्र तर्हि मे कालकूटम् ?

शान्ता– हरिरिव[3] पदमात्रश्लाघ्यधर्मा स नून
वहति गरमगौरं ह्रासभागेव चन्द्र ।

---

1) कृष्णवर्त्मानिम् अग्निम् ।

2) तरुरूपवृन्दावन वा ।

3) अनिष्ट हरतीति हरि इति व्युत्पत्तिसद्भावेऽपि गोपिकाना अधुना अनिष्टप्रदत्वात् । पदमात्रेण श्लाघ्यधर्मत्वम् ।

Rarest Archiver

धन्ये यामिनि त्व कामिनीव शशिन[1] सान्दन्द आचुम्ब्य तस्य मान्यै' करै सुधारसधरै सदा आश्लिङ्गिताङ्गी तद्विश्लेषात् चकित[ ] देशान्तरे प्रस्थित न अनुयासि[2] बत । अध्वनि कञ्जनयनाय[3] कृष्णाय अस्मन्मनोवेदना शस । यस्या निशाचरा. प्राणहराश्च चोरा' सञ्चरन्ति सुबोध' बुधा न चरन्ति, या च यामिनी स्वय कृष्णपक्षे अप्रियसौभगा सेय रात्रि , हे आर्या कृष्णपक्षावलम्बिनीनां अस्माक आनन्दकरी किम् ?

कालिन्दि, कञ्जदलायताक्ष त कथय । त्व कृष्णेतिनाम्ना नैल्येन गुणेन च नन्दसूनो सदृशी ननु । सखि, ऋषय' शान्तगम्य ब्रह्मण्यदेव, कृष्ण भवत्या' ब्रह्महृदे[4] कृतगृह ब्रुवते । कालिन्दि त्व अघान्वितानपि सत: पवित्रात्मन कृत्वा तव भ्रातुः यमस्य निकेत प्रति कदापि गन्तु नैव मुञ्चसि । किन्तु प्रीता सती क्षीरपयोब्धिवासनिरतान् तान् आश्रितान् करोषि । तथाहि । भर्तरि स्निग्धे सति[5] कामिनीजनस्य रुचिः अल भर्तृपक्षे एव हि । यमुने त्व रङ्गत्तरङ्गचयै सङ्गतवायुना त्वत्समर्पी कृतालयाना जनाना माङ्गल्यदा किल । तव अन्तिकवने भृङ्गी. इव सञ्चरन्ती सङ्गीतकृष्णचरिताः अस्मान् उपेक्षसे किम् ?

हे मन्दमारुत मुकुन्दस्य पदाब्जगन्धश्रिया माननीय मानिभिर-गम्य त कृष्ण इह आनय । नो चेत् अङ्ग वायो अस्मद्हृदिस्थित तव समानजाति प्राण बहिर्नय । अथ कृष्णपादे अर्पया । त्व अतीन्द्रियस्य अमित विक्रमस्य पदाब्जगन्ध प्रदर्शयसि । हे अदृश्य, दृश्यात्मविशेषधर्मन्[6] परमस्य तस्य साम्य[7] अपेक्षसे किम् ?

---

1) चन्द्रस्य निशापतित्वात् ।

2) यत्र यत्र चन्द्र' तत्र तत्र रात्रे गमनात् ।

3) कृष्णज्ञानाय तल्लक्षणकथनमेतत् ।

4) अक्रूराय श्रीकृष्ण स्वात्मान यत्रादर्शयत् तस्यतीर्थस्य नामब्रह्महृद इति ।

5) क्षीरसमुद्रस्य चिक्कणतागुणयुक्तत्वात्स्निग्धत्वम् ।

6) अनुष्णशीतगुणाख्यधर्मविशेषेण गम्यत्वम् ।

7) दुष्टेभ्यो अदृश्य शिष्टेभ्यो दृश्य कृष्ण. ।

हे पक्षिण कृष्ण उदीरयध्वम् पापापह पावनपावन तम्। नोचेत् अस्मच्छ्रोत्रस्य शल्योपमितं एतं भवत्कण्ठविशेषणं किम्? सखि, परपुष्ट. स्वरेण शौरिं स्मारयन् न प्रयच्छति। स विस्पष्ट पोष्टु विप्रलम्भको वै।

"हे कृष्णसार, नेत्रोदयस्य भर बिभर्षि। आत्मदृष्टे कौतुक श्रीकृष्णवर्ष्म त्वया अरक्षि किम्? भवत श्रोत्रस्य इय उन्नतिः चकास्ति मुरलीरव श्रुत किं भवता?"

गोपी– "नाथ निगमविदूर त्व नृणा दूरदूरः यदि तर्हि अस्माक हृदयकमलत किं न अपैषि?"

अन्या– तरुणि, तव तनुवियोग सम्मत?"

पुन गोपी– "मनोज्ञे, प्रियपुरुषवियोगात् तनुवियोग दु सह न मन्ये।

एका गोपी– सखि कृष्णस्य अदर्शनम त्रेण त्वयि तनुकार्श्य क्षणेन अतर्दैन्य च अजनि। अत कृष्ण इय न प्रगल्भा इति त्वयि मान न वहति।"

अन्या– "कृशतरनिखिलाङ्ग्या मम दैन्य त दीननाथप्रयुक्त किन्तु विश्लेषवन्हे।"

गोपी काचित्– अनृतंलपित एन नार्थयध्वम्।

अपरा गोपी– तत्तथा। परन्तु अस्य गीत-वाक्य-अलकाभा एते परभृत-शुक भृङ्गा श्रीमुखश्री चन्द्रश्च इत्येते पथिपथि अस्मच्चेत प्रार्थनाशील विदधति। [1]गोप्य एका प्रति– "रमणि, रुचिररूप कृष्ण तव विदूरे आसीत् किम्?"

सा– "तन्वि, नहिनहि, मम पुण्य दूरे प्रयातम्।

पुनस्ता – "बत यदुकुलनाथ स त्वया मृग्यते किम्?"

सा– "सखि, नहि, तेन सह नोत वित्तमन्वेषयामि।"

---

1) कृष्णेन स्वसमूहात् या प्रेम्णेव नीता तामपि वियुक्ता दृष्ट्वा सोपहासमाहु।

Rarest Archive

बत सख्य चित्त सुस्थिर वितनुत। स· कृष्ण· अस्मन्मृदुलहृद् अवलोक्य स्थैर्य आलम्बयेत्।

अन्या·- "अयि सखि, वनुवन समन्तात् सञ्चरन्त त कान्त अनुसरत् अनुरक्त तत् चित्त क स्थिर कारयेत् ?"

स विधिरपि निदेश तस्य नून विधत्ते। विरहदहनशान्ति यन्न मूर्च्छा ददाति। अपि निशि हृदयान्त कृष्णसश्लेषशङ्की न दिशति च सुषुप्ति हा हता कि विधेयम् ? यदि अस्माभि· मधुर कृष्णस्य गाथामृत प्राक् अपायि तर्हि मुकुन्दः स्वां स्फुरदधरसुधां अस्माक यच्छेत्। किञ्च क्वचिदपि विमल स्थावर जङ्गम वा निज-धाम–कृष्णप्रतिमा–यदि अदर्शि तर्हि हरिः आत्मान अस्माक दर्शयेत्। सौन्दर्यधामन् कृष्ण, तव करद्वन्द्वे भास्वत· गात्रस्य विश्लेषभीत्या नः मृति· नानुमता। अधुना तवादर्शनाच्च असुभृतिरपि नानुमता। वय अधिगहन उभाभ्या बद्धकण्ठा इव स्म। हे कान्त, कृष्ण, अस्माक नयनगत कामस्य नलिनशर तव वक्त्रेन्दुकान्त्या शमय। अस्माक कुचस्थ कामस्य उत्पलबाण तव नवपदाख्यरविभासा· शमय। सदय तव दासी गाढालिङ्गनेन अर्धगात्री विरचय। तेन च कन्दर्पदर्प शमय[1]। अयि, रमण मुरारे, सुन्दरीकान्त, शौरे, नरकमथन[2] कृष्ण, प्रौढ वाराशिधिष्ण्य दानशक्त्या करजितसुरवृक्ष, अहङ्कृतानां आत्मीयानां शिक्षाप्रद, स्वकविजयसहाय, ध्वस्तधर्मान्तराय कन्दर्पदर्प शमय" इति गोप्य व्यलपन्।

वृक्षेषु पक्षिषु मृगेषु कृष्ण विचारयन्ती· प्रमुग्धहृदयाः श्रुततत्व कान्ती·[3] प्रेक्ष्य आविर्बभूवुरपि रम्याना तदीयाना वाक्यानां भाव पुन विविदिषु· कृष्ण तदा तिरोऽभूत्।

जितापत् सुखी कृष्ण· कामिनी इति कृत्वा यां गोपी सुखयन् निनाय कामि-नीति-जिता तेन, कृष्णेन काञ्चित् पद्यां (मार्ग) आसाद्य सा

1) गाढालिङ्गनेन अर्धनारीश्वरप्रतीत्या कामस्य दर्प· शाम्यति।

2) नरकासुरनाशक, स्मरता नरकविनाशन

3) श्रुत तत्व यैस्ते तत्त्वज्ञानिनः तेषा कान्तिरिव कान्ति· यासा ता

Rarest Archiver

उज्झिता । सा कृष्णेनोज्झिता गोपी असारससारे अरसा सुपारे. सरे. सारे स्वोये उर सरसि सरत्सारसपक्षिवच्छोभमानकुचा सुरसूरस [1] ससार । स्मरतात एन अलक्षयन्ती सा त एन कृष्णं स्मरता हृदा आत्तखेदा 'त्रिधे सौम्य अति दूरे न नय, नयनातिदूर न कुर्याः' इति जगाद। "हे ईश कान्त, दिवाऽपि [2] कुट्टचामपि (वनगमनेन) अन्तर्हित त्वा कालभतेजसा [3] उपमानेन स्वान्ते बिभर्मि । अज इह वने त त्वां विना साय का अन्त हित लभते ? हे ईश, त्व सारः सुरस रासि । तत् एहि । हे महि ! इहवने ससादा (दुःखसहितां) वेदवादविद· कृष्णस्य सदसि वद । हे ईश कृष्ण सरसा मधुपानां आलिः सरसीं उप कण्ठ उपेत्य मधुना मुदितां सभया [4] सभयां, अलि अनुनीय उद्इता अधुना वसन्तकाले अनुयाति च पश्य । अङ्ग,कृष्ण नगे आयतस्य आकाशपरिमितस्य अगस्य गोवर्धनस्य सानु समेत्य पुस्कोकिलसुस्वनेन गायता शमितागसा त्वया का नु मृगाक्षी न विमदीकृता ?

"सर्पतल्पस्य कृष्णस्य नन्दन, आनन्दकारण हे कन्दर्प यत्र सतां बन्धु हरिरास्ते त देश मां नय । हे र [5] अह गोपी कृतिदूरवृत्तिः [6] , अमानया [7] मया कारणेन, अहकृतिदूरवृत्ति त्व मा (कृष्णसामीप) नय । याऽह कृतिदूरवृत्तिः [8] अत एव अमाया. [9] अनयस्य अहकृतेश्च दूरवृत्ति. रमा न। [10]

---

1) सुरान् सूते इति सुरसू –लक्ष्मी । सा उरसि यस्य स तम् ।
2) गृह कुट्टी च मन्दिरम् ।
3) कलभ करिशावक तत्सम्बन्धि कालभ
4) सरोवरे वर्तनादया अनुष्ठातृब्राह्मणससदा
5) कन्दर्प, र पुमान् पावके कामे इति रत्नमाला ।
6) कृते गमनादिव्यापारस्य दूरा वृत्ति यस्या सा ।
7) अहकाररहितया
8) कृते उत्पते दूरा वृत्ति वर्तन देहाद्यवस्थान यस्या सा अप्राकृत विग्रहा ।
9) मा = ज्ञान अमा अज्ञान तस्या ।
10) एकपादयमकश्लोकोऽयम् ।

Rarest Archive

हे अतात[1] तत-अतत-अतीत-तत्त्वततितात[2] तां[3] अतते[4] । तत.[5] अत्ति । तत् ते तत्ता[6] -तौतातीत-ईती अतीते[7] । कृष्ण ते अधरामृत दिशते ते तनु अर्पये । विहरता त्वया इह मच्छरीरे रतौ विहिते सति अराणां (पापानां) चये हृति विरचये । इत्यनेन प्रकारेण भवता अभवता[8] अदायि । मुनयः य तीव्रै योगै. अते अगु त कृष्ण रन्ता इति मत्वा कापि गोपी इत्थ गिरा अर्चयन्ती गञ्जितात्महारा हा रामकृष्ण इति शुचार्ता अपतत् ।

रोम्णां हर्षणकारिणि श्रवणत. पापौघविध्वसिनि
प्रेम्णा चिन्तयतां विचित्रविमलश्लाघ्यार्थसन्दायिनि ।
सञ्जाते भुवि रुक्मिणीशविजये सद्रादिराजोदिते
सञ्जातः सुरमण्डलीषु महितः सर्गो मुदां सप्तमः ॥

---

1) जनकरहित ।

2) तत व्याप्तं आकाशादि, अततं = अव्याप्त पृथिव्यादि अतीताः मुक्ताः इति तत्वतते तात ।

3) ता पूर्वोक्ततत्त्वतति ।

4) व्याप्नोति, अत सातत्यगमने इति धातो कर्तरि लट् ।

5; अनन्तरम् ।

6) जगदैक्यम । तौतातीता मीमासका तेषा ईति निरीश्वरत्वरूप बाध ।

7) अतिक्रान्ते ।

8) भव ससार । न भव अभव तस्य भाव अभवता मुक्तत्वमित्यर्थ.

Rarest Archive

अष्टमः सर्गः[1]

बत अमल कृष्ण ! यान् वीक्ष्य इला भिया चलति ते विरहवन्हि बला[2] मलयानिला, अलयानिला[3] अस्मान् तुदन्तितराम्-कथमिव। अखिलधाम जगत् (प्र) लयानिला इव। हे अष्टैश्वर्यप्रद देवेश कृष्ण, देवेन्द्रे अशनिसहितवर्षस्य हेतौ सति, असिपाताज्जातासितघातकल्पे दावे 'अस्मान् आवेष्टयति त्व पाता अभू'। निजे भकते समान[4] स त्व अद्य अस्मान् मा त्यज्य। हे नानाननाननुत्[5] (नानाआनन-अन-नुत्) इन, एन' नून अनन्ने[6] न। अन्निना[7] स अनन्न पुरुष नौ. नु। नानान्नेनुन्नेन अनेन एनसा ना (पुरुष) ऊन[8] न भवति। केवल नः न ननु। स्व[9] अमित्रहृदा दैत्याना मनसा अहित, हृदा [10]अन-साम-हित-स्वर-

---

1) कृष्णविरहकातरा व्रजाङ्गना. त प्रार्थयन्ते।

2) विरहवन्हे बल येभ्यस्ते।

3) अलय नाशरहित अनिल प्राणवायु. यासा ता (जीवतीरित्यर्थ)

4) मानेन अभिमानेन सहित' समान। -

5) नानाअनेकानि आननानि यस्य स चतुर्मुख, पञ्चमुखो रुद्रो वा। अन = मुख्यप्राण। तौ नुदति इति नानाआननअननुत्। ब्रह्मरुद्र वायुप्रेरक।

6) अन्नरहिते पुरुपे, 'विषया विनिवर्तन्ते निराहारस्य देहिन' इति वचनात्।

7) अन्नवता विषयलालसानाम्।

8) रहित। तथाच अयमर्थ — हे ब्रह्मवायुप्रेरक, प्रिय कृष्ण, पाप नूनं अन्नरहिते पुरुषे नास्ति। अन्नवता पुसा स' अनन्न पुरुष, ससाराब्धि तरणे नौ, नानाप्रकारै अन्नै प्रेरितेन अनेन पापेन, पुरुष रहित (मुक्त = दोषोईझत) न भवति। केवल वयमेव पापोझ्झिता न भवाम इति न। अत कृतापरधासु अपि अस्मासु अनुग्रह कार्य इति गोपीना प्रार्थना। एकाक्षरपद्यमेतत्।

9) स्व = स्वर्गस्य अमित्र विरोधि हृत् येषा ते दैत्या।

10) अन मुख्यप्राण तस्य सामानि मुख्यप्राणेन गीयमानसामानि। तेषा हित स्वराः तेषा मित्र। मुख्यप्राणगीयमानसामवेदप्रिय।

Rarest Archiver

मित्र, [1]स्वर-मित्र-हृदा मनसा महित, अनसा[2] अमहितस्वर, हृदा मित्र[3], हे कृष्ण हे असुरमोदस्य अरे, वर. यासु अस्मासु रमा वर्तते ताः ईमाः किङ्करी तरसा वरय। उदारे त्वयि इद[4] न गुणोचितम्। हे कवीश कृष्ण, यदि भवान् वने दासी अस्मान् नो वृणीत तर्हि ईश आत्मनः प्रवृत्ता [5]गौ अपहृता भवति। क-वीश-गौरीशौ आत्मवृत्तौ[6] (स्वान्त करणे) हृत, त्व न अवने इन। तस्मात् (अस्मदनङ्गीकारे) ऋणी आसी.। हे प्रभो, तव अमानवेषु[7] देवेषु स्थिति जानतीः इमाः न मा त्यज। नवेषु (स्त्रीजनेष) स्थिति मा कुरु। असौ तव प्रिया मा (लक्ष्मी) नवा किम्? हे प्रिय इमा. गोप्य इह भूलोके स्थिति न ईषु। किन्तु नवे इषौ स्थिति ईषु [8] ईश, त्वयि चक्षुर्विषये सति व्रजे तोषसित विकुण्ठ मह भजेम। न चेत् त्वदीक्षोत्सवस्य भङ्गहीन तं विकुण्ठ उषसि हन्त व्रजेम। वियोगे तव गोविन्द दिवसोऽपि भयङ्करः कान्त, दिशाव्याप्ततामिस्त्रा इय निशा किं पुन.? हे कृष्ण शरै.समा समायता इय निशा न अयते। हे असमायते[9] कृष्ण भवान् स्वेषु समायते[10] किल। तेन भक्तेषु वैषम्याभावेन हे समाय[11], समायतुभ्य नमः हे असमाय[12] सः

---

1) स्वर प्रणव स्वरे मित्र स्नेहयुक्त हृत् येषा तेषा प्रणवोपासकपरमहसानाम्।
2) शकटेन शकटासुरेण।
3) हृदा वक्षसा मित्र इव सूर्यं इव सूर्यवद्दीप्यमानवक्ष स्थलयुक्त इत्यर्थ।
4) अस्मदुपेक्षणम्।
5) सेवार्थं सम्भवन्तु सुरस्त्रिय इति ब्रह्मद्वारा स्वप्रवृत्ता वाणी।
6) क ब्रह्मा वीश गरुड गौरीश शिव, तौ ध्यातेत्यर्थ।
7) निर्धारणे सप्तमी देवानामध्ये श्रेष्ठ इति।
8) तवानङ्गीकारे नूतनशराग्रे बलात पतित्वा मरिष्याम इति भाव।
9) असमा असदृशी आयति व्याप्ति यस्य स'। तस्य सम्बुद्धि।
10) समवदाचरति। सर्वानपि भक्ताननुगृह्णातीत्यर्थ।
11) मायया लक्ष्म्या सहित समाय तस्य सम्बुद्धि।
12) असदृश आय लाभ यस्य स। तस्य यम्बुद्धि। अवाप्तसकलकामेत्यर्थ.

Rarest Archiver

ते यते वर्त्मं मा भज । हे उदधिमन्थसङ्ग[1] मुरारे, अतिकार्य. अस्मत्करः दधिमन्थस्य सङ्गमपि कर्तु न यतते स्म । तेन त्वदङ्घ्रिजुष्टि विना अपर कार्यं का वा आर्या करोति ? हे दीनबन्धो यदि आसु गोपीषु दया नास्ति तथापि हे इनबन्धो[2] प्रिया इय नदी सूर्यपुत्री यमुना हि आप्या । यस्मात् अस्या यमुनाया· भाग्यस्य अरि असौ कालिय. तोयदसौभगस्य तव ओजसा हृत । हे रामावर हे कृष्ण हन्त उदारान् सुरान् अमु देवलोक च विहाय तव सङ्गसिध्यै इह (भूमौ) आगता वरेण सिद्धभद्रा.[3] सिद्धानामपि भद्रा[4] इमा रामाः न मुञ्च । हे सुदय, दुष्टाना भयप्रदाभ, नाथ, चकितासु आसु गोपीषु दया उचितैव यदा भवान् न वर्तते तदा अदोहं[5] अद. अस्मदगृह अपि भयदम् । उत्स्वनेन जलेन युक्त इद वन भयद न किम् ? हे निर्जितारिकुल, सदय, विभो, परिभ्रमणेन रञ्जितः वियुक्ततरुणीना स्थिरताहृत् अय भृङ्गचयः तव पदाब्जयुगे भ्रमर अस्माक हृदय अर्दयति । हे अच्युत विषयेक्षया सपदि दृक्क्षतिदृक्[6] दृष्टिः अस्माक, तव चरणाम्बुजं, करसरोजरुच, कवि धर्णनस्य आकरसरः अजरुच[7] तव नाभि च दिदृक्षति । सदा स्मरतः निर्मलस्य देहिन प्रिय अस्माक प्रिय तव पदारविन्द हृदि देहि । हें अज कृष्ण त्व शान्तानां स्तवनस्य प्रियः । पूर्व तव परिरम्भणादिना शान्तः तव नन्दन काम अधुना जयन् अस्मान् निहन्ति । तत् एहि ।

हे चम्पक जयोदय अच्युतपदाम्बु[8] ते अस्ति ननु । अच्युतस्य

---

1) उदधे मन्था मन्दर तस्य सङ्गो यस्य स ।

2) सूर्यबन्धो, सूर्यमण्डले स्थितित्वात् ।

3) सिद्ध सपन्न भद्र मङ्गलं यासा ता ।

4) मनोहरा

5) दोहनक्रियया रहितम् ।

6) दृश ज्ञानस्य क्षति विनाश ता पश्यतीति दृक्क्षतिदृक् ।

7) अजस्य ब्रह्मण रुक्कान्ति यस्मात् ।

8) अच्युतपादाख्याकाशाद् वृष्ट ।

Rarest Archiver

पदाम्बुजयो· उचितं अलिना अकलित पुष्प च तव अस्ति । अत मलिनैः अकलित त कृष्ण अस्माक इह आशु ईक्षय ।

अय अलि मधुद्विष न हि वेत्ति । तथापि शोभने अत्र चम्पक कुसुमे द्विषन् तस्य मधु नात्ति । एतद्युक्तम् । बहुपदे[1] पुसि विषमस्थितिः प्रकृति एव । परन्तु इहास्मन्निकटे (कृष्णस्य) अस्थिति अस्माक केवल विष वितनुते ।

हे अज, यते अपि मोहदा, त्वदुद्यमस्य हिता जगति महिता तव मुरली अस्मन्मनः विजयते । सा मुरली प्रलये अग्रवलया कमला इव तव अधरस्य सु-धार-सुधाः पिबति ।[2] हे उदार कृष्ण रणता वधू-तति-जिता तव वेणुना विनता (नम्रीभाव प्राप्ता) अतिजिता, सुरैरपि नता यमुना नदी, ते मुदा कमल कर[3] ददतीव अल अन्तिक आगता । हे आलि, कृरजाना प्रसक्त्या उरुरुचा, रुरुवत्[4] चारुणा अवलोकनेन आकलितया तया मुरल्या अरुचि–राशि–अपह–प्रियोष्ठ–रस–तीर–सती रुचिरा कमला[5] अन्वकारि । हे मुरलि इम कृष्ण आनय । तव आयत वाचा जितचेतसा अन्तिक आगताः वधू. अस्मान् निजे भक्तजने अभिनव भारवान् कमिता कृष्ण. न विसृजेत् । हे साध्वि मुरलि, विनतौ सत्यां इनता (प्रभुत्व) न चकास्ति ।

हे अजने[6] ईश्वर, तवजने अविभि. तताऽपि इय व्रजभूः भुवि ख्याता उद्भूत् । हे सुरमणे, कमला अपि तत्र गोकुले लसते । अधुना सा

1) षट्पदे । बहुस्त्रीजनेषु पद स्थान यस्य स तस्मिन् (कृष्णे) बहुस्त्री वल्लभे ।
2) अस्माद्योग्य-त्वदधरपानस्य स्वय करणात् अस्माक मनोग्लानि ।
3) उपायन
4) कृष्णसारवत्
5) साऽपि कमला कृष्णकरजाना प्रसक्त्या (नखक्षतेन) शोभमाना, मृगवत् चञ्चलावलोकनभूषिता च ।
6) जननरहित ।

रमणे त्वयि अलसता[1] इति कृत्वा गोष्ठ उत्सृजेत् । हे परम विजने वने स्वजनं उत्सृजत तव मन यदि अत्र आगमन न मनुते तर्हि तव परम हसै नुतस्य पुण्यस्य तव यशस स्तोतार आगम[2] विनिहसि । ईशमानी स. दण्डपाणि यम. (त्वद्वियोगभिन्ना) तव अधिदासी अस्मान् गोपी. नयति बत ।,तद्युक्तम् हि । यत तव वियोगे (त्वदनुग्रहवियोगे) तेन दण्डपाणिना अय.पर्वतस्य च भेदने समर्थ' पुरुष यतीशमान्यपि न ह्रियते किम्? हे ईश अनादित विनाश-नाना-आमय-देहपुष्टी त्व उज्झसि । त्वद्विरहेण इदानी वय च अशन-अनामय-देहपुष्टी विना (ता. त्यक्त्वा) त्वत्तुलना लभेमहि[3] ।

विधिशर्वपूर्वाणां सुमनसां सुमन.सरसीनिवास हे अज जगता सह त्वदभिन्नता गता (निरस्ता) । तुहिनत सकाशात् यज्वभि नत दहन अपरो हि । हे असदृश श्रीकृष्ण युवयो तादृशता दहनतुहिनवत् विरुद्ध-धर्माक्रान्ता वर्तते ।[4] इन्दिरा कमलासनात् भवात्, अभवात् (मुक्तात्)[5] महती किल । अरिवृतोदयदाव[6] श्रीकृष्ण तया लक्ष्म्या लतया तरुवत् भवान् परिवृत: । तव सा इन्दिरा इद जगत् अनु (स्वस्या अनन्तरं) मनुते किल । हे असम, तव निखिलेश्वरत्वसमये मतिमत पुस अतिमत निगम. अस्ति । ये असृभृत पुरुषा त प्रसिद्ध वेदमपि त्यजन्ति तै: अक्ष-रहितै अहितै स्वनय कुत. प्रमाणात् सुभृत ? हे अलय य. कोऽपि वादी मानै: सहित ते जगत् अनृत कलयते स. वादी निजनये हित

1) किं गोष्ठवासेन इति आलस्य उपेक्षण अस्तीतिकृत्वा ।

2) "तेषा नित्याभियुक्ताना योगक्षेम वहाम्यहम्" इत्याद्यगम विनिहसि ।

3) त्वद्विरहात येनकेनचित् प्रकारेण देह त्यक्त्वा मुक्तौ त्वसाम्य प्राप्स्यामः ।

4) जीवपरमौ परस्पर भिन्नौ विरुद्धधर्माक्रान्तत्वात् दहनतुहिनतत् इमौ च तादृशौ तस्माद् भिन्नौ" इति अनुमानम् ।

5) मुक्तेभ्य जात्येकवचनम् ।

6) अरिभि वृत उदय अभ्युदय तस्य वनाग्ने ।

Rarest Archiver

रुचिर[1] कथ जनयेत् । न हि रज्ज्वहे मकाशात् अभूति (अमङ्गला) क्षति अभूत् । अस्य रज्जुसर्पस्य भयहतुता, कम्पकता च न स्त । तज्ज्ञानस्यैव भयकम्पहेतुता । निशि सुप्ते मनुष्ये सर्पाद्यर्थस्य महिमा तान् कम्पादीन न हि राति । इह रज्जुसर्पे सर्परूपार्थे गतेऽपि सर्पज्ञानमेव तान् भयकम्पादीन् राति हि । हे अर[2] रिपो, उदारचरित, मुररिपो कृष्ण यदि अखिल जगत् भेदशून्य तर्हि [3] मखिलङ्घिभि असुरैः अर्दिता सुराणा सभा सभा.[4] तव धाम क्षीरसमुद्र किमर्थं आर ? पुसूक्तादिना स्तुतिरपि किकारण आचरिता ? हे अमितोरुविक्रम, तव अभिदा वदन् श्रुत्यायसम्मतवाक् खरमते रमते । विरुद्धधर्मे जलधी इव विद्यमानौ जीवपरमौ क्व ? निज-योनिजयो तयो जडधिया कलिता अभिदा (ऐक्य) क्व । स्मृतय , भारत, अवृणानि पुराणानि, पुरातन वेद ब्रह्ममीमासाशास्त्र इत्येतेषा विभव विभव[5] परम च नारायण-मानस-मयै समये अनृत वदन् वादी सुसभासु सभा (भासा सहित) न भवति ।

फणिराजार्वशमा , अन अयकारक हवने विनुत स कृष्ण इह वने कुत्सितान् हत त् चकितात्मना तत्कृपा-वसु-हृदा सुहृदा अस्माक श कुरुतात् । हे अज अदय[6] अस्माक हृदा सुरम तव मुखमारस, अल सुर-नम्जुन-ग्राह-भावयुक्त नयनजयो युगल, मनोज-मनो-जयि तत्ते सुस्मित अयते ।

---

1) पराङ्गीकारार्ह, यथास्यात्तथा । जगन्मिथ्यात्वे जगदन्त पाति प्रमाणानामपि मिथ्यात्वात् मिथ्याभूतप्रमाणैश्च स्वसिद्धान्त साधयितुमशक्यत्वात् ।

2) अरा दोषाः

3) मखिन याज्ञिका तान्-लघयन्तीति मखिलघिन ।

4) भासा सहितासभा

5) भवरहितम्

6) दयारहित इति आक्रोशेन सम्बुद्धि

इत्यनेन प्रकारेण गोपीना कृष्णविरहजन्य परिताप कृष्णाय शसन्निव उडुपति अब्धे [1] अन्तिक प्राप । तत गोपीना वक्षोजाख्यगिरि करैः परिमृजन् [2]तासां नेत्रोत्पल हर्षयन्, हृद्योम अनुरञ्जयन् तासां प्रमोद म्बुधे वृद्धि विरचयन् अच्युतेन्दु तत्पुण्यपुञ्जाचलात् उदित ।

सञ्चितपुण्यशेषा, अम्बुजाक्षी काचिद् गोपी अन्तर्निलीनस्य मदनायुधजातघातस्य शान्ति विधातुमिव मुकुन्दमुखसारसस्य सौरभाढ्य ताम्बूलचर्वितमभक्षयत् । तस्य असे परिलम्बितपाणिपद्मा धन्या हृष्टमुखी अन्या गोपकन्या प्रेष्ठस्य कृष्णस्य अन्तरे अङ्कुरिताया रासविलास तृष्णाया पुष्टिप्रदा इव स्फुरन्मकरकुण्डलशोभिगण्ड त कृष्ण मृदु चुचुम्बे । काचित् तन्वी गोपी रुचिरालकास्य त रमण कृष्ण प्रति बिम्बोष्ठचुम्बनस्य रुचि भ्रूसज्ञया एव दर्शयन्तीव दष्टमृदुलोष्ठपुटी सती त मुकन्द तरलस्य आत्मकटाक्षस्य लक्ष्य ततान । काचिदन्या, हे नयकोविद कृष्ण 'अह स्वैरिणी इति कृत्वा मयि तव उपेक्षा न युक्ता' इति त प्रति बोधयन्तीव सुखजाश्रुधारा[3] सती हर्षकराणां कङ्कणानां सुस्वनेन[4] स्वहस्तेन कृष्णस्य पाणिकमल[5] पस्पर्श किल । अन्या रत्युत्सवार्हस्य स्वतनुमन्दिरस्य तुङ्गवक्षोजाख्यौ सत्कलशौ विकसितपल्लवैः मण्डयितुमिव कृष्णस्य चरणपल्लव स्वकुचयो. सयोज्य आशु मारधिक्कार चिन्ह उत्पताक कृष्णपादगतध्वज अखनत् । पुलकै. शोभितसर्वगात्री धन्या अन्या च काचित् त कृष्ण हृदि निधाय निमीलिताक्षी सती सर्वाभि आभि गोपीभि अनुभूत वीटिकाभक्षणादिभोग अभुवत । तथाहि किं नाम न स्ति मुनिमार्गजुषा हि लोके ? गोप्यः गगनगतं विधु परिहसन्त अस्य कृष्णस्य मुखविधु नयनै दधु । स्मरता रणे जयदायिनी

1) समुद्रस्य कृष्णवासस्थानत्वात्

2) चन्द्रोऽप्युदयकाले पर्वताग्रे करान् प्रसारयति इत्यादि ।

3) अनेन कन्यादानधारोदक सम्पादितम् ।

4) विवाहोचिततूर्यध्वनिसम्पत्ति

5) अनेन पाणिग्रहण उक्त भवति ।

Rarest Archive

अस्य चरणे स्तनयुगेन दधु. । स्वगर्वशमनस्य अवधिं गते, कृष्णे अधिगते युगेऽपि क्षणता दधु ।

ताभि. गोपीभि सस्मित ईक्षित यदुपति हृदिस्थाया आवृते मोक्ष प्रकटीचकार। स्वानन्द प्रकटीचकार। ता गोप्य आलिङ्ग्य सुवद स ुज्र ाकटोचकार। स्वक्रा नुरो ति रकंश्च स धर्म सारूप्यस ष्टि दिशन् तथा रासाख्य च उत्सव प्रकटीचकार। न हि कथा व्यर्था परब्रह्मण । असौ शौरि स्मारजनिमतीनां गोपीना ईहिताय रासमहाय रम्या स्थली अगात्। असा गोपीना ईप्सितदातरि ईशे रागात् सा रजनी असौ[1] हिताय अभूत् ।

कण्ठे आश्लेष', स्तनेषु कराग्रपात , मधुरव्याहारा , मन्दस्मितं, लोलापाङ्गनिरीक्षण, मरुत्, सङ्गीत शीतांशुः– इत्येतै विभावादिभिः उच्चकै. कुसुमिते वृन्दावने शृङ्गारं रसं पोषयन् मधुपतिः कृष्ण; गोपीमण्डलमण्डितं रासोत्सवं निर्ममे । प्रेमोत्थरोमोद्गमै' करैः प्रेष्टस्य कृष्णस्य असयुग पुनः पलायनभिया इव उभयतः सुष्ठु आलिंग्य औत्सुक्यत वीक्षना सिद्धानां नयनैः सम, समुदित मण्डलाकारेण स्थितानां स्वासां मध्येस्थितं शृगारसज्ञ रस मिथोधृतकराः ताः गोप्यः क्वचिदपि बहिर्गन्तु न मुमुचुः । इन्दीवरलोचना' ताः गोप्य', सः शौरिः प्रागिव अस्माक मध्ये मनोरमा काचित् नारी नेष्यतीति भियेव परस्परा-बद्धमनोज्ञहस्ता सत्य रासोत्सवे विरेजु । विष्वक् विसर्पिनयना परिमुच्यमानवक्षोजवस्त्र- कबरीभर- भव्यनीव्यः सिञ्जद्भिभूषणगणा गोप्य. नाटयच्छलेन, रासोत्सव पश्यतां सिद्धादीना धैर्य चरणे कणश वितेनु. । कृष्णांसविन्यस्तकराब्जमाला हृष्टा सलीला ता स्त्रिय ननृतु । तथाहि । आनन्दमूर्ति परिरभ्य मर्त्य को नाम नो नृत्यति सिद्धकृत्य. ? एका बाला मुक्तगणवल्लभस्य कृष्णस्य कण्ठ आबध्य विमुक्तस्य स्वस्य कबरीभरस्य बन्धनाय अलसा सती यत्न न चक्रे । गुरु-

1) असु=प्राणविषये ।

कार्यलाभे लब्ध्वर्थस्य साधने कृतिः न हि दृष्टपूर्वा ।[1] कृष्णालिङ्गनस्य भङ्गशङ्किहृदया ता गोप्य स्त्रस्त कच वक्षोजाम्बर उद्गता नीवी च न बबन्धु किल । भर्त्रा सह रतिसूचक तत् कबरीवक्षोजाम्बर-नीवीमोचन दृष्ट्वा रतिर्भविष्यतीति प्रहृष्टानना ता मृगदृश. अनभिमत र यतोऽन्निनकर्म कबरीबन्धनादिक नो चक्रुरेवेति मम चेत । अब्जनेत्रा काचित् कारुण्यसिन्धो कमलेक्षणस्य कृष्णस्य कर मम कण्ठमाश्लिष्य पूर्ववत् मां न मुञ्च इति अञ्चयन्तीव त कर चुचुम्बे । श्रीलोलस्य कोमलकपोले विलीनेन गण्डेन लोलं अन्यवेध्वा. आनन कयाप्यन्ययाऽबलया स्ववक्त्रगतवीटिकाया जघ्ने । तां वीटिका दित्सतः कृष्णस्य तद्वीटकया ताडनं सूचकमिवाभूत् । अस्यां रासक्रीडायां वरसिद्धेन सत्कृतेन आविला, अम्बरस्थितसिद्धैः सत्कृता वीणाध्वनिवत् मनोहरया गानविद्यया आतना काचित् गोपी असमस्य कृष्णस्य विलास.तगान । तया नार्या लोक नवीनाध्वनि गानवित् अभूत् । भर्तु कृष्णस्य मृदुस्वरेण कृतानुकृति एका हृद्यकलकण्ठवधूरिव स्वगीत विस्ताय गीतेन च सकलेषु अद्धा मुग्धीभवत्सु सत्सु रहसीव विशक स्निग्धा मुकुन्दवक्त्र चुचुम्ब । हे ईश कृष्ण आप्तकामस्य तव आभिः गोपीभिः किं प्रयोजनम् ? तथापि विलासै अस्मान् तोषयसे इति ईरयन्तीव काऽपि बाला मुरारे कर बलेन स्तने न्यधात् । या बाला कृष्णकर स्वस्तने न्यधात् । सा गोपी अन्यासाधारण स्वस्या उरोजयुग्मे अङ्कित कुङ्कुमाङ्क आत्मभर्तु कृष्णस्य स्वस्तनन्यस्तहस्ते स्थिरीकृत्य चारु त हस्त अन्यमानीनां अभिरुच्ययोग्य चकार ।

मुदावहा भासुरेण गीतेन शोभिता वृन्दावने रसलीला विभाति । अङ्गनाल्या उदावहाभा (उद-आवह-भा = जलदकान्ति) सुरै गीत-शोभा हरे मूर्ति शतश. विभाति ।

1) नित्यमुक्तस्य बन्धने महाप्रयोजने लब्धे सद्योमुक्तस्य कबरीभरस्य बन्धने यत्नायोग ।

रोम्णां हर्षणकारिणि श्रवणत पापौघविध्वसिनि ।
प्रेम्णा चिन्तयता विचित्रविमलश्लाघ्यार्थसन्दायिनि ।
सञ्जाते भुवि रुक्मिणीशविजये सद्वादिराजोदिते ।
सञ्जात सुरमण्डलीषु महित सर्गोऽष्टमोऽस्य मुदाम् ।।

नवमः सर्गः[1]

गण्डलीकृताना मनोरमाणा रापाणां कुण्डलद्युतिभि' रासभूप्रदेशः सुदीपित' आसीत् । गण्डचुम्बनकुतूहलाना कामेन अखण्डितानां आननसरोरुहाणां धाम' स रसविलास जयति । नृत्तातिशयात् तत्र गोपीनां कबरीबन्ध : मुच्यमाना , ताभिः रसदाता मुकुन्दः प्रोच्यमानः । कुचकण्ठपार्श्वादौ नखलाञ्छनाख्य' चन्द्र प्रथ्यमान हरिविक्रम, वृन्द च कथ्यमानम् । स रासोत्सव हृष्टरोमनिकरैः हृतचित्तै वृन्दावनस्थ मृगादिभि· दृष्टरम्यविभव , गगनस्थै स्तुतमुकुन्दचरित्रै निर्जरगणै' आवेष्टितश्च । विलसन्त्या चारुपादतलाना सन्नखाना च कान्त्या, विचरन्त्या अधीर नूपुराणा रुचा स रासभूप्रदेश रत्नमयैर्घण्टपपक्तिभिः भूषितभूरिवाभूत् । स रासविलास वेणुवाद्यपटुना व्रजनारीमानदेन हरिणा अन्तरहारी आनत-अब्जजनि-म रुत-गौरीप्राणनाथ-नयनोत्सव कारी आसीत् । तत्र पादसञ्चरणेन ताल दर्शितः । स्वादुगीतानां वर विभ्रमाणा वीक्षणचुम्बनादीना समूह अभवत् । तेन रासोत्सवेन श्रीधरे-क्षणरम्यनलोलेन द्विज-मृगा-अधिप-शैला अपि मोदिता । स. रास विलास विचित्र हारसरस्य हारणशील । तत्र कृष्णस्य मूर्तीना शत इन्द्र-

---

1) अस्मिन् सर्गे श्रीकृष्णेन बृन्दावने गोपिकाभि साक विहितस्य रास-विलासस्य वर्णन क्रियते ।

नीलरत्नानि । पुष्टा गोपतरुण्य मुक्तामणयः । घृष्टपाणय एव मालास्थ वरदाम् । हारेण शास्वदुरसा, स्वीयस्मरशताधिकभासा पूरिताशाप्रदेशेन, शारदाम्बुजदृशा वरभूषाधारिणा कमलेशा[1] कृष्णेन अतिरुचिर स रासोत्सव कृतोऽभूत् । प्रियाभिः सहिताना अमराणा विमानान्येव तत्र वितानानि । तृप्तबन्दिचयसदृश वि-तान[2] तत्राभवत् । स च रासमह स्वल्पमेघरवाख्यमर्दलेन सान्द्र, स्व.प्रसूनाना रुचिमद्भि. दलै सान्द्रश्च । जुम्भमाण-नव-पल्लव-शोभे, शम्बरारि[3] पितृपत्-लवशोभे अम्बुजे अर्पितहृदा हिमदेन अहिमखण्डनेन मरुता तत्र जृम्भित । मञ्जु सिञ्जदतिभासुरभूष, कञ्जनाभबहुसुन्दरवेषः, अस लग्न कर-सारस-प्र श. सश्रुतः रासविलासः जयति ।

पुण्डरीकमुने मुखस्य मुख्यविकासः खण्डित अरितिमिर उरुतराशः शौण्डमध्वकविवर्ण्यविलास पाण्डुरङ्गरविः अत्र ललास ।[4] यस्य कृष्णस्य पद जातु ऋगाद्यैः वेदैरपि साकल्येन असिद्ध तत्पद गातृणा कोकिलानां रवै श्रुतिपूर्तौ स्फीतै भृङ्गनिनदैः श्रुतिपूर्तौ[5] इह रासोत्सवे सिद्धैः मृगादोरपि ध्यातम् ।

अस्मिन् रासोत्सवे हस्तिनीनां गोपीनां शत रमाकृतयः, कृष्णस्य मूर्तयः एव सुरपादपश्रेष्ठाः । सद्युतिस्मितानि च पयोऽमृतधारा., एता दृशः रासोत्सवः एकैकरमा-कल्पद्रुमविलसित क्षीरपयोब्धि धिक्चकार ।

श्रीशोडुराजस्य निजसौभगेन रञ्जितस्य रासोत्सवस्य रस भुवि को वा वर्णयेत् । यत् भृङ्गहस शुककोकिल वे कि मुख्या[6] अपि त द्रष्टु प्रहृष्टमनस परित समीयु ।

---

1) कमलाया ईट् ईश तेन ।
2) वीना पक्षिणा तान विस्तार ।
3) शम्बरासुरस्य अरि मन्मथ ।
4) रविरपि पुण्डरीकाना कमलाना विकासमातनोति । अरिभूत तिमिरस्य खण्डनेन आशा.(दिश) प्रकाशयति । कविभि तस्य विलासा वर्ण्यन्ते ।
5) श्रुते तानप्रदानस्य पूर्ति सम्पूर्ति यास्मिन् ।
6) विलासानाभिज्ञतिर्यग्योन्युत्पन्ना अपि ।

यत्ताण्डव पक्षिमृग अघिपादीन् उद्भूतहर्षाम्बुनयनान् उन्नम्र-रोम्णश्च अकार्षीत् स कृष्ण. मा ईदृशमेव[1] कुर्वन् मन्तरङ्गे ननर्तु[2]। य कृष्ण प्रति तर्हि[3] बर्ही ननर्त। नगाः पुष्प समर्प्य आर्चयन्। मञ्जु रवा मधुकराः स्वैर जगु। मृगा साक्षात्प्रैक्षन्त। उत्क्षिप्तोच्चफणाः फणीश्वरगणा कम्पेन[4] य पर्यगु सोऽय श्रीरमणः मया रचितया रासक्रीडा-वर्णनाख्यया अर्चया प्रीणातु।

स कृष्ण रासोत्सवस्मरणलालसमानसानां पुसां असह्य ससार बन्ध मोचयतीति नापूर्वम्। यस्मात् स रास व्रजवल्लवाना केश-पाशस्य कुचकञ्चुकस्य, रम्यनीव्याश्च बन्ध विश्लथयते।[5] यस्मिन् उदयति सति, नाग-केकि-नकुला फेरुण्ड-सिह द्विपा, गो-शार्दूल-मृगा, किरात-विहग स्फुट परस्पर वैर परित्यज्य मित्रेषु अमित्रेषु कलत्रेषु पुत्रेषु च विरसाः सन्तः, तस्थु। तद्वृन्दावनरासमण्डलश्री मम चित्त-स्थितान् कामक्रोधादि षड्रिपून् कृन्ततु। रासक्रीडाया कृष्णांसे आलम्बित पाणिपद्माना ललनाना ससद. कपोलस्थलीषु ससक्तगण्डमण्डल, हसास-नाद्यै सुत, वक्षोस्थापितमङ्गलाङ्गुलिदल, विलासपारवश्येन स्रसद् विभूषावलि इन्द्रनीलवत्नील त अमल ससारसार हरि सेवे। हाराणां आधारे मनोहरे उरसि लसन्नारीकरम्भोरुह, ताराधीशमुख विहारेण सरसोदारस्फुरद्वीक्षण, स्मेर चारु परार्घ्यभूषणधर कारुण्यवारांनिधि धाराधरश्यामल त श्रीकृष्ण इद कारागार ससार विहाय भज। छत्रा-यिताहीश्वरे मत्सिहासनवत् सशोभिमूलस्य विभवविराजिते विस्तीर्णा-मरशाखिरूपरत्नभवने विभ्राजमान भृत्यै. ब्रह्मभवादिभि परिवृत,

1) उद्भूतहर्षाम्बुदृश पुलकिताङ्ग च।

2) रासोत्सववर्णनेन कृष्णे सञ्जातप्रेमातिशय कवि स्वाभीष्ट प्रार्थयते।

3) तदा कृष्णस्य ताण्डवसमये।

4) कृष्णरासास्वादजन्यकम्पेन।

5) एकैकाङ्गनानिष्ठबन्धत्रयमोचकस्य रासोत्सवस्य स्मरता एकबन्ध-मोक्षण किमाश्चर्यम्?

Rarest Archiver

सद्बन्दिभि सस्तुत त्रिलोकगोपललनानेत्रान्तसचत्रामर विभु कृष्णं हे चित्त उपास्व । हे चित्ताख्यक्षितिपाल, त्व भक्तिरमणीयुक्त सन् विठ्ठल ङ्गपरसीतोये अनिश रमस्व । अक्षिमीनाश्रय नाभि-आवर्तवान्, श्रुतिहृदयुत केशौघशैवालवान्, सुभ्रू-सद्वलिप्रङ्क्तिमन्दहसितःख्य उत्तङ्गोर्मि- फेनाविल हस्त अघ्रिरूपअब्जवान् ।[1] हे हस्ताख्याम्बुज विठ्ठलाघ्रितरणि मा मुञ्च । हे दृक्कैरव कृष्णस्य श्रीमन्त मुखचन्द्र मा मुञ्च । अस्थिरमनश्चोर कृष्णस्यालकाख्य तम मा मुञ्च । हे जिह्वादर्दुर, तत्वथासुजलधि मा मुञ्च । हे हृद्गेह, हरे वक्ष कवाट मा मुञ्च । हे श्रुतिपञ्जर प्रतिदिन शुकस्योदित हृद्यम् मा मुञ्च ।[2] हे भ्रान्तस्वान्त ! विनिन्दितै विष्ठातिपुष्टै क्रिमिशतै -आवृत मूत्रामत्र अमेयपूय विगेय अवलोकाय त्यज ।[3] किन्तु नित्य निर्मलविग्रह निजाना वश नीलोत्पलश्यामल प्रेष्ठ व्रजवधूतृष्णासमुज्जृम्भक विठ्ठल सस्मर ।

गोपीकृष्णसवाद

गोपी– हे हृद्य, नाथ इन अस्मत्निकटात् क्व गतोऽसि ?

कृष्ण – मुग्धे, मृगया कर्तुम् ।

गोपी– सा मृगया प्रभो तव अन्तरे अद्यैव कथमङ्कुरिता ?

कृष्ण.– परिलसाति कुम्भीन्द्रकुम्भत्विपि तव स्तनतटे लुब्धान् केसरिण स्पर्धायुताश्च द्विपान् वेद्धु अद्यैव मम चित्ते मृगया अङ्कुरिता इतीरयन् स मुररिपु मम बुद्धि दद्यात् ।

"हे सखि (मम वराहनृसिंहाख्यरूपद्वयसद्भवात्) साजात्येन वराहाणा सिंहाना च निग्रह सन्त्यज्य, सारङ्गान् प्रियाया तव चक्षुषो

---

1) यथासरसीतोये मीनावर्तहृदशैवालादयो वर्तन्तेतथा विठ्ठलाङ्गसरसीतोयेऽपि । भक्तिरहितध्यानस्य अप्रयोजकत्वात् भक्तिरमणीयुक्त इत्युक्तम् कामिनीरहिततया जलक्रीडाया अपि अप्रोजकत्वात् भक्तीरमणी इति उक्ता ।

2) पञ्जरस्य शुकस्य ध्वनि हृद्या । श्रुतिपञ्जरस्य शुकाचार्योक्त भागवत हृद्यम् ।

3) स्त्रीशरीरे आसक्ति मा कुर्वित्यर्थ ।

साम्येन विहाय, शशानपि चन्द्रस्य त्वन्मुखसादृश्यगर्वापहान् सन्यज्य, शिखण्डिनां व्रज 'शिखण्डी' इतिनाम्ना, तद्बर्हिणा च त्वत्पुष्पाञ्चित केशहस्ततुलया त्यक्त्वा हे मृग क्षि मत्सङ्गप्रतिबन्धके तव दुरिते मृगयां कृत्वा अत्र आगम" इति आलपन् असौ कृष्ण पातु ।

गोप्य – हे नाथ, अस्मान् विहाय त्व कस्मादन्यत्र अगमः ?

कृष्ण – हे मुग्धा ! वृक्षाणां अभ्यन्तरे वर्तिनः चन्द्रमहस. सकाशात् युष्मान् पृथक् अज्ञात्वा, शुकौघानां वचनात् युष्मन्मञ्जुगिरः पृथक्अज्ञात्वा, पिकौघनिनदात् भवत्सुस्वरान् पृथक् अज्ञात्वा, भवन्मार्गण कर्तु अन्यत्र गतोऽह इति उदीर्य ता गोप्य शमयन् स. कृष्ण मम सौख्यं दद्यात् ।

दन्तक्षतेन स्फुरितगण्डरुच कृष्णकराब्जेन बद्धमध्याः कुचकुम्भ-पार्श्वे सञ्जातमञ्जुलनखव्रणरञ्जिता ताः इन्दुमुख्यः स्वकीयस्य अहंकाररूपसान्द्रापराधस्य फल आपुरिव ।[1] गन्धलुब्धै परभृत-मधु-पाद्यैः परिसेवित अशोक-अरविन्द-चूत-मल्लिका-नीलोत्पलाना काम-बाणानां सदृशै कर-पाद-अधर हास-अपाङ्गै.शोभित , सुललितवन मालाख्यपुष्पधनुर्धर दृप्तयोषिद्भि सहित स कृष्णः वररूपी स्मर इव विरेजे ।

नालीकागार[2] –मार–त्रिपुरहरमुखै देवै अम्बरस्थै गीयमाना, वनमालाया., अलङ्काराणां च कान्त्या विघटितहृदयग्रन्थि.[3] इन्दीव-राभा कालिन्दीतीरसंस्था, करधृतमुरली, कामिनीनां केल्यां लोला, लीलापाङ्गावलोका प्रेयसी सा कृष्णाख्या देवता मम हृदये विलसतु । श्रीकृष्ण नीलाम्भोदोपम । मेघस्तनितवत् मञ्जु गायति । स्वागमनेन

1) अपराधिन. दंशनबन्धनताडनादिभि दण्डयन्ते किल ।
2) नालीक पद्म आगारं गृह यस्य स चतुर्मुख ।
3) विमोचितकञ्चुकग्रन्थि । मनोहरपुरुषदर्शने कञ्चुकग्रन्थिर्विभिद्यते इति प्रसिद्धि । 'भिद्यते हृदयग्रन्थि. छिद्यन्ते सर्वसशया' इत्युक्ते योगिना हृदयस्थाविद्याग्रन्थिरपि मोचिता ।

Rarest Archiver

स्रवन्त्या कलिन्द्याः पुष्टिहेतु । तापपरिहारित्वेन नीरवद्विद्यमान सङ्गोत्रादिमोक्ष वर्षति । निजतनुमहसा अर्काङ्कुराजौ आच्छादयति । बालाना गोपीना नेत्रोत्सवश्रीः असौ । सुरवराणां हृदयाख्यव्योमधामा वरवसनतटित् सन्द्रनालयेन्द्रचापः असौ मेघोपमः कृष्णः जयति । यमुनाजवननिवास कमनीय कामिनीभिः कलित विमृशता योगीशाना तसौ दूर कृष्णाख्य ब्रह्म मदीय अघ शमयतु ।

जलक्रीडावर्णनम् :

गन्धलोभेन दूरमनुगमनात् श्रान्तैः अलिभिः परिवृत, अम्भसि गाहमान कान्ताख्यकरिणीभिः सहित कनकोज्वलाङ्गः प्रान्तस्थिताना अङ्गानां चयचुम्बिकर मुकुन्दाख्यदन्ती ममान्तरस्था मोहाख्यमोचाः[1] निकृन्ततु । जलक्रीडाया अभिगति जलदान प्रेम्ण सश्लेषः इत्येतेषा वेगान् स्फटिककुम्भागा दृश्यमानोरुदेशाः कचात् विगलितमाल्याः ताः गोप्यः क्षलिते जलसयुक्तै कुङ्कुमाद्यङ्गरागैः यमुनासरितमपि[2] सरागा[3] चक्रु, पुरुषास्तु आसां गोपीनां किम्? यमुनानदी अपि गोपी इव अलक्ष्यत । सत्कैरव तस्या आस्यम् । उत्पलमेव लोलनेत्रम् । मधुपेन अङ्कितः पद्मकोशः तस्याः व्यक्तस्तनौ । आवर्त एव नाभिः ऊर्मयः तस्याः हस्ताः लक्ष्यजघना सुफेनहासा सा नदी गोपीवास्ति ।

अधिजल गाढं आलिङ्गतवल्लभा अत एव निःशब्दभूषावली अब्जास्यां गोपी अविमृश्य उपगता[4] आलिङ्गितवल्लभायाः गोप्याः सत्कारश्रवणेन क्रुद्धा सा गोपी शशिमुखी, तस्या भ्रूरूपदृढचापे लग्ननयन प्रान्ताख्य इषुपातात्पूर्वमेव रूपान्तरवता कृष्णेन सामोक्त्या समालिङ्गिता । करधृताना दृतीनां तोयै मुकुन्द स्नापयित्वा स आलिग्य कुच

1) कदली रम्भा कदलीमोचेति हलः ।

2) रसअनभिज्ञामपि ।

3) सकामामितिध्वनि ।

4) कण्ठपर्यन्त जलवर्तित्वात् तस्या केवल मुख कमलवत् अदृश्यत ! कमलमिति भ्रान्त्या कृष्णेन सह विलास कर्तु आगता ।

Rarest Archiver

तटगतगन्धेन लिप्तं कृत्वा यतियोग्यां गतिं साधयन्त्य इव ता अबलाः शिरसि निहितमाल्यैः अर्घ्यैः एनं कृष्णं आनर्चुः । एषः देवः कृष्णः रम्यललनानां करपद्मपत्रैः स्नापितोऽपि भृङ्गानां अमराणां आवलिना समर्पितं पुष्पपुञ्जे विस्तीर्णं पुष्परेणुनिकरं आत्मनः अङ्गे दधत् हस्तीश्वरप्रकृतिं आर्जयत् ।[1]

द्विरेफभावेन अङ्कितशोभितवक्त्रं, सुस्वरराजहंसैः कृतक्षतं, मनोरमं सारसकोशं एका बाला स्वस्याः घनस्तनस्पर्धि दृष्ट्वा चकर्त । माद्यद्द्विरेफैः कृतगोसजाते युक्तं, पद्मासनस्येष्टं पवनेन जुष्टं सुगन्धि पद्मं मुकुन्दयोग्यं सपत्न्या लक्ष्म्या सद्माभिशङ्क्य इव कापि न्यलुनत् । काचित् श्रीपतेः अधरसीत्कृतिकाले मां इतरा गोपिका ईक्षयति इति कोपेन तप्तहृदया इव गोपी एत्य सरागं कोकनदं जहार । दृप्तभृङ्गाक्ष्येन अपाङ्गेन विलोलं सत्सरोजं काचित् सः हरिः एतत्पद्मं मदीयं वक्त्रमिति सीत्करिष्यति इति भीतियुतेव अलुनात् । समीपगतात् सखीजनात् जातलज्जा सती काचित् आकण्ठं अम्भसि गतस्य हरेः मनोज्ञं आस्यं 'एतत् विकसत् अधीरभृङ्गयुक्तं[2] आताम्रकेसरं[3] नीलोत्पलं' इति प्रवदन्ती अजिघ्रत् ।

दूत्यादि प्रेषणम् .

गोपीप्रेषिता दूती कृष्णं प्रति कथयति । "आर्य, प्रभो, कृष्ण, तद्भुवनं आयाहि । त्वया विरहितं गृहं सन्त्यज्य सत्वरा सा तव नायिका त्वच्चरणे चित्तं निधाय विवशा सती चित्रार्पिता इव गृहद्वारि त्वदागमनदर्शनोत्सुका आस्ते । तव योगहीना तनुमिव[4] पुनः तद्गृहं न विविक्षति । हे ईश कृष्ण तवानागमने तस्याः तनुरूपशाखिना तद्भुवनं काननमेवस्यात् ।"

1) गजः स्नात्वापि रेणुदिग्धः भवति एव गोपीभिः स्नापितोऽपि पुष्पवृष्ट्या पुष्परागदिग्धाङ्गोऽभवत् देवः ।
2) कटाक्षरूपकमेतत्
3) बिम्बोष्ठरूपकमिदम् ।
4) अनेन कृष्णानागमने तनुत्यागः निरणायि ।

Rarest Archiver

"हे ईश, असौ तव प्रेयसी गृह प्रविशन्ती निर्यान्ती च त्वदागमविषयक मम प्रेमालाप अपि प्रत्याक्षिपन्ती, क्वापिहस्ते आनन निवेश्य उरुशुचा श्वसन्ती तव वर्त्म पश्यन्ती साश्रुनयना सती महुः मा याचमाना क्वापि मोह वहन्ती, कस्य वा पश्यतः प्राणिनः मन. सदयं न कुर्यात् ?" "हे मारतात, चारुराज, इन कृष्ण इदानी हि सायम् । इयं गोपी सा व्याप्ता रमा न हि । एणाक्षी तव गोपी जरारुचा[1] अदेववत्[2] क्षीणा ।" इत्थ निगद्य दूत्यः नृत्यन्मयूर-शुक-कोकिल-मत्तभृङ्ग-समूहेन आदृतेन उपवनेन वासितं, अङ्गनायाः वितानमणिशोभिगृह निगमैरपि अकलितं कृष्ण निशासु नयन्ति ।

सा गोपी-प्रियेकृष्णे अभ्यागते सति मञ्जुकलशप्रख्ययोः स्तनयोः स्थायिना नेत्रानन्दजलेन हिमवारिणा इव पाद्य अर्घ्यं च प्रादात् ।[3] प्रसूनस्तुतैः मधुभि. स्नान प्रादात् । कृष्ण आलिङ्गघ अङ्गकलाप-रम्यतिलक श्रीखण्डलपान् प्रादात् । लालईक्षाख्यां उत्पलमालां ओष्टज सुधां च प्रादात् ।[4] गोप्या कान्ताधरचुम्बनासक्तायां तस्य आननद्युति निवृत्तासती तस्याः कटाक्ष-गण्ड बिम्बोष्ठ रम्यरुचिभि. मिलिता । एतन्मिश्रिता तस्या. स्मितश्रीः इन्दीवर-अम्बुरुह-कोकनदै सुगन्धि पीयमान सान्द्र मधु अनुकुरुते । विष्वग्व्यापिमणिप्रशाभिध-पयःसिन्धौ स्फुरन्मण्टपप्रख्ये वेश्मनि, रत्नमयभित्तेः श्रीपतिमौलेश्च रत्नानां महसा पार्श्वतो गन्तुमसमर्थतया उत्सर्पिण्या स्वरत्नश्रिया पुष्टोन्नम्रफणत्विषा मुषि भोगिकल्पकशिपौ व्रजस्त्रीजनैः साक लसन् असौ विठ्ठलः तुष्टोऽस्तु । काचन गोपी रत्युत्सुके हृदये बलात् धीरतामालम्ब्य कोपेनेव नेत्रयुगल निमील्य तल्पे शयाना सती किञ्चित्काल कान्त कृष्ण निद्रितमाकलय्य

1) जरयाप्राप्ताअरुक्अकान्तिस्तया । जरा एव रुक् रोग. तया इति वा ।

2) सामान्यमनुष्यवत् ।

3) पादयो दीयनाम हस्तयो दीयमान जलम् । अनेन कृष्णागमने गोप्या कृष्णपादयो वन्दन तत्करयो गोपीस्तनयोः स्थापन च द्योत्यते ।

4) अनेन नैवेद्यान्तोपचरा कथिता ।

शनकै तं आलिङ्गच बिम्बधर सीत्कुर्वन्ती, अथ कृष्णेन वीक्षिताऽपि तत्सुखेन विविशा सा मान[1] न सस्मार ।

गोपीकृष्ण संवाद :

गोपी– हे मुकुन्द, कुत्र गन्तु समुद्यतोऽसि ?[2]

कृष्ण.– हे तरुणि त्वद्धाम गन्तुमुद्यतोऽस्मि ।[3]

गोपी– मद्धाम्न. पद्धति. कि तत्रास्ति ?[4]

कृष्णः– हे मानिनि, तव स्वच्छोर्जितकान्त्या आक्रान्त त्वद्गृह द्वार अलक्षयन् तस्यतेजसः अन्तरे कृश इद तव गात्र च अलक्षयन् गन्तास्मि इति अभिधाय तन्मृदुकर गृह्णन् मा गृह्णतु ।

गोपी.– ईश कृष्ण यदि त्व मया सह रिरसया महित मद्धाम आयासि चेत् अध्वनि स्निग्धां मा अवलोक्य सद्य भीतपदवी कस्मादल भीष्टा. ?

कृष्ण – हे पद्माक्षि, तव स्तनाख्यजृम्भिकुम्भयुगल उद्वीक्ष्य पृष्ठतः कुम्भीश्वर आगत. इति आशङ्कया भीतपदवी गतोऽस्मि इति निगद्य सुस्मितमुखी तां चुम्बन् स. कृष्ण. जृम्भते ।

गोपी– ईश, अन्ययाकृतेन चुम्बनेन जात चिह्नं अधुना तव बिम्बाधरे दृश्यते । तत् मां प्रियगिरा किं कारण रञ्जयसि ? संवाबला धन्याहि यया त्व चुम्बितः ।

कृष्णः– हे सखि वरवर्णिनि मन्यूद्रिक्तहृदा दष्टोष्ठतया भवत्या शून्यां मभा मुहुः पश्यतः मे तदधरव्रज अभूत् इति तस्या. कोप शमयन् असौ कृष्ण मन्मानसे स्यात् ।

गोपललनावृन्द वृन्दारकैःप्रोषितै. मन्दारादीनां लसतां प्रसूनानां निचयै. प्रियस्य कृष्णस्य वर्त्म सन्दृश्य वृन्दावनस्य निकुञ्जमन्दिरगत, मन्दानिलैर्वीजितं, चन्द्रस्य अमन्दकरेण सेवितपद कन्दर्पतात निशि शनैः

---

1) प्रणयकोप

2) स्वात्मान वञ्चयित्वा अन्यत्र गच्छन्तं कृष्ण प्रति उक्तिरियम् ।

3) स्वकृतवञ्चनामाच्छादयत. कृष्णस्य प्रत्युक्तिरियम् ।

4) मद्गृहमतिक्रम्य दूरत ।

Rarest Archive

पद्मने । मेघश्यामकृष्णदर्शनेन नृत्यत्केकिनि, चित्रपुष्पयुत तिलकवृक्षाख्य-रत्नस्फुरत्तोरणे विष्वक्शोभिनि, पल्लवाख्यविलसत्तल्पे विस्तीर्णे औषधिभि प्रदीपत्विषि, प्रसूनबिलसत्पत्रै वितानप्रभे, मत्तालिव्रजगायके कुञ्जे निजा रञ्जयन् हरिरभात् ।[1] सौन्दर्यनद्या स्नात परिहृतवसन, गोपिकाना आलेपनश्रीयुक्त[2] वक्षोजाख्याब्जासनस्थ वने कृतवसति प्रेयस्या दानु हारमालाकराग्र. केशपाशाख्यकाशान् बिभ्रत्, अधरज न्यपयोमात्रवृत्ति विनिद्रः प्रेष्ठ. असौ विठ्ठल मुनिगण जयति । अस्य मुनिमार्गवर्तिन कृष्णस्य जारवार्ता कुत ?[3] सौन्दर्यसिन्धु सुस्मितमुख तुङ्गात्मीयमनोरमस्तनतटे नखै सन्दर्शिताङ्क कृष्ण पुलकितै गलद्भूषणै स्वाङ्गै गाढ परिरभ्य, कृष्णस्य सरसाधर चुम्बन्त्य ता गाप्य् मन्दानिलै मञ्जुल तद्वृन्दावन । दृष्ट्वा ननन्दु कान्ताकदम्ब-कुच कुञ्जर कुम्भपङ्गो, सन्तापहारिणा नखमण्डलेन अत्र मण्डित स्वगण्डानुषक्त बल्लवीना विलसन्मुखचन्द्रचुम्बी कृष्णस्य विचित्रसिह कुञ्जेष सञ्चरति । यत्र वृन्दावने गोवर्धनाचलसहित अखिल स्थल कृष्णस्य अङ्घ्रयो ध्वजादिलक्ष्मभि लक्ष्य, यत्र सस्त्रीका पक्षिग हरिण्यः, हर्यंशाः वृक्षा इत्येवमादय सर्वेऽपि मुनय एव । यत्र पाथ (उदक) सुरसिन्धु-सिन्दुभ्या महित यस्मिन्वृन्दावने श्रुत्यन्त-अन्तरित मह कृष्णाख्य ब्रजस्त्रीवश तिष्ठति तत् उत्तम वृन्दावन अस्माक मुदे स्यात् । यस्य कुञ्जा मुरवैरिणा सङ्गताना वधूना विक्रीडनै वासिता यच्च वृन्दावन स्वस्मिन्सञ्जाताना सुरद्रुमाणा समूहस्य महसा विद्योतिताशा मुख, यच्चवृन्दावन चन्द्रईश-सुरेश मुख्यै विबुधै सदा ससेव्यमान तद् वृन्दावन प्रमत्ते मम चित्ते सतत आविरस्तु ।

गृहगता गोपी– कस्त्वम् ?

---

1) महाराज कृष्ण कुञ्जेऽपि नृत्तगीतादिराजवैभव नामुञ्चत् ।

2) गाढालिङ्गनवशात् तासा अनुलेप एन प्राप्नोति ।

3) मुनिरपि नद्या स्नात दिगम्बर गोपीचन्दनलेपवान् पद्मासनस्थ अरण्यवासी जपमालाधारी, दर्भवान्, अल्पभक्ष विनिद्र । स्त्रीभि सहितोऽपि कृष्ण मुनिवृति इति जयति मुनिगणमित्युक्तम् ।

Rarest Archiver

कृष्ण – कश्चन निर्जरोऽ[1] हम्

गोपी– इह ते स्वर्गः क्व वर्तते ?

कृष्णः– तत् त्वद्गृहमेव ।

गोपी– पीयूष क्व ?

कृष्ण.– तवाधरेऽस्ति सुभगे ।

गोपी– क्वास्ते तवानिद्रता

कृष्ण – सखि त्वत्प्रेम्णा चिन्तया ममानिद्रता ।

गोपी– अनिमिषता कुत्र ?

कृष्ण – प्रिये पश्यतः त्वद्रूप ।

इति प्रियगिरा सः चक्री वल्लबी निजां चक्रे । गोपी कापि वैश्यवत् श्रीकृष्णस्य प्रीतेर्लाभमवेक्ष्य चित्तमपि तस्मै ददौ । कृष्णः तां वैश्योप्तत्तिस्थाने स्वाङ्केन्यधात् । रतिसङ्गरस्थहृदया ता रम्यै भुजैः आलिलिङ्ग । पूर्वं विरहोच्छ्वासादिना औष्ण्यतया तिलकाभावेन सूर्यसदृश तस्या मुख सूर्योत्पत्तिकारणनेत्रविषय कृत्वा कलङ्किनः चन्द्रस्य उत्पत्तिस्थानाय स्वस्य मनसे संरोचयन् इव स कृष्णः कस्तूरा तिलकेन तन्मुख भूषयति । स स्यान्मुदे विठ्ठलः ।

रोम्णा हर्षणकारिणि श्रवणतः पापौघविध्वसिनि
प्रेम्णा चिन्तयतां विचित्र विमलश्लाघ्यार्थसन्दायिनि ।
सञ्जाते भुवि रुक्मिणीशविजये सद्वादिराजोदिते ।
सञ्जातः सुरमण्डलीषु नवमः सर्गो मुदा सत्कृत. ।।

---

1) देवता

दशमः सर्गः

स कृष्ण. अनेन प्रकारेण रात्रौ विविधान् विलासान् कृत्वा निशान्ते गोपी विससर्ज। विधो प्रीत्यर्थ तदन्वये जातः कृष्ण. स्वन कृतरासलीला सूर्यं न सन्दर्शयति स्म नूनम्।

एकदा दुर्गाविने दुर्गापूजायामासक्त उपवासव्रतधर नन्दगोप निशि बुभुक्षितचित्तवृत्तिः सर्प अग्रसीत् किल। सकलेश्वर कृष्ण विसृज्य अन्यदेव प्रत्यर्हणे अभिरत त नन्दगोप सर्प अग्रसीत् इत्यहृ ऊहयामि। सुदर्शननामा विद्याधर. शापेण सर्पशरीर प्राप्त, अब्जनेत्र कृष्ण नन्दगोपं दशन्त तं सर्पं स्वस्य (कृष्णस्य) दर्शनेन सुष्टु दर्शन प्राप्त सुदर्शननामानं, आत्मन. (कृष्णस्य) विद्याधराणा अन्वयसम्भूत अमूमुचत्। सः सर्पशरीरात् मोचित. गन्धर्वोऽपि तत्पदेन पूनतनु उत्तम पुरुषाङ्घ्रिप्रीत्या इव तस्य विष्णो पदमेव (गगन) जगाम।

स. हरि स्वात्मनि विद्यमानं असह्याना नक्तञ्चराणा नाशकत्व प्रकाशयन् सन् निगूढतया तत्र क्षपाया आगन शङ्खचूडाख्य दितिज शार्दूलमिव ममर्द। सः तस्यशंखचूडस्य वधात् अवाप्त शिरोमणि वल रामाय दत्वा स्वयं मनोज्ञकान्तामणिभि. समेत चन्द्रचयातिचारु यशोमणि बुभुजे।

अरिष्टासुरवध :

धूलीपालिभिः विष्णो पद अम्बरं मलिनयन्, कृष्णसमानकान्तीन् तोयदान् लाङ्गूलेन विदारयन्, कृष्णावतारस्य निमित्तमिति देवेन्द्र ककुदाख्यपर्वतेन, पृथ्वी च खरपुटैः क्लेशयन् अजित कृष्ण स्वविषाण लक्ष्य कुर्वन् वृषभरूपधारी अरिष्टासुरः अभ्यायात्। उग्र स. अरिष्टासुरः स्वविषाणयुग्मं अग्रे निधाय अच्युत प्रतिअगमत्- तच्छृङ्गयुग्म दोष्णा उत्पाटयतः मुरारेः स्वशिरोभारजिहीर्षया सहायं कुर्वन्निव। यदुपतिमृदुहस्तेन उद्धृतं अरिष्टस्य श्रृङ्गयुग्म त अरिष्ट असुर त क्षणेन व्यसुमकार्षीत्। तद्युक्तम्। शिरसिधृत. स्वीयोऽपि अन्तकाले सति शत्रो

Rarest Archiver

करवशमुपयातः[1] शत्रुतामेति । यदीय नाम स्मरतां मुनीनां अरिष्टं अत्यन्तिक नाश एति तदेकनाथ[2] जैत्र व्रज एत्य अरिष्टस्य[3] पुष्टि. न हि दृष्टपूर्वा ।

कृष्णसपत्नानां कसचाणूरादीना अङ्गनाः अरिष्टासुरनाशेन कृष्णस्य प्रथमानवीर्यतरणिं दृष्ट्वा चिन्ताक्रान्तमनोरथा[4] भाविनः स्वीयपयोधरद्वयशुष्कत्वस्य सप्राप्तये हृद्गस्य उदग्रपयस· वियोगकरणे उद्युक्ता इव भृश आर्ता· स्वनयनद्वारा[5] अश्रुधारा दधु ।

"आजौ मुकुन्द प्रतियास्यत मम श्व.[6] जीविताशा न विद्यते नूनु" इति निश्चित्य इव केशी दैत्य. अश्वरूपी सन् नन्दव्रज जवेन जगाम । विश्वमूर्ति[7] अग्र्यकीर्ति त कृष्ण ग्रसिष्णु स केशी विस्तृतास्य सन् त प्रति अभ्यागमत् किल । यदोर्वंशमणिश्च हरि स्व पाणि तन्मुखे प्रवेशयन् तस्य विस्तृतास्यतया अभ्यागमन ईप्सितमेव मेने । स. मुरारिः तदीयस्य हार्द्राम्बिरस्य मध्ये सस्थित असु बहिष्कर्तु ईहमान इव स्वकीय कर केशिदैत्यस्य मुखे निवेशयामास । असौ कृष्णहस्त. जरा इव, तस्य केशिन· धैर्यं जरयन् शरीरबलं च शमयन्, अङ्ग मुहु कम्पयन्, चक्षुराद्यक्षेभ्यो अपटुतां दिशन् दृढतरान् दन्तान् बलात् पाटयन् तच्छ्वासं स्खलयन्, बहुश· तद्यौवन दूरयन् केशिन द्विष· अन्तकपुरातिथ्य सूचयन् तद्वदनान्तप्रदेशे ववृधे । खलाग्रगण्य· स केशी कृष्णस्य दोर्दण्ड वरस्य अभिवृद्ध्या काय विससर्ज । तथाहि । परस्य जातान् करोदयान्[8] वीक्ष्य असूयाभरिता पुरुषाः असून् अपि त्यजन्ति ।

---

(1) शत्रुदत्तद्रव्यवशमुपयात ।
(2) स कृष्ण एव एको नाथ यस्य तत् व्रज
(3) अशुभस्य, अरिष्टनामकदैत्यस्य
(4) कसादिनाशाद् अस्मन्मनोरथा न पूर्यन्ते इति चिन्ता
(5) अनिमिषदृष्ट्या सूर्यदर्शने अस्त्रोदय यथाभवति तथा सपत्नाङ्गनाना कृष्णस्य शौर्यतरणिदर्शनेन अश्रुधारा सञ्जाता ।
(6) श्व न विद्यते इति अश्व
(7) विश्वस्य स्वोदरे स्थापितत्वात् विश्वमूर्ति
(8) प्राप्तद्रव्याभिवृद्धि

Rarest Archive

केशिवधानन्तर सुरर्षिर्नारदः वाक्कौशलेन विपक्ष निन्दन् स्वपक्ष स्तुवश्च कस अभ्येत्य इत्थ शशस-अङ्ग, कस सोऽय भोजराज. उग्रसेनः न तव पिता। त्व मायामयात् उग्रसेनवेषधरात् कपटिनः जारात् जातोऽसि। कस, भुवि ये तत्रानुगा ते सर्वे दानवा त्व चासुरसञ्चयेषु अग्रगण्य। असौ वसुदेवसूनु सुराणां ईश्वरः। तत्पक्षगताश्च समस्ताः सुरा.। स. कृष्ण वसुदेवपत्न्या देवक्या वसुदेवात् गर्भे धृत.। अस्मिन् तव मन्दिरे प्रसूतः। त्वदीयभीत्या आनकदुन्दुभि त कृष्णं तव आलयात् मित्रस्य नन्दगोपस्यालय निनाय। अत नन्दगोपितत्वेन नन्दसूनुरिति ख्यात ।- इति नारदेन ईरिते सति शौरिण वसुदेवस्य वधोद्यतं तं कस स तु देवयोगी बुद्धया उपायेन निषिध्य, वसुदेवस्य शृङ्खलाबन्ध तु तदा मुकुन्दस्य मत[1] विजानन् न वारयामास।

नारदर्षि. त कस एव वसुदेवस्य शृखलाबन्धनेन रचितापराध विधाय कृष्णस्य अन्तिक आजगाम। यथापराध खलानां दण्डकर्तुः कृष्णस्य पुरत कस कृतापराधमूचे-पुरारि प्रतिमः नारद.। अवाप्तसकल कामस्य कृष्णस्य किञ्चिदपि कर्तव्य नास्तीति असौ नारद. 'मदीय वचनं ऋत विधातुमपि वा इह कार्याणि करिष्यति[2]' इति हेतोः भविष्यत् सकल मधुरागमन कसवधादिक बभाषे।

इतीरयित्वा अब्जजने सुते नारदे गते, अरिणा कसेन प्रहितः श्वफल्कज. अक्रूर तत्र नन्दव्रजे अदृश्यत। सच, मृगाधिपेन ग्रस्त दिष्टया विमुक्त वीक्षितस्वर्गत्वात् हृष्यन् मृगशाव इव विभ्रमवानासीत्। स्वभक्तेभ्य स्वस्य सर्वेप्सितदोहदक्षतां सन्दर्शयितु समुद्यत निज प्रभु व्रजे गोदोहनकर्मणि स्थित नीरदनीलविग्रह कृष्ण सः अक्रूरः ददर्श। स अक्रूर. आदिपूरुष नारायण त ननाम। तद्दर्शनाख्योत्सवेन सञ्जात सम्भ्रमः सन् ननर्त। नानादुरितौघ अर्दयन् ननाद। नन्दस्य तपःफलोदय ननन्द। एणाङ्कशुचिस्मिताननः अच्युत. सशङ्क प्रिय त अक्रूर तदा-

(1) कस सापराधं विधाय हनिष्यत कृष्णस्य

(2) सत्यं विधातु निजभृत्यभाषितं इतिस्मृते.।

Rarest Archive

श्रितं अनादिसिद्ध भवरूपबन्धनं अञ्जसा विश्लेथयन् इव दृढं आलिलिङ्गे ।[1]

अक्रूराणां[2] जनाना प्रिय. गीर्वाणानां गी-र्बाणगणस्य अतिदूर· रक्षो-भर क्षोभकृत् श्रीकृष्णः हीन महीन[3] कस मथितु स्व निनीषु अक्रूर इत्थ अवोचत् "अक्रूर, तव क्षेम किम् ? अस्माक पिता कि कुशली ? स्वाध्याय-तीर्थाप्लुति- स्वर्ग्याराधनमुख्या शोभनकृति विघ्नोज्झिता वर्तते किम् ? संसारविमुक्तये प्रयतसे किम् ? कसस्य का वा स्पृहा ? स त्व वेत्सि अखिल । यद् अद्य मया कार्यं तच्च ज्ञापय ।"

अक्रूर – हे अनन्त, प्रभो भवान् मम- हृत्सरसिजे यावद् वर्तते तावत् क्षेमः । स्वीयाना क्लेशवनस्य अनले त्वयि सति तव पित्रोः क्लेशः क्व ? किन्तु त्वत्पितृतापवादजनित तयोः कसकृत शृङ्खला बन्धन चिन्तासन्ततिहेतुरेव[4] तयोः न सन्तापकारि । हे कृष्णय स्मात् तव पादरजः जुष्ट[5] तस्मात् तीर्थं सेवितमेव । येन अह तव वपुः आलिङ्गितवान् तेन सर्वे सुरा सत्कृता[6] । यत् तव दर्शन लब्ध पुण्यक्रिया च चीर्णा[7] । यत् ते कल्याण वचन श्रुतच तत् वेद परिचित.[8] भवत्सामीप्यभाज[9] मम भवोऽपि नास्ति । हे विष्णो कि बहुनोदितेन ?

---

(1) पूर्वकृत रज्ज्वादिबन्धनस्य ततोऽपि दृढतरबन्धान्तरे सति विश्लथन भवति खलु ।

(2) शान्ताना

(3) मह्या इन भूपतिः

(4) तव स्मरणहेतुरेव ।

(5) श्रीकृष्णपादधूल्या सकलतीर्थसन्निधानात्

(6) सर्वदेवाश्रितत्वदालिङ्गने सति देवतालिङ्गनस्यापि कृतत्वात्

(7) कर्मणा ज्ञानमातनोति इति श्रुते पुण्याभावे तवदर्शनासम्भवात्

(8) त्वद्वचनस्य सकलवेदोपबृहितत्वात् ।

(9) सामीप्यादीना मोक्षरूपत्वात् । किंससारविमुक्तये प्रयतसे इत्यस्योत्तरम्

Rarest Archive

भवद्दर्शनात् विश्वं विदित[1] कसेन सप्रेषितः अहं यत् तव सुन्दरंवपुः अद्राक्ष, शत्रु भवोऽपि मम मित्रमभून् । सर्वज्ञचूडामणे ते अय प्रश्नः नराणां विडम्बनाय,। [2]ईश, मम प्रत्युक्तिश्च ईदृशी । सम्प्रति कंसः कार्मुकोत्सवस्य कथाव्याजेन तव विप्रियं[3] कर्तु वाञ्छति । तेन मातुलेन क्रियमाण धनुर्मह सार्थं[4] विधातु तत्र मधुराया गत्वा सबल शत्रु धुनोतु । पुनस्तद्वधानन्तर समाधिप्रिय भवान् स्फुरद्भ्रूचापोत्सव आरचय्य भजतां तत्रत्यस्त्रीपुरुषाणां आधि धुनोतु । हे भवोत्तारक कृष्ण भवता मधु-राकेश-महसा मह-साधिका सा मधुरा स्वैः सह सहसा आप्या ।" ततः स कृष्णः सतत स्वध्यानेन शुद्धै. वृद्धजनै. आश्रितां मधुरां पुरी स्वप्रवेशेन मधुरा कर्तु गमनाय उपचक्रमे ।

हरिं मधुपुरी यान्त विलोक्य व्रजयोषित त विनिवर्तयितु धिया विविधालापै विलेपु । "नवाम्बुदनीलमूर्ते कृष्ण तव रम्याधरोष्ठसुधया रचितात्मवृत्ती. अस्मान् त्यक्तु नार्हसि हे अङ्ग त्वत्सङ्गमस्य भङ्ग करणे उद्यत पाप[5] तवलोचनान्तौ हि क्षपयितु शक्नोति । कृष्ण मधुरां यियासु त्वां समालोक्य न प्राणोऽपि देहात् यियासति । युवयो. हरि वीय्वो' अविनाभाव अक्षैरीक्षामहेऽधुना । किमु दुरितमस्माभिरकारि ? विवेकहीन' विधि' कसेन प्रकटिते कार्मुकसम्भ्रमे अस्मदीय कोमलकलेवर आदौ शराणां लक्ष्य अकृत । दयया अतिदूर, हे विधे, तव वचसा अतितृप्ता यदूद्वहस्य आलिङ्गने लुब्धचित्ता' अस्मान् तदीक्षणेन अपि विहीना दीना कथ करोषि ? अहो ! [6] अक्रूरः इति विरुद्धनामधेय. [7]

(1) येनाश्रुत श्रुत भवनीति श्रुते
(2) नृविडम्बनाय न अज्ञानेन । प्रत्युक्तिश्च न तदज्ञानमाशक्य ।
(3) विप्रिय विगतप्रिय विशेषप्रिय च
(4) सार्थं शत्रु हननरूप अर्थसहित । कसशत्रुरिति आपततोऽर्थः । शत्रु-भूतकसमिति आन्तरोप्यर्थ
(5) गोपीना दुरित, पापिन कस वा ।
(6) अक्रूरे चतुर्मुखावेश इति कृत्वा तत्कृत विधिकृत इति एवमाक्रोश.
(7) परमप्रियस्य कृष्णस्य वियोगकरणे क्रूरोऽपि ।

Rarest Archive

अयमपि च कंसदूत· कामिनीनां अस्माक विलाप उपेक्ष्य प्रियसरस-विलास अग्रचवेष कमनीय चारुहास कमलदृश कृष्ण नयति । भृत्य: अयमक्रूर· कि करोतु परन्तु स. कसः सतां प्रत्यर्थिभूत. । तद्धनुरुत्सव· निहतोऽस्तु । धनुश्च भग्न भूयात् । य अस्मत्प्राणसम स्मेरानन श्रीपति वियोजयति हा ! अतिमद त कस अस्मदीय विभु. देव. प्राणेन वियोजयतु । हे मुरारे इत गोष्ठात् यदि राजधानी मथुरा जिगमिषसि, तर्हि श्रुतिततिजित याहि ते तत्र शुभा श्रीरस्तु । हे सौम्य सुखद तदुपसर्ग[1] शीघ्र· सन्धेहि । अघटितघटक नो-चेत् अस्माक तवैव उप (समीप) सर्ग घटय ।[2] प्रिय कृष्ण निनीषो·, यस्य अक्रूरस्य कांक्षा निजाना सौख्यदाता धाता पिपर्ति । गर्भीकृतपद्मजन्मा[3] स एष अक्रूर श्रीशपादाम्बुजन्म जिघृक्षति ।"– इति विरहजभीत्या वेपमानाः कृशाङ्गीः गलितवलयहाराः चित्रलेख्यानुसाराः गोपी· अमृतकल्पै प्रेमवाक्यैः प्रीणयन् मुरारि ताः असकृत् सकरुण वीक्षमाण मथुरां प्रति प्रतस्थे ।

पादस्पर्श·, करग्रहः, प्रियतमस्य अङ्गाना आश्लेषः केशग्रहः परस्परं प्रेक्षा, अध·करण, उपरिस्थितिः मिथोमुष्ठिः एतदादिभिः विलासैः जुष्टे सुरते, गोपीनां कुचकुम्भमर्दनकृता येन कृष्णेन मल्लेन्द्रविद्या[4] ईभार्दनवैखरी च आर्जिता स· प्रभु कृष्ण. ताः[5] गोपीः त्यक्तु कथ ईष्टे ?[6] स· शौरि. बल्लवानां प्रणयाख्यदाम्ना निबध्यमानोऽपि रिपून् जिघासु सन् मथुरां जगाम । तथाहि न विजेतुकाम· निवार्यमाणोऽपि निवर्तते । रथेन मथुरा प्रति दूरे व्रजन्त त रमण कृष्ण व्रज-

(1) याहि इत्यस्य सुखद उपसर्ग आ इति उपसर्गम् । आयाहीति भवति ।

(2) कृष्णानागमने स्वासा मरण सूच्यते ।

(3) ब्रह्मणाऽविष्ट अक्रूर (4) पादस्पर्श परस्पयं हस्तग्रहणादीना मल्लविद्याया साम्यात् ।

(5) विद्याद्वये गुरुस्थानीया

(6) स्वकृतविलासपात्रीभूतत्वात् सदा दयास्ति ।

स्त्रिय परितः, दृगश्वंभाजा दृढभक्तिदाम्ना बुद्धिरूपयन्त्रा सहितेन मनो रथेन अनुजग्मु ।[1]

ईशं नन्दकिशोर नयन् असौ श्वफल्कसूनु अक्रूर.[2] यमुनाम्बुमध्ये सेवाफलरूप[3] अन्यैरदृश्य अस्य कृष्णस्यैव विचित्ररूप ददर्श । पुण्यक्षेत्र निवासिनां सुविमलज्ञाने अनुरक्तात्मना, वृद्धपरम्परया समागतमपि राजान कृष्णपक्षप्रिय दूरेण उत्सृजतां, सुशान्तमनसा, तीर्थाटनं कुर्वन्तां पुरुषाणा वेद्य हृद्य हरे. रूप श्वफल्कात्मज. अपश्यत्[4] । भक्तो नाम अक्रूर एव । य. करगते कृष्णेऽपि वेदोदित तत्कर्म[5] आचरत् । क्षितौ दुरितप्रध्वसि कर्म तदेव । क्षितौतीर्थ चापि यमुनाजलमध्यगत ब्रह्म-हृदाख्यमेव यतो हि जात्वपि श्राव्यया तयोः कर्म-तीर्थयोः ससेवया दास्यैकवश्य. प्रभु मुररिपु स्व रूप अदर्शयत् ।

अक्रूरदृष्टस्य भगवद्रूपस्य वर्णनम्

श्रीकृष्णस्य कान्ति सहस्रसहस्रांशुमरीचिवत् दिक्तटे व्याप्ता । कमलायाः कराद्येन तस्य चरणाख्यारुणभास्करः अर्च्यः । वज्रा-अङ्कुश-पताका-अब्जानां रेखाभिः लक्ष्येन पादतलेन स उज्ज्वलः । भिन्नप्रवाल-वत् विलसद्भिः अङ्गुलीदलैः मण्डित । पुष्कलस्येन्दोः समश्रीमद्भिः निष्कलङ्कैःनखै भूषितः । उत्तुङ्गरत्नखचिताभ्या नूत्ननूपुराभ्यां शोभित । तस्य वृषाकपे. जङ्घाद्वय लक्ष्मीकराब्जससक्तम् । विभोः ज्ञानुद्वय रत्नदर्पणसङ्काशतया शस्तम् । अव्ययस्य ऊरूद्वय मृदुवर्तुल

---

(1) यावद्दृष्टिपात चक्षुषा पश्यन्त्य तत मनसा. ध्यायन्त्य स्नेह कातरा स्थिता, ।

(2) स्नानार्थ यमुनाया अवतीर्य

(3) सारथ्यरूपसेवाया. फलरूप

(4) अक्रूरस्यापि मधुराक्षेत्रवासित्वात् कृष्णोत्तमताज्ञानवत्वात् कंसाख्य प्रभुत्यागात् स्वयमक्रूरत्वात्, यमुनातीर्थ प्रति आगमनाच्च उक्त-गुणवत्त्वम् ।

(5) सन्ध्याकर्म ।

Rarest Archive

रम्भास्तम्भवन् सम्भासते। कटिद्वय च कृष्णस्य करिपोतलसत्कुम्भवत् रम्यम्। हरे कौशेयवास उद्यदर्कशतोद्रिक्तं रम्यम्। विचित्रै. रत्नै: सशोभित हैम काञ्चीदाम तस्य। अनेकभुवनाना आधारे तस्य तनूदरे वलित्रयन् शोभते। तन्नाभिसरोवर च विरिञ्च्याख्यभृगेन शोभितेन अब्जेन स्फुरति। वलिपल्लवसत्कान्त्या उदरबन्धन प्रज्वलितम्। कृश मध्य स। विशालोरस्थलेचन्दन चर्चितम्। परात्पर: स लक्ष्मी-धराभ्यां आश्लिष्टपुष्टपार्श्वं अङ्कस्थितरमाया वक्ष कुङ्कुमाङ्केन उपलक्षित। वक्षसिश्रीवत्सं तस्य। श्रीमद्वनमालाविभूषित. श्रीहरि: स्फुरदिन्दुसमामन्दवरकौस्तुभमण्डन:। विलसद्रत्नकटकै: कङ्कणैरङ्गुलीयकै: शङ्खचक्रगदापद्मैश्च अङ्कितानि तस्य श्रीमत्करा‌म्बुजानि। रेखात्रय युक्त कम्बुसङ्काश स्फुरन्निष्क तस्य शिरोधर। तन्मुख च अगण्य लावण्यपूर्णं प्रसन्न सारसमिव। अतिरक्त मृदु स्निग्ध पक्वबिम्बनिभ: तदधर। कुन्दकुड्मलवत् सशोभिदन्तपक्ति तस्य दयानिधे। चन्द्रिका सौभागस्पर्धिना मन्दहासेन मनोहर हरि हरिर्नालस्य ज्वलद्वप्रवत् विलसद्गण्डगण्डल। तरुणादित्यसंकाशाभ्यां कुण्डलाभ्या मण्डित। लसन्नासाप्रभया नवचम्पकसम्पद् मुष्टा। चलन्मधुकरासक्तजलजोपम लोचन:। इन्द्रनीलोपलमयशाङ्गंसौद्वर्यजिद्भ्रू। तस्य लोलापाङ्ग मधुव्रत: श्री-भू-मुखाम्भोजासक्त। हृद्योर्ध्वपुण्ड मध्यस्थेन सद्रत्नतिलकेन उज्ज्वल.। अळकासक्तेन भास्करायमाणेन मुकुटेन अनर्घ्यै. हारै: केयूरै: नूपुरै एतदद्यै विराजित अच्युत: कन्दर्पकोटिलावण्यमन्दिराकार.। सुवर्णमण्टपान्त स्थ कमलामलविष्टर। विधिमुख्यै सुरगणै मुदितै: मुनिपुङ्गवै गीयमान। तद्दयादृष्ट्या आश्रिताना कल्मषं क्षालितम्। विश्वस्य स्थेमलयोत्पत्तिमुक्त्यदे: मुख्यहेतु अच्छशेषफणारत्नछत्रेण शोभित श्रीहरि.। एतादृश श्रीकृष्ण अक्रूर: यमुनाम्बुमध्ये ऐक्षत।

अम्भोरुहपत्रनेत्र त कृष्ण दृष्ट्वा तुष्टाखिलचित्तवृत्ति अक्रूर: तुष्टाव। पश्चात् रथस्थित त सिषेवे। तथाहि मुक्तोऽपि नैवोज्झति कृष्णसेवाम्।

यमुना सा विजयते यमिनी परमप्रिया या स्नानमात्रत सुधियः कृष्ण प्रदर्शयति ।

अथ मधुरापुरी उपगम्य पुराद्बहि कृतवसति कृष्णः गान्दिनी-सुत अक्रूर "त्व पुरत पुर याहि" इति अवदत् । प्रियस्य कृष्णस्य सङ्गस्य विच्छेदभयेन निर्विण्णधी· असौ अक्रूरः ग्रहपुत्रकलत्रेच्छा-रहित सन् माधव वक्ति– "हे कृष्ण, ससाराख्यस्य असारसिन्धो· जनि-मरण- जरादिभि· ऊर्मिभि बाधितानां अस्माक प्रेमपाशै निबद्धा. दाराऽऽगारादिभारा: जगति सुखकरा किम् ? तस्मात् सत्पताक सकेतु रम्य कर्मन्दिगम्य भवजलधौ भवता खेदानां विच्छेदहेतु त्वत्पादपोत अनिश प्रदिश । हे कृष्ण, तवागमनकाले प्राय व्रजस्त्रीजनै: दत्तशाप· मां अस्पृशत् येन लावण्यवारांनिधिपूर्णमूर्ति भवान् वियुङ्क्ते । पुण्य विना श्रेय· को वा उपार्जयेत् ? मुकुन्द, पुण्याना श्रेण्या· अतिदूरमपि मां सतां दूषणेषु अनुदिन मूक कुरु । मीनदृशां स्त्रीणां ईक्षणेषु अन्ध कुरु । त्वद् भिन्नगोष्ठीषु बधिर कुरु । पापकरप्रयाणकरणे पङ्गुकुरु । तादृशकर्मसु अपाणि कुरु । ग्राम्यरतौ क्लीब कुरु । तदीय[1] स्मृतौ मां मूढं च कुरु ।[2] हे विठ्ठल तव अङ्घ्रियुगार्चने काम·, अमलधियां[3] लोभ., सुपुण्यार्जने मात्सर्य, तवचरितानुकीर्तनाख्यसुधापानात् मद·, त्वज्छत्रुषु क्रोध , भवत जनेषु: राग. च उदियात् । अन्यत्र न उदियात् । यस्मात् उच्चनिलयस्य राजाद्याश्रयगुक्तस्य पुस शत्रु शत्रु· न भवति । अन्यस्य राजाद्याश्रय रहितस्य तु शत्रुर्भवेत् ।[4] हे रुद्र त्व हि मनोभिमान्यसि । तत मम मन. त्वच्छत्रो· कामस्य मित्र[5] मा कुरु । हे ईश मे मन अच्युतस्य चिन्तनार्चे-

---

(1) ग्राम्यविषयाणा स्मरणे ।

(2) मूकत्वबधिरत्वादीना पापफलत्वदृष्ट्या पुण्यदूर मा एव कुरु इति प्रार्थना ।

(3) निर्मलज्ञानसम्पदने

(4) कामक्रोधादीना शत्रुत्वेऽपि कृष्णाख्यमहाराजाश्रयवत अस्माक शत्रवो न भवन्ति ।

(5) स्वाभिमन्यमानस्य भटस्य वैरिणे दानं नोचितम्

Rarest Archive

नरत कुरु। हे भास्कर, चक्षुरभिमान्यसि । तच्च विठ्ठलवपु सन्दर्शनैकाध्वर कृत्वा कैरवाक्षीणा अनुचर मा कुरु। यत ताः तव सपत्नाना[1] आश्रया । स्वामिन् विठ्ठल, सज्जनश्वशुरत प्राप्ता, दिगन्ताम्बरां, उत्क्रान्तावधि योगिनी, मनन-सद्ध्यानादिभि भूषिता, मोक्षापत्यवती विरक्तिरूपरमणी अहर्निश सश्लिष्यत मम काल गच्छतु। अन्यथा न कुरु। यस्मात् तदा काम आलम्बते। विठ्ठलनाम्नि ताम्बूले वि ठ इति वर्णयुग सत्पर्ण-चूर्णे। अपर वर्ण ल पूगफलम्। हरे गुणौघगणना महत् कर्पूरखण्डम्। भिक्षुश्लाघ्य अनङ्गवैरि, ससर्पिरागापह तदिद आकस्मिक ताम्बूल जक्षत् पुमान् ससृतिरोग कथमेष्यति ? कृष्ण ! यत् ते अङ्घ्रिकमले चञ्चरीकति तदेव स्वान्तम्। इतरत् विषयलोलुप भ्रमद्भुजगसन्निभ स्वस्य अन्तकारि मन्ये। कृष्ण, इति ब्रुवन्तमक्रूर मधुरोक्तिभिराश्वास्य विससर्ज। सोऽपि अक्रूर प्रभो आज्ञा विधित्सु गृहान् अगात्।

रोम्णा हर्षणकारिणि श्रवणत पापौघविध्वसिनि
प्रेम्णा चिन्तयता विचित्रविमलश्लाघ्यार्थसन्दायिनि।
सञ्जाते भुवि रुक्मिणीशविजये सद्वादिराजोदिते
सञ्जातः सुरमण्डलेषु दशम सर्गो मुदा सत्कृत ॥

---

(1) सूर्यशतुनीलोत्पलोपमलोचनाश्रया ।

एकादशः सर्गः

हरि गृह व्रजत तस्य अक्रूरस्य हृदय.ख्यपुरी प्रविश्य इनोदये तां मथुरां मधुरापुरी निर्विविशे। द्वारि द्वारि[1] स्वभक्तै[2] आहृत-विविधबलि उद्यानवापीषु प्रोत्फुल्लाना अम्भोजकुन्दाना प्रकरै. सुरभिणा वायुना[3] अधिवर्त्म सेव्यमान उरुगुण ईश. कृष्ण: पुष्पपीयूषवृष्ट्या[4] सिक्ता सन्मार्गनाडी पापव्रात[5] दिधक्षु सन् अविशत्– प्रथितनिजपुरस्य हृदयस्य ब्रह्मनाडीमिव। पीतवसन सर्ववित् स कृष्ण अध्वनि रजक रजसा ग्रस्त दर्शयन्निव वसन समयाचत। कृष्णेन वसने याचिते सति सः रजक दुरालाप चकार। तन्निशम्य दुरात्मन तस्य शिरो[5] जहार। अकृतकिल्बिष काय कि करोतु ?

मथुराया राजमार्गे गच्छन् हरि पथि पथि नवसौधाना अन्त स्थिताभि मुग्धाङ्गनाभि कुसुमनिकरै लाजै कीर्यमाणोऽपि ता परित्यज्य त्रिवक्रा[6] अविदितनद्गुणकर्मा अपि तां कुब्जामुपेत्य वव्रे। तथाहि चतु पुरुषकाक्षा वक्रयोषित्सु नूनम्। स कृष्ण. मुष्टिप्रमाणतनुमध्यवर्ती स्वकर्णविश्रान्तगुणां रुचिरा त्रिवक्रा लज्जावशात् विष्वक्प्रयुक्त-

---

' हृदय ब्रह्मपुर इतिश्रुतिप्रथिता निजपू भक्तशरीर तस्या ब्रह्मनाडी हृन्मध्यस्था सुषुम्नानाडी। ब्रह्मनाडी प्रविशन् इव हरि मथुराया राजमार्गनाडी अविशत् तत्रापि

(1) चक्षुरादि इन्द्रियद्वारेषु

(2) चक्षुराद्यभिमानिसूर्यादिभि आहृत तत्तदिन्द्रियजन्यसुखरूपबलि ।

(3) प्राणापानव्यानोदानसमानाख्यवायुना।

(4) मूर्ध्निस्थितवरुणमण्डलात् नि सृतअमृतवृष्ट्या।

(5) शरीरपक्षे वामकुक्षिस्थ पापपुरुषावयवभूत ब्रह्महत्यादि पापसमूह मधुरापक्षे कसचाणूरादीना समूहम्।

(5) दुरालापकर्तृ वदनाश्रयत्वात् शिर कृतकिल्बिषम्। अपराधानुसार शिक्षादेया खलु

(6) जानुमध्यकटिषु वक्राम्।

Rarest Archive

नयनान्ताख्यशरा ता निरीक्ष्य उद्धवकथाविषय कोदण्ड मेने ।[1] कृष्णस्य मधुरवचनमात्रेण पुलकितरुचिराङ्गी चञ्चलापाङ्गभृङ्गी सती सा कुब्जा कृष्णस्य अङ्गराग ददौ। खलकुलवनदाव वासुदेवः त्रिवक्रा इति अनुचितमभिधान[2] त्याजयन् ता त्रिवक्रा ऋजुगात्री ततान। तस्या प्रपदे निहितपादाम्भोजफुल्लप्रसून कृष्ण तस्या वदन उपगतेन द्व्यङ्गुलोत्तानेन दोष्णा ता त्रिवक्रा उन्नमय्य ऋजुतनुमतनोत् ।[3] तथाहि। चिबुकगतकराणां अञ्चतां[4] पुसा वक्रा क्वास्ति। कृष्णस्य करः वक्रामपि तां तन्वी ऋज्वीमकरोत्। कुपिता वाला अनुकूलयितु कर[5] एव हि कारणम्।

कुब्जादय [6] गन्धार्पणात् रुचिरवेषकरणात्, मनोज्ञकुन्दप्रसूनरचिता मलमाल्यदानात् कृष्णस्य महाप्रसाद अलभन्त। विभु त सर्वविधिभिः अर्चयन्तः महाप्रसाद लभन्ते इति किं वाच्यम्?

अथो रमेश राजाध्वना धनुपूजानिवास समधिगम्य कोदण्ड खण्डनं चक्रमे। तद्युक्तम् हि। सकलदैवतानां मुख्यदेव कृष्ण जडतमस्य धनुष बलि कथ सहेत? सद्वंशजातोऽपि [7]गुणान्वितोपि[8] शिक्षानु

(1) कोदण्डस्यापि मुष्टिप्रमाणतनुमध्यवत्व मोक्तु कर्णविश्रान्तगुण (मौर्वी)त्व, आदिमध्यान्तभागेषु वक्रत्व च वर्तन्ते। उद्धवाख्ययादवेन कृष्णदूतेन तद्धनुष्कथा वर्णिता आसीच्च।

(2) प्रियोक्तिश्रवणमात्रेण अङ्गरागार्पणात् एकत्राप्यवक्रायाः त्रिवक्रत्वमनुचितम्।

(3) यथा विलासी प्रणयकोपे वक्राया पादे पुष्प समर्प्य वदनं संगृह्य स्तुत्वा अनुकूलयति तथा।

(4) पुष्पदानादिना मानयता

(5) द्रव्यदानम्। 'बलिहस्ताशव करा'

(6) कुब्जाआदि ययो नापितमालाकारयो, ते कुब्जादय।

(7) उत्तमवेणौ जातोऽपि

(8) मौर्व्या सहितोऽपि

रूपोऽपि स चाप तेन कृष्णेन शनैः भग्नः । लोके वक्रहृद [1] पुंस' कोवा गुण कोविदमानयोग्य. ? असौ लीलाबाल. कृष्ण प्राक् खलमिव तद्धनु. करेण[2] उदघृत्य गुणावेदन[3] व्यतनुत । तदनुप्रभु [4] पादाघात विरच्य्य आशु अनमयत् । अथो नम्रीकरणानन्तर भग्नमकरोत् । बलात् नम्रीभूते शुष्कहृदये[5] करुणा किम् ? भग्न चाप' भयङ्करनिनदै. स्वभर्तुः कंसस्य धैर्यचौर्यं ततान । व्यग्रस्वान्तान् स्वपालान् दृढतरस्वशकलद्वन्द्वघातैः जघान । चाप. स्वभङ्गेनैव उग्राणा मल्लाना प्रकरस्य हृदि भल्लकल्प भं चखान । विपक्षे द्वैधीभाव विरचयति सति स्वीय एव स्वशत्रुः भवति बत ।

श्रीपते. इति विविध चरित्रं[6] मेरो अपरभागस्थिताना सिद्ध-विद्याधराणा कथयितुमिव भानुः अमलमेरोः अन्य भाग अगमत् । अगणितविभव मुकुन्दोऽपि ज्ञातिभिर्जुष्ट स्व निवास अगमत् । सः अस्तङ्गतः रविः काष्ठासु समन्तात् तम पुपूरा । पुराद् बहिर्गत' मुकुन्दोऽपि भयाख्य तम स्वशत्रुषु पुपूर । औदार्य-धैर्यशौर्याणि कंस निष्ठानि गर्हयन् स भयोच्चयः मधुसूदनदूतवत् कंसस्य मनः ममर्द[7] ।

कंसभयोच्चययोः सम्भाषणम्

कंसः– कस्त्वम् ?

भयदूत – अरे कंस, सोऽहं त्वदन्तकतटादभ्यागतो वै भटः

कंस'– पृथ्वा क्वास्ति ममान्तकः ?

भयम्– स भुवनेषु अन्तर्बहिश्च वर्तते ।

कंस – नामाप्यस्य न श्रूयते ?

---

(1) कुटिलहृदयस्य । चापोऽपि हृदये = मध्ये वक्र ।

(2) खलपक्षे हारकटकादिदानेन सत्कृत्य ।

(3) मौर्वी सम्बन्ध, खलपक्षे विनयादिगुणावेदन ।

(4) एतावताप्यननुकूल

(5) स्नेहविधुरचित्ते । धनु पक्षे शुष्कमध्ये आर्द्रवशेनधनु करणायोगात् ।

(6) कुब्जोन्नयनादि चरित्रम् ।

(7) कंसे उत्पन्न भयोच्चय कृष्णदूतत्वेन वर्णयति कवि

भयम्– देवकीसुत इति ख्यात स: ।

कस – तस्या हि नन्दन मया ध्वस्त ।

भयम्– अज्ञ तस्य त्वदन्तकस्य मृतिर्नास्ति । पर तेन कृष्णेन त्वदीया पूतनादय निहता किल ।

कस –शैलसमा मल्ला सन्ति । जगति प्रख्यात बल चास्त्येव मे । हस्तिसहस्रसम्मितबल: मम हस्ती[1] अस्ति । तत्क्वास्ति मृत्युर्मम ?

भयदूत – राजन्, भवतां चित्ते समुज्जृम्भित अहमेव शङ्कासहृत्सार्पक: सन् मृत्युरिव भवद्भि: दृष्ट वस्तु भयङ्कर विरचये । यस्मिन् कृष्णे स्वभक्तनिकरै साक नृणा हृदयमन्दिर उत्सृजतिसति प्राक् क्षणात् ते नरा: अन्धा. बधिरा विवेकरहिता: मूकायिताश्च भवन्ति । अन्ते प्रेतपुरी प्रयान्ति । जगता ईशस्य कृष्णस्य अग्रत: कि मल्लै किमु हस्तिनाऽतिबलिना ? कि वा त्वया ? कि भटै ?

कस – हे दुर्मते दूत भ्रान्तोऽसि किम् ? इद विरुद्धभाषण मा ब्रूहि ।

भयम्– कस, यत् ते मन मया निर्जित तत् भ्रान्ति. विपरीत वागापि ते एव ।

कस– दूत, मम खड्गाभिहति इच्छसि किम् ?

भयम्– भयग्रस्तस्य तव चञ्चलात् हस्तात् शनै गलन् स खड्ग: त्वामेव हनिष्यति । ईश्वरभट मा हन्तु क: इशोऽस्ति ?

कस.– अज्ञ, क्लीब त्व कि कुरुषे ?

भयम्– भवत क्लीबोपमां दित्सया क्लीबभाव शिरसा दधामि । कि बहुना जल्पितेनाधुना ? स पवन मन्नियत: सन्[2] वाति । मन्नियत अनल पाक विधत्ते । मन्नियत: असौ सूर्य समुदेति । त हरिं ऋते सर्व जगन्मद्वशम् । हे कस, चित्ते समुज्जृम्भित अह सत्व निष्फलमातनोमि । मुख मलिन खिन्न च आतनोमि । गात्र वेपथुग्रस्त तनोमि । अक्षियुगल

(1) कुवलयापीडाख्य.

(2) भीषाऽस्माद्वात पवते । भीषोदेतिसूर्य भीषास्मादाग्निश्चेन्द्रश्च इति श्रुति: ।

Rarest Archiver

अधीर (चञ्चल) आतनोमि। चित्तच चिन्ताकुल करोमि। वाचि दैन्य, विभवे विरक्तता, भोगावले त्याग, लज्जाया मानस्य, यशसश्च च्युति च विरचये।

कस – रे रे मन्द, बहि: प्रयाहि

भयदूत – भो भोजेश कंस यदि कृष्णाश्रितो भूया: तर्हि तथा करोमि। अपरया उभयत्र त्वां नोत्सृजे। धैर्यश्वैर्यगुतस्याच्युतस्य प्रियाणा मन मह्य न वै रोचते। तस्य कृष्णस्य वैरिणा: चेत प्रतिदिन मम क्षेमाय अभ्युदया च भवति। कस, शम्भु सम्भज, पद्मयोनिमथवा, चन्द्रेन्द्रवीन्द्रादिकान् भज स्वर्गं गच्छ, तमो व्रज, प्रविश वा पाताल अत्रैव भुवि भित्तिसहस्रै: वारिधिना महाशैलेन ज्वलत्पावकैश्च रक्षा कृत्वा तिष्ठ तथापि कृष्णविमत त्वा न त्यक्ष्याम्यहम्।[1] स्तब्ध कस यस्य चित्ते अह उज्जृम्भित स. युद्धार्थं कदाऽपि न गच्छति। गतोऽपि ओजस्विनां पृष्ठत तिष्ठति। कथचित् पुरोगच्छन् शत्रुमवेक्ष्य शस्त्रनिकर क्षणेन पृथ्व्या उज्झति। तृणानि च अङ्गुलीदलानि च अदन् शत्रु स्तौति। शत्रुणा मुक्त कम्पी पतन् धावति– इत्थ वहुलोकनिन्दितदशां सम्प्रापयिष्याम्यहम्। हे भूपकस गाथा तावत् तिष्ठतु। सम्प्रति[2] भवान् निद्राति किम्? कथचन निद्रितोऽपि शोभन स्वप्न पश्यति किम्? रिपु अनिश न शङ्कते किम्? हृदि धैर्यं सन्दधाति किम्? अनुचरान् धीरान् उद्वीक्षते किम्? स्वैरमद्वशमानसस्य सौख्यार्थिन भवत. सौख्य क्वास्ति?

इत्थ साध्वसन्दिग्धबुद्धि स कस निद्रा न अध्यगात्। लब्धनिद्रोऽपि दुस्वप्नै स्पर्धया उन्नद्ध व्यबोध्यत।

तत. अर्क तमिस्र परिहर्तु अभ्राग राजमार्ग[3] समाससाद।

---

(1) रुद्राश्रितस्य बाणस्य भयदर्शनात्। ब्रह्माश्रितस्य हिरण्यकशिपो भयदर्शनात्। चन्द्रादीना राहुवादिभ्य भयम्। पातालगतस्य हिरण्याक्षस्य भय दर्शनात् समुद्रादिना रक्षाकृत्वा स्थितस्य नरकासुरस्यमृतिरभूत्'। एव अन्याश्रयणे भय वर्तते।

(2) भयोज्जृम्भणकाले

(3) सोमो राजा इति श्रुते चन्द्रास्तमये तन्मार्गे सूर्यं आगत।

Rarest Archive

हरिश्च स्वकरे असद्गतमिस्त्र जिहीर्षु गोपै सह राजमार्ग आससाद।

गजरम्यगति कृष्ण राजमार्गे गच्छन् रङ्गद्वारिस्थितेभ अथ हस्तिप च विलोक्य 'मार्ग प्रदेहि करिणा सह दूर एहि, नो चेत् विदूर कृतान्तलोक प्रयास्यसि' इत्यवोचत्। हस्तिप. अम्बष्ट– "वनवासिज नैकमान्य भो कृष्ण तिष्ठ, तिष्ठ। शत्रुसन्दर्भस्य केसरिसमेषु जितश्रमेषु विदग्धेषु पारवासिजनेषु पुदृक्प्रौढि बकौल शल अस्ति तादृश प्रौढि बल कुशल वने सञ्चरत तव गोपालस्य नास्ति।" कृष्णस्तु– हे जना, मन्दमते अस्य अम्बष्टस्य प्रौढि विचारयत। अस्य हस्तिन विध्वसने उद्यतकरस्य मम वने निवास दूषण किम्? विमतकेसरिसम्मितानां एतेषा प्रतिदिन नगरे निवास भूषण किम्? इत्युक्त्वा "प्रौढि तथास्तु अस्मदीय बल कौशल च पश्य" इति उदीर्य तरसा किरण त कुवलयापीड निहत्य तस्य करिणं अङ्घ्रीणां मध्ये अधिगम्य विलिल्ये। तदा हस्ती व्यकम्पत। शौरि न जगृहे। अपारशक्ति कृष्ण पुरुसत्वं अमु हस्तिन पुच्छे प्रगृह्य पुनश्च बहुदूर चकर्ष। गजस्य अग्रे धावन् विभुः निजविपात विशङ्किन अस्य गजस्य भूलग्नदन्तयुगल शिथिलीचकार। कृष्ण भुवि पतित विशङ्क्य कृष्णताडनाय भुवि सहते आत्मदन्ते अनुषक्तबहुधूलि इभ आत्मबुद्धचुचित सिद्धसिद्धि इव अम्बरस्थ सिद्धेश्वराणा कृष्णस्तुतिगिरा[2] पथि वर्ण्यमान विरेजे।

इत्थ अम्बुजाक्षः स्वीय बलकौशल[1] प्रदर्श्य करिण पद्भ्यां तरसा प्रपीड्य ममर्द। उत्खातौ तस्य धवलदन्तौकरे धृत्वा स हरि तत्स्वामिन अम्बष्ट तदनुगाश्च लीलयैव क्षणेन ममर्द। तस्य श्रीकृष्णस्य अङ्घ्रौ सङ्तानां सहजाङ्कुशरम्यरेखाना भीत्या इव तत्पादप्रहारेण विवशः असौ वारण कम्पितमहीधरभूप्रदेश सन् कुवलयापीड[3] इति स्वनाम गुणानुकूल कुर्वन् भुवि पपात किल।

(1) प्रकारान्तरेण बलकौशल प्रदर्शयति।

(2) कृष्णविषयकमिथ्याज्ञानेनैव गजमुखेधूलिपातोजात इति वर्ण्यमान इभो रेजे।

(3) को. पृथिव्या वलय मण्डल आसम्यक् पीडयतीति कुवलयापीड।

स्वांसस्थस्य उत्खातदन्तस्य परिशोभिरक्तबिन्दुभि ससतक-निर्मन्तनु द्विपारि हरि रक्षस हिरण्यकशिपो विदारणाख्येन विलासेन धृतान्त्रमालाधरेण वक्ष.स्थलेन अद्भुतनृसिंह इव आबभासे।

द्विषता लोकद्वये भोक्तव्यस्य सुखसमूहस्य प्रत्यूहकरौ विघ्नेश्वराविव कुवलयापीडस्य एकैकदन्तधृत्वा अश्रान्तौ तौ रामकृष्णौ विमूरङ्ग विविशतु। रङ्गप्रवेशानन्तरतयो रामकृष्णयो मल्लाभ्या चाणूर मुष्टिकाभ्या सह ख्यातयो. सिंहयो मत्ताभ्या गजाभ्या इव युद्ध प्रववर्ते। स्वभक्ति ससारमिव कृष्ण चाणूरमभ्यगात्। तत्कृष्णस्य ज्ञान पापौघ इव रोहिणीसुत बलराम मुष्टिक अभ्यगात्। विविध चाणूरमुष्टिकयो. अभ्यासकौशल्यमपि, अव्यग्रमत्योः फणिपति– यदुपत्यो अग्रत. निष्फल आसीत्। तथाहि। अनवस्था अतियत्नेन अभ्यस्ता विद्या सहज तेजोबुद्धिभाजा अग्रे फलति किम्? समरे अङ्गालिङ्गने तत्परस्य, चरणस्पर्शे उद्यतस्य अपि अल नम्रस्य, परित. स्व उपेयुष. अपि चाणूर नाम्नः मल्लस्य वशे कृष्णः नाभूत्। सङ्कर्षणश्च मुष्टिकस्य वशे नाभूत्। दुष्टे वञ्चनया आचरिता मृत्युप्रदा आलिङ्गनादिसत्कृति लोके मतिमान् विश्वसेत् किम्? अशनि समस्य कठोरस्य मल्लस्य हस्तघात. हरे मृदुनिकलेवरे अफलोऽभूत् तथाहि। मृदुसरसकवे पुरतः कठिणपदप्रियकाव्यकारशीला ईड्या किम्? दुष्टेभपञ्चानन श्रीकृष्ण. तस्मात् चाणूरात् लभ्यां जयाख्यां कामिनी लषन्निव रिपो चाणूरस्य पादौ गृहीत्वा[1], तत्कालार्हं[2] भ्रम[3] प्रतिदिशन्निव त मुहु भ्रामयित्वा, द्विष तस्य अङ्गे अभ्यासेनसमोधितां कठिनता पश्यन् इव क्षितितले तन्मूर्धान अताडयत्। स पृथिव्या चूर्णित· चाणूरमल्लस्य मूर्धा अन्यलोकगमनाय उद्यतस्य महाभीतस्य कसस्य परिपन्थिसुशान्त्यै बालमल्लस्य कृष्णस्य करेण चूर्णितस्य भास्व-

(1) दातु पादग्रहणादिपूर्वक कन्याया ग्राह्यत्वात्।

(2) असुरवधकालार्हं कन्याऽऽनयनकालर्हं च

(3) विपरीतज्ञान। मृतौ विपरीतबुद्धिभाजः दैत्याः। कन्यापक्षे, दातु चित्तवैकल्यम्।

Rarest Archive

नारिकेलफलस्य तुलना जगाम[1]। प्रौढानां पतिः हरिः मल्लवरं चाणूरं पदोः प्रगृह्य प्रसभं धरण्यां निपात्य सञ्चूर्णयन् स्वसहोदराणां कंसकृतस्य उन्मूलनकर्मणः योग्यां प्रतिक्रियां प्रचक्रे। बलरामस्य हस्ततलघातेन नष्टं मुष्टिकं द्रष्टुं ह्रिया इव[2] चाणूरस्य शिरः पुरा एव चूर्णितं सत् रेजे। रामः "मे मुष्टिप्रहारस्य अयं मुष्टिकः लक्ष्यो न भवति" इति लक्षयन् अपार्थनामकं तं मुष्टितलघातेन जघान।[3]

"हे मद्भटाः, कृष्णं मन्नगरात्[4] तत्पक्षीयैः[5] समं बहिष्कुरुत। आशु नन्दं[6] मारयत। तं हीनं उग्रसेनं[7] भुवि मर्दयत।" – कंसेन इत्थमुदीरिते सति अखिलखलश्रेणीवनस्य उग्रानलः कृष्णः तस्य कंसस्य आज्ञाधरवत् सुजनस्तोमस्य अन्तकस्य कंसस्य अन्तिकं जगाम। तदा मदेन अन्धाः अन्ये चतुरङ्गिणीभिः चमूभिः एनं कृष्णं परिवव्रुः— पतङ्गाः ज्वलन्तं ज्वलनं यथा, यथा वा तमस्समूहः तरणिम्। तदा रणे पदाभ्यां चरतः स्वाभ्युदयप्रदस्य परस्य मुरारेः सेवां भुवि कर्तुकामः सः सहस्रनेत्रः ससूतं रथं कृष्णार्थं समादिशत्। अथो अतिविचित्ररत्नखचितः तारावृतः चन्द्रः इव स्थितः रथाग्र्यः मुकुन्दस्य सन्दर्शनेन विधूतपापं मुनिं[8] खलात् ऊर्ध्वलोकं नेतुमिव अवततार। सः इन्द्रः सहस्रनेत्रः अनिमिषाणां प्रभुः शतक्रतुः वज्रधरो हि लोके। यः हरेः

---

(1) राज्ञः यात्रादौ विघ्नपरिहाराय तदाश्रिताः मल्लाः नारिकेलफलानि चूर्णयन्ति।

(2) समानबलस्य मल्लस्य सलीलं तलघातमात्रेण वधं द्रष्टुं लज्जया इव

(3) मुष्टिः के शिरसि यस्य सः मुष्टिकः। बलभद्रमुष्टेः अलक्ष्यत्वात् अस्य शिरसः मुष्टिकः इति नाम अपार्थकम्।

(4) मन्नगरात् मम शरीराख्यनगरात्

(5) चक्षुराद्यभिमानिदेवैः

(6) भटाः नन्दं इत्यत्र भटानन्दं इति अभिप्रेतं भटानां आनन्दं।

(7) हीना उग्रा पूतनादिरूपा सेना यस्य सः हीनोग्रसेनः कंसः। एतान् अर्थान् अभिप्रेत्यैव कृष्णः तस्य आज्ञाधारवज्जगाम।

(8) कंसाविष्टं भृगुमुनिं

सुरावनी शतधात्वनुर्वी सपर्यां क्षणशः करोति । देवदेव कृष्णः इन्द्र प्रेषितं रथं समारुह्य हस्त्यश्वपदातिभि. पीनां सपत्नसेनां जघान । अपि च परितः स्थितानां आत्मीयानां मनोरथस्थः सन् तद्दुरिष्टसेनामपि जघान । सः शस्त्रास्त्रविदां रिपूणां कर-ऊरु-अंङ्घ्रि-शिरोधरादीन् शरैः चकर्त । तदा स्वयं कृष्णः कामिनीनां मुदा उन्मीलितलोचनान्ताख्यशरैः अता ड्यत । पुरा चिरं वैष्णवस्य इन्द्रस्य सेवनेन मुकुन्दस्य सामीप्यं फलं प्रपन्नः सः मातलिः इन्द्रस्य सूतः तस्य कृष्णस्य विचित्रवीर्यं निरीक्ष्य उभयथाऽपि रथे नेतृतया, कृष्णगुणस्तोतृतया च सूतः[1] अभूत् ।

गाढतमसे त कंस क्रमात् सम्प्रेषयिष्यन् कृष्णः प्राक् परिपोषयाय धात्री पूतनां, विलासाय पतग बकं, वातं तृणावर्तं च[2] तान् हतान् वत्स-अनः–वृषधेनुकादीन् दितिजान् तस्य कंसस्य भारवोढानिव मातुल कृते अश्वेभौ केशिकुवलयापीडौ रजकं मल्लांश्च सम्प्रेष्य तत्सेनां प्रेषयति स्म ।

सा युद्धरङ्गभूमि. युद्धे पृथिव्यां विस्तीर्णा. वरैः हारैः चामरैः सितच्छत्रै. एततादितवित्तैः क्वचित् सिता, त्रस्तैः कचैः असिभिः नील मणिभि. क्वचित् नीला, रक्तचयेन क्वचिद्रक्ता, हैमकवचाकल्पैः क्वचित् पीता असृक्सरिदोघमग्नकुणपा सा रङ्गभूमिः इति स्वनाम तदा अनुकूलं चक्रे ।

प्रभुः अच्युत. कोपाटोपस्य वशेन रक्तनयनं खड्गचर्मभ्यां उल्ल-सत्पाणि कंसं पापमिव[3] मूर्ध्निप्रगृह्य पृथ्वीमेत्य निपात्य विस्तृत कच त्रस्त अमतं कंस प्रेम्णा प्राञ्जलिः साधुसघनयनै. सानन्द आलोकितः सन् चकर्ष ।

अथ चक्षु.श्रोत्र–मुख–अक्षि पालनपरैः स्वीयै. सुरैः समेतः कृष्णः कंसस्य देहाभिघात् नगरात् बहिराजगाम । इष्टान् जनान् नष्टान्

(1) सूतोसारथिबन्दिनौ इति भास्कर ।
(2) राजानो हि पक्षिमन्दमारुतेन क्रीडन्ते ।
(3) पापपुरुषमिव ।

निरीक्ष्य, विमत कृष्ण अतिपुष्ट दृष्ट्वा कसभटानामानन्दोऽपि क्षयमेयिवान् । हीना उग्रसेना यस्य सः कसोऽपि खलः हतः । कंसः अन्तर्वृत गर्वपर्वतवर. पोतस्य कृष्णस्य हस्तघातेन आहतः मन् वक्त्रं दर्शयितु सुलज्जित इव उग्र अन्धतमः प्राप । 'द्वेषिणा कंसेन युक्त मां हरि करुणया अग्रहीत्' इति आश्राव्यभव्योत्सवः अन्यः जीव. कसाविष्टो भृगुः सुमहस्तोम श्रीरमणस्य धाम जगाम । सः कृष्णः कतिचित् चाणूरादीन् सञ्चूर्णिताङ्गान् कतिचित् छिन्नाङ्गसन्धीन् हत्वा, दोर्भ्यां परिरभ्य रुदन्त्या कंसपत्न्यः कसस्यकाय दर्शयिष्यन्निव, कसं तथा न जघान ।[1] यमिनां वृन्दस्य मनसः चन्द्रः[2] कृष्ण श्रमं परिहरन् इव अञ्जसा विमलीकर्तुं[3] यमुनाकूलमगमत् ।

रोम्णां हर्षणकारिणि श्रवणतः पापौघविध्वसिनि
प्रेम्णा चिन्तयतां विचित्रविमलश्लाघ्यार्थसन्दायिनि ।
सञ्जाते भुवि रुक्मिणीशविजये सद्वादिराजोदिते
सञ्जातः सुरमण्डलीषु महितः सर्गोऽयमेकादशः ॥

---

(1) मञ्चादध पतनवेगेनैव गतासु चकार ।

(2) तन्मनस्तापशान्तिकृत् कृष्णस्य श्रमाभावे हेतुरिदं विशेषणम् ।

(3) स्वपादस्पर्शेन यमुनामेव विमलीकर्तुम् ।

द्वादशः सर्गः

एव कसवधानन्तर प्रणतेषु वत्सल. मथुरापतिः कृष्ण मुदा सदसि उग्रसेन आहूय यदूनामधिप चक्रे। "कृष्ण[1] तव शास्त्रमेव मम राज्य, नियमा एव सेना, तितिक्षा अङ्गना। नित्य भक्तिविरक्तिदैन्य-शमन ज्ञानदीना लाभः एव धनम्। स्फुरच्चामरे मच्छोत्रान्तिकराङ्गते तव यशोधारे। छत्र मूर्ध्निकृत भवातपहर हस्तारविन्द तव। मम दुर्ग त्वत्क्षेत्रम्। वर्म आर्याणा करुणा। रथः त्वदघ्रिध्वजासक्तः मम मनोरथः अमन्दा हयाः छन्दांसि। सारथि प्राण. आयुध त्वदभिदा। जेयः शत्रुः कलि तद्भटाः कामक्रोधादयः षट्। तेषा नगरी संसृतिरपि जेया। अथो लभ्या विमुक्तिः पुरी। अब्जलोचन हरे, यथा त्व सतत पूर्णः साम्राज्य नेच्छसि, तथा त्वत्सेव्या पूर्णाः वयमपि साम्राज्य नेच्छामः शास्त्रविचारे विस्मृतधियः उदितप्रेमाश्रुधाराधराः पुलकाङ्किताङ्गाः ये भक्ताः श्रेयस्कर श्रीकर त्वा सेवन्ते, नाथ कृष्ण तेषा ऐहिकसम्पत् नास्ति इति अज्ञैः गीता कथा उन्मूलयितु यदि मे मदः न स्यात् त्वद्गदित साम्राज्यपालन करोमि। चक्रधरः उग्रसेन यदूना पति चक्रे किल यतः विश्वेश्वरस्य तस्य यदुमात्राधिपत्येन कि प्रयोजनम्। कसविध्वंसी सः कृष्ण. तन्मही तत्पित्रे ददौ। परार्थैकफलः साक्षात्पुराणपुरुषो ह्यसौ। हरिः सर्वे वयत्वदुक्तिकारिण. इति उग्रसेन अब्रवीत्। भक्तमात्रोक्तकर्तुः दयानिधेः तत् अपूर्व किम्? माधव. 'राजन् उग्रसेन, वय तवसेना मध्यगाः इत्याह। विश्वमध्यगत[2] स्यास्य सेनान्तः कि नु दूषणम्?

[3]कुब्जातन्वा. उज्जृम्भकः कृष्ण. मम सर्व वक्र अनुदिन अवक्र-यतु। मल्लाना लयकृत् सः अस्मद्रिपून् धुनोतु, कसस्य हिसाकरः बन्धक कान् बन्धून् वियोजयतु। माधुरः हरि अस्माक रम्या व्याख्यानादिधुर सन्दद्यात्। रङ्गस्थलीरञ्जक. अस्माक अन्तरङ्गविभव सन्दद्यात्।

(1) कृष्णदत्त लौकिक साम्राज्य अरोचमानस्य कृष्णप्रणतस्य उग्रसेनस्य उक्तिरियम्।
(2) अणुरेणु तृणकाष्ठपरिपूर्णस्य।
(3) उक्तकथानुवादपूर्वक स्वाभिष्टप्रार्थना।

Rarest Archiver

येन कृष्णेन मधुरा मधुरापुरी समभू-उज्झिता समभूत् । महता अहतार्थं प्रद स्मरतात त कृष्णं स्मरत । यस्या जल कृष्णस्य उदारै. विहारैः खण्डितमल मङ्गल यस्या स्थली तत्पादाम्बुजयो लक्ष्मभि लक्ष्य विभवा धन्यस्थली, यस्यां गेहानि नित्यं स्वभर्तुः स्थिते रमया कृत-स्पृहाणि शुभकरी सा मथुरापुरी अस्माक भूयासि श्रेयासि दद्यात् ।

अथ जगत्पित्रा कृष्णेन मृदुभाषणपूर्वक प्रणतौ तौ पितरौ देवकी वसुदेवौ चक्रिणि तस्मिन् ईश्वरे पुत्रबुद्धि न चक्रतुः । ईशः कृष्णः तौ पितरौ कसकृतात निगडात् विमुच्य स्मितवक्त्र प्रियं वदन् कृतस्नेहः मायामय निगड अयोजयत् । अथ धर्मपथस्य अध्यक्ष जगदेकाराट् कृष्णः जगदे– "योऽहं वृद्धयोः युवयो. पोषणादिक हितं न चकार सोऽहं केवल वार्तामात्रेण भवतो पुत्र " [1]इति एवमुक्तः वसुदेवः वक्ति–हे तात कृष्ण त्वया सर्वं पुत्रेण कर्तव्य कृतम् त्वया अस्मदीये अन्वये उदितम् । तेन इद यादवकुल तिलकोबभूव ।[2] मम कीर्तिश्च विस्तृता किल । येन त्वया अनेकखलान्, बलिन वशदुह कस च निहत्य दयया अयं शृङ्खला बन्धग्रन्थि व्ययोजि । तेन त्वया किंकि न कृतम् । अम्बा देवेकी तं कृष्णं परिरभ्य पुलकरसन्मालयेन तस्यार्चनं, नेत्रानन्दजलेन सिञ्चनं उरोजोद्यत्पयोधारया नैवेद्य, शोभन वीक्षणाख्य लसन्नीराजनच निवेद्य भाविन्या स्वीयमुक्तिलतिकाया बीज निज निर्ममे ।

यौ व्रजे अङ्गनाभि सम गृहस्थानां उचिताः रम्याः लीलाः प्रचक्रतु विधिना उपनीतौ तौ सुतौ रामकृष्णौ शूरसूनुः वसुदेवः उपवीतौ वितेने किल । कृष्णोपनयनमहस्य ईक्षणे उत्सुका धृतनियमाः आप्तकामाः मुनयः उत्तरत्र स्वेषा उपनयनादिनिदानं जनिं परिहर्तुमिव समेताः सन्तः सर्वत. उपययु किल । कृष्णोपनयनकाले वाद्यानि मन्त्रान् उच्चारयन्त मुनयश्च बन्दिवृन्दै सहनेदु । नाकिलोके वृन्दारकाणा

---

(1) वस्तुतः नाह पुत्र इति हृदयम् ।
(2) यादव श्रीकृष्ण इति कुलस्य कृष्णनाम्नासह पठ्यमानत्वात् सर्व लोकविभूषणं बभूव ।

Rarest Archiver

स्तुतयश्च गन्धर्वगीतै सहनेदु । रागयुता समस्ता नार्यः नयनोत्सव तं मुकुन्द रक्ताक्षतै अवाकिरन् । तत्परिरम्भणोत्का कुब्जा ध्रुव दुरन्तां चिन्तां आप । अम्बाया देवक्या पितु वसुदेवस्य अञ्चतां सतां च सत्प्रेमद मोपम् तयो रामकृष्णयोः गले सम्बद्ध विशद् त्रिगुणित यज्ञोपवीत प्रत्येक बहुगुणवद्भिः तस्य हरेः विलसद्भिः ज्ञानानन्दादिगुणै अन्तर्गरिष्ट स्तोतृस्तव्यतया[1] तयोः रामकृष्णयो. आश्रययुत स्वच्छ श्रुतीनां त्रयमिव रेजे ।

"इह भुवि लोक विडम्बयितुमेव उपनीत असौ हरि मम अप्रत्याना[2] वाञ्छा सत्यां करिष्यति" इति भावेन प्रहृष्टहृदिव विशङ्कः उपनयनमण्टपस्थ अग्नि. यज्ववराणां मन्त्रहुतैः हविर्भिः जज्वाल । गर्गाचार्य सकलविदे पुराणपुंसे गायत्रीमन्त्र अदिशत् । असौ गर्गाचार्यः तद्गुरुदेशव्याजात् तद्गुणचिन्तकाय मह्य दयया सद्बुद्धि प्रदिश इति कृष्ण ययाचे । इत्थ मम ऊहः ।

श्रौतपथस्थितः अय कृष्ण. इतः पर गोपालकानां बाललीलां न याति इतीव वसुदेव दक्षिणाभि. सह सुभगाः गाः मुदा मुनिभ्यः ददौ । यज्ञोपवीतेन उज्ज्वलकण्टदेशः कृष्णाजिनश्रीः मुनिसङ्घैर्मान्यः प्राणप्रणेता[3] धृततर्कमुद्रः सः कृष्ण. ध्यायन् गायत्रीमन्त्र व्यास इव अभूत् । असौ उपनीतः कृष्णः दिने दिने अग्नौ समिधः जुहाव । तथा श्रुतीना जननीं गायत्री जजाप । स्वकुक्षिपूर्तौ निजानुभावस्य स्मरणोत्सवे च कस्य हि न रतिः ?[4]

---

(1) स्तोतृतयाशेषात्मक बलरामाश्रितं स्तव्यतया प्रतिपाद्यतया कृष्णाश्रययुतम् ।

(2) अर्चिर्नाम्ना कुमाराणा कृष्णाख्यपतिकाङ्क्षया कन्यात्वे तपसा गताना अग्निकुमाराणा षोडशसहस्त्राणा

(3) प्राणायामपर, व्यासपक्षे प्राणापररूपस्य श्रीमध्वाचार्यस्य प्रणेता व्याख्याता ।

(4) अग्नौ क्रियमाणहोमस्य भोक्ता कृष्णः एवं गायत्री च कृष्णमहात्म प्रतिपादिका ।

Rarest Archiver

आर्या ब्रह्मचर्यव्रतधुर्यं तं कृष्णं सन्दृश्य हृष्टा । परन्तु कृष्णवक्षःस्थलस्था अब्धिपुत्री त्रपया आकुला आसीत् । अपि च अभ्यर्थ्यमानौ दिनेशवन्ही च त्रपया आकुलौ आस्ताम् ।

"अतः परं भवान् इद भवारण्य चिदग्नौ निर्दहतात्" इतीव सर्वं विदग्रगण्यौ तौ रामकृष्णौ गुरवे समिधः समर्प्य गुरोर्गृह[1] (गुरुकुलं) उपेयतु । अथो स धीमान् कृष्णः बलश्च चतुष्षष्टिकला चतुष्षष्टिदिनै प्रजग्रहतु । यस्मात् तत. अपि अल्पदिनै आसां कलानां सकृत् समुच्चारण मपि गुरोः सान्दीपिन अशक्य आसीत् ।

ततो विद्याभ्यासानन्तर गुरवे उपायन दिशन् कृष्ण. गुरु सान्दीपिन किं देयमिति अपृच्छत् । मुरारे. सदयावलोकनै विमलीकृतान्वय स गुरुः पुरा मृतमपि बालक मुरारे सदयावलोकनै. अवद्यात् परिपाल यन्निव सुतं ययाचे । सः कृष्णः गुरोः सुत मृत्युना नीत विजानन् अपि शङ्खदैत्यं पञ्चजन विनिहन्तुकामः समुद्रमासाद्य रक्ष शङ्खदैत्य निहत्य लसद्यश सम्मित पाञ्चजन्यशङ्खं आप । स कृष्ण पञ्चजनाख्यासुरस्य देहस्थान् पञ्चप्राणान् तद्देहत. बहिर्निष्कास्य तेन दैत्येन साक पयोनिधि अपञ्चजन[2] आतेने । विभु स. कृष्णः यमालय प्राप्यउद्घृत रिपुदर्पहारिण त पाञ्चजन्यकम्बु "मम गुरो सान्दीपिनः सुत देहि । न चेत् यम, तवापि इयं दशा[3] भवेत्" इति निदर्शयन्निव प्रदध्मौ । "ईश कृष्ण, लक्ष्मीशस्य तव गुरोः सुतस्य अमुष्य मुक्ति करगताऽभूत् ध्रुवम् । त्वदागमनात् पूर्वमपि त जिहासु मां विभु त्व किंकारणमाज्ञापयसि ?" इति बुद्ध्या इव तद्गुरुपुत्रस्य त्यागे निःशङ्कमानस., अलभ्येन कृष्णदर्शनेन सञ्जातसम्भ्रम, प्रहृष्टरोमा, मुहुः मुहुः कृष्ण प्रणमन् यम. त समभ्यर्च्य सुत समादिशत् । तत शौरिः अन्तकान्तिकात् गुरु-

(1) सान्दीपन गृहम् ।

(2) न विद्यते पञ्चजन पञ्चजनाख्यासुर यस्मिन स पयोनिधि न विन्द्यन्ते पञ्च जना पञ्चसख्याका प्राणादय यस्मिन् स दैत्यः ।

(3) वैरिणं हत्वा तदङ्गात् अस्थ्युद्धरणरूपावस्था ।

Rarest Archiver

सुत समानीय गुरवे प्रदाय स्वकां मथुरापुरीउपेत्य पित्रोः देवकीवसुदेवयोः अपि दक्षिणामिव निज स्वविग्रह, प्रदर्शयामास ।

राजराजपदस्यापि त्राता रमापति यत्र राजा भोज-वृष्टि-अन्धकं आश्रिता सा राजधानी मथुरापुरी, जयति । यस्य द्वजिन्यां द्विषा उग्रा. बलरामादय. अग्रेसरा., स्वर्गिभि गीतवैभव. स उग्रसेनः विजयते ।

मन्त्रिमन्त्रप्रकार वर्णनम्

राजनीतेः हृदयज्ञा मन्त्रतन्त्रज्ञा. मन्त्रिण शाङ्र्गधन्वनः सभायां अन्वह इत्थ मन्त्रयन्ति ।– "यस्य राज्ञः आज्ञाख्यशरशङ्ड किंचित्ताः भटाः रणे परावृत्य न लक्षयन्ति, जयाङ्गनां वा दिविजाङ्गनां वा स्पृशन्ति स एव राजा विजयी ।[1] य. चारेण रिपो. विचार वेत्ति, य. सदा रणोपस्करण युनक्ति य शत्रुभिः परिखादिना अगम्यभूमि स एव राजा विजयी न चान्यः । य स्वससदि प्रौढजनेषु[2] मन्त्रिवरेषु नीत्यागमस्य तत्त्ववित्सु च कार्याकार्य विचार्य द्विषतां मिथो विभेद कुर्यात् स. भूपः सुखभाक् । हे राजेन्द्र, उग्रसेन, यात्रादौ उत्साहेन सङ्गता नीतिः नरवरस्य उचितौ कीर्तिप्रतापौ सूते ।[3] तत्र नीत्या आलस्यं प्रतीपकृत ।[4] सामादिचतुरुपायानां अवसरज्ञानशून्यस्य राज्ञ. शूरता आम्नायार्थानां अपरिस्फूर्तेः वादिन सामर्थ्यमिव । य अज्ञानी सन्धिमुख्यायां अमल नीते. प्रयोगकाल अविज्ञाय रण विधत्ते स ससत्सु षण्णिग्रहाणां समया-

(1) राज्ञ प्रभुशक्तिरावश्यकीतिभाव ।

(2) पुरातनवृत्तान्तज्ञेषु ।

(3) पुरुषखसङ्गतस्त्रीवत् उत्साहसङ्गता नीति फलति । उत्साहशब्दस्य पुल्लिङ्गत्वात् नीतिशब्दस्य स्त्रीलिङ्गत्वात् तयो साम्यम् । तथा कीर्तिशब्दस्य स्त्रीलिङ्गत्वात् प्रतापशब्दस्य पुल्लिङ्त्वात्, तयो कुमारीकुमारसाम्यम् ।

(4) क्लीबसङ्गतस्त्रीवत् न फलति । आलस्यशब्दस्य नपुंसकलिङ्गत्वात्तत्साम्यम् ।

नभिज्ञवादीव अकीर्तिं याति । यः क्षितोश नानाप्रकारै दशदिक्षु शत्रून् जेतु नैव यतते असौ अवशीभूतदशेन्द्रियौघ इतीव कदापि सुखभाक् न भवति । यस्य राज्ञ सैन्यस्य कुन्ता शार्दूलदन्ता इव स्वसपत्नानां चिन्ता साधयन्ति स्वतन्त्री तदीयदष्ट्रा इव स्वराष्ट्रस्य सन्तोषमपि साधयन्ति स: अवनीशः । हे राजन् तव बाण त्वया मुक्तोऽपि दिशिदिशि तव अरीन् निहन्ति । गुणिसङ्गस्य वशस्य आर्जवस्य फल हि तत् । दुष्कराज्ञ य राजा दिवसेदिनेशप्रख्य सन् पान्थान् तस्करेभ्य अवति, रजन्या च रजनीशकल्प सन् समन्तन् पान्थान् तस्करेभ्योऽवति स एव राजा कीर्त्या दिशां उपान्त एति । यः नृपति व्यवहारपदेषु न्याय सगृह्य अन्याय सन्त्यजेत् त नृपति पदेपदे अन्याय [1] सन्नम्य अभ्यर्थयिष्यते[2] । दिने दिनेशप्रख्य रात्रौ रात्रीशसन्निभ प्रजाः कापथेभ्यः रुन्धे स राजा स विशां इन [3] । प्रायेण धनवानेव क्लेशवानपि जायते । फलवान् तरुरेव कण्टकैरुपरुध्यते हि । यः राजा काले काले अर्थिभ्य नून हि धन वितरेत् स सर्वदु खेभ्य मुच्यते- द्रुम कण्टकेभ्य इव । य. प्रत्यह वित्तै कीर्ति शरै शौर्यं समार्जयेत् स एव सम्राट् धनवान् । अन्य अकिञ्चन मन्ये । य भूपः अर्थिभ्यः अर्थ अनादिश्य तत् क्षितौ निक्षिपति, स स्वयोग्या मृत्स्नां आदाय वित्त भूम्यै प्रदत्तवान् । यस्य राज्ञ सर्वज्ञे अमला भक्तिः नैव, एतदाज्ञात्मके धर्मे वा न रति तदाश्रितजने सन्मानलेशोऽपि वा न, तस्य निष्ठुरगिर दुर्मन्त्रदत्तश्रुतेः साम्राज्यं निजवशपांसनकृते कंसस्य संसारवत् भवति । विष्णुभक्तिरतं भूपं विष्णुप्रिया लक्ष्मी नैव त्यक्ष्यति । पतिव्रता सा तद्द्वेषिणि स्थातु न उत्सहेत । धर्मद्वितीय नृपति अन्य धर्मं (यमधर्मं) नैव पीडयेत् । अन्यथा अप्रतिमल्ल असौ यमधर्मः सान्वय राजान संहरिष्यति । यस्तु राजा विष्णो अर्भकसङ्काशान् वैष्णवान् निन्दति । तस्मिन्नपि

(1) अन्येभ्य पौरजानपदेभ्य. आय द्रव्यप्राप्ति अन्याय ।

(2) यथा राज्ञा परित्यक्त पुरुष मा परिपालयेति त अभ्यर्थयिष्यते तथा परित्यक्त 'अन्याय' राजान अभ्यर्थयिष्यते ।

(3) चन्द्रसूर्यसाम्यात् चन्द्रसूर्यवाचकौ राज-इन शब्दौ अस्याप्युचितौ ।

राज्ञि श्री. न स्थिरा भवति– पुत्रद्वेषिणि मातृवत् । दुष्टप्रीतिरत भूप क्रमात् दोषोऽपि स्पृशति । विनयादिगुणलुब्धा श्री.दोषिण नाश्रयेदिति मे मति । इन्दिरा कठोरगिर नृपमुत्सृज्य अपर मृदुवचन वृणोति– तटित् उग्रस्तनितात् पूर्वमेव घन विहाय दिश इव । सन्मन्त्रक्षीर्णः दुर्मन्त्र प्रयोक्तार क्षिणोति यथा नृसिह मन्त्राख्य सूर्यस्य अग्रे भैरव मन्त्र कैरवद्युति भवति । य राजान प्रजा न प्रशसन्ति, यश्च अर्थिभिः न स्तुत. विषयसक्त कुमते. तस्य भूपते सुख नास्ति । यो लुब्धो राजा प्रजानां पीडन कृत्वा धन-मार्जयेत् स. राजा स्वसुतानेव विक्रीय वसु सञ्चिनुते वै । प्रजानां धर्मत. परिपालनेन रञ्जनकृन्नृप प्रजापरम्परामेति[1] । पीडिता सा प्रजा सनाम्नी (प्रजां) तस्य राज्ञ. कुले नोत्पादयति[2] । अपूजित अतिथि अपार्थकं स्वीय अतिथित्व तस्य अपूजकस्य तिथ्या अपूज्यत्व अर्पयन्निव समर्पयति । स्रक् चन्दनादिविषयेषु उपभुक्तेषु सत्सु अस्य उपभुक्तस्य विषयस्य तृतीयांश एव उपभोक्तु' जीर्यते । शिष्ट तु विषसारूप्यात्[3] कष्टाय परिकल्पते । इत्यादिकया अमात्य वर्गोक्तनीत्या पृथ्वी पालयन् मुकुन्दे भक्ति बिभ्राण. स. उग्रसेनः विषयस्पृहा तत्याज ।

रोम्णा हर्षणकारिणि श्रवणत. पापौघविध्वसिनि ।
प्रेम्णा चिन्तयता विचित्रविमलश्लाघ्यार्थमन्दायिनि ।
सञ्जाते भुवि रुक्मिणीशविजये सद्वादिराजोदिते
सञ्जातः सुरमण्डलीषु महित सर्गो मुदां द्वादश ॥

---

(1) पुत्रपौत्रादिवृद्धिम् ।

(2) निष्कासितः याचकः याचकान्तर निवारयति तथा पीडिता प्रजा प्रजान्तरं निवर्तयति ।

(3) विषय इत्यत्र तृतीयांश' यकार । तदवशिष्ट 'विष' सारूप्य भजते ।

Rarest Archive

त्रयोदशः सर्गः

अथ व्रजेश्वरः कृष्ण स्वस्य इमा रम्या ब्रह्मचर्यस्थिति निशम्य निजागमस्य आशया धृतजीवनाना व्रजाङ्गनानां, स्वसूनुताशाया अपगमाच्च[1] पित्रो यशोदानन्दयो च हृदि खेदशङ्की सन् आत्मन. वियोग वन्हेः सकाशात् प्रतप्त स्ववर्ग सुखार्थसन्देशसुधाप्रवाहै उज्जीवयितु स्वकीय उद्धव "व्रज व्रज" इत्यादिशत् । सञ्चोद्धवः प्रियस्य कृष्णस्य वियोगेन समुत्थ साध्वम तदीयै. सन्देशवरै विदूरयन्[2] मधुद्विषः अदः प्रपन्नवात्सल्य स्मरन्, वर्त्मनि श्रम विस्मरन् ययौ ।

अथ निशामुखे स: उद्धवः ईशितु कृष्णस्य व्रज प्रविशन् परिस्फुरद्वेणुना क्रियमाणसङ्गीतविनोदेन वेदितस्वभर्तृ (कृष्ण) लीलारसैः गोपबालकै. मण्डित गवा निकुरम्ब ददर्श । तदा अध्वनि उत्क्षिप्तपुच्छं उदितात्परवेण अभिराम, धावनविलासेन कम्पिताङ्ग वत्स वीक्ष्य अनुधावनपरा गौः कृष्ण. स्ववर्ग अहमिव अन्वेतु इति उद्धवाय वक्ति स्म । गोधूलि-धूसर-मनोज्ञ-शरीरकान्तीन् करसङ्गतवेणुशृङ्गान् गोपान्निरीक्ष्य कृष्णस्य शैशवविलास अनुस्मरन् स उद्धव मोदाम्बुना पूर्ण नयनः पुलकै अङ्कितश्च अभूत् । कृष्णेन भुक्तवरभूषण-वस्त्रमाल्यधर कृष्णभृत्य उद्धव निरीक्ष्य ताः गावः निजनाथाधिया इव उन्नम्रकन्धर उदीरितकर्णयुग्मं पश्यन्त्य उद्धवस्य मनस अभ्युदय वितेनुः । स्ववर्गे प्रीतमनाः अरविन्दनेत्रः य निज उद्धव व्रज प्रति दिदेश सः कृष्णेन आज्ञप्त उद्धवोऽपि दूरात् स्वद्रष्टृणा विलोचनेषु उद्धवमेव[3] निवेशयन् व्रज विवेश ।

गृहे गृहे कृष्णकथामृतेन आतत, तदर्चनाय आहृतेन धूपेन वासित, तदर्पितै. स्रगम्बरालङ्कृतिचन्दनादिभि विभूषितस्त्रीपुरुष, हरेर्नाम गृणद्भि शुकै तद्गुणरवानुवादिभि पिकैश्च हरिकिङ्करप्रभै मुकुन्द

(1) वसुदेवेन उपनीते कृष्णे स्वपुत्रोऽयमिनि आशायाः अपगम
(2) आकाशवद्व्याप्तेन मया सह विरहो न घटते इति सन्देश ।
(3) उत्सवमेव ।

पादाम्बुजवत् शोभिनि नीरजे स्थिरै. द्विरेफैश्च आवृत, सदा मुकुन्दागमनस्य अभिशङ्कया सपूर्णै. कुम्भ. शुभै तोरणध्वजैश्च अलङ्कृतद्वारचय, फलैच्चयै विचित्ररङ्गावलिभिश्च रञ्जित, अन्वहम् मुकुन्दस्य वीक्षाफल काम्यया त्रिकाल चीर्णद्विजदेवतार्चनैः तदीयलीलामृतपूर्णाभिः सत्कथाभि धृतासुभि लोकै सङ्कुल गोकुल उद्धव प्राप। सहसा ततः उद्धवः नन्दस्य सदन विवेश । अन्येषामपि चेत सु पर उद्धव न्ययुङ्क्त ।

सः नन्दगोपः स्वनन्दनस्य कृष्णस्य अघ्र्यम्बुजयोः लुब्धभृङ्ग त उद्धव अर्चयामास तथाहि । लक्ष्मीशपदैकभक्ता तदन्यत् तदीयबुद्धया अर्चन्ति । नन्दगोप उद्धवेन आत्मनि वर्ण्यमाना हरेः कृपां निशम्य जायया सह प्रहृष्टरोमा प्रतिरुद्धकण्ठ. प्रहर्षवारिणा अङ्कितलोलनेत्रः अभूत् । "यस्य मुखे विजृम्भिते सति सती इय यशोदा आत्मान इद जगच्च अपश्यत् अमुना कृष्णेन वियोगवार्ता उत्सृजध्व, पर परब्रह्मधिया भजध्वम् ।" इत्थ नन्द प्रति उद्धव अवदत् । स उद्धव नन्द आनन्द निधि विधाय सुदुष्करै उग्रै व्रतैः कर्षिताङ्गानां मुनीनां आश्रमसम्मितानि गोपीजनाना मन्दिराणि प्रति जगाम ।

काचित् मुकुन्देन सहैव शय्यां प्राप्तु अघ शयनव्रतस्था बत । घन्या अन्या तज्जुष्टताम्बूलफलाय ताम्बूलरुचि तत्याज किल । एका तद्भुक्तशेषे ओदने लुब्धचित्ता सती नित्य अनशनव्रतस्था किल । दीना कापि गोपी स्वस्थाऽपि स्वप्नेऽपि तत्सङ्ग आप्तुकामा इव शेते । हरि कान्त तत्प्रभव कुमार तज्जुष्टगेह गृह ऊहमाना काचन तन्वी पत्युःपूजा न वितनोति, पुत्ररक्षा न वितनोति नापि गृहकृत्य वितनोति । रतावसाने मुरजित्करेण निबद्ध उज्झितकेशबन्धा तदा एव तत्सहितभूषणेच्छा कापि बाला भूषण न बिभर्ति । अन्याः दिनेदिने स्वधामवृन्दावनं[1] प्रदक्षिणीकृत्य विकस्वराणां क्ष्मारुहाणां पुञ्जेन मुञ्जुनि मुकुन्दवृन्दावने रासलीला अर्थयन्ते । कापि गोपी प्रियेण कृष्णेन सार्धं रम्यां गोष्ठी

---

(1) स्वगृहस्थित तुलसीबृन्दावनम् । वृन्दावन प्रदक्षिणीकृत्य प्रदक्षिणाकारा रासलीला बृन्दावने प्रार्थयन्ते ।

Rarest Archiver

अकुर्वता वचसा किं फलमिति दीना सती निजैर्बन्धुभिः जनन्या जनकेन च साकं किञ्चन न भाषते। काचित् इन्दीवराक्षी निजाङ्गं दहतः विश्लेषवन्हे वृद्धिं विदध्यात् इति चिन्तया इव चन्दनरम्यगन्धिं मन्दानिलं न सहते। "एतावत्कालं मुकुन्दस्य आगमनं वदन्ती सेयं सखी अन्यं विषयं वदतीति उत्थिततीव्रतापा सती अन्या बाला आल्या प्रियं आलापं अपार्थं आलोच्य न हि शुश्रुवे। अन्या गोपी कृष्णाङ्गसङ्गिवरवैष्णववर्गयोग्यं तन्मलयजं अमलचूर्णं दोर्भ्यां कृष्णं परिरभ्य स्वाङ्गे धर्तुं भिया इव कर्पूर-कुङ्कुम लसन्मृगनाभिभिः शोभितं श्रीगन्धचूर्णं नेच्छति अहो! कृष्णस्य उक्तिषु, सन्मुखे, मृदुस्वरे, कुन्तले, अङ्गसौरभ्ये सङ्गतसमस्तवृत्तिः कापि गोपी कीर, इन्दु, कोकिल, मधुव्रतमान्यगन्धं पुष्पाणि च हृदं न विषयीकरोति।

कृष्णाङ्घ्रिभृङ्गं तं उद्धवं वीक्ष्य लज्जाक्लेशवशगता सत्यः गोप्यः उद्धवं तथा अग्रतः स्थितं अन्यं भृङ्गं च लक्षीकृत्य श्लिष्टोक्त्या ऊचुः-

हे मधुप[1] त्वं अस्मदग्रे कस्माच्चरसि? नूनं अग्र्यद्विरदवरद-मूर्धा[2] रोहयोग्योऽसि। अस्मदङ्गं निर्दहति इह विषमविरहवन्हौ पतितुं इच्छसि किम्? अज्ञ दूरे प्रयाहि। हे भृङ्ग त्वं सुमनसां सदसि[3] अलं प्रौढिं आदर्शय। विधुरविविध[4] योषितां तापं किंकारणमापादये? आर्याः सख्य! यत् अयं वसतिपुत्रामित्रवार्तया उज्झितानां नः पुरस्तात् वसति इयं अस्माकं ग्रहगतिः। हे सखि कामिनीनां कामदः[5] सोऽयं वरुणदिशि गतोऽपि बलभेत्तुर्दिशि स्वैरं उद्याति। हरिपदकृतवृत्तिः धीरः गुरु-

(1) मधुकुलोत्पन्नत्वात मधून् पाति रक्षति इति मधुपः उद्धवः।

(2) भृङ्गपक्षे अग्र्यद्विरदस्य वरद सन्तोषद यः मूर्धा तदारोहयोग्योऽसि उद्धवपक्षे तवस्वामी कृष्ण, महाप्रभुर्जात अत त्वं गजमारुह्यसञ्चर।

(3) उद्धवपक्षे— सुमनसां देवानां सदसि उद्धवस्य बृहस्पतित्वाद् देवैर्मान्य त्वम्।

(4) विधु-रवि-विध चन्द्रसूर्य जातीय, बृहस्पते नवग्रहान्तर्गतत्वात्।

(5) उद्धवपक्षे कृष्णविषयककामोद्बोधकोऽयम्।

Rarest Archiver

शिव कर्णोपान्तमभ्येत्य गीत[1] श्रावयस्यैव । हे गगनचर[2] अस्मत्सन्निधौ ते कि कृत्य अस्ति ? अस्मद्व्रजस्य दूर हरिपद उपयाया. । नन्दसूनो· वक्रया अलकाल्या समरुचि त्वा इह कथ सम्भजाम । कथ वा त्यजामः कथय । हे मधुप त्वदीय. असौ माधव.[3] वनभवनगतानां अस्माक कतिपयदिनमध्ये स्वरूप दर्शयित्वा पुन हन्त ईक्षा न दिशति । हे चपल तस्य अनुवर्ती त्व अपि तादृक् । तदस्मासु मैत्र्या किम् ? अयि सखि, स्वैरं अस्मत्पुरस्तात् चरत अस्य सहकारी मरुत्[4] अपि अस्य अग्रचर्यवित साधयति । अभिमुख, अनुपार्श्वं विष्वक् ऊर्ध्व तथाऽधः चरणचतुरशील: एष वीरान्[5] शिक्षयेत् । हे प्रियनिनद अमल सुरपतिरपि एतद्गान निशम्य महिष्या शच्याः समं त्वां विलोक्य मानयिष्यति, नून शिष्यवत् त्वद्वश. स्यात् । इदानी अस्मदग्रे गायतोऽपि तव किं फलम् ? हे मधुकर त्व माधवे पक्षपाती असि इति विद्म । यतः कुजरविजयि चापे तस्य[6] जीवायितोऽसि । विवश[7] विविधरसविलासश्रेणिविश्राणनज्ञं तं नः समीपे वसन्त विरचय ।"

अथ उद्धवः वितन्यमानस्वप्रेष्ठवियोगार्ती. गोपीः प्रियोक्तिभिः प्रीणयित्वा कृष्णसन्निधिं प्रययौ ।

अथ कसे बलैः सह मृते सति अवशिष्टा अत एव अस्तिनाम्नी आर्ता सा स्वमातु. वशमपि तादृश कृत्वा अस्ति इति निजाभिधानं

(1) कृष्णसन्देशरूप ।

(2) आकाशचर भृङ्ग विष्णुपादभक्त उद्धव गुरुग्रहत्वेन आकाशाश्रितः ।

(3) वसन्तः, कृष्ण ।

(4) उद्धवान्तर्गत मुख्यप्राण ।

(5) अर्जुनादीन् द्रोणाचार्यरूपेण ।

(6) उद्धवपक्षे–कु–ज–रवि–जयि–चाप–इतवस्य कौ (भूमौ) जातस्य रवे. (कर्णस्य) जयिना चापेन इतस्य मुक्तस्य अर्जुनस्य द्रोणरूपेण जीवायित असि । भृङ्गपक्षे– कुजर–विजयि–चापे तस्य कुत्सितजराणा यूना विजयिनः मन्मथस्य चापस्य जीवायितोऽसि ।

(7) वे पक्षिण गरुडस्य वशं विवश कृष्ण । भृङ्ग शुकादिपक्षिवशः ।

Rarest Archive

उचित विदधनोइव अच्युतस्य स्वभर्तृवधरूप कृत्य पित्रे जरासन्धाय न्यवेदयत् । साधित सैन्यसिन्धु. मदान्धबुद्धि. स मागध अनेकदेशाश्रित भूमिभारहरस्य अच्युतस्य सारथ्यकृत् मधुरां जगाम । स. जरासन्ध: अमु चमू जामातु. कसस्य परा तस्मै प्रेषयितु धिया इव गगन स्पृशद्भि: गजै: रथौवै भासुरभूषणौघैर्भटै हयै सह मधुरां प्रति जगाम ।

वादिन. कुतर्कै आद्या उपनिषद्विद्या इव ते जरासन्धभटा: भगवत्पुरी मधुरा कुन्तै कुठारै कुद्दालै च बभञ्जु । प्रतिभयाना वर शक्त्याद्यायुधानां ऊर्जिताधारयुक्ता खलमतिहृतचित्ता दूष्यदुर्मन्त्रदृप्ता: जरासन्धभटा उपवेदप्राय उपवन उन्मूलयन्त सुकृतसम उदार द्वार आरात् बभञ्जु ।

समयिन [1] गतभया क्रुद्धा खला. दमता. युक्त्या आत्मपक्षे[2] अञ्जसा ऐक्य[3] कृत्वा तां[4] निश्चलार्थनिकरै [5] सह बाध्यां[6] अन्त. निर्गुणागारा[7] कृष्णन समुज्झिता विधातु यत्न[8] अपि वितेनु: किल । अहो दुर्भाष्यपुञ्जैरपि समयोजयन् ।[9]

तदध्यायपादसख्योज्ज्वलै अमलै चतुर्भि अध्यायै. सहिता अत्यूर्जितां सुवर्णखचितां भास्वत्सूत्रचमू उपनिषदां रक्षार्थं व्यास इव प्रभु कृष्णः सुवणखचितां स्वचमू चतुर्धा कृत्वा तत्रचतुर अग्रचान् निधाय नगरीरक्षार्थ अदिशत् ।

---

(1) एव कुर्म इति सङ्केतवन्त । अत पर कृष्णजरासन्धयोर्युद्ध तत्ववादि मायावादि वादसाम्येन वर्ण्यते ।

(2) उपनिषद्विद्या, मधुरापुरी ।

(3) मायावादिपक्षे अर्था । जीवपरमात्मरूपचेनपक्षे ।

(4) अद्वैतम् ।

(5) प्रमाणसिद्धै पञ्चभेदादिअर्थै सह ।

(6) मिथ्याभूताम् (शब्दत अर्थतश्च)

(7) भित्तिखचित पद्मरागादिपातनेन शोभारूपगुणरहिताम् । निर्गुणस्य ब्रह्मण. आगार यस्यताम ।

(8) शबलब्रह्मरूपे कृष्णे तात्पर्यरहिता विधातु यत्नबितेनु ।

(9) पुरी भिन्धि, छिन्धि दह इत्यादि दुर्वाक्यसमूहै ।

चतुर्भि. निगमै सम्बद्ध. मनोभिमानिना खगेन्द्रेण आवृत विष्णोर्धाम तदग्निकेतुनिलयः ब्रह्मसूत्राणा पुष्टिप्रद मध्वस्य मनोरथ. इव विख्याताश्वचतुष्टय ध्वजाग्रस्थाने पक्षीन्द्रस्य आयतन. परस्यकृष्णस्य वसति , विभ्राजमानध्वन: वृष्णीना प्रमोदप्रद. रथ तदा वैकुण्ठादभ्यागात् किल । युद्धकाले तदा, वादनिविष्टस्य मध्वस्य वाँचःसमा कौमोदकी गदा, समम्तागमगानकर्तु: गुरो मध्वस्य मञ्जुनिनादकण्ठकान्ति. पाञ्चजन्याख्य कम्बुश्च धरण्या प्रादुरभूत् ।

व्यक्तै अभेद्यै सहस्रवक्त्रै रुचिर नित्य मुरारे: प्रिय, मुक्तिद्वार अहीशमुख्यविबुधैर्गीत तमिस्रापह दैत्यध्वसि दिनकरोद्रिक्त दिगन्ता तत मध्वसुदर्शनप्रतिकृति प्रोज्ज्वल कृष्णस्य सुदर्शनचक्र पृथ्व्यां प्रादृश्यत । कृष्णश्रेष्ठेचसमर्थनेऽतिचतुरै तद्भिन्नलोके भिदां नित्य साधयितु क्षमै: मतिमाता अपि अच्छेद्यहृद्यात्मभि विख्यातै: शरसञ्चयै सुरुचिरं भास्वन्मानसहस्रभाष्यसदनुव्याख्यानकल्प निषङ्गद्वय तदा प्राप्तम् । सद्वंशजात सुगुण मुकुन्दहस्ताम्बुजाधार अन्यै अभेद्य मानोपमं नेषुभि: अन्यजिष्णु सतां वृन्द इव शार्ङ्ग आवीरासीत् । असौ कृष्ण भवतौघस्य नन्दक युधि द्विड्वर्गस्य दैन्यकर नन्दक सृज्ञित असि उद्धतशत्रुविध्वसन स्वजनहर्षकर सद्वादिना समय इव उररीचकार ।

[1] श्रुत्यन्त विश्रान्ताना शरौघानां युक्तौ (सयोजने) शूरा हरे पक्षधरा: अत्यूर्जित पूर्वे वर्तमान शत्रुपक्ष जघ्नु । मुरान्तकस्य मुख्यवात [2] सञ्जातशखमधुरश्रुतिरम्यशब्दै आप्यायिता. हरेभंटा. समरे शत्रून् निहत्य ता पुरी परित मुकुन्दगुणवर्णनेन शोभमानां चक्रु ।

---

(1) तत्त्ववादिपक्षे, श्रुत्यन्तविश्रान्तै वेदान्तसम्बद्धै: शरौघवत्कठिणै युक्तिभि शूरा वैष्णवा अत्यूर्जित मायाविना पूर्वपक्ष (जगत्सत्यं भेदः सत्य इत्यादि) सिद्धान्त विधाय अन्ते उत्तरपक्ष मायावादि सिद्धान्त जघ्नु ।

(2) मुखवायु मुख्यप्राण तदवतार मध्वाचार्यस्य शखध्वनिवत् । श्रुतिरम्यै शब्दै. ।

Rarest Archiver

कृष्णाङ्गसङ्ग्युज्ज्वलशाङ्र्गजन्मा[1] सत्पक्षपातेन[2] गृहीतवेग· असौ बाण एक अपि नानावदनै· समन्तात् युध्यन् मध्व. इव अस्ति। अय·स्थिराप्त्या[3] अरिभटै. असह्य सुवर्णशोभी शुभवशजन्मा दिगष्टक व्याप्ततनु बाण. आजौ समन्तात् मायाविनां निकामं जिगाय। आजौ नत्युद्यतानां नयवाक्यभाजां न्यस्तायुधानां निकुरम्ब हित्वा उद्धतानेव जयन् स बाणः पूर्णमत्याह्वयार्हाचरण बिभर्ति। पृथ्वीभुजां हृन्मध्यालयत निर्गततनुः सः बाणः अच्युतप्रेक्षावाप्तमहोदय क्षितौ पवनवद् विख्यातवेगः सच्छास्त्रोदित कृष्णविक्रमचय विख्यापयन् स्वर्गिणां सुप्रीति जनयन् मुरान्तकचमू पुष्णन् द्विष अजैषीत्। अरिधृतैः शस्त्रैः अस्त्रगणैः शरैश्च कृष्णे वेधं विभेदं छिदा च स्वागमकौशलै. परिहरन् स्वानन्द मात्राकृति निर्बाधां प्रतिपादयन्, अवयवान् नित्यांश्च विज्ञापयन् सः बाणः अगण्यप्रताप प्रभु कृष्ण युधि अग्राह्य अतीन्द्रिय च व्यतनुत। सः विशिखः[3] कृष्णस्य चमू हृष्टां वितन्वन्, दुष्टान् विनष्टान् विधाय व्योम चरै· सुरै. तुष्ट. जिनारे मुरारेः उत्तमतां स्पष्टीचकार।

असौ जरासन्ध· पौराणिकं वाक्यमिव उग्रसेनं अग्रे जहास, स च उग्रसेनः आत्मयुक्त्या जीवेशयोः भेदमिव अस्य जरासन्धस्य चापे भेदं असाधयत्। स. कृष्णमुक्तशरः श्रीरमण (कृष्णधनु·) गुणोज्झित विधातु यतमानं अरिवर्गं आशु गुणै विहीन विरचय्य कृष्ण अनन्तसच्चिन्त्यगुणं वितेने। स· बाण अन्धानामपि कृष्णस्य सद्गुणाख्यमणिं सन्दर्शयित्वा जगद्वन्द्या कृष्णस्य कीर्त्याख्यवधू लोकत्रये परेषां अनलसम सन्धाय,

---

(1) मध्वपक्षे—कृष्णालिङ्गितशाङ्र्गाभिमानिदुर्गात्मकलक्ष्मीप्रभव।

(2) सज्जनेषु पक्षपातेन बाणप्रवर्तिकृष्णायसस्य स्थिराप्त्या। मध्वपक्षे–अये शुभप्रदे देवे हरौ स्थिराप्त्या दृढभक्तया। (अय शुभावहोविधिः अमर

(3) बाण, सन्यासित्वेन शिखारहित मध्वाचार्य।

सान्द्राश्रुजले रत्नदृषदां वृन्द च सम्प्लावयन् छन्द [1] अन्वर्थ अल समर्थ्य सुधिया सन्देह आशु अच्छिनत् ।

स. बाण शस्त्रास्त्रप्रकरेषु, शाङ्र्गधरत भेद द्विप-अश्व-द्विपत्-वर्गेषु आत्तशरासनात् मुरभिद भद, विभिन्न गात्रेषु मृत्योर्लोक इतेषु च स्वजनत भेद कायात् मिथ खण्डिते हस्तादौ च भेद साधयन् भिदा पञ्चक व्यक्त विदधे[2] । मध्वशिष्य परोक्तवाक्यै स्वपक्ष आस्थाप्य विपक्षपक्षान् इव हरिभटाः युधि अरिप्रयुक्तै. शरौघै तै तद्ध्वजिनीमेव निजघ्नु. ।

मुरारे भटा युधि ब्रह्मण कृष्णस्य साक्षात्कृतेः लब्ध यत्तत् प्राणायोग–पलायन– प्रपतन–आघात– आर्ति– वित्तव्यय-स्वेद-अस्त्रोदय-वक्त्रनैस्य–भय–दुष्कीर्त्यादि अखिल विश्व शत्रुचयेषु सत्य चक्रु । आत्मसु च तत्कृष्णसाक्षात्कृते. सिद्ध तद्विपरीत[3] विश्व सत्य चक्रु ।

रोम्णा हर्षणकारिणि श्रवणत पापौघविध्वसिनि ।
प्रेम्णा चिन्तयतां विचित्रविमलश्लाघ्यार्थसन्दायिनि ।
सञ्जाते भुवि रुक्मिणीशविजये सद्वादिराजोदिते ।
सञ्जातोऽयमभूत् त्रयोदशमित सर्गो मुदां स्वर्गिषु ॥

---

(1) अन्धाना कृष्णगुणमणिदर्शनात् 'अन्धोमणिं अवन्दत' इति वेदस्य कीर्तिवध्वा अनलसमत्वे 'योषितमाग्नि ध्यायीत' इति छन्दस रत्नाभरणाना रक्तेसप्लावितत्वात् 'ग्रावाण. प्लवन्ते' इति श्रुति वाक्यस्थ प्रामाण्य समर्थितम् ।)

(2) जीवेशभेदः जीवजीवभेद जडेशभेद जडजडभेद जडजीवभेद इति पञ्चभेदा ।

(3) प्राणायोगादिविपरीत ।

चतुर्दशः सर्गः

कृष्णभृत्या युधि शत्रूणां छत्र ध्वज चामराणि, चर्माणि, वर्माणि हस्तिन अश्वा पत्तय.–एतदादि समस्त वित्त सखण्ड कृत्वा[1] अखण्ड यं[2] अविद्यमान चक्रुः । कृष्णभृत्या युद्धे सङ्ग्रामकौशल्य ज्ञानेन उज्झितानां भग समलिङ्ग्य सुमूर्छितानां जरासन्धभटाना सिद्धा अविद्या विज्ञप्त्य-भावाकृति एव विदधु ।[3] युद्धे ये जरासन्धपक्षीया युद्धाङ्गणात् अन्यत्र पलायने विदधु तान् नृपान् सत्कोटिषु विधाय अन्यान् युद्धाभिमुख्येन स्थिताम् असत्कोटिषु सन्निवेश्य कृष्णभृत्याः सदसद्विभिन्न शून्य प्रचक्रु. धानुष्कचूडामणयः ते कृष्णभटा शार्ङ्गधरात् ब्रह्मण. कृष्णात् विभिन्नान् हेयान् अपि गर्विणः तान् जरासन्धपक्षीयान् शत्रून् युद्धे आहूय स्वेभ्योऽपि भिन्नान् (छिन्नान्) विरचय्य नून निजघ्नु. । ते कृष्णसेवका कृष्णस्य जये सति समन्तात् समुत्थिताभिः कृष्णादन्येषु अयोग्याभिः मुकुन्दे मुख्यार्थपराभिः सुराणा ऋषीणा सिद्धाना च स्तुतिभिः अस्य मुकुन्दस्य अवाच्यभाव[4] समदूषयन् । गिरिश. य[5] बाह्यदृष्ट्या[6] भस्मीभूतमिव आरचय्य पुनः चित्तान्तस्थित त अनेकानन[7] गिरिसुतागर्भे हि आर्पयत् ।

(1) खण्डसहित कृत्वा–छित्वा

(2) अच्छिन्नपदार्थ, मायावाद्युक्त अखण्डब्रह्म ।

(3) सङ्ग्रामकौशल्यरहिता जरासन्धभटा. पराभव प्राप्य मूर्छिता भूत्वा बन्धूनपि न ज्ञातवन्त । एतेन अविद्या अभावरूपा एव अभूत् । भावरूप अज्ञान वर्तते इति अद्वैतिनामत तत्कृष्णभक्तै निराकृतम् ।

(4) लक्षणावृत्तिगम्यत्वम् ।

(5) काम, विष्णुसर्वोत्तमत्वसाधकसमीचीनतर्क ।

(6) ललाटस्थलोचनेन, "त्व च रुद्रमहाबाहो मोहशास्त्राणि कारय" इति हरेराज्ञानुसार तत्सर्वोत्तमत्वप्रतिपादकतर्कस्यापातत: निराकरणम् । अत एव भस्मीभूतमिव इत्युक्तम् चित्तान्त स्थित चित्तज कामम् ।

(7) षण्मुखं, कामस्य षण्मुखावतारत्वात् आत्माश्रयान्योन्याश्रयचक्रकानवस्था केवलानिष्टापादनरूपेण पञ्चमुख तर्क ।

Rarest Archive

विभु कृष्णः पञ्चावयवेषु[1] अङ्गैरुचिर[2] अग्र्यतर्कोपमं त कामं प्रद्युम्नत्वेन सृष्ट्वा तेन छन्दोबाह्यकुतर्ककल्प एकलव्य अजयत् । श्रितानां आत्मीयानां गतिः सर्वशक्ति स कृष्ण रणे क्षणेन उज्ज्वलाङ्गै सम अङ्गजं (प्रद्युम्न) समुत्पाद्य भवस्य अनुभावात् आगतां तत्पितृत्वप्रथा द्यति स्म । कृष्णभृत्या युद्धे ईशस्य अपरोक्षसमकाल सकल तदिद शस्त्रताडनादिक द्विषत्सु जरासन्धीयेषु तदीयाशेषविद्यया अबाध्य प्रसाध्य स्वोपार्जित निखिल शत्रुसम्बन्धिछत्रादिकं श्रीशार्ङ्गपाणिचरणे समर्प्य महाप्रसाद समलभन्त । य जरासन्धः प्रथम शंवीगदां कृष्णवधाय सम्प्रेष्य जराभिधानां स्वजननी जघान, असौ आत्मोदित व्याहृतिहेतुना जात्युत्तरेणेव पराजितोऽभूत् । सगरे केचित् जरासन्धभटा. सवाद बभ्रु. किल ।[3] अपरे शरैः ताडिता. सन्त. अनुक्ति[4] बभ्रु । परे भृत्या कटकात् निर्यान्तः निजजने निरुन्धति सति क्रुद्धाः विरोध[5] बभ्रु ध्वस्ताः निजजनै. असङ्गति[6] बभ्रु सर्वे शत्रव जयै. न्यूनतां[7] बभ्रु । सर्वे शत्रव-हृतिभिः-आधिक्य[8] बभ्रु. इत्थ तत् जरासन्धबलं अद्वैतिवत् पराजित

---

(1) पञ्चावयव (लता) बाणा ते एव इषव यस्य तर्कपक्षे प्रतिज्ञाहेतु उदाहरण-उपनय-निगमनान्येव इषवः यस्य तम् ।

(2) अङ्गै करचरणादिभि सुन्दर, व्याप्ति-प्रतितर्काप्रतिहतिविपर्ययापर्यवसानाद्यै अङ्गै रुचिर तर्कम् ।

(3) केचिन्माधवमासाद्य विजयस्वेतिचाब्रुवन् इति भागवतोक्त्या समीचीन वचन दधु विप्रतिपन्नप्रमेयाङ्गीकार सवाद । सवादाख्यनिग्रह स्थानम् ।

(4) तूष्णीभावोऽनुक्ति अनुक्त्याख्यनिग्रहस्थानम् ।

(5) प्रतिज्ञादीना व्याघातलक्षणं विरोधाख्यनिग्रहस्थानं

(6) आकाङ्क्षितविरहोऽसङ्गति इति असङ्गत्याख्यनिग्रहस्थानम् ।

(7) उपादेयाना अन्यतमानुपादान न्यून इति न्यूनाख्यनिग्रहस्थानमिति वादपक्षे ।

(8) आधिक्याख्य निग्रहस्थानम् । सवादानुक्ती विरोधासङ्गती न्यूनाधिक्ये च इति षडेव निग्रहस्थानानि मध्वसिद्धान्तरीत्या ।

Rarest Archive

मभूत् । शरौघै: सञ्चूर्णिताङ्गा , सछिन्नपादोदरकण्ठहस्ताः जरासन्ध भटाः असृगब्धौ निराकारमतस्य तावत् फल अश्नन्त इव विरेजु ।

स्वाङ्गेन आच्छादितशत्रुशौर्यतरणिः शाङ्र्ख्येन इन्द्रचापेनोज्ज्वलः श्रीदेव्याख्यविद्युत्वान्, अद्भुतरथरूपेण श्रीमत्समीरेण ईरितः, काव्येषु उद्गीतकथः स. कृष्णाम्बुदः शरौघाख्यकरकावर्षे राजन्यानां आनन पाणिपादाख्यकमलव्रातान् क्षणे अलावीत् ।

सन्मुसल. हलायुध. रणावनौ कठोर मृत्पिण्डसमान् रिपून् मुहुः समाकृष्य प्रचूर्णयन् शौर्यमनोज्ञबीजान् यशोऽङ्कुराश्च हि असाधयत् ।

तत. क्रुद्ध. करधृतधनुः चैद्यः विभौ मार्गणगणान् वर्षन् विष्णोः प्रशिखै विशिखैः ग्लानिमगमत् । तदा कोपेन उज्ज्वलितवदनाः पापान्धाः भूपाः कार्मुककराः सन्त. परमपुरुष पावक इव परीयुः । कृष्णोऽपि द्विषातां वक्षसि, मुखे ललाटे च लग्नैः लसितलाञ्छनैः चित्र पत्रैः शरैः स्वाध्याय-कीर्तन-सदूर्ध्वललामैः शून्यान् शोणितशोणगात्रान् राज्ञः[1] तान् सार्थाभिधानकृत । मधुजित् कृष्णः माद्यन्त शिशुपालं एत्य शार्ङ्गच्युतैः सायकैः चापच्छत्रकिरीटकेतुरहित कृत्वा शिशूनां प्रभु चक्रे । [2]बलरामश्च चूर्णितवाजिसारथिरथ मागध जरया सहितप्राय कृत्वा त आग्रहीतमपि प्रभोः कृष्णस्य वाचा मुमोच ।

दुर्मति सः मागध पुनश्च तावती सेनां[3] सम्पाद्य मथुरापुरीं विधुरीकर्तुं यमुनायाः परं पार उपागमत् । सः मागध जरासन्धः पुण्य नद्याः यमुनाया. तीर उपव्रज्यापि बन्दिभि गीयमान· सन् आत्मानं अमूमुदत् । सा हि विमुग्धानां प्रकृतिः । भास्करः कुहकस्य तस्य जरासन्धस्य मथुरां नाशयिष्यामीति कुबुद्धि अभिवीक्ष्य कुपितः तदुद्योगस्य विघातार्थमिव[4] अपीपदत् । अथ निशाचरबलान्तकः शौरि उष. समये

(1) प्रजारञ्जनरूपार्थासम्भवेऽपि रक्तरञ्जितगात्रत्वेनैव राजान बभूवुः ।

(2) शिशुवत् निश्चेष्ट चक्रे ।

(3) त्रयोविंशत्यक्षोहिणी ।

(4) पुनश्च स्वोदयपर्यन्त विघातार्थं ।

Rarest Archive

सविता इव[1] स्वीयै सह रथ आरुह्य युद्धार्थं निर्ययौ । अमेयविभवः राजीवनयन हरि. राजनीति प्रकटयन् स्वीयामनीकिनी त्रिधा अयूयुजत् । उदयशैलमूर्ध्नि लसता सूर्येण श्रीपते. शौर्योन्नतिं प्रकटयन्; अम्बुजैः तत्कृष्णेन पोष्याणां यादवाना उदय प्रकटयन्, ध्वस्तै. सन्तमसैश्च तामसाना जरासन्धभटाना दशाप्रकटयन्, नीडे क्वणद्भि. खगै. परवैभव प्रकटयन् सः मुहूर्तः मुदे स्यात् । त्रिषुस्थानेषु विस्तीर्णा[2] मधुसूदनवाहिनी त्रिपदा वेदमाता गायत्री इव रिपुसेना क्षणात् अहन् हरेर्भटाः अमतेषु शस्त्रात् त्रिदशाधीशाः खलेषु ज्वलत्तापत्रय यथा अमूमुचन् । शत्रो जरासन्धस्य ध्वजिनी यमुनातीरगा अपि प्रमत्ताभूत् । असतां पुण्यसरिदप्यनिष्टस्य हि कारणम् । सः कृष्ण जरासन्धस्य तत् चतुरङ्गसैन्य अपारैः शरैः पूरयन् मम इषुवारिधे तव सेना नालं इति शसति । मुरजित् रणधुरि दोष्णा शार्ङ्गं बिभ्रत् दोष्णा निषङ्गान्निशितशरचयान् आददानः दोष्णा ज्या आकर्णान्त मुहुः विकर्षन् दोष्णा प्रबलरिपुवपुः मार्गणौघैः पूरयन् दोष्णा अन्यातङ्क स्वशङ्खं रणयन्, दोष्णा अङ्घ्रिमूले नातानां अभयं तन्वन् च स्वां विश्वतःपाणितां प्रथयति ।

ये द्विषः भास्वदुदये सन्ध्यासमयेऽपि निद्रा अचीकरन् शुभकृतेः साक्षी अच्युत तेभ्यः सुदीर्घा ता हि निद्रा आदीदिशत् । ये कुमतिभिः रवेः ईक्षा न कृता तेषा द्विषा दृश अमीलयत् । ये शुद्धाम्बुनि नो ममज्जुः तान् अहितान् तेषामेव (शत्रूणा) शोणिते अमज्जयत् । युधि जीवाना त्रितयेन सञ्चितदशा सन्दर्शयन्त कतिपये वैरिभटा. आत्मेशितु कृष्णस्य पादाब्जे स्वं मूर्धानं अनीनमन् । केऽपि शार्ङ्गिमुक्तशरै विशीर्णतनवः सन्त आत्मनः अमीमरन् । अन्ये केऽपि हरिं जरासुतमपि त्यक्त्वा ततो युद्धाङ्गणात् दुद्रुवुः । वीरशिरोमणिः यः हरि. मागधस्य[3] साधर्म्यमापन्नानपि नावधीत् । स. कृष्णः मागधवध हीन मेने ।

(1) सविताऽपि निशाचराणा चोर-उलूकादीना बलान्तकः ।

(2) अग्रे, पार्श्वद्वये च ।

(3) स्तुतिपाठकस्य ।

अरिन्दम सः हरि इत्थ आजौ उग्रसेन त बार्हद्रथ जरासन्ध बहुवार विजित्य अब्धिमध्ये हिरण्येन अमलरत्नैश्च चित्र पुर अचीकरत् ।

अथो अपरिमेयशक्तिः अरिघ्नः कृष्ण तस्यां द्वारावत्यां मथुरा पुरीस्थान् निजान् क्षणेन विधाय यवन दिधक्षु. सन् स्वभक्तस्य मुचुकुन्दाख्यस्य हर्यक्षस्य दरी प्रति विदुद्रुवे । पराङ्मुख सन् खलस्य कालयवनस्य अग्रत पलायन् असौ परम कञ्जदलायताक्ष कृष्णः दुरात्मनां वक्त्रनिरीक्षण स्वै जनै तु न कार्यमिति शसति स्म । अध्वनि तेन यवनेन अधिक्षिप्तोऽपि अदत्तोत्तर. ईश्वर. सतां असद्वर्गै सम अस-ल्लापं सशिक्षयन्निवाभवत् । निद्रालोः मुचकुन्दाख्यभूवरमणेः विद्योत मानां गुहां अध्यासीन अल्पमतिभि अगम्य शुद्ध स्वत प्रबुद्ध कृष्ण-हृद्व्योमास्थितमुग्धजीवनिकरात् ब्रह्म अभिन्न वदन् अद्वैतीव- सः दुर्धी. असुरः यवनः नृपात् मुचुकुन्दात् भेदरहित बुध्या अन्वमस्त ।

कृष्णे मुचुकुन्दस्य ऐक्य यदि सिसाधयिषितस्यात् तर्हि किमर्थं मुचुकुन्दराजे अच्युतमतियुत रक्ष यवन शुकाचार्य न सेहे ? अर्हणीयः शुकाचार्य. 'अह अच्युतः' इति विघोषयन्त पौण्ड्रक कस्मादगर्हयत् ?

मुचुकुन्दहृत्सरसिजातभानु मुकुन्द. भूपते. तस्य नयनाग्निना यवनाख्य कानन प्रदाह्य पुन मुचुकुन्दस्य भवाख्य गहन स्वपदपद्मवीक्षाग्निना विनाश्य शनै जलधिमध्यरत्नायिता आत्मन पुर द्वारावती इयाय ।

अम्बुजेक्षणे कृष्णे निजै सह द्वारवत्या निवसति सति कश्चिद् द्विज अज्ञया रुक्मिण्या प्रेषित पत्र उपाहरत् ।

<u>रुक्मिणी प्रेषित पत्रम्.</u> या अबला विभवे साम्ना वेद्याय; साम्नाये. शास्त्रे. उदितस्य धर्मस्यपात्रे, पात्रेषु दत्तवैकुण्ठाख्यापदाय भूम्ने पुरुषाय कृष्णाय दत्ता सा धन्या भवेत् ।

हे अङ्गजाना आकृतिशतात् ऊर्जितरम्यरूप, हे देहिना अङ्ग-जातनिलय, कृष्ण, कामवशगा त्वत्त अन्ये शिशुपालादय. मयि चित्त

Rarest Archiver

कुर्वन्ति । तान् रणे अन्तिकागतयमानुचरान् कुरु । त्वदङ्घ्रि सरोज सेवा च मे देहि । भव-ताप-हर-अपाङ्ग कृष्ण, भवता मम धीः अपहृता एव । तव चरणाङ्कैः कृताङ्कां मां च रणाङ्गणतो नय । भवघ्न, प्रभो, अङ्ग कृष्ण भवत सूक्ते[1] आसक्तहृत् अहं उमेशहंसगमनौ, स्वर्गीस्वराग्नी अखिल लोक देवौघमान्यान् मुनीन् सच्छास्त्राध्वनि कोविदानापि बुधान् धिक्कृत्य यत् त्वयि एव सस्पृहा अस्मि तस्मात् भवत विश्वाधीश्वरतां निश्चनोमि । प्रभो शम्भु मम पुत्रसमः, पुर रिपु. सः पौत्र., शशो सोदर, सिन्धुर्मे जनकायितः । मधुसखः मन्मथः मत्सूनुकल्प । अहं सकलस्य अम्बा । इति कमला मनोभृङ्ग कृष्णैक लग्नं दर्शयितु कृतोग्रशपथा इव स्व रूपमस्पष्टयत् । हे वीराग्रग यदुपते, ते यत् विश्वविदित अनन्यग अच्युतनाम अस्ति । तत् नित्यानन्दचिदाकृति त्वामेव पतिं मन्ये । तदच्युतनाम यदि चिन्मात्रसमीक्षया चेत् सर्वेऽपि किं नाच्युताः? यदिचैतत् चिरकालसस्थिसिकृतं स्यात् तर्हि तव पुत्रेऽपि ब्रह्मणि तन्नामस्यात् । हे अङ्ग यत् अन्ते प्रलय समये अशेष जगत् आत्मगर्भे बिभ्रत् अभ्रद्युति. त्व शेषे शेषे । तत् आनन्दसान्द्राकृति अच्युत श्रीश त्वा ईश वरयामि नान्यम् । दशावृति[2] इद पद्मजाण्ड अनेकधा यस्य रोमकूपे पराणुवत् तिष्ठति किल । अङ्ग, तस्य तव देह कथ पञ्चभूतभव स्यात्? हे लोकनाथ स्वानां आपत्–छिदापादनविक्रमौघ, त्व गोपी. अगोपी किल । हे विभो,दयावारिधे एव वञ्चितदुर्दशा मां स्वीयां विधेहि । अनादिसिद्धा तव जायां मां नयत. ते रुग्मिणा किम् । भीष्मकेण किम् नृपसंज्ञितैः. अन्यैर्वा किम् प्रयोजनम्? ईश, अन्यजनैः अभोग्यां त्वदङ्घ्रियुग्मार्चनकर्मणि योग्यां मा नय । नो चेत् इमां अवस्था अवधूय भूम्न. तव हृदयस्य योग्या भवामि? हे सौन्दर्यसमुद्रसान्द्र, असुनाथ, मुकुन्द, आश्रितायाः मम

---

(1) रुक्मिणी वरयामीति नारद प्रति उक्ते तव समीचीनवचने, अभ्रणी सूक्ते ।

(2) दश आवृत्य यस्य तत् । आदौ पञ्चमहाभूतानि, तदुपरि अहंकार तत्व महत्तत्व गुणत्रय चेति दशावरणानि ।

त्वदीक्षण दिश । न चेत् दिशासु चरन्ती सती अहं याः स्त्रिय गोप्य· क्षण त्वां आश्रिता तदीयभाग्यस्य नाथे । अन्तस्त्वदैवय स्मरता जनानां दैत्यजुष्ट अनिष्ट भवति किल । तत् त्वदेकपत्नी मां अभिकांक्षत· तान् इमान् शिशुपालादीन् त्व उपेक्षितु नार्हसि । अङ्ग कृष्ण, त्व स्वतन्त्र. लक्ष्मीरमण । अहं त्वदीयजाया कमलाऽस्मि । मदर्थितायाः छलतोऽसज्जनानां शिशुपालादीना अभिमानहानि विधत्स्व ।

इति त पत्रगतालाप सः माधव आलोक्य रथ आरुह्य यत्र सा प्रिया रुक्मिणी तत्र तरसा प्रतस्थे । कमलेक्षण अच्युत भीष्मकन्याया· रुक्मिण्या सन्देश सन्दृश्य मन्दस्मितमुख सन् दयया त विदर्भाख्यदेश अगच्छत् । यस्मात् कृष्ण तस्या. वचनमात्रेण हृत (परवश) अपि सदय सन् करपल्लवेन पत्रानेतु ब्राह्मणस्य हस्त प्रत्यग्रहीत् । तस्मात् आश्रितपक्षपाती एष· हरि भैष्मीकरग्रहण करिष्यतीति वक्तव्यमस्ति किम् ?

तदा पद्मोदयाय[1] उद्यन्मरीचिशतै भासितसर्वदेश निशाचरघूक शोक[2] पुष्णन् सच्चक्रमानितगति.[3] दिनराट् इव स. कृष्णः पूर्वसिन्धो· उपकण्ठे हि ललास ।

कृष्ण दुष्टौघै जरासन्धादिभिः पूर्णां विदर्भनगरी प्रवेष्टु अनिच्छन् बहिरेव हि वास चक्रे । तदीक्षणोत्सुकै नागरिकै वृता सा स्थली तां पुरी अजयत् । सदाराः ते पौरा. तदा उपायनपाणय सन्त. सौन्दर्य समुद्रसान्द्र त शौरि आलोक्य अपरान् वीरान्[4] उपेक्ष्य अपार्थान् प्रचक्रुः किल ।

"श्यामलकोमलाङ्ग अयं न स्मर, वीतकलङ्कशङ्क. नाय शशी । लोकदृगार्तिहारी नाय रवि, सोऽयं अद्वितीयः पुराण· पुरुषः नारायण· । मनोज्ञा भीष्मसुता सा रुक्मिणी श्रीरेव । सुभगाग्रगण्योऽय

(1) पद्मानां उदयाय, पद्मायाः कमलाया उदयाय ।

(2) निशाचराश्चते घूकाश्च । कृष्णपक्षे निशाचरा घूकाइव ।

(3) चक्रवाकै मानितगति । सता चक्रेण मण्डलेन मानितगति ।

(4) शिशुपालादीन् ।

Rarest Archiver

श्रीवल्लभ । एतौ समेतौ भवताम्" इति ते नागरिका आत्मेष्टदं धातार अर्थयन्ते । "पुरुषाग्रगण्यः सोऽय कृष्ण नः पुण्येन एणदृश्या रुक्मिण्या कर गृण्हाति तदा नीलमणि स्वर्णसमेत मन्यामहे । अन्यथा चेत् लोह समेत मन्यामहे ।" इत्थ वृन्दश गृणन्त ते पौराः मुकुन्द नत्वा नयनै पपु, कृष्णोऽपि मुग्धस्मित. सन् तान् सर्वान् सदयावलोकै अञ्जसा अरञ्जयत् ।

अथो पौरा रुक्मिण्या सह चलत्पताकोज्ज्वलचामरौघा परिस्फुरच्छत्रसहस्रशोभा विचित्रतूर्यध्वनिपूरिताशा कुलदेवयात्रा वितेनुः अथ सा भैष्मी स्वजनकस्य गृहदेव पौत्र शिव आराध्य निज गृहदेव माधव द्रष्टुकामा सा पुर अभियान्ती अपि प्रियचरणसकाश तेवनेन व्रजन्ती रथ नारुरोह ।

अलसेन विलसता अक्षिणा स्तम्भितान्याक्षवृत्तिः जलजानां कुलजेन गन्धेन सह स्पर्धिना सौरभ्येण सान्द्रा[1] वदनमदनशस्त्रा अगण्येन लावण्येन चित्रा गजगति भीष्मपुत्री रुक्मिणी अजतात एन कृष्ण ऐक्षत । 'मम जननी इय रुक्मिणी कृष्णेनैव नेया इत्युत्सुकः तद्रुक्मिणीदृष्टिजन्मा स्मर. एवं आत्मशरै सकलान् नृपालान् नूनं मूर्छावशान् अकार्षीत् । तदनु भूपेषु मदनेन मन्दीभूतचित्तेषु सत्सु अविदितगति स्वतन्त्र. कृष्ण. प्रहर्षात् उद्यद्रोमराजि विकसितयोः नयनाब्जयोः उद्भूतहर्षाम्बुधारां स्वां रुक्मिणी निजरथं अधिरोप्य प्रपेदे ।

लक्ष्मीरमण. कृष्णः इन्दिरायाः पुनः[2] विवाहेन किम् ? इतीव अपाङ्गाख्यया दूत्या विनिवेदितात्ममनोनुरागां तां सुयोगामतनोत् । कृष्णस्य आस्येन्दो समीपे लग्नमुदितभ्राजत्कपोला, प्रभोः हस्ताम्भोज युगेन वेष्टितलसन्मध्या भिया इव अञ्जसा भर्तुः अंसद्वये सहितायत भुजा मोदाम्बुधौ मग्नधीः सा रुक्मिणी इम विवाहोत्सव पाणिग्रहणात् अधिक मेने ।

(1) अनेन भैष्म्या पद्मिनीत्व द्योत्यते ।
(2) विधिसहितविवाहेन ।

Rarest Archives

रोम्णां हर्षणकारिणि श्रवणत. पापौघविध्वंसिनि ।
प्रेम्णा चिन्तयतां विचित्रविमलश्लाघ्यार्थसन्दायिनि ।
सञ्जाते भुवि रुक्मिणीशविजये सद्वादिराजोदिते ।
सञ्जातोऽयमभूच्चतुर्दशमित. सर्गो मुदां स्वर्गिषु ॥

पञ्चदशः सर्गः

कृष्णे रुक्मिणीं रथे आरोप्य गच्छति सति मदनवशगाः मानिनः महीशाः विषमात् मृगदृशीवियोगरोगात् पुरस्तात् स्वतनुं उज्झितुं इव तं कृष्णं तमः तरणिमिव अन्वधावन् किल । ये भैष्म्याः परिरम्भण चकमिरे तेषां द्विषां भुजान् हरिभटा खड्गैः चिच्छिदुः । ये वा तस्याः मुखस्य चुम्बनरुचि चकमिरे तेषां शिरांसि चिच्छिदु । खला ये राजानः लोकाम्बया तया रुक्मिण्या सह तल्पे शयनं चकमिरे दुर्मदान् तान् हरिभटाः सयकै. प्रेतै सार्धं अशीशयन् ।

शम्भोर्दयिता पार्वती तस्य शम्भो वैरिण. कामस्य मातु. रुक्मिण्याः साहाय्य क्व चकार ? स. विप्रयोगोऽपि वा देव्याः श्रीपति-विप्रयोगं कथ अहरत् ? किन्तु सः श्रीपतिरेव स्वविरहायोग्यां सम-व्यापिनी तां अश्लेषकथा खलैः सह मुहु शिक्षन् श्रुति रक्षन् निन्ये । सुग्रीवोद्धतसैन्यमात्रबलवान्[1] श्रीपूर्वराम. सः कृष्ण युधिहतै गजादि

---

(1) तुरगा सैन्य-सुग्रीव-मेघपुष्यबलाहका इति वचनात् । सुग्रीव सैन्य इतिरथाश्वौ । सुग्रीवश्च उद्धतसैन्यश्च सुग्रीवोद्धतसैन्यौ केवलौ तौ तन्मात्र तदेवबल अस्य अस्तीति सुग्रीवोद्धतसैन्दमात्रबलवान् कृष्ण रामपक्षे– सुग्रीवाख्यस्य कपे उद्धतसैन्यमात्रबलवान् ।

Rarest Archiver

निकरैः रक्ताम्भोनिचये सेतु आबध्य तस्यां रुक्मिण्यां लग्नचित्त खलं प्राक्तनरावण शिशुपाल जित्वा निजां अव्यग्रवक्त्राम्बुजां प्राचीनावनिजां रुक्मिणी निनाय । हरेः विक्रमार्कोदये सति कश्चित् भट अहयी[1] अहयीत्[2] । अपरः अच्युत अनंसीत् । शरै विद्ध सन् अपरः नाक्रमीत् । उन्मुखशिखे स्वीये प्रतापाख्ये अनले शत्रुसमूह हुत्वा, शराख्यैः भ्राजद्‌द्युतिश्रेणिभिः रक्तरसार्द्रतामपि कृत्वा स्वर्वासिभि देवै प्रेषितै पुष्पाख्यै लाजनिकरैः आकीर्णः तत्समयोचितैः क्षितीशार्पितै वित्तैः सह निसर्गं प्रियां निजां रुक्मिणी श्रीहरि. निन्ये । उरुबले कृष्णे स्वां दयितां नयति सति भूभुज तस्याः रुक्मिण्या. बन्धूनां योग्यां दशां आपन्ना इव अन्वागताः अन्तकपुरी गता वै । अन्ये खिन्नमुखाः दृगम्बु ससृजुः । केचिच्च मूर्छां श्रिताः, चैद्याद्या. मलिनानना गतगिरः दुरन्तां चिन्तां ययुः । रिपूणां वाहिनी कृष्णः तत्सेनाऽपि वा न जघान । सा वाहिनी जनन्याः रुक्मिण्या द्रोहकृतः चैद्यस्य पक्षपातेन हता ।

सः रुग्मी रुग्मीव[3] यदा विरोध चक्रे तदा चक्रधरः देवः तस्य रौग्मं धनुः छित्वा भविष्यद्दुद्योग उत्थापयति स्म ।[4] शचीपतिस्तुल्यकृतिर्मुरारिः त रुग्मिण मुण्डितमूर्धज अचीक्लृपत् । लक्ष्मीः यद्गेह उपेक्ष्य अगात् तत् एतत् खलस्य हि अनुगुणम् ।

अनन्यकान्ता चञ्चललोचनान्ता सा रुक्मिणी सहस्रसंख्याकानां अवनिपालाना भङ्गेन समुत्थिताभि. जयकामिनीभि. आत्मदासीभिः सह जगाम ।

तस्य कृष्णस्य योधाः जयकामिनीजनयुता. धैर्योर्जिता गर्जन्ति । तुरगा युद्धाप्ता बडवाः निरीक्ष्य हेषा मुहु तन्वते । हस्तीन्द्रा. करिणीः समेत्य परितः बृंहित कुर्वन्ति । अहो भक्ताभीष्टकर हरि पुरा एव[5] स्वीयान् सजायान् व्यधात् ननु ।

---

(1) हयरहितः ।
(2) गतवान् हयगतौ इतिधातु । तुरगादवरुह्य पलायितवान ।
(3) धनवानिव ।
(4) अक्षय्यधनु प्राप्त्यर्थं शिव प्रतितप.करणाय ।
(5) स्वविवाहात्पूर्वमेव ।

Rarest Archiver

हयहस्तिरथोपेत प्रियया रुक्मिण्या सहित· जलजायतलोचन: कृष्ण· अलङ्कृतां निजपुरी द्वारका अविशत् ।

अथ यथाविधि वैदर्भ्या रुक्मिण्या. कर जिघृक्षु शरण्य कृष्ण प्रियया बन्धुभिश्च सार्व मूलमाधव उद्यान प्रययौ ।

कृष्णेन कृतरम्यशोभा द्वारावती मुरारे. अभिमुखे उभयभागयो: हेम्नां उल्लसत्कान्त्याख्येनाञ्चलेन द्वारिगच्छन्त त आस्थापयतीव अभूत् । सा द्वारवती कृष्णे बलाद् व्रजति सति तस्य मन्दहासाख्यया नवचन्द्रिकया स्रवद्भि. इन्दुकान्तै· अश्रुधारां उद्गतवचोरभसा तस्य सैन्यस्य सम्भ्रमेण समुत्थै: रजोभि. आस्यमालिन्य च बभार । तदनु दीना सा द्वारवती स्फुरत्सु आत्मवप्रलग्नरत्ननिकरेषु भर्तु कृष्णस्य प्रतिकृतिं निधाय तस्थौ इवाभूत् । अथ स्वयं अच्युतस्य भूषणेषु फलिता विश्लेषशङ्किहृदया सती ईश अनुययौ इव ।

चलतां पताकानां अनिलै. निर्मलीकृते, रथौघानां चक्रावलिभि: समीकृते– सुरालिमुक्तै: अमलै. पुष्पै. लञ्छिते, गजेन्द्राणां दानाम्बु कदम्बै. सिञ्चिते, वराश्ववारोच्चयेन सूचितै: इतस्तत मण्डलधावनोद्यतै. परिस्फुरद्भूषणचामरोज्वलै: हृ षितभूषिताननै. हयै विराजिते, कलशोपमानै. पार्श्वद्वयस्थाना इभाना कदम्बस्य रङ्गिकुम्भै: समेते, नीलोत्पलतोरणाभै अन्योन्यसक्तै. उन्मुखै· कुञ्चिताग्रै शुण्डै समेते, विचित्ररत्नोज्ज्वलभूषणौघे प्राहुणिकाङ्गनानां पदाम्बुजै. रङ्गप्रभां मुष्णाति राजमार्गे मन्मथकोटिरूप. कृष्ण मन्द ययौ ।

मध्ये स्थापितमाधवा स्मितलसत्फेना चलच्चामरव्राताख्यै ऊर्मिभि· वितता आतपत्राख्यकमठवती हस्त्यश्वपत्यावृता वीणावेणुनिनादाख्येन गर्जितेन युता आच्छन्न-अनिमिषा अन्तरागतमहीपालौघसेनासरित् वार्धे: समा,सा कृष्णस्य चमू. मन्द ययौ । लक्ष्मीशवाह-रथ-हस्ति-भटौघवेगात् जात: आत्तरय त्रिदिव व्रजत् तत् रज: कृष्णानुषङ्गिन: चित: अचेतनस्य च सङ्गभाज पुस· गतमेधसोऽपि त्रिविष्टपगति वक्ति । सिन्धु स्वतीरे विचित्ररत्नद्युतिरङ्गकान्त्या सुमौक्तिकौघाख्यया

Rarest Archiver

अक्षतलाजराज्या मन्दानिलव्यजनेन च स्वजामातरं कृष्णं अर्चतीव भासते। तुङ्गैः धृतशङ्खचक्रैः तरङ्गैः पयः कीर्णं वितन्वन् वार्धिः व्रजतः मुरारेः अधिमार्गं हस्तैः वस्त्राणि विस्तारयतीव। नीलाश्मद्युति-पत्र शोभिभिः, अधोव्यालम्बिपुष्पस्फुरन्मुक्तादामभिः, उल्लसत्किसलयश्रेणी वितानोज्ज्वलैः, सिन्धुप्रेषितरत्नसहततलैः सुवर्णोन्नतस्तम्भाङ्गैः मणि-मण्टपानुकृतिभिः समानायतैः वृक्षैः युक्तं मूलमाधवाख्यं वनं श्रीहरिः अविशत्। अथ कृष्णः विष्वक्लम्बिफलोच्चयं, कलपिकैः आरब्धगीतं, गर्जद्वारिधिमर्दलं, शुकवचःस्तोत्रं, स्वतन्वीक्षया नृत्यत्केकिनटीभिः मनोज्ञं, अलिगीर्वीणानिनादं, पतत्पुष्पौघाख्यैः अक्षतलाजवृन्दैः सहितं माङ्गल्यवेश्मोपमं मूलमाधववनं अविशत्। यत् तत् वनं इन्दिरायाः प्रियाङ्गसंश्लेषमहोत्सवश्रियः मूलं अभूत्। ततः स्थलज्ञाः आर्याः भुवि तत् स्थलं मूलमाधवं प्रवदन्ति नूनम्।

केचन सदाराः नृपाः भीष्मपुत्र्याः पक्षे, अपरे मुरारेः पक्षे आसन्। तदा वार्धिः वारिजाक्ष्याः रुक्मिण्याः पक्षे अहमेव इति वदन्निव उच्चैः गर्जति।

अथ रत्नौघैः पूर्णे रविवर्णे सुवर्णपात्रे सत्कर्णप्रमुख शोभनवस्तु राशि विस्तीर्य शङ्खपटहध्वनिभिः पूरिताशाः सन्तः वरपक्षीयाः उत्सव निर्णयाय वधूगृहं जग्मुः।

तयोः कृष्णरुक्मिण्योः विविच्य सर्वाङ्गविचारकाले[1] समन्तात् घटना आसीत् किल। परं देव्याः सुपीने स्तनमध्यदेशे अच्युतस्य सा घटना सुदुर्लभा आसीत्।

वर पक्षीयाः– कनकदामवत् कदम्बवच्च गौरी धन्या इमा कन्या हरिनीलभासे हरये भवन्तो दिशन्तु। तया युक्तः अयं कृष्णः आत्त विद्युत् उदवाह इव विष्वक् समस्तपुमर्थवर्षं करिष्यति। सती इयं वैदर्भवंशोद्भविजातरत्नम्। सोऽपि कृष्णः उडुनायकस्य कुलोद्भवा-

(1) विवाहाङ्गानां राश्यादिकूटानां, हस्तमुखाद्यवयवानामितिध्वनिः।

Rarest Archiver

लङ्कृति. । तस्मात् एतयो. परपरायोग्य योग अवेत[1] । पावनाङ्गी सा भौष्मो पद्मालया । नवनीरदाभ अय नारायण । तेनानयो योग सुस्थिरमेव मन्यामहे, अन्योन्यविभूतिहेतु च मन्यामहे ।" इत्याहु । कन्यापक्षीया – "आर्य. कृष्ण स्वभार्यां भारकार्ये यदि नैवोपदिश्यात् । पुनः कदापि एनां न त्यजेत्, अत्र जात्वपि न कुप्येत् तर्हि स न अब्ज मुखीकर गृण्हातु । विभो, हरे, विश्वद: त्व अस्माक सन्देशमात्रमभिवीक्ष्य एनां न: गृह यदि सम्प्रेषयिष्यसि, अन्यपत्नी यदि न करिष्यसि, बन्धून् अस्मान् यदि स्मरिष्यसि तर्हि वल्गुवदना इय वरिष्ठ त्वां वरयेत् ।" इत्यवदन् । वरपक्षीया:– "साध्वी इय रुक्मिणी हरे चतुर्दश लसत्प्रासादशोभ ब्रह्माण्डाख्यगृह, तन्मध्ये गृहस्य उचित स्वर्णाद्रि. क्षिति: धान्यानि, रत्नानि, लवण-क्षीर-इक्षु-सर्पि-दधि स्वादूदादिसमुद्रा , इत्यादि वस्तुजातं पद्मजमुखान् सुतान् तेषा धुर मन्दिर च सतत विचारयतु । एतत् गृहकृत्य गृहिण्या रुक्मिण्या कार्यम् । एतत् भारकारि नो । अन्य जनैरसाध्य तदेतत्सकल तन्वी इय स्वलोललीलाकटाक्षेण करिष्यति ।

कृष्ण एना ससदि न त्यजेत् । रहसि, स्वैरावतारेषु वा स्नानाभ्यर्जनभोजनादिविविधक्रीडासु न सन्त्यजेत् । विभूषणगत स्वाङ्गाश्लेषुसुख वशाद्याश्रित बिम्बोष्ठज अमृत च अस्यै दिशेत् । पर एतया विरहित देशं सन्त्यजेत् ।

अय कृष्ण सर्वभुवनाय क्रुद्धोऽपि भीष्मपुत्र्यां क्रोध न करिष्यति । पर तदाऽपि[2] कोमलाङ्गी एनां दोर्भ्यां परिरभ्य रमयेत् किल । य इमां वियुक्तां कलयेत् तत्रैवास्य कोप. ।

---

(1) एतत्कुलमूलयो समुद्रचन्द्रयो सहजमित्रत्वात् - परम्परायोग्ययोग अथवा समुद्रजातत्वात् लक्ष्मीत्व. सोमकुलोद्भवाना पुरुषाणा अलंकृति इत्यनेन पुरुषोत्तमत्व उक्तम् । अत लक्ष्मीनारयणयो परम्परायोग्ययोग ।

(2) प्रलयेऽपि ।

Rarest Archiver

स्वपुसा दयिन स अस्या केश प्रगृह्य, करजै कुचकुम्भपार्श्वे व्रणानि कुर्वन्, मुदुलोष्ठपुट दशयन् दन्तक्षत विरचयेत् तदा क्रोध न कलयध्वम् । असौ विलास । स प्राय· इमा स्वभक्तगेहेषु न प्रेषयति । तेऽपि ता न लषन्ति । अथ प्रदत्तामपि तामिमा लक्ष्मी धीरा भक्ता. यूय परावृत्य न किं दिशध्वम् ? पूर्ण पुरुषग्रणी· अय हरिः अन्यां न वरयेत् । धृतोऽपि अन्याङ्गनादेहे इमां प्रेयसी रमयेत् । सदा अपरोक्षी कृतसर्वविश्व स्मरणीयशील: स कथ युष्मान् स्मरेत् । तथापि स्वांघ्रि युगाश्रयेषु युष्मासु स्मृते फल कृपा कुर्यात् ।" इत्यूचु ।

कन्यापक्षोया – "अस्मै कृष्णाय बहु पारिबर्हं रथाश्वहस्त्यादि बलानि च दातु न वय ईशा पर पद्ममुखी इमां दिशाम· । तिथिज्ञमाहूय तिथिविचार्यताम् ।" इति प्रत्याहु

वरपक्षीया – "पूर्णसुख. स पारिबर्ह न वृणोति । पर तस्याः कटाक्ष कांक्षति यत विरिञ्चवैरिञ्चमुखामराणा अगण्यभाग्य हि सदा बभूव ।" इति प्रत्यवदन् ।

[1] प्राज्ञा. ययोः वक्त्रे विधु[2] आमनान्ति । मुग्धस्मिते सुबुध[3] आमनन्ति हस्तयो. उच्चद्योममणि[4] आमनन्ति । कटितटे गुरु[5] आमनन्ति । मध्य च काव्यास्पद आमनन्ति ।[6]

(1) रुक्मिणीकृष्णयो अवयवदर्णनव्याजेन पञ्चाना शुभग्रहाणा मुखाद्युच्च स्थानस्थितत्व चतुर्णामशुभग्रहाणा पादाद्यधमस्थानस्थितत्वच वर्ण यन् शुभाना पञ्चग्रहणा उच्चस्थानस्थितत्वे अशुभाना नीचस्थान स्थितत्वे सुमुहूर्तत्वस्य ज्योति शास्त्रप्रसिद्धत्वात् सर्वा तिथय अनयो रुक्मिणी कृष्णयो अनुकूला इति प्रतिपादयति ।

(2) मुखस्य चन्द्रोपमत्वात् ।

(3) मन्दस्मितत्वेन अल्पप्रकाशबुधसादृश्यम् । अथवा तयो मन्दस्मिते सति सुबुध सम्यक् ज्ञानिनम् । यमुद्दिश्य कृपया मन्दरस्मित कुरुत स ज्ञानी भविष्यतीत्यर्थ

Rarest Archiver

यत्पादस्पृशि मङ्गल आमनान्ति[7] ययोः पदतले केतु[8] गतौ मन्दगं यद्रोचिश्चकित तम [9] आमनान्ति तयोः अनयोः रुक्मिणीकृष्णयोः नित्य मुहूर्तोदय ।

यदीयवीक्षाविषयस्य[10] नित्य विधोर्बलं, यदीयतार[11] जपत. पुस सुष्ठु तारबल[12] चास्ति तदस्य कृष्णस्य सदा मुहूर्तोदयमेव मन्ये ।

ज्योतिष्पथज्ञैः उक्ता सा तिथिः द्वित्रै दिनै. अन्तरिता अपि उद्यन्महर्धि मिषतां जनानां क्षणाभा अभूत् । भैष्म्या तु कल्पायुतसम्मितासीत् ।

पूगयुक्त ताम्बूलपत्रं विवाहोत्सवस्य निर्णयाय आसीत् किल । एतदेव यूनां चेतस्सु माङ्गल्यदीक्षोत्सव निश्चाययति स्म । तत. क्रमेण उभयवर्गनार्य. विवाहोत्सवमूलभूतां तैलयुतां हरिद्रा गृहे गृहे परस्परं स्नेह अर्पयन्त्यः इव ददु । अभ्युदयार्थकामौ कन्यावरौ अन्येद्यु पितृ देवतानां अर्चा चक्रतु । अह तु अमू तदग्रे अन्योन्य चीर्णोत्सवौ सम्प्रति जातलज्जौ मन्ये ।

अथ यदुनन्दनः स्नातकसाधर्म्यं सम्प्राप्य स्नातु तीर्थं जिगमिषु. प्रीत्या श्वशुरपक्षीयै इत्थ प्रत्यषिध्यत–

---

(4) करयो बालसूर्य सदृशत्वम् ।
(5) पृथुत्वात् गुरु बृहस्पतिमिति ध्वनिः ।
(6) काव्येषु वर्णनयोग्यम् काव्यस्य शुक्रस्य आस्पदम् । उशना – शुक्र. काव्य – हलः ।
(7) पादार्चन कुर्वति पुरुषे मङ्गलम् ।
(8) रेखारुपध्वज, केतुग्रहम् ।
(9) तयो रोचिषा कान्त्या तम चकितं भवति । तम राहु । तमो राहौ गुणे ध्वान्ते इति रत्नमाला । तयोश्च मन्दगमनम् । शनैश्चरम्
(10) वीक्षायाः चन्द्राश्रितत्वात् ।
(11) प्रणवमन्त्र
(12) नक्षत्रबलम् ।

Rarest Archiver

"हे परिहृतभवपाश[1] श्रीश[2] शौरे मा याहि। ईशे त्वयि व्रजति सति त्रिभुवनपरिगीत सकल तीर्थजात पृष्ठतः स्पष्ट युष्मच्चरणवरण भूम्यां[3] आसीत्। त्वदग्रे तीर्थ क्वास्ति ? ईश ते यर्हि सकलतीर्थनिषवणेच्छावर्तते तर्हि त्वदीया मुनय तत्र तत्र तीर्थेषु त्वां स्नापयन्ति किल। विवेकै ध्यानविशेषै त्वां जलमध्यगतमपि कुर्वन्ति। तस्मात् तव अद्य विधेय किमस्ति ? हे ईश यत्र त्वदीयगुणकीर्तननर्तनादि तत्रैव तीर्थ निकरा.[4] किल सवसन्ति। सुजनाः समस्त सुकृतं यत्र त्वयि अर्पयन्ति[5], हरे तस्य ते सकल पूर्णं आकलयामि।

गङ्गादितीर्थनिकरा यत्पादाब्जसङ्गात् पुनन्ति। भुवि भवदन्तरङ्गा. अङ्गानुषङ्गकरणात् तानपि तीर्थनिकरान् पावयन्ति। तस्य तव तीर्थचर्येषु गाहनेन किम् ? ब्रह्माण्डखर्परशतायुतकोटयोऽपि यस्य रोमकूपमपि पूरयितु न शेकु गङ्गापि यच्चरणसन्नखस्य सेकमात्रं तस्य तव उर्व्यां मज्जनविधौ तीर्थं क्वास्ति ?

भ्रूकाशी[6] वरनाभिमानसवती[7] हारावलीजाह्नवी[8] नीवीदिव्यसरस्वती[9] प्रविलसद्रोमालिसूर्यात्मजा[10] काञ्चीशोभिकटि, कुचोच्चबदरी[11] नेत्रान्तयुग्मयो· प्रभाख्याया· कावेर्या· अन्तर्गतास्यचन्द्रसरसी

---

(1) ससाराभावात् पारत्रिकफलाय यात्रा न घटते।

(2) श्रीपतित्वात् ऐहिक सम्पदर्थं यात्रा न युज्यते इति हेतु गर्भविशेषणत्वम्।

(3) कृष्णपादधूल्या गङ्गादिसकलतीर्थाता सन्निधानात्।

(4) "सर्वाणि तीर्थानि वसन्ति तत्र यत्राच्युतोयारकथाप्रसङ्ग.।"

(5) "करोमि यद्यत् सकल परस्मै नारायणायेति समर्पयामि।"

(6) भ्रूरेवकाशी यस्या ता रुक्मिणीम्। काश्या, धनुराकारतया भ्रूसादृश्यम्।

(7) वरनाभि एव मानससर अस्या अस्तीति। निम्नत्वात् सर साम्यम्।

(8) हारावल्या गङ्गावत् धवलत्वात्।

(9) सरस्वत्याः पतित्वात् पीताम्बरनीवीसाम्यम्।

(10) यमुनाया नीलत्वात् रोमालित्वम्।

(11) अभिनवराजकुमारीत्वात् उच्चबदरीफलसादृश्यम् बदरिकाश्रमौ ध्वनिलब्धौ।

Rarest Archive

यात्राऽस्तु भैष्मी प्रति । हे ईश कृष्ण अस्मिन् मूलमाधवाख्ये क्षेत्रे त्वं भैष्म्याः पाणि परिगृह्य तदेतत् मूलमाधव उद्यान जगति अप्रतिम तीर्थ विधेहि । व्याप्तस्य ते यात्रा न नन्दयाम ।"

स शौरि. नित्य निजोरुस्थितया भीष्मपुत्र्या. रुक्मिण्या. नृत्यद् घनोत्तुङ्गकुचयो ग्रहस्य[1] प्रत्यूहशान्ति काङ्क्षमाणः इव ग्रहशान्ति[2] कर्म चक्रे ।

रोम्णा हर्षणकारिणि श्रवणत पापौघविध्वंसिनि
प्रेम्णा चिन्तयतां विचित्रविमलश्लाघ्यार्थसन्दायिनि ।
सञ्जाते भुवि रुक्मिणीशविजये सद्वादिराजोदिते
सर्ग. पञ्चदशो मुदामयमभूत् स्वर्गीश्वराणां कुले ॥

षोडशः सर्गः[3]

रुक्मिण्याः बुद्धिरूपा सखी स्वयवर समुद्योगे समागतान् स्वयम्भु प्रमुखान् सुरान् समीक्ष्य रुक्मिणी इत्थं बभाषे-

सखि, रुक्मिणि, पुरा ब्रह्मकल्पस्य आदौ वारिषु कमनीये फणीन्द्र तल्पे लक्ष्म्या सह कृतालयस्य मुक्तौघै सेवितपादस्य आदिपुरुषस्य नारायणस्य नाभिदेशात् पद्म अजनि, तत पद्मात् पद्मयोनि ब्रह्मा

(1) ग्रहणस्य ।
(2) आदित्यादिग्रहाणा पूजाकर्म ।
(3) कविनिर्मितोऽय रुक्मिणीस्वयवर । कृष्णस्य सर्वोत्तमत्व प्रतिपाद्यतेऽस्मिन् सर्गे । ब्रह्मादीन् यथास्वरूप वर्णयन्ती रुक्मिण्या सखी तेषु अस्वरसबीज प्रदर्शयति ।

Rarest Archive

अंजनि ।[1] सः मुररिपु– आत्माभिध., स्वयं इति प्रथितः अकारवाच्यः अस्य ब्रह्मण तात.। तत सखि, अमु मुनीन्द्रा. ख्यात्या स्वयम्भुव, अज, आत्मयोनि विदुः । चेतःस्थतच्छ्रुतिर्ति वेदगर्भमिति च विदुः । महोर्मिणां सङ्घातशतै आतते अम्भसि अदृष्टसद्दिष्टपद्ममूल विधिज्ञ स विधि. विजिताक्षवृत्ति. सन् पितर दिदृक्षु. तपस्तेपे । अथ ब्रह्मा फणासहस्राणां अमलरत्नानां रश्मिभि तृणीकृतार्कोडुपलक्षलक्ष्मी अम्बुकल्लोलाख्याया विलोलडोलाया. अन्तरे स्थितस्य नागाधिपस्य शेषस्य भोग शय्यामपश्यत् । तस्यां च सिन्धुपुत्र्या सह शयान, अम्भोजविशालनेत्र, मनोज्ञदोर्दण्डसहस्रभासं, प्रवालवत् मृदुना आघ्रिणा अरुणीकृतांशं सुवर्ण वर्णेन अम्बरेण शोभिमध्य, अगण्यलावण्यसमुद्रेण हृद्य, विशालनीलाचलकल्प, अल्पस्मिताननेन अन्धाकृत चन्द्रदर्पं, परिस्फुरद्भिः कुण्डल-हार-काञ्ची-किरीट-मुद्रा-अङ्गद-नूपुराद्यैः विराजित, तिग्ममरीचिरोचिषा शरीरेण सम्भासित सर्वदेश, विशालवक्षःस्थलशोभिरत्न, विचित्रभूषावलिभिः भूषिताङ्गैः विवृद्धभक्त्या अवनतः विमुक्तै. शक्रार्कविरिञ्चमुख्यै. परीतं श्रीमन्नारायणमपश्यत् । त नारायणाख्य चक्रवर्तिन वन्दिवत् शुभयशश्चिन्होक्तिभिः ब्रह्मा उन्मीलिताक्ष व्यधात् । तस्य नारायणस्य उन्नाल अब्जमेव वर आतपत्रम् । अहिराट् तत्सिहासनायितः । सन्नद्धा. मुक्ता एव भृत्या., समुद्रस्य मान्या ऊर्मय एव चामराणि । समुद्रनादाख्य. दुन्दुभिश्च आसीत् । रमारमेशाभ्यां अनुगृहीतः एषः विरिञ्च. सदा अच्युताङ्घ्रि स्मरणेन धन्य अग्रे क्रमात् इद समस्त जगत् ससर्ज । अय तदीयभक्तेषु अग्रगण्यः ।

सखि, अय प्राणगणाधिनाथः स्वयम्भुवा सर्वगुणैः समानः । पूर्व शिवादिदेवा. व्यवदन्त । ततोऽस्य सत्व प्रकटीबभूव[2] । अय जीवनिकाय काये हरं मनु जपन् विश्व जीवयति । हे आर्ये, जगत्पति. हरिः एनं

(1) अनेन ब्रह्मणः नारायणोत्पन्नत्वेन तदवरत्वेन अनङ्गीकारेऽस्वरस बीज उक्त भवति । पद्म योनि यस्य स पद्मयोनि ।

(2) अहमुक्थमस्म्यहमुक्थमस्मीसि ता अब्रुवन् । तत्प्राणे उत्क्रान्तेऽपद्यत तत्प्राणे प्रपन्ने उदतिष्ठत् इति श्रुते ।

निजाङ्कमारोप्यं जातसुखं विधत्ते किल । सुराणां हि क्वचित् रक्षोवशता भवेत् । अमुष्मिन् मुख्यप्राणे कदापि सा नास्ति । अच्छिन्न मुकुन्दधर्म. अय भाविकल्पे विरिञ्चतामेष्यति किल । हे अम्बुजाक्षि रुक्मिणि, प्राक् एष. पयोब्धिज दुर्विषह विष स्वयं पपौ । शिव: नष्टजवं अल्प पपौ । असौ हरे निदेशात् प्रियाय विमुक्तिमपि दातु प्रभु: हे सति, अथ स: इह भूमौ अवतीर्य हनूमदाख्य सन् हरे: सेवां व्यधत्त । अथ भीमरूप: सन् विभो: सेवां विधत्ते । मध्वरूपी भूत्वा अन्यै: त्रिदशै: असाध्यां सेवां विधास्यति ।" इति स्वबुद्धिसख्या उदीरिता सा भैष्मी निजांघ्रिपद्मावनतौ सुतौ तौ कृपाकटाक्षण निरीक्ष्य एतयो: प्रभु एव स्वकान्त मेने । सा पुनरवदत्– "अब्जासनात् लब्धजन्मा अय भवः । अय विहङ्गराज: । अय अहीश्वर: । समानविज्ञानबलप्रमोदा एते मुकुन्दसेवाभरिता: किल ।"

"देवि, सुपर्वरिपूणां गर्वविभेदने दक्षोऽयं शर्व: पूर्वं पुरत्रयं अजैषित् किल । हर्यंघ्रितीर्थेन परिपूतकपर्दं अत्यसाध्यमपि एन गौरी वशयाम्बभूव[1] ।

अच्छ: कुण्डलिराट् अयं महाशेष कच्छपतनो पवनस्य पृष्ठं पुच्छेन अवलम्ब्य, सरिदर्णवशैलपूर्णां सुपृथ्वी पृथ्वी फणातपत्रे सिद्धार्थ खण्डमिव बिभर्ति किल ।"

य. बलिना बलिना सम नियुध्य गोमन्तस्य मूर्ध्नि निजदेवतायै हरये मुकुट प्रादात् स अय गरुद्भ्यां जनितेन वायुवा चालताद्रिद्वीपाम्बुराशि. अहिभिरपि वर्ण्यबल. सुपर्ण. । स. तार्क्ष्य अन्यसुरै असाध्य विष्णुवाहत्वं तपोभि: अवाप । अय अहीश्वर: तदीयतल्पत्व अवाप । तौ सुराणां विमुक्तिमार्गौ किल" इति । सती सा रुक्मिणी गरुत्मदंसाचल नीलमेघ फणीन्द्रहारोच्चयनीलरत्न उमेशहृसप्रियपादपद्म रमेश पति चकमे ।

सा सखी पुनरूचे "बलस्य अरि अय इन्द्र: त्रिविक्रमश्रीचरणप्रसादात त्रिविष्टपस्य ईश. अभूत् । पय.पयोब्धि विमथ्नता तेन नारायणेन असौ

(1) हरिपादोदकधारण स्त्यन्तरपरिग्रहश्च अस्वरसबीजमुक्तंभवति ।

'इन्द्र विचित्रभाग्यावृत कृत'। हे देवि, कल्पद्रुमः करिवर [1] कविवर्ग्य' वाजी,[2] इत्येतानि नित्य अस्य वशे भवन्ति किल। इन्द्रपदयोग्यमहाविभूति सोऽय इन्द्र मध्ये महासनगत. दैवी सभा अजस्र परिपाति।

अग्रचे भैष्मि अय सुराणां गुरु.। एष धर्म.। असौ सुधाकरः। स सहस्ररश्मि.। अयं च रत्नाकरशब्दित.। एषा महत्व अभिधा एव वक्ति।

इमे सर्वे सुरा नित्यं श्रीपतेः सेवाया वियोगस्य भीत्या अनिमिषाः विनिद्राश्च। तस्य श्रीपते करुणया प्रभूतस्य सुधारसस्य आस्वादनेन अमृतत्व प्रपेदिरे।

परिस्फुरद्भूषणभूषणाङ्गी भैष्मी नरान् तृणीकृत्य मरुत्वतः अत्युछ्रितस्य भाग्यस्य हेतु, सुरौघाणां सञ्जीवनस्य अमृतस्य मूलभूतं कृष्णं प्रति जगाम।

सखि, चित्प्रमोदमयाव्ययाङ्गः अखिलदोषशून्यः गुणाम्बुराशिः अयं मुकुन्दः विश्वजनस्य गुप्त्यै अस्मिन् भूतले अतातरत् किल। शास्त्रयोनेः अमुष्मात् जगतः जनि-स्थेम-लयादयः धर्माः भवन्ति किल। यद्रोमसु विश्वकोशाः तिष्ठन्ति। तस्य अमुष्य साम्य सुराणां कतमः उपैति? सेतिहासाः पुराणयुक्ता. समस्तवेदा स्मृतिभि सह एन प्रभु मुकुन्द समानशून्यं आमनन्ति। योऽय अर्घ्य विमृश्य लक्ष्मी लभते स्म। हे मृगाक्षि, यदीयपाद अण्डकटाहस्य भेदी, विधातु हस्तार्हणस्य सारवेदी सोऽय विविधै. अवतारै. वियोजितात्युद्धतभूमिभारः। विवेकसख्या इति विबोधिता आत्तमाला सा रमा तूष्णीं बभूव। परन्तु तदा तस्या. प्रहर्षचिन्हानि रुक्मिणी प्रभु त आकांक्षतीति ऊचु।

मुहूर्तावधि तयो. रुक्मिणीकृष्णयो. मध्ये दत्तपट विनिर्भिद्य मिथः स्पृशन्त्य. तयो' प्रभाः विवेकभाज' पुरुषान् प्रति सदा तयो' अखण्डित योगभाग्य विबोधयन्ति स्म। मङ्गलार्थं सीतास्वयवरमहोत्सवगानकाले जातौ रमाया पुलकः माधवस्य मन्दहासः एतौ, 'सा जानकी इयं रुक्मिणी

(1) ऐरावत। (2) उच्चैश्रवा।

Rarest Archive

अयमेव हि रामचन्द्र. तन्मुहूर्तकथया किं ? इति शसतः स्म। परस्पर निरीक्षणकर्मकाले, मुरारे. नयन भैष्म्याः मुखाम्बुजगत आसीत्। तस्याश्च नयन कृष्णस्य नाभिसरसीनिलय आसीत्। तदेतत् युक्तम्। असौ अर्कदृक् इय उत्पलाक्षी। विवाहसमये, बन्धुवर्गे गुडान्विताभिः शुभजीरिकाभि परस्पर वर्षति सति वक्ष स्थितया अम्भोधिसुतया जितः कृष्ण. तत्पक्ष्ये प्रयुक्त प्रथम बभार[1]। श्री नेत्रान्तनीलोत्पलचारुमालां मुरारेः आपादतलात् आकण्ठ सन्दधे। श्रीपति. आत्मपत्न्यां तस्यां भैष्म्यां तत्क्षण हृष्टरोमाख्यसत्कञ्चुक सन्दधे[2]।

"हे सखि, अय[3] उग्र। अमले, अय[4] चञ्चल। हे रमे, सोऽय गूढपात्[5]। असौ[6] वृद्धः। अय[7] ज्वलन। एष तपन[8] असौ हि[9] सद्वक्रतुण्डः। हे मुग्धे, एष अदन्तक[10] देवि, अय जल (ड) राट्[11]। असौ गोत्रासह.[12] इत्यादि अभिधया एव धिक्कृतसुरा श्री. 'अच्युत' आससाद।

वेधाः वैदिकमौलि. एष पवन सन्तत मन्त्र जपन् वर्तते, असौ शर्वः सुविरक्तधी, स मघवान् व्यापारभाराकुल, सूर्य पर्यटनप्रिय, स तु शशी दोषाकर असौ स्मरश्च अनङ्ग" इति कमला अखिलान् देवान

---

(1) वधूवरयो मध्ये पुरुषप्रयुक्त जीरिकादिक प्रथम कन्योपरि पतति चेत् पुरुषो जयवान् कन्याप्रयुक्त पुरुषोपरि पतति चेत् कन्या जयवतीति लोकप्रवाद। अत्र रमारूपेण कृष्णस्य वक्ष समाक्रम्य स्थिताया कन्याया जय सुस्पष्ट एव इति तत्पक्षै प्रयुक्तजीरिकाः कृष्ण प्रथम बभार।

(2) विवाहकाले कन्यया मालादातव्या, वरेण कञ्चुकादिक इति सम्प्रदाय रुक्मिणी लज्जावशात् कृष्णस्य मुख अदृष्टवा पादतल मारभ्यक्रमेण कण्ठपर्यन्त दृष्टवती। सैवनेत्रान्तनीलोत्पलचारुमाला कृष्णदर्शनेन तस्या हृदि रोमाञ्च सञ्जात। तस्यैव कञ्चुकोप मात्मम्।

(3) शिव (4) वायु (5) शेषः (6) ब्रह्मा
(7) अग्नि (8) सूर्य (9) गरुड (10) पूषन
(11) समुद्र. डलयोरभेदात्। (12) इन्द्र, कुलविरोधीति ध्वनि।

उपेक्ष्य यदूना पति वव्रे । स पद्मभू यस्य पुत्र , फणिपति यस्य शय्या, खगेशः यस्य रथ , शम्भु यच्चरणाम्बुमौलि अगभित् इन्द्र यद्दत्त साम्राज्यभुक्, विधुरवो नित्य यत्पद सङ्गतौ श्रीवधू यद्वल्लभा सुदती सा रुक्मिणी त वयं द्वारकानायक वरयाम्बभूव । या (मालिका) चम्पकानां सम्पदा अब्जवसते अमता वै, दूर्वाणां श्रिया स्वात्मन अमता, केतक्या विभवेन कृत्तिवसनस्य अमता, अम्भोजानां कान्त्या विधो अमता सन्नीलोत्पलानां शोभया दिनमणे अमता श्रीमत्तलख्या हेरम्बस्य अमता, परन्तु हरेः समुचिता सा रुक्मिणीकरस्था मालिका शोभते । प्रमोदोत्थितरोमराजि सा रमा, 'हरेः प्रसादैकभुजां सुराणां इमां माला कथ प्रदास्यामि' इतीव मुकुन्दकण्ठे समर्पयामास ।

व्यालोलै हारै उज्ज्वला सा रुक्मिणी धाराम्बुकदम्बकेन सह प्रेमाश्रुधारां हरे आवेद्य भ्राजन्मालिकया सम प्रणयसन्मालां आवेद्य नेत्रान्तेन सुनीराजन आवेद्य, शुचिस्मितामृतरसं हरे. नैवेद्यमावेद्य तत्फल इव[1] तस्य हरे पार्श्वं मन्द उपाश्रयत् । समलङ्कृताङ्ग्यः सङ्गीतमङ्गलकथा नार्य विवाहकाले नवकुङ्कुमाभान् अक्षतान् रुक्मिणीकृष्णयो प्रववृषुः । सौवर्णविष्टरगतौ कन्यावरौ तौ सदयैः अपाङ्गै तासां अक्षत फलमेव प्रववर्षतु ।

गृहीतपाणी तौ वधूवरौ रुक्मिणीकृष्णौ आस्यगं त रम्यरहस्य गोष्ठ्या आत्मीय विधातुमिव लाजसमेधिताग्नि प्रदक्षिणं चक्रतु किल ।

तत चतुर्थे दिवसे प्रहृष्टौ एतौ, चिररतौ "तल्पतनौ फणीन्द्रे विलम्बिनि सति क्षमां वहत" इति नागबलि नून प्रचक्रतु । सा रुक्मिणी मन्दस्मिताख्येन मौक्तिकेन, सदपाङ्गाख्यैः हयैः हृत्पुर वक्षोजद्विरदेन, कायकनकेन, उद्धूतरोमाख्यै अनुगै तत्ससक्तमनोरथेन विविधाङ्गानां श्रीविचित्राम्बरै तस्य कृष्णस्य योग्यस्य अमृतस्य साध नया अधरभुवा तं कृष्ण सन्तर्पयामास । तत्र स्वयवरे ज्वलत्कलापा.

(1) अभिषेक–पुष्पमाला–नीराजन–नैवेद्यादिभि हरे पूजाया कृतया तत्सामीप्यगमनमोक्षलक्षणफलमिव ।

स्फुरदङ्गलेपा: विचित्रवस्त्रा स्मितशोभिवक्त्रा नरा नार्यश्च वधूवराभा किल सञ्चरन्ति ।

स्वर्गिभि: गीयमान· भग्नदुर्जनदर्प: असौ रुक्मिणीरमण: दुर्गम स्व दुर्ग आविश्य बभौ ।

समुद्रवर्णनम् :

सुफेनस्य कान्त्या सितपार्श्वयुग्म: और्वस्य शिखाभि. सुपीत मध्य , अन्यत्र सितेतर स: समुद्र भूतधात्र्या विचित्रवस्त्रश्रियमातनोति । वार्धि. असह्यवन्हिव्यथितोऽपि, उदरे अनन्तरत्नानि पिधाय जातु पानीयमपि न प्रदत्ते । घनस्य लाभादधिको हि लोभ. । सरित्पति: सरितां मुखतो हि वेलां विलङ्घयति । अत्र: स विवेकहीन । तथाहि । नार्या सह सङ्गताना कुतो विवेक कुत एव वेला ?

सरित् बहूपभोग्या अपि समुद्रतटे कण्टकितोपकण्ठा सा न बहूपभोग्या, काश्चित् खलु रहसि विटान् उपाहूय स्वभर्तु तटे सदाचारपरा: भवन्ति । सुहृत् तोयेश स्वीयाशायुवतिमुपेत्य रागभाज इन्दो नाश वीक्ष्य आनन्दात् अनिश उच्चै: वृद्धि उपैति । एकस्यामभिरतिमिच्छतो क्व मैत्री ? वार्धि अन्त कृतान्तोपमेन वाडवाग्निना सन्तप्तगात्रोऽपि मुदा गर्जन् इव फेनस्मितश्री गगनस्पृगूर्मि. सन् गाम्भीर्यमावेदयतीव वर्तते । कृष्ण· स्वगृहस्य सिन्धो दोषिसखित्वजाता असेव्यतां जहार इति न चित्रम् । यत तद्दिष्टा एव हृष्टा सन्त महान्ति पापानि हरन्ति । पुरा अपि अजेय मुरजिन् अत्र समुद्रे पुरी विधाय अत्यजेय अभवत् किल । कलत्रवस्त्रे कृतालय क. खलु जेतुकाम ?–इत्थं मम आभाति । रम्येण फेनाख्येन आसवेन शोभिवक्त्र. स समुद्र विधूदये सति तरङ्गाख्यै: हस्तै नदीनां जघन सस्पृशति । सरसस्य कस्य हि इन्दु दृष्टया काम न स्यात् ? सितेतर पीतकृशानुमध्य: नदीभि. सहस्रश श्लिष्टतनु. अब्धि अनेकयोषिता परितोषदायी पीतवासा स: कृष्ण इव भासते ।

मुनीश्वरा वर्त्मनि इत्थं वारिराशिं वर्णयन्त. ता द्वारवती समेत्य मुदा कृष्ण उपासते ।

रोम्णा हर्षणकारिणि श्रवणत पापौघविध्वंसिनि ।
प्रेम्णा चिन्तयतां विचित्रविमलश्लाघ्यार्थसन्दायिनि ।
सञ्जाते भुवि रुक्मिणीशविजये सद्वादिराजोदिते ।
सञ्जातः सुरमण्डलीषु सुतरां सर्गो मुदां षोडश. ॥

सप्तदशः सर्गः*

स्वभजकस्य अब्जकुलस्य[1] उदयहेतवे भवमहानलात् मुक्तभयाना अनुगानां छविपदे[2] जलनिधौ वरभोगिनिकेतने[3] लसते अविपदे नारायणाय

*अस्मिन् सर्गे प्रथमत चतुर्विंशतिपद्यै एकार्थेन तत्तदवतारा. अन्यार्थेन सर्वपद्येषु कृष्णकथा च ऋषिवाक्यतया वर्ण्यते ।

(1) मूलरूपनारायणवर्णनम्- मुक्तब्रह्मसमूहस्य ।

(2) लक्ष्मीविमुक्तगरुडविष्वक्सेनाद्यनुगाना कान्तिस्थाने जलनिधौ प्रलयसमुद्रे । कृष्णकथा- स्व भजकस्य अब्जस्य चन्द्रस्य कुलस्य यादववंशस्य उदयहेतवे, भवस्य काशिराजेष्टदैवस्य शिवस्य महानलः द्वारकानाशाय प्रयुक्तः कृत्यारूपाग्नि तस्मान्मुक्तभया अनुगा यादवाः तेषा कान्तिस्थाने द्वारावतीपत्तने-द्वारावती समुद्रस्थे-वरभोगिनां श्रेष्ठ सुखिना निकेतने- लसते विपद्रहिताय कृष्णाय नमोऽस्तु ।

(3) शेष एव निकेतन तस्मिन् ।

नमोऽस्तु। मुनिजना जनककर्दमशोभिगृहाङ्गणे कुशकृतस्थलसिद्ध पुरीश्वर कठिणतत्त्वगतिश्रमदायुध निजनाथ अमु जगु[1] ।

मुने, यमजनि निजचिद्घनमूर्तित प्रकटित तापसविग्रह भज । गिरिमूर्धनि नरधृत यत्पद लसता ईड्यनखेन्दुना लसते[2] । विमलदत्तपद प्रणतार्जुनाभ्युदयहेतुः अमानवयोगधृत् सुधिया अनसूयया हृदिधृत हि सः मम भवतापहरो भवतात्[3] । भरतशास्त्रविशारदताकर, नवयोगिनां

---

(1) कपिलावतार.– मुनिजना जनकस्य कर्दमऋषेः शोभिनि गृहाङ्गणे कुशं. कृतस्थलस्य सिद्धपुर्याश्रमस्य ईश्वर कठिणतत्वानां अवगतौ श्रमपरिहारकायुध निजनाथ अमु कपिल जगुः । कृष्णपक्षे– मुनिजनाः जनकस्य नन्दगोपस्य कर्दमेन पङ्केन शोभिनि गृहाङ्गणे, कुशनामकदैत्येन कृतेस्थले सिद्धाया. पुर्याः द्वारकायाः ईश्वर कठिणस्य तस्य कुशदैत्यस्य त्वचः अति श्रमदायुध (शार्ङ्ग) वन्तं निजनाथं कृष्ण अमु जगु ।

(2) नारायणावतारपक्षे– हे मुने, यमात्जनि यस्य तं, निजा स्वविषयिणी चित्ज्ञान तया घना निबिडा । सा च सा मूर्तिनाम्नी धर्म पत्नी तस्या. प्रकटित, मुनिरूप नारायण भज । गिरिमूर्धनि शतशृङ्ग पर्वतमध्यस्थे नारायणवासभूते तुङ्गशिरसि नरेण नरनामकऋषिणा सेवार्थं धृत यस्य नारायणस्य पद लसता ईड्यनखेन्दुना विलसते ।

कृष्णावतारकथा– हे मुनय. य अजनि कृष्ण भजत । स कृष्णः निजा स्वाभाविकी चिद्घना ज्ञानमयी मूर्ति मूलमूर्ति कृष्णकेशात्मिका तत प्रकटित विग्रह आप । गिरि स्तुतिरूपवाचि मूर्धनि अवनते शिरसि नरेण अर्जुनेन धृत स्तुत यस्य कृष्णस्य पद लसता ईड्य नखेन्दुना विलसते ।

(3) दत्तावतारः– विमलदत्तात्रेयनामधेयः प्रणतस्य कार्तवीर्यार्जुनस्य अभ्युदयस्य हेतु दिव्ययोगाभ्यासधारी सुधिया अनसूयादेव्या गर्भे धृत स दत्तात्रेय मम भवतापहर भवतात् ।

Rarest Archiver

पितृवत् प्रियकृत, मधुराधिपं य ऋषभ सुमधुरा सुमति जयन्ती अन्तिके अगात्[1] ।

स अनुभव जनकदोष उपेत्य शर्वरीतिजननीमपि हर्षयन् अन्वह रसदोहकृत् बालवपुस्सुरसद दृशि घटयते[2] । य अगदपाणि. विजनिता-पदवद्यवनाय शमदायक अभूत् । कृती उदधिरत्न सहजश्रिय इभजेडच-गति अमु हृदि भजेत्[3] ।मधुरयाजित, दानवसद्गिरी अशनिकाय, गतागम

कृष्णकथा-विमलाय भवताय दत्तद्वारावतीपद. प्रणतस्स्य अर्जुनस्य अभ्युदयहेतु अमान-वयो (पक्षि) मद्गोवर्धनागधृत् स कृष्ण. मम भवतापहरो भवतात् ।

(1) ऋषभरूपम्- भरताख्यस्वपुत्रस्य शास्त्रे विशारदताकरं, कविहरिरित्यादि नवयोगिना भरतानुजानां पितृवत् प्रियकृत मधुराणां वचसां अधिप ऋषभनामक सुमधुरा सुमतिः जयन्तीनाम्नी पत्नी अन्तिके अगात् ।

कृष्णकथा-भरतशास्त्रस्य नाटचस्य विशारदताया आकर पितृवत् नवयोगिनां (उपनीतानां प्रथमत. कृष्णमन्त्रोपदेशात्) प्रियकृत मधुरा-धिप ऋषभ (श्रेष्ठ) कृष्ण सुमधुरा विषयादिक जयन्ती सुमतिः अन्तिके अगात् ।

(2) शिशुमाररूपम् : स. नारायण. भव अनु प्रतिशिशुमाराव-तारे) जनक दोषाख्य प्रजापति उपेत्य शर्वरी इति नाम्नी जननीमपि हर्षयन् अन्वह अद्भुतरसस्य दोहकृत् बाले वपुषि च स्फुरतां सुराणां सद (सभा) जनाना दृशि घटयते । कृष्णकथा- अन्वह्न स्फुरत् सुरसदः रसस्य (सुखस्य) दोहकृत् बालवपुः कृष्ण जनकस्य नन्दस्य दोष (हस्तं) उपेत्य (तत्करेण लालित) जननी यशोदामपि हर्षयन् शर्वस्य रीतेः (दिगम्बरत्वस्य) अनुभव पश्यता जनानां हृदि घटयते ।

(3) धन्वन्तरिवर्णनम्- यःधन्वन्तरि अगंदपाणि. सन् विज नितस्य रोगापद्-अवद्याख्याय वनाय शमदायक. अभूत् उदधेः क्षीर-समुद्रस्य रत्नमिव रत्न सहजश्रिय (सहजाताश्रीः यस्य स) इभजवत्

Rarest Archiver

साधक, हर्षकराकृते, भवगत, अवगताखिल नरतुरङ्गम नः पाहि[1] । यत: जलान्तर्वर्तिनिजास्पद प्रणतविप्रजनाम अकरोत् ननु । बिमलभीमरथीप्सितदायकः अय अच्युतःअविजित अपि स्वविजितः[2] । रुचिर केशव ते शम्बरधाम[3] लसति । समाकृते मारमणः[4] असि । सकलगोकुल-

---

ईड्यगति अमु धन्वन्तरिं कृती हृदि भजेत् । कृष्णकथा– यः कृष्ण विजनिना पक्षिणा तापदव्याधवत् अगदणानि सन् कालयवनाय शम-दायक अभूत् त सहजश्रिय ईभजेन कुवलयापीडेन ईड्यगति उदधिरत्न (कौस्तुभरत्नवन्तं) अमुकृती भजेत् ।

(1) हयग्रीव वर्णनम्– दानवस्य मधोः रयेण अजित, दानवानां सभाख्यगिरौ अशनिवत् कठोरकाय, गतस्य मधुकैटभाहृतस्य आगमस्य वेदस्य साधक, हर्षकराकृते, भवगत, (भवः गतः यस्मात्) सर्वज्ञ, नर-तुरङ्गम (हयग्रीव) नः पाहि । कृष्णकथा-मधुरया सद्गिरा जित-(दुर्योधनाख्य) दानव, वशानां पाण्डवानां निकायस्य गतस्य राज्यस्य आगमसाधक नरस्य अर्जुनस्य तुरङ्गमाणां हर्षकराकृते भवगतौ (अपि) अवगताखिल श्रीकृष्ण, नः पाहि ।

(2) पाण्डुरङ्ग वर्णनम्– यतः पुण्डरीकतीर्थजलस्य अन्तरे वर्तमान निज आस्पद स्वगृह प्रणतात् विप्रात् जातनाम (पुण्डरीकदेवालयः इति) अकरोन्ननु । विमलभीमरथ्या ईप्सितदायकः अय पाण्डुरङ्ग. अविजितोऽपि स्वभक्तेन विजितः ।

कृष्णकथा– प्रणतानां मधुरापुरस्थ विप्रजनानां कालयवनकृतात् आमयत निजास्पद जलान्तर्वर्ति (द्वारकासमुद्रवर्ति) अकरोत् ननु । विमलस्य भीमाख्यस्य रथिन ईप्सितदायकः अयमुच्युत. अविजितोऽपि स्वभक्तैः विजित. ।

(3) केशवादिरुपाणि– नीरक्षीराम्बुशम्बरम् । उदकाख्यगृहम् । अनेन नारायण इत्युक्त भवति ।

(4) सर्वावतारेषु समाकारत्व, माया. रमणः माधवः असि ।

पालक[1] अरिहर अखिलवास[2] न' दुष्कृति परिहर । मधुमदक्षयमाल्य-सुविस्तृते, कुजनमानसमाप्तिदविक्रम, सोमरसार्थिषु सुखदवामन उदाय अवनौ मुदा श्रिय आर्जयसे[3] । करणपालनशील, जलजनाभ, कं आश्रिताः नते स्थिति वदन्ति । वरदामधरोदर प्रियजुष अमी न ते यजुष अग्निबलीन् इव स्थिति विदु[4] । बिभजते प्रियमृगाजिनता अखिलदा अत्यरुचिप्रदा इति अहो भजतां मुदे शुभसमुद्रकर वरयतेः स्थिरभूति त 'भजत ।[4]

---

(1) कलाभि. सहित सकलम् । गोकुल शास्त्रम् । तस्य पालक गाः शब्दान् विन्दते प्राप्नोति-पालयतीति गोविन्द. इत्युक्त भवति ।

(2) अखिलेषु वासः यस्य सः । विषलृव्याप्तौ इति धातोः 'विष्णुः इत्युक्तं भवति ।

कृष्णकथा– हे रुचिर केश ते वश वरधाम द्वारका लसति । हे मारमनो– असि समाकृते सकलगोकुलपालक कंसाद्यरिहर अखिलवास कृष्ण, न' दुष्कृति परिहर ।

(3) मधुसूदनादय – मधु-मद-क्षय (मधुसूदन) माल्या. आल्याः असुविस्मृते (लक्ष्मीप्राणनाथ) , कुजनाना मानसमाप्तिदपादविक्रम (त्रिविक्रम) सोमरसार्थिषु देवेषु सुखद वामन अवाप्तसकलकाम अवनौ मुदा श्रिय अर्जयसे (श्रीधर.) कृष्णकथा–मधुमत्-अक्षयमाल्य- सुविस्तृते कृष्ण कुजनानां मान-समाप्तिदविक्रम अमरसार्थिषु देवसहायवत्सु अमनस. दुर्जनस्य सुखस्य दावाग्निकल्प उदाय अवनौ मुदा श्रिय आर्जयसे । अथवा द्वारावतीश्रिय उदाय (समुद्रजलाय) दातु आर्जयसे ।

(4) हृषीकेशादय – करणाना पालनशील (हृषीकेश) जलजनाभ (पद्मनाभ) क मुख्यप्राण (आश्रिता) त्वद्भक्ताः नते नम्रे भक्ते तव स्थिति वदन्ति । वरदामधरोदर (दामोदर) तव प्रियजुषः अमी मध्व शिष्या' नते तवभक्ते यजुर्वेदाध्ययनात् यज्ञान् इव स्थिति विदुः । कृष्णपक्षे– सृष्टयादिकरणपालनशील भवदन्तिकं आश्रिताः अधरोदर

Rarest Archive

प्रियप्रणयपाशवृत कुमतिना अतिनाशनदण्डधृत् त्व अथ भजक भाविविरिञ्चकृते इत अब्धिगः सन् तदवनि शिवरूप्य एष्यसि[1] । अनिश भुवनवासी मनुसस्तुन अन्वह्न विधिविरोधिविनाशकृत् अनिमिषप्रभु आगमहर्षदः जवशोभितसागर निजवशोऽस्तु[2] ।

प्रियजुष. अमी यादवा अयजुषः अग्निबलीन् यज्ञानिब ते वरदा स्थिर्ति न विदु ।

(4) वेदव्यासवर्णनम्– स्वाङ्गात् विभाग कुर्वते वेदव्यासाय (कृष्णाजिनंमुञ्चते) प्रियमृगाजिनता अति अरुचिप्रदा । कृष्णाजिन मुञ्चत तस्य अरुचि जायते । (कृष्णाजिन कदापि वेदव्यासः न मुञ्चतीत्यर्थः) कथमिव । अखिलदा ब्रह्मविद्या इव । भजतां शुकादीनां मुदे शुभ स-मुद्र करं धरन्त वरयतेः मध्वाचार्यस्य स्थिरज्ञानप्रद त वेदव्यास भजत । कृष्णपक्षे–भजता यादवाना मुदे शुभसमुद्रकर (द्वारकायाः परित) आजौ पारिजातापहारकालीनयुद्धे नताखिलदैवत कृष्ण, स्थिरभूतेः शिवस्य मह भजते शिवभक्ताय अत्यरुचिप्रदा (नते विष्णो जायमानो न जातः इत्यादि) ऋक् वरयते । मुहु शिव कृष्णात् विभजते च ।

(1) उडुपीकृष्णवर्णनम्– प्रियप्रणय. पाशवृतः कृष्ण कुमतिनां अतिनाशनदण्डधृत् त्व अथ भजकस्य भाविविरिञ्चस्य मध्वाचार्यस्य कृते इत द्वारावतीत. समुद्र (मार्गगः) सन् तदवनि शिवरूप्य एष्यसि । द्वारकाकृष्णपक्षे– शिव (मङ्गल) रूपी कुमतिना जरासन्धादिना अमित. अज्ञात अमति (अज्ञान) नाशनदण्डधृत् त्व इदानीविव अथ ब्रह्मण. आगामिनि दिनेऽपि मूलरूपेण अब्धिग क्षीरसमुद्रशायी सन् भजकस्य भाववत भक्तिवत विरिञ्चस्य कृते प्रियेषु भूमिस्थभक्तेषु य प्रणय स एव पाश तेन वृत सन् तदवनि भक्तानां भूमि एष्यसि ।

(2) मत्स्यावतार वर्णनम्– अनिश भुवन (जल) वासी वैवस्वत मनुसस्तुत अन्वह्न विधिविरोधिना दैत्यानां नाशकृत् वेदान् आनीय पुनः प्रचारकरणेन देवानां हर्षद जवेन शोभितप्रलयसमुद्र. अनिमिषाणां मत्स्यानां प्रभुर्हरि निजवशोऽस्तु ।

Rarest Archiver

भुजग दिक्करि-भारजशोकहृत्, सुरमनोरथपूरणकारणः स्वमत-वारिनिधे मथने पटुः गिरिधरः अरिधरः अय इह आगतः[1]। स्ववश गोरिपुभीषणचेष्टितः वरवराहतया द्विषा दवकृन् मखसहायकृति धरया अर्चित अय अमलया कमलया वृत. अहो ।[2] अरिहिरण्यकसक्षय कारक अद्भुतचेष्टित अघकृदिन्द्रकृतार्चनतोषित, अजमनोहरविक्रम नरमृगाधिप हे मनः भज[3]।

कृष्णपक्षे– अनिश भुवनेषु लोकेषु वासी अन्वह मनुना कृष्ण मन्त्रेण सस्तुत. विधे. विहितराजसूयादीनां विरोधिन जरासन्धशिशुपालादय तेषा विनाशकृत् इन्द्रप्रस्थं प्रति स्वागमेन पाण्डवानां हर्षद. द्वारवती प्रति पुन. परावृत्य गमनजवेन शोभितसागर. अनिमिषाणां देवानां प्रभु श्रीकृष्ण. निजवशोऽस्तु ।

(1) कूर्मावतार वर्णनम्– भुजगस्य दिक्करिणां च भूभारजशोक हृत्, सुराणां अमृतपानमनोरथस्य पूरणकारण, स्वस्य समतस्य क्षीर समुद्रस्य मथने पटु. मन्दरगिरिधर चक्रवर अय कूर्म. इह क्षीरसमुद्र मथनप्रदेशे आगत. । कृष्णकथा– भुजगस्य दिक्करिणा च भूस्थित दैत्य भारजशोकहृत्, सुरमनोरथस्य पूरणे कारण (युद्धसाधनं) यस्य स. सु-अमतदैत्याख्य समुद्रमथने पटु गोवर्धनगिरिधर., अरीणां धर (पर्वत) इव स्थित अयं कृष्ण. इह द्वारवत्यामागत. ।

(2) वराहावतार वर्णनम्– स्ववशाया गो. भूमे. रिपो. हिरण्याक्षस्य भीषणचेष्टित. वरवराहतया द्विषा दवकृत् (परस्परहन्यमान दंष्ट्राग्रेण अग्निकृत्) मखस्य यज्ञस्य सहाया साधनीभूता. कुशाद्या तेषा स्वाङ्गेभ्य करण यस्मात्स धरया अर्चित अय वराह अमलया कमलया वृत । कृष्णपक्षे– स्ववशाना गवा रिपूणां व्याघ्रादीनां भीषणचेष्टित. द्विषा वररुद्रादे वरेण अहतयादवकृत् पाण्डवाना राजसूयमखस्य सहाय कृति प्राग्जोतिषपुरे नरकासुरमात्रा धरया अर्चित अय कृष्ण अमलया कमलया रुक्मिण्या वृत. अहो ।

(3) नरसिंहावतार वर्णनम्– अरे. हिरण्यकशिपोः सक्षयकारक वृत्रहत्यारूपाघकृता इन्द्रेण कृतार्चनेन तोषित अजस्य ब्रह्मणः–मनोहर

बलहृदार्तिहरानुजनि बलिपराजयकृत् सतां जयकृत् अवनिजात पलाशसुदण्डधृक् भुवनपावनपादसरोरुह प्रभु ।[1] युधि सहस्रकरोर्जित बाणहृत्परशु अर्जुनमत्क्षितिदायक कुभरसह्रणे उग्ररणे अग्रणी द्विज भव. अजभवोन्नतिदायक ।[2] अहिमकान्तिमन कुल कलया अधिक भूषित व्यतनुत । अन्यदशास्यसुखण्डन क्षितिसुतातिसुतापभिदाकृति अभय अञ्जसा व्यतनुत ।[3]

विक्रम. नरमृगाधिप नरहरि. हे मन भज । कृष्णकथा– अरीणां दुर्योधनादीनां हिरण्यकस्य (सम्पद) सक्षयकारक शैशवेऽपि उदरे ब्रह्माण्डधारणादि अद्भुतचेष्टित, स्वयागभ्वसे कृष्णावज्ञारूपापराधकृता इन्द्रेण कृतार्चनेन तोषित, (पट्टाभिषेकादिना तोषित) अजस्य-कामस्य मनोहर-विक्रम पादविक्षेप यस्य स त, नरमृगाधिप कृष्ण हे मन भज ।

(1) वामनावतारवर्णनम्– बलासुरहृद इन्द्रस्य आर्तिहर अनुजनि, बलिचक्रवर्तिपराजयकृत् सता जयकृत् अवनि-जात-पलाश-सुदण्डधृक्, भुवनपावनपादसरोरुह वामन अस्माक प्रभु ।

कृष्णकथा- बलरामस्य हृद हृदयस्य आर्तिहरानुजनि, बलिनां जरासन्धादीना पराजयकृत् सता पाण्डवाना जयकृत् अवनिजातानां पलाशाना राक्षसाना सम्यक् शिक्षाकृत्, भुवन लोक पातीति भवनप. अर्जुन: तस्य अवन यस्मात् भुवनपावनम् पादसरोरुह यस्य सः, कृष्ण. अस्माक प्रभु. ।

(2) परशुरामावतार – युधि सहस्रकरस्य कार्तवीर्यार्जुनस्य ऊर्जितबाणहृत्परशु, तस्य अर्जुनस्य सती क्षिति क्षयः तस्यदायक. (बाणान् छित्वा तस्य पि खण्डन कृतवान् इत्यर्थः). क पृथ्वी बिभ्रति इति कुभरा क्षत्रिया तेषा सहरणे उग्ररणे अग्रणी ब्राह्मणकुलोत्पन्न. परशुराम: अजभवयो उन्नतिदायक ।

कृष्णपक्षे– युधि सहस्रकरस्य ऊर्जितबाणासुरस्य हृदि परशुरिव, अर्जुनस्य सक्षितया दायक कु-भर-सहरणे उग्ररणे अग्रणीः द्विजभवः

Rarest Archiver

रुचिरभारतपुण्यकथोदय, शुकसुभाषणतोषणकारण क्षितौ विमलधर्मशुभस्थितिकृत् असौ अथ नृणा यमसौहृदकृत् ।[1] स्ववित् यथा अम्बर भुवि इत आत्मन: नवमाकृति सकलवित् खलसञ्चयवञ्चक. स्वमतिद एष: तथागत न मतिदोषहरोऽस्तु ।[2] वितत, विष्णुयशोजनन अञ्जसा कृतयुगोन्नतिदातृकरोजित, द्विजसुहृत्कलिकाननदैन्यहेत्वसिधर, धराभयकारक. असि ।[3]

इत्थ सरससल्लापै: सतां पति श्रीकृष्ण सस्तुवन्त ते मुनय: प्रत्यहं तत्पदाम्भोज ईक्षमाणा द्वारवत्या वसन्ति ।

द्विजनां ब्राह्मणाना भव: मङ्गल यस्मात्स) कृष्ण. अजभवस्य शिवस्य कैलासयात्रादिना उन्नतिदायक. ।

(3) दाशरथिराम.–अहिमकान्तिमत: सूर्यस्य कुल कलया अधिक भूषित व्यतनुत । अन्यस्य वैरिण: दशास्यस्यासुखण्डन. क्षितिसुताया: सीताया: सुतापभिदाकृति: राम लोकस्य अञ्जसा अभय व्यतनुत ।

कृष्णकथा– क्षितिसुतस्य नरकासुरस्य अतिसुताप-भिदा-कृति: अन्येषा शत्रूणा दशा-असि-असु-खण्डन. काना (मस्तकाना फणानां लयेन आकुल (क लय-आकुल) अकान्ति अहि कालिय अत. यमुनाहृदात् अधिकाया जन्मभूम्या उषित (अधिक-भू-उषित) व्यतनुत । अञ्जसा तस्य गरुडात् अभय व्यतनुत ।

(1) पुनर्वेदव्यास वर्णनम्: रुचिरभारतपुण्यकथोदय. शुकाचार्यस्य सुभाषणास्यतोषण कारणवान्, क्षितौ विमलधर्मस्य शुभस्थिति कृत्, असौ श्रीवेदव्यास नृणा यमेन सह सौहृद करोति । तदुक्तधर्म माचरता यमभय नास्तिइत्यर्थं ।

कृष्णकथा– रुचिराया. भारतस्यार्जुनस्य सम्बन्धिन्या पुण्य कथाया गीताया .उदय यस्यात्स, शुकवत् सुभाषणास्यतोषणकारण वान्, क्षितौविमलधमराजस्य शुभास्थतिकृत् यमयो नकुल सहदेवयो सौहृदकृत् अय असौ द्वारावतीस्थ श्रीकृष्ण ।

Rarest Archiver

द्वारवती वर्णनम् :

इह अखिलैश्वर्यमुभोगवृद्धे, परत्र नि श्रेयसमौख्यसिद्धे पर द्वार कृष्णाख्य मह अवाप्य असौ पुरी पृथ्व्यां द्वारवती बभूव। यत सेय पुरी कवाटे विवृतेऽपि हरिन्मणीनां महत्या प्रभया कवाटान्तरिता इव भाति। सा कथं नु द्वारवतीतिमन्ये। अरिसेना यदीय त्नावृत्हेम-वप्रसकाश अभ्येत्य समुद्यतासीन् प्रतिबिम्बराशीन् निरीक्ष्य दीना सती बहुशः निवर्तते स्म।

मुक्तावलीभिः राजितसर्वगेहा, नित्य प्रमोदाननसत्समूहा, दुष्टैर गम्या मुरारे दयिता सा द्वारवती पुरी मुवितप्रभा। विचित्र-रत्नावृत वप्र-सौध-गृहाङ्गना-गापुर-वापिकौघं इद पुरीरत्नं अवाप्य अब्धिः नूनं

पूर्वपृष्ठतोऽनुवृतम्—

(2) बुद्धावतारः– स्वविंत् स्वप्रकाशः यथा अम्बरं भुवि इतः व्याप्तः परमात्मनः नवम-आकृतिः सकलवित् खलानां त्रिपुरस्थदैत्यानां सञ्चयस्य स्वरचितबौद्धागमेन सु-अमति (मिथ्याज्ञान) द, एषः तथा गत बुद्धः नः मतिदोषहरोऽस्तु।

कृष्णकथा– यथा अम्बर, भुवि तथाऽऽगत. स्वै. भक्तै. विदित परमात्मन. सकाशात् अनवमा अनूतनाआकृति, सकलवित्, दुर्योधना-दिखलसञ्चयस्य वञ्चक, स्व-मतिद कृष्ण न अमतिरूपदोषहरोऽस्तु।

(3) कल्क्यवतार.– हे वितत, विष्णुयशोजनन, (विष्णुयशोनामक ब्राह्मणाज्जनन यस्य) अञ्जसा कृतयुगस्य उन्नतिदात्रा करेण ऊर्जित, द्विजानां सुहृदि कल्कल्याख्य कानन तस्य दैन्य (छेद) कारणासिधर हे कल्किन् त्व धराया अभयकारकोऽसि।

कृष्णकथा– विततस्य विष्णो यशोजनन (यशस प्रादुर्भावः यस्मात्) अञ्जसा कृतं युगवत् (रथाङ्गविशेषवत्) उन्नति. दैर्घ्यं यस्य स तेन दात्रा करेण ऊर्जित, द्विजसुहृत् (चन्द्र) कलिकानन, शत्रूणां दैन्यहेतुनन्दकाख्यासिधर हे श्रीकृष्ण त्व धरायां. अभयकारकः असि।

रत्नाकरशब्दित बभूव । आशुगस्य बलेन समुद्र उत्सृज्य पुरी प्रविष्टा मुक्तावलि. मरुद्बलेन भवाब्धि उल्लङ्घ्य आप्तविकुण्ठमुक्तावलिवत् विरेजे ।

'स हरि मदीय पारिजाततरु नयतु । उच्चागम स्व.पुरी अमरावती नेतु न समर्थ भवति ।' इति मरुत्वता ईरित एव कृष्णः इमां द्वारवतीपुरी स्वर्गादपि रम्यतमा चकार । पोत अधिष्ठिताः वणिक्समूहाः स्वकार्यलाभाय अमू द्वारवती श्रयन्ते । हरिपादपोतकृताश्रयाः सिद्धजनाश्च ज्ञानानन्दादि स्वरूपसिद्ध्यै दूरात् अमू द्वारवती श्रयन्ते ।

इमा पुरी अधिश्रित्य व्रतिनः परत्र लोके विमुक्तिमेव व्रजन्ति । पुरा ससारावस्थायामपि नाकाधिकद्वारावतीभाजा तेषा सः नाकः बहुमानपात्र कथ स्यात् ? यस्या द्वारवत्या श्रुतिसङ्गतेन स्वकोटि मात्रेण गुणेन विनम्रवक्त्रा अवज्ञासञ्छादनवैखरीज्ञा काशी धनुषः अनुकार बभार ।

इन्द्र सुधर्मपुञ्जस्य अवने मूलभूत द्वारवत्यां कृताधिवास अच्युतं वीक्ष्य पुरावत् स्वससद अत्युच्चसभायाः भिया इव स्वकीयां सुधर्मा सभा कृष्णाय प्रददौ । स. मागध कृष्णस्य परिखीकृताब्धि पुरी अगम्यां निशम्य निरूढचिन्तः इह क्रमात् जरासहितगात्रसीमा सन् जरासन्धः इति योग्यनामा बभूव ।

इह द्वारवत्या यामिका. रात्रौ सितानुलेपाम्बनमाल्यहाराः शुचिस्मिता व्रजन्ती वारवधू उदितेन्दुद्युतित अतिरिक्ता लक्षयितु न क्षमन्ते । इह मुरारे. पुरे मनोज्ञा. बुधाः वदान्याश्च काव्योचितश्लोक[1] अपेक्षमाणा विद्वज्जनानन्दकरान् अर्थान् पदेपदे विचारयन्ति । यस्य अघ्रितीर्थेन गङ्गया, यदीयनाम्न बलेन च काशी प्रथिता आसीत् किल, तस्य मुरद्विष. निवासभूता इय द्वारवती पुरी त्रिलोक्यां अद्वितीया ।

(1) काव्यस्य योग्य पद्यमपेक्षमाणा बुधा, काव्ये वर्णनयोग्य यश अपेक्षमाणा वदान्या । पद्ये यशसि च श्लोक — अमरः :

Rarest Archiver

तस्यां द्वारवत्या चलद्भ्रुव. वारवध्व समानान् जनान् स्मरस्य उच्चल त्कार्मुकलग्नानां नीलोत्पलेषूनां घातैरिव चञ्चलनेत्रपात्रै वशयन्ति। इय पुरी उन्मयूखै स्वर्गोपुरीषै दिव व्यतीयाय। अन्तर्हृदि मुकुन्द धारयन्त्या. विचित्रतीर्थानि च स्पृशन्त्या तस्या द्वारवत्याः तन्न चित्रम्।

अत्र द्वारवत्यां ब्रह्मा (कृष्णा) स्त्रवान् भक्तजन रतिपतेः सचिव, क्वचित् तूष्णी वसन्त विधाय, तन्मित्र चन्द्र क्षयभाजन विधाय, तस्य कामस्य अनुगान् पिकादीन् गिरा माधुर्यधुर्यान् विधाय त च काम अनङ्गीकृत्य प्रत्यह चरन्ति। परिपन्थिशून्याः सन्यासिन स्मरस्य भार्यां अपहृत्य विष्णोः स्नुषा ता रति तदङ्घ्रचब्जयुगे निधाय स्वकीय काम जय भुवि दर्शयन्त सन्तः सञ्चरन्ति।

अपरे च द्वारवत्या मार दर्पकर प्रतर्क्य, तस्य सुहृदं चन्द्र जगन्मोहन मत्वा, तस्य सेनां च प्र-मदां मत्वा, शराश्च विषमान् तस्य अनुगान् पिकादीन् व्योमगान्मत्वा, तस्य कोदण्ड सुमनःसमूहविनुतं मत्वा स्मरसारथि वसन्त तै पूरित मत्वा तां सेना अवलम्ब्य तस्य कामस्य वशगा सन्त रमन्ते।

कतिचित् कृष्णार्चकाः तस्य शास्त्रस्य श्रवणोत्सवेन, केचन सुधिय त सङ्कीर्त्य, संस्मृत्य तत्पादाब्जनिषेवया तस्य अर्चया अपरे सख्येन केचित् बहुधा प्रणम्य, तवदासा इति आत्मान तस्मै कृष्णाय निवेद्य मोक्षनिरताः सन्ति।[1]

अङ्गीकारस्य गिरा श्रुतौ अभिरता मानिनी. ताः कामिनीः सङ्कीर्त्य तासां पादौ परिगृह्य वन्दन कृत्वा "वय. त्वदीया" वय त्वद्दासा इत्युदीर्य, मनसा अतीतां रतिं स्मरन्तः सख्यकुशला केचन विलासिन नीवीमोक्षफलाय राम-अर्चका अत्र द्वारवत्या वसन्ति अहो!

अत्र प्राकाराद् बहिः अय वारिधिः स्वातौ अम्बुदैः वृष्ट वारि प्राप्य तत चिरेण हृदये मुक्तामयः जायते। द्वारवत्या अभ्यन्तरे विप्र

---

(1) श्रवण कीर्तनं विष्णो स्मरण पादसेवनम् अर्चन वन्दन दास्य सख्यमात्म निवेदनम् इति नवविधा भक्ति।

Rarest Archive

जंळधि· हस्तपुटेषु कृष्णाख्येन अब्देन वृष्ट वित्ताम्बु सदा प्रतिपद्य तत्क्षणमेव मुक्त-आमय जायते । अहो !

जलौघाश्रय. समुद्र. जविना आशासक्तजनेन आशुगेन उपान्ते रज: जृम्भयन् तेनैव उग्रतम· सृजन् शुभदृशामपि आन्ध्य आपादयन्, अनिश अन्तस्तम्भित सत्ववृत्ति.[1] ससारवाराशिवत्[2] त्रिधामनगरीप्राप्तौ प्रत्यूहीभवति ।

उत्तुङ्गोर्मि-कर-अनुषक्त-विलसत्-चक्राङ्कशङ्खः स्फुरद्रत्नौघावृतगात्रवासि-अनिमिषः, फेनानुलेपोज्वलः, स्वासक्तैः जलसञ्चयैः अपि महापापानि निर्मूलयन् योगीन्द्रजिह्वोत्सवः वार्धि कृष्ण इव इह द्वारवत्यां परितः अवति ।

सच्चक्रा[3] करपुष्टरम्यकटका,[4] भोगीन्द्रभोगास्पदा,[5] नेत्रस्थानगत

---

1) अन्त जलाभ्यन्तरे स्तम्भिता सत्त्वाना मत्स्यादीना वृत्तिः यस्य स ।

2) संसारसमुद्रोऽपि भगवत्प्राप्तौ विघ्न तत्रापि आशासक्तः लोभासक्त जना एव आशुग । तेन दातृणा उपान्ते रज रागातिशयमूल रजो गुण उज्जृम्भित । तेनैव याचकजनेन उग्र तम — द्रव्यालाभे तमो विकार कोप सृजन् । अन्तस्तम्भितसत्वगुणवृत्ति । ससार जलौघाश्रय. (जडौघ) मूर्खसमूहाश्रय ।

3) पुरीपक्षे—सता चक्र यस्या सा । विष्णोराकृतिपक्षे—सत्चक्र सुदर्शनं यस्या ।

4) पुरीपक्षे—करेण राजभ्य समाहृतबलिरूपद्रव्येण नतु कोशस्थद्रव्येण पुष्ट रम्य कटक सेना यस्या सा । अन्यत्र करेण हस्तेन पुष्टानि कटकानि करभूषणानि यस्या सा ।

5) भोगीन्द्राणा विलासिश्रेष्ठाना भोगस्य विषयभोगस्यास्पदम्, भोगीन्द्रस्य शेषस्य भोग एव शरीरमेव आस्पद शयनस्थान यस्या ।

Rarest Archive

इन्दु-इना[1], कनकमद्वग्रातिपीताम्बरा, स्वोदरवासिहंसगमना[2] सुधर्मा वहू लक्ष्मीधरालिङ्गिता[3] सेयं पुरी विष्णोः आकृतिवत् समुद्रहृये भाति।

ये विलासिनः पुरा स्त्रीसङ्गेन ताम्रनयना सन्त पुरारे रिपुणा कामेन अनये ग्राम्यधर्मे सङ्गता स्म, तेऽपि अत्र द्वारवत्यां वर-अल-कान्तया कान्तया सह रेचकादिभृत सन्त तेपिरे। तस्या द्वारवत्या बहुमानयुक्ता बुधा बहुमानयुक्ताः विदग्धाश्च चरन्ति। मत्ता बहुशस्तरङ्गा गजाश्च बहिः सिन्धो बहुशः तरङ्गाश्च चरन्ति। अस्या द्वारकाया अङ्गनाल, अलकावलिभृङ्ग, मन्दहासमधु मन्मथबाण अमल मुखपद्म बिभ्रती अङ्गना अलं जगद् वशयितुम्। मुनयः यं कृष्णं मनसाऽपि न अनुययु तमपि कृष्णं लब्धु अनसा चय दधत् जनः जायया सह इमा द्वारवती पुरी उपैति यया सहजा कृष्णदर्शनप्रतिबान्धिका प्रकृतिः विघटिता। यस्यां रमा परं आश्रमं आप, तत्र जनः दिवि निवसन्निव सर्वदा सर्व-दानतः श्रमं मा सवेत्ति। इह द्वारकाया कृष्णस्य भटाः ईशः यथा कृतयुगान्ते नवीनमार्गे विशतः निवारयति तथा द्वारावती विशत विवारयन्ति। न चेत् वृका अमार्गे विशतः आर्तान् अवीन् इव इह नवीनमार्गे विशत कृतान्ते क्षिपन्ति। सा द्वारवती कोपिनि शान्तभाव तनोति। तस्या पुर्यां य कोऽपि मनःसु निशान्तभाव तनोति। तस्या खगाश्च कल-शालि-कण्ठा गृहाश्च भास्वत्कलश-आलिकण्ठा।

यस्या भित्तिस्थेषु रत्नेषु फलितैः प्रतिरूपचित्रैः चित्रा मुरजिल्ल-नानिवासाः सुशोभिनवरत्नरुचा रङ्गानुषङ्गरमणीयं प्रदेशं दधानाः

1) पुरीपक्षे— प्रासादाना किञ्चिदर्वाग्भागे स्थितौ इन्दु-इनौ चन्द्रसूर्यौ यस्या। अन्यत्र—सूर्या-चन्द्रमसावस्य चक्षुषीतिश्रुते नेत्रयो स्थाने गतौ चन्द्रसूर्यौ यस्या।

2) स्वोदरे वासिन्य हंसगमना नार्य यस्या, स्वोदरे स्वोदरस्थनाभि-कमले वासी हंसगमनः ब्रह्मा यस्या,।

3) लक्ष्मीधरेण श्रीकृष्णेनालिङ्गितापुरी, लक्ष्मीधराभ्या देवीभ्या आलिङ्गिता विष्णोराकृति।

इव विभान्ति । यत्र सौहार्देन नृत्यदुरुकेकिनां निकायेन शोभिसौधेषु रुचिराचलशृङ्गबुद्धया ससवत स्वसंधिगात्र अभ्रनिचय परित पतन्त्य· पताका मरुत अजयन् । तस्यां द्वारवत्यां बुधाः सुवर्णवरवेष्टनभाजि, तेजसा प्रद्योतिताम्बरे हरिन्मणिविद्रुमाद्यै· नवै नवविध· रत्नैः खचिते प्रासादमूर्ध्नि कपिशीर्षनाम न सहन्ते ।[1]

यति भोज्यमात्रान्नमात्रात् अन्यत् न नयति अस्यां द्वारवत्याम् । रतिभर्त्रा प्रेरित भोग्ये नैव चरति च । अजनि-मतङ्ग च अन्ते ऽनि सन्तरत्येव । अभयाख्या स्वस्थवृत्ति यमभय न वेत्ति ।

अत्र पुर्यां काचन कामिनी वैरिवध्वां· कपोले नवहृति अवलोक्य श्वासे विश्रान्तवाक्या सती हृदि तोष न वहति । समुदितरवे· दृष्टया जातव्रीडेन विभ्रान्तनेत्रा समुत् इतरवराङ्गी भावमाविष्करोति ।

अस्मिन् पत्तने सिद्धा अहि· ईश . क (ब्रह्मा) इत्येतेषां न्यास कलाया· अर्थरूप उदार कृष्ण महीशकन्याना षोडशसहस्रसख्याकानां सकलार्थरूप विहायसा आलोक्य अन्ते दत्त उदार सालोक्य विहाय मुदा रमन्ते । अत्र द्वारवत्यां मदिरापानेन अदभ्र मत्ता अचित् या नारी रविशङ्किनेत्र प्रायोजयत् सा यानगर्धी नगवत् धीरचित्त त पुरुष प्राय अजयत् ।

अस्यां विलसद्भिः हारै सरैः सारशिरोधरा· सरसा नार्यः नय-नैपुण्याभ्यां जिष्णुभि नयनै जनान् वशयन्ति । यत् कृष्णसङ्गवधूषु ललामलेपं तद्ध्य नेन धूतदुरितेषु पुरुषेषु च साम्य वितनुते तत् सेय पुरी विषयोपभोक्तु विषयोज्झितस्य च फलेन प्राय समता वितनुते । इह नवोष्ठे नव दन्तक्षतं वीक्ष्य सपत्न्या दुरन्ता चिन्ता समभूत् । तन्वी अन्या तदाच्छादनयुक्तिशून्या मुहु दैन्य दर्शयति ।

य· श्रीकृष्णः द्विजवराणा सभायां आराधितानां नारदादि-मुनीना वाचा अल कीर्तित , य सुप्रगीत· सन् चित्फल जन्मान्ताद्येनसा

---

1) प्रासादाग्रे कपिशीर्ष—हलायुध ।

Rarest Archive

विहृतिं रचयति, य ससाराख्यरुग्भेदी, प्रौढसद्वाग्मिषु विविधसुवाणीविलासे प्रतर्क्यं य. आदौ तथा अन्ते विमलयतितते जल्पशुद्धौ सहायः शस्त स. कृष्ण अस्या द्वारिवत्या अस्ति ।

रोम्णां हर्षणकारिणि श्रवणत पापौघविध्वंसिनि
प्रेम्णा चिन्तयतां विचित्रविमलश्लाघ्यार्थसन्दायिनि ।
मञ्जाते भुवि रुक्मिणीशविजये सद्वादिराजोदिते
सर्ग. सप्तदशो मुदामयमभूत् स्वर्गीश्वराणां कुले ॥

अष्टादशः सर्गः

रक्तात्मायतरुत्विषा [1] प्रविलसत्स्त्रीयोर्ध्वभागश्रिया[2] स्वच्छेन्दुच्छविवृतसन्नखरुचा[3] स्वासक्तभूषावले. अङ्गुलतरत्नबन्धनमह यच्छन्ति सन्ति दम्पत्यो श्रीरुक्मिणीकृष्णयो पदपङ्कजानि भजतां ध्रुव सम्पत्कराणि ।[4]

लक्ष्म्याः स्तनयोः स्फुरितस्य कुङ्कुम रूपपङ्कस्य सङ्गिनि, भक्त्या रमरतां मुनाना मन सरसि निरूढ, उत्तुङ्गरम्यनखाख्य मौक्तिक पुञ्जस्य शोभावति, रक्ताङ्गुलीदलपङ्क्त्या कान्ते, प्रीत्याक्वणद् वदनाना हसाला कदम्बवत् जृम्भिणीभि मुक्ताफलोल्लसिताभिः किङ्किणीमुख्यभूषाभि श भिते, तद्ववक्त्रजाताना कविभीर्गीताना

(1) पद्मरागरत्नसम्बन्ध उक्त ।
(2) इन्द्रनीलसम्बन्ध ।
(3) मुक्तामणिसम्बन्ध ।
(4) आश्रिताना अचेतनानामपि भूषणाना सम्पत्कराणि किल किमु भजता चेतनानाम ।

सुवर्णवर्णस्य उदरस्य मध्ये लग्ना इन्दिराया मनोज्ञा रोमावलिः वक्षोजयुगयोः करीन्द्रकुम्भयो युगात् अवतीर्णा मदवारिधारां जिगाय। अब्धिदुहितु मृद्वी वलि तन्नाभिवापीतटात् विलसत्कुचाचलयोः तटीद्वन्द्वान्तरस्य प्राप्तये उद्यान्ती, मध्ये व्योमवशात् अलब्धसरणि सद्रोमावल्याख्यां नीलरत्नतिलका धर्तुं विधात्रा कृतां अष्टापदस्य यष्टिं स्पर्धते ।

हे चित्तमीन, श्रीभुवो कटाक्षोत्पलयुत अब्जभृद्विरेफस्य अम्भोजस्य आश्रयं वृत्त अगाध अच्छशोभाम्बुपूर्ण अच्युतस्य नाभिहृद विश ।

उद्दीप्तहाराणां अन्तररत्नकान्त्या हृद्य, मनोज्ञेन उदरबन्धेन बद्ध, त्रिवलि, विश्वपित्रो रुग्मिणीश्रीकृष्णयो तत् कृशोदर न त्रिकाल शर्माणि निर्मातु । तौ गर्भस्थसर्वभुवनौ अपि इदानीं प्रद्युम्नस्य-कामस्य जनकौ इति सूचनाय विश्वैकमन्दिरमपि मन्मथस्य गात्रमात्र दधत् तदीय मध्य मुदे भवतु । सत्तर्कमात्रेण कलित, सकलानां अपवर्गदं तस्य रम्यात् नाभिविवरात् अभ्युदितस्य अम्बरस्य[1] उपरिष्टात् पद्मोपभोग्य परिमाण इव स्थितं मधुकैटभमर्दनस्य मध्य मुदे भवतु । यस्मात् शिक्षितधिय कवयः अपि लक्ष्मीमुकुन्दयोः तनुवृत्त मनोज्ञ मध्य उद्वीक्ष्य अधुनापि 'अस्ति किं न किं' इति सन्दिहते खलु तस्मात् एव मध्यं सन्दोहसञ्ज्ञितमभूत् ।[2] यत्कृशत्वमुद्वीक्ष्य तत्पूर्तिविधित्सया इव पद्मा कराब्जेन सदा आलिलिङ्गे तत् मनोज्ञ मृदुल सुवृत्त कृष्णस्य मध्य मम बुद्धौ सदा तिष्ठतु ।

सपत्नीनां वक्षोजात् लब्धाङ्कमपि यत् लक्ष्मी चिर नैव तत्याज मुरारेः तत् सद्वर्ण्यलावण्यगुणैकधाम वक्ष सुरक्षां कुरुतात् । आलिङ्गितायाः प्रियतमायाः कुचकुङ्कुमाङ्केन लक्ष्य वसुदेवसुतस्य वक्षः मत्त-

---

(1) "नाभ्या आसीदन्तरिक्ष" इति श्रुतेः ।

(2) "अस्ति वा न वा" इति सन्देहसन्दोहस्य बिषयत्वात् मध्यस्य सन्दोहसञ्ज्ञा ।

स्फुरत्परिणतद्विपस्य धातुरक्तकुम्भाङ्केन जृम्भमाणं हरिनीलविशालवप्रं जिगाय। विशाल हरिनीलनील लक्ष्मीगृह चन्दनचर्चितं स्फुरत्कौस्तुभस्य उद्भासक विस्तीर्णभूषावलि विट्ठलस्य तत् वक्ष चित्तेऽस्तु ।

यच्चर्चित नवकुङ्कुमशशिरपि पुरुषोत्तमस्य वक्षोनुलेपनमणि आसीत् तत् इन्दिरायाः सौवर्णरम्यकलशोपमित मनोज्ञ वक्षोजकुड्मल-युग जयति। आच्छादितोरस्थलाख्यमूलदेश यथास्या तया जातस्य यस्य अखिलधर्मगोप्ता शौरि कर यच्छति रमाया तं चारुस्तन वर्णयितु क ईश ? मन्दहसितामृतेन शोभित, मनोज्ञमुखाख्य उद्यन्निर्मल पूर्णचन्द्र उद्वीक्ष्य सदा मुकुलितस्य अम्बुजकोशस्य कान्ति बिभ्रत् विश्व जनन्या. रुक्मिण्याः कुचमण्डल नः पुष्पातु । सद्वंशे जातोऽपि, सुगुणोऽपि सुवृत्तरत्नोऽपि हार. कमलाकुचान्ते अवकाश नैव लभते । तथाहि । कठिनोपकण्ठे कुलेन किम् ? गुणौघैः वा किम् ?

युधि शाङ्र्गस्य ग्रहणे, मनोरमगुणस्य आकर्षणे, सायकस्य निषङ्गात् आदाने, सन्धानकर्मणि अपि फलिता माधवस्य चत्वारः हस्ता. रहःकेलिषु कबरी प्रगृह्य, कमलामाश्लिष्य, गण्डस्थली सगृह्य अधरामृत पिबत. तस्य फलिता. । कृष्णस्य स्फुरन्मरकतद्युतय , अतिदीर्घा. रम्यनखाख्यैः मौक्तिकैः शोभमाना. फलितपुष्पितपारिजात शाखा समानविभावाः विभवः कृष्णस्य हस्ता. न अखिलार्थान् यच्छन्तु । हरे. चक्र मर्दितदैत्यचक्रम् । शङ्ख. स्वनैः विकृतदैत्यशङ्ख. । पद्म च विश्वस्य रास्यपद्मम् । सा गदा च पापगदस्य अपहन्त्री । निजप्रहर्षकरः अस्य कृष्णस्य खड्ग. द्विषा असह्योऽपि नन्दकाख्य किल । लोके वियुक्त नारी परितापकारी इन्दु आनन्दकर न किम् ? अपारैः शरैः. रिपुवर्गः दैन्यक. अस्य मुरारे. चाप त्रिनत. । तथाहि । सद्वंशभवाः गुणाढ्याः समर्था. अपि सर्वसन्त्री नता । कटक-कङ्कण-मुद्रिकाद्यैः दीप्ता. सुदर्शन-गदा-अम्बुज शङ्खशोभा. वृत्ताः त्रिरेखमणिबन्धश्च अतिदीर्घा. रक्ताब्ज कोमलतला हरेः हस्ता. मम मानसे स्यु. ।

Rarest Archiver

एकोनविंशः सर्गः

प्रियवशीकरणे उचितस्य, वश्यकर्मणि अर्हेण रक्तरसेन रचिताक्षरस्य कनकयन्त्रवरस्य प्रभा मुष्णत् दन्तक्षतं कृतपद देव्या. रुक्मिण्या गण्ड-स्थल प्रविभाति । मुरवैरिपत्न्या नासाविभूषणमणिः अन्तर्निगूढेन कनकेन अङ्कुरिताननोऽपि मुक्तामयः[1] किल । सदा मनोज्ञवधूनां सुधार्द्र बिम्बोष्ठचुम्बिवदनस्य जनस्य आमयः क्वास्ति? मुक्तात्मकोपि[2] रुक्मिण्या मृदुले ओष्ठपुटेऽनुषक्त नित्य तस्या उल्लसता अपाङ्गशरेण भिन्न नासविभूषणमणि परिलम्बते । एतस्या. देव्या अच्युतवशीकरणे प्रयास किम् । नाम्याख्यचम्पकभिया चलितस्य, नेत्राख्ये चार्वम्बुजे अर्पितहृद समुत्सुकस्य च अधीरजवस्य भृङ्गस्य सम्पद मुष्णन् यदुपुङ्गवशाङ्ग्या अपाङ्गः लक्ष्मी तनोतु । रुक्मिणी स्ववाङ्गी । वरनील रत्नसदृशापाङ्गी । प्रवालवत् उल्लसत्पादा । स्मिताख्यमौक्तिकवती । मरकतस्कन्धवत् विराजमाननीलाजटा । वैडूर्याग्रचनखा । नखक्षताख्य माणिक्यपुष्पाढ्या । ओष्ठाभिधगोमेदयुक्ता । रदाहृत्ववज्रकान्तिमती । अस्यै रुक्मिण्यै श्रीपतिः सुरतरु न ददौ ।[3] लक्ष्म्या मनोज्ञे काये कार्श्यं अस्ति । कचभरकरयो लम्बमानत्वदैर्घ्ये स्त । चक्षु-मध्य-ऊरुदेशेष्वपि अधिकचपलता-अदृश्यता-मार्दवानि च क्रमेण सन्ति । किन्तु द्विरदस्य परिलसत्कुम्भयो शोभापहारिणि लक्ष्म्याः कुचकलशतटे तत् ते तानि नास्ति नास्तो न सन्ति । श्रीश्रीशयो नीलनीला भ्रूमध्ये लग्ना मृगना-भिललामरेखा, शाणोपलस्य उपरिगत रणधीरस्य मारस्य चापानुषक्त असित उत्पलाख्य चारुबाण अनुकरोति । नित्य परस्पर मनोरमगात्र-सङ्गात् मत्ताल्या, रक्तसरसीरुहस्य च कान्तिमन्तौ जगदादिपित्रोः लक्ष्मीरमारमणयो कटाक्षौ अस्माक ईप्सितफल कुरुतात् । कापेन रवता

---

(1) मुक्ताफलात्मक, मुक्त आमय. व्याधि येने सः ।

(2) मुक्ताफलात्मक, मुक्ति प्राप्त ।

(3) रुक्मिण्या एव नवरत्नात्मकत्वात् नवरत्नमय सुरपारिजाततरु तस्यै न ददौ ।

रमारामयोः कटाक्षलक्ष्मीः अस्मदमित्रवर्गं लक्षीकरोतु । विधिशर्वपूर्वाणां सौभाग्यदात्री सैव अनुरक्ता शरणागतं मां लक्षीकरोतु । मुकुटाख्यरवेर्भयात् अध्र लम्बमानं, मुखेन्दोः प्रवलिसता उरुभासा उन्मुखं च तयोः रुक्मिणीकृष्णयोः मुखस्थं कुटिलं अलकराशिं कर्णनीलोत्पलश्रिया परिहृतनिजदैन्यं अन्धकारं तर्कयामि । उत्तुङ्ग-नील चमरीमृग-वालभारकल्पं स्फुरद्भिः विविधरत्नैः लसत्किरीटं धरन्तं, उत्फुल्लपुष्पाणां आकरं, उज्ज्वलन्तं कमलाच्युतयोः मौलिदेशं नित्यं स्मरामि ।

सः विभुः द्वारावतीवल्लभः कृष्णः इत्थं जाम्बवतीं उवाह । सल्लक्षणां लक्ष्मणां उवाह । सर्वगुणाकरां सत्यभामां, उवाह । शशिमुखीं नीलां उवाह । नीलालका कालिन्दीमुवाह । कलकण्ठकुण्ठनिनदां स्वां[1] मित्रविन्दां उवाह । भूमिसुतेन नरकासुरेण आहृताः बहुशः बालाश्च उवाह ।

हे मानवाः मुरभिदः सर्वोत्तमत्वे कस्मात् मुह्यथ ? पुरा यः भूभारहरणे अक्षमैः पद्मासनधूर्जटिप्रभृतिभिः प्रार्थितः, गर्भे गीर्भिः अभिष्टुतः, फणिफणे नृत्यश्च यः सेवितः सद्गुणयन् च नम्रतनुभिः पद्मासनादिभिः विस्मितः ईक्षितः श्वफल्कात्मजः अक्रूरः अपि कृष्णायाः ते देवैः नतैः परिवृतं यं दृष्ट्वा गुणैः अबद्धं इतरान् बद्धान् स्फुटं उदीर्य तुष्टाव । सैव तुष्टहृदः देवनिकरात् अप्राप्तमुक्तिं, तैः निद्रिताय अपि मुचुकुन्दभूमिपतये यः प्रभुः प्रादात् यः कल्पाङ्घ्रिपं आहरन् सेश्वरान् सुरवरान् व्यद्रावयत् यश्च पुरा भस्मीकृतभस्मदानवपतिः शम्भुम् अपालयत् । योगीन्द्रादृतवैभवः भृगुमुनिः यस्य श्रैष्ठ्यमस्पष्टयत् । हे कैवल्यकामाः जनाः तं अजितं मधुजितं कृष्णं भक्त्या भजत ।

कैलासयात्रादिभिश्च अस्य कृष्णस्य ऊनभावः यदि तर्हि भवदीयः ऐश्वर्यवादः वृथा स्यात् । भवता[2] लीला इति वाच्यम् । अत्र तु पौत्रलाभप्राप्ति

---

(1) मातुलपुत्रीत्वेन स्वाम् । भद्रामपि उवाहेति शेषः ।

(2) ऐक्यवादिना

उपेक्षयामः । युधिष्ठिरस्य आलयं एव गच्छन् द्विजातीन् यमिनः समर्चयन् अपि कृष्णः ततोऽपि नीचः किम् ? नृलोके इह सर्वं हि नरानुकारार्थम् । अस्मिन् विषये विपरीतभावे[1] यदि शङ्का तदा आत्मलोकात् पयोब्धितीरं व्रजतः विधातुः, स्वालयात् कैलासात् गतस्य शिवस्य च अनुसरणीयाः नराः सन्ति किम् ? स्वस्थानेषु सत्यलोकादिषु संस्थैः ब्रह्मादिभिः रचिताः समस्ताः पूर्वोक्ताः क्षीरसमुद्रगमनादयः अर्थाः नराणां दृष्टिगम्याः किम् ? अत्रापि मनुष्यलोके अदृश्याकृतिभिः मुनीन्द्राणां विज्ञानदृष्टेरपि दूरदूरं देवैः रचिताः अर्थाः नरदृष्टिगम्याः किम् ? पुरा उग्रभस्मासुरघातकाले नरानुकारस्य युक्तिः काऽस्ति ? सतत्त्वविचारहेतोः वैकुण्ठं गतस्य भृगुमुनेः च मर्त्यानुकृतिः किमर्था ? मर्त्यलोकं प्राप्तस्य मर्त्यानुकारः युक्तो हि । कृष्णः स्वजनस्य मध्ये नरदृष्टिमार्गे विज्ञाप्य[2] कैलासशैलं अगमत् आगमच्च ।

स कृष्णः प्रागेव निजनाभिजातात् कुशेशयात् पुत्रं चतुर्मुखं जनयाम्बभूव तदा तदीयस्य (चतुर्मुखस्य) कालान्तरे जातः वरस्य दाता शिवः कुत्रासीत् ? यस्य कृष्णस्य वाहिनीभूतस्य गरुत्मतः ओजः पिनाकपाणिं विद्रावयामास तस्य 'शिवस्य प्रसादात् सः कृष्णः सुतं जगाम' इत्युक्तिः न विद्वज्जनमाननीया ।

सर्वसुराग्रगण्यः पापौघतमिस्रभानुः कृष्णः 'मदन्यसेवा ऐहिककामदात्री' इति उदीरयन् स्वपौत्रयात्रां विरचय्य मन्मथ सूनुं अवाप ।

आनन्दाम्बुधिमग्नमूर्तिः[3] सा कमला उदयन्मोदाश्रुधाराजलं[4] भर्तुः कृष्णस्य अङ्घ्र्योः प्रणिधाय स्वकायाख्यकनक कृष्णार्पितं[5] अतनोत् या च तस्य कृष्णस्य गात्राख्यहरिन्मणि करवशं[6] चक्रे, या च विमुक्त-

(1) नरानुकारार्थं ब्रह्मादयः श्रीहरिं शरणं गता इति ।

(2) मया कैलासशैलं गम्यते । तावत्पुरीयं रक्षणीया इत्याद्याघोष्य ।

(3) समुद्रे कृतस्नानेति ध्वनिः ।

(4) दानोचितं धारजलम् ।

(5) सुवर्णदानम् धर्मप्राप्तिः ।

(6) अर्थप्राप्तिः ।

Rarest Archive

कबरी[1] सती स्मर[2] गर्भं दधार अनया रुक्मिण्या को वा अर्थः अनवाप्त. ? गजरम्यगतिः अब्धिपुत्री तन्वी रुक्मिणी मध्ये मनोज्ञमर्दनात्मकं गर्भं स्वकान्तात् बभार । हृदयङ्गमस्य मर्त्यं अनुकारिचरितस्य तस्य त एव (काम एव) तद्योगचकिते स्वीयहृदि अपि बभार । अथ भैष्मी जितारे. शौरेः अनुरूपरूपं मार कुमार सुषुवे–प्राचीदिक् रोचिःशतैः पूरिताश प्राज्ञं सुवर्चा विषय दिशेश इव । यः मन्मथ कृष्णस्य कर्णे निजचिन्ह मकर[3],उन्नतशरान्[4] दन्तोष्ठ-दृग्-दोः-पदे, मध्यतनौ स्वाङ्ग[5], भ्रुवो. वरधनुः, लसत्कुन्तले मौर्वीं, वनमालायां मन्त्रिण, आनने सुहृद चन्द्र, वाक्ये शुक च अर्पयित्वा तस्य कृष्णस्य गात्रं रचयाम्बभूव सः स्मरः तस्य कृष्णस्य सुतोऽभूत्किल । तारुण्य-लावण्य-सुवीर्य-धैर्य-कारुण्यमुख्यै द्रविणै. प्रकृष्ट. असौ रुक्मिणीकृष्णयो. कुमार प्रद्युम्नस्य मुख्यांशयुतः प्रद्युम्ननाम्न[6] अर्थं पिपर्ति । हरे. सुतः सः प्रद्युम्नः रुग्मिपुत्र्यां रुग्मवत्या आत्मजात अनिरुद्ध अजीजनत् किल । या अमलहेमकल्प त असूत असौ रुग्मवतीति स्वनाम उचितमेव बभ्रे । आजौ सपत्नानां सैन्यैः अनिरुद्ध, सदा आश्रितजनेभ्यः अभीप्सितस्य वित्तराशेः प्रदानकाले अपि अनिरुद्ध त रुग्मवतीपुत्र अनिरुद्धसज्ञ आमनन्ति । स च अनिरुद्ध उषाभिधायां स्वपत्न्या वैरिनगौघवज्रं वज्रसंज्ञ उदयाद्रिः उषसि तमस्समुन्मूलन उज्वलन्तं अशीतांशु इव अजीजनत् ।

य क्षितौ पृथिवीपतीनां राज्ञां मौलिरत्नै. घटितश्रीपादपाठ ; यः दिवि स्वर्गीश्वराणां फाळमण्डनकरश्रीपादरेणु . य. श्रेय पथ-पान्थानां सज्जनानां मन पाथेयगेयोदयः तस्य श्रीकृष्णस्य सेय असमा

(1) मोक्षाख्यपुरुषार्थमिति ध्वनि ।
(2) कामाख्यपुरुषार्थमिति ध्वनि. ।
(3) मकरकुण्डलधरत्वात् ।
(4) मल्लिकाचूतेन्दीवरारविन्दाशोकाख्यान् ।
(5) कामस्य शून्याङ्गत्वात् कृष्णमध्यस्य च अतिसूक्ष्मत्वात् शून्यत्वम् ।
(6) प्रकृष्ट द्युम्न दविण यस्य स प्रद्युम्नः ।

द्वारावतीपुरी प्रियतमा बभूव । मणिमञ्जुमौलिना विद्योतिताशादशकः आद्यः पुमान् आर्यैः वृतः स देवः कृष्णः अद्यापि मध्येसमुद्र भैष्म्या समं तां पुरीं आसयन् आस्ते किल । शरीरिणां सर्वपुमर्थसार्थकरी कुशलैकगम्या प्रशस्तकीर्तेः कृष्णस्य प्रथिता सेयं कुशस्थली पुरी (द्वारावती) मदन्तरङ्गे नरीनर्तु ।

वन्दारुभिः द्विजवर्यैः वाञ्छितनिजध्यानः क्षमायाः शङ्करः सर्वाग्मिनां व्रजे वर्ण्यदिग्विततविक्रमौघराजत्करी, रुद्राणीपतिमान्यराजितगतिः सत्यासहायः सता वरदः कृष्णः स्वबन्दुभिः रुचिरा ता अद्भुतां द्वारवतीपुरी रक्षन् रेमे । कृष्णस्य उदयवर्णनैः सुचरितस्तोमानां स्तवैः कृष्णस्य सूक्तिभिः सुश्लोकैश्च सुभगा, स्वानन्दसर्गैः विविधैः रसैश्च वृता, दुष्टागम्यैः निजार्थैः तोषितखगा विष्वक्सुवर्णोज्ज्वला सा विठ्ठलपुरी अस्याः कृतेः[1] वैखरी बिभ्राणा इव विभाति ।

यस्मिन् मङ्गलदेवता अखिलजगन्माता रमा नायकी, पद्मा–पद्मभवादिसेव्यचरणः तस्याः वल्लभो नायकः, अश्वग्रीवस्य दयापयोधेः फलितं प्रागुचोक्तिरत्नोज्ज्वलं तद्दासानुगवादिराजरचितं काव्यं विभाव्य बुधैः । प्रभुः श्रीकृष्णः रुक्मिणीशविजयकाव्यकृते मह्यं स्वहस्ताख्यं कमलछत्रं, सच्छास्त्राभिधा-रम्या राजपदवी, सुज्ञानाख्यं यानं, करयुगे मुदा स्वाङ्घ्र्याराधनकङ्कणं, गले कृष्णकैङ्कर्याख्यं हारं, हृदि स्वात्मानं नित्यचिन्तनधनं सद्युक्तिरत्नान्यपि मुदा प्रदद्यात् । हंसाना हृदयङ्गम कविलसद्भृङ्गैः आदृतं मौक्तिकप्रख्याग्रयावलि, नव इद प्रबन्ध जलज हरेः पादे, लक्ष्म्याः रम्यकरे, वरामरतते सन्मानसे अर्पितस्यात् । पवनः शारदानन्द तत् प्रबन्धजलजं स्वहृदि कृतगुणं लोके अञ्जसा विस्तारयतु ।

रोम्णां हर्षणकारिणि श्रवणतः पापौघविध्वंसिनि
प्रेम्णा चिन्तयतां विचित्रविमलश्लाघ्यार्थसन्दायिनि ।
सञ्जाते भुवि रुक्मिणीशविजये सद्वादिराजोदिते
सर्गोऽभूत्सुरमण्डलीषु सुतरां एकोनविंशो मुदाम् ॥

(1) रुक्मिणीशविजयाख्यायाः सर्वाण्यपि विशेषणानि कृतेरपि सम्बध्यन्ते ।

Rarest Archiver